

This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.


+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`

NYPL RESEARCH LIBRARIES
3 3433 08185487 3

Digitized by Google



Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, PH. D.
Nos. 134 & 140.

पण्डितवरश्रीवामनविरचितसवृत्ति-
काव्यालंकारसूत्राणि ।

श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितकाव्यालंकार-कामधेनुसमाख्यव्याख्यासहितानि ।

श्रीमदाचार्य श्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा रत्नगोपालभट्टेन संशोधितानि ।

KÂVYÂLAṄKÂRA SÛTRAS with GLOSS
BY PANDIT VÂMANA
And a Commentary
Called KÂVYÂLANKÂR KÂMADHÈNU
By ŚRÎ GOPENDRA TRIPURAHARA BHÛPÂLA,
EDITED BY RATNA GOPÂL BHATTA.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press.
BENARES.
1908.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

Digitized by Google

THE NEW YORK
PUBLIC LIBRARY
510301
ASTOR, LENOX AND
TILDEN FOU DATIONS.
R 1910 L

Digitized by Google

श्रीगणेशाय नमः ।

श्रेयांसि प्रथयतु कोऽपि विद्वल्लाहो
देवो नः श्रुतिशिखरैर्विभूष्यरूपः ॥
गोपीनां कुचशिखरेषु यो विहारै-
र्मत्तस्मार्ग्मुनिजनमानसे विहारम् ॥ १ ॥

ननु भोः सहृदया विद्वन्मण्यः ! सन्निदं किञ्चिद् विज्ञाप्यते ।

सवृत्तिकाव्यालङ्कारसूत्राणां प्रणेता पण्डितवरवामनोऽतिप्राचीन इति सर्वजनविदितमेतत् । किन्त्वयं काश्मीरदेशीयः काशिकावृत्तिकाराद् भिन्नश्चेति केषाञ्चिदाशयः ।

तदीयसूत्राणि सवृत्तिमात्राणि बालानामतीव विशेषप्रतिपत्तिं न कलयेयुरिति तद्ग्रहस्यप्रकटनप्रगल्भेन लोकोपकारनिरतेन गोपेन्द्र-त्रिपुरहरभूपालतिलकेन काचनव्याख्याभिनिर्मिता । स किल भूपालस्तैलिङ्गदेशाधिप इन्दुवंशोद्भवो नाम्ना– तिप्पः, त्रिपुरहरश्चेति । सैषा व्याख्या विद्युल्लतपदविन्यासशालिनी अभिमतार्थदायिनी सुमनसां हृदयाह्लादिनी नाम्ना काव्यालङ्कारकामधेनुरिति ।

इयं हि अस्मत्पूर्वैरितरैश्च विद्वन्मणिभिः समासादिता । ग्रन्थोऽस्मदेशलिपितो देवनागरीलिपिभिः परिवृत्यालेखि । अनन्तरमस्य प्रकटीभवनं प्रतीक्षमाणो संप्रत्यलंकृतवुम्बयीनगराणां पण्डितवरत्येष्ठाराममुकुन्दशर्मणां सकाशं ग्रन्थमिममनैषम् । तैः किल काश्यां सकलप्राचीनशास्त्रग्रन्थप्रकाशवद्वपरिकरस्य श्रीयुतहरिदासगुप्ताभिधस्य सचिवे संप्रेषितः । तेन च नरमणिना वाराणसेयसंस्कृतपुस्तकमालायां मुद्रणेन पुस्तकमेकमपीदमनेकतां सद्य एव प्रापितमिति तेषामुपकारगौरवं विभूयः ।

अस्य ग्रन्थस्य लेखनाधारभूतानि पुस्तकानि त्वेतानि ।

(१) भावयोरात्रेयजयपुरकृष्णमाचार्यस्य सव्याख्यानमतिशुद्धं पुस्तकमेकम् ।

(२) पुनर्द्वितीयं कलकत्तामुद्रितं सवृत्तिमात्रं पुस्तकं तस्यैव ।

(३) भावयोर्वाधूलालकराचार्यस्य सव्याख्यानमतिशुद्धं पुस्तकमेकम् ।

Digitized by Google

(४) एतद्विठ्ठलपुरनिवासिनां काव्यमालानवमगुच्छकान्तर्गतस्य गीतिशतकस्य प्रणेतृणां श्रीवात्स्यसुन्दराचार्यकवीनां स्वहस्तलिखितमतिशुद्धं तालपत्रात्मकं सवृत्तिव्याख्यानं पुस्तकमेकम् । तत्पत्राणि ॥ ८४ ॥

एवञ्च पुस्तकाधारेण लिखितस्यास्य ग्रन्थस्यावलोकनेनावाप्यपि सहृदयहृदयैरनुग्राह्यो भवाव इति ।

पण्डितश्रीमदात्रेयजयपुरकृष्णमाचार्यः ।
पण्डितश्रीवाधूलालकराचार्यश्च

तिरुनेलवेलिं-समीपवर्तिविठ्ठपुरनिवासिनो सहृदयसमुदायविधेयौ॥

Digitized by Google

काव्यालङ्कारसूत्रविषयानुक्रमः ।

शारीरं नामादिममधिकरणम् ।

अध्यायः । १ प्रयोजनव्यापना ।

२ अधिकारिचिन्ता, रीतिनिश्चयश्च ।

३ काव्याङ्गानि, काव्यविशेषाश्च ।

दोषदर्शनं नाम द्वितीयमधिकरणम् ।

१ पदपदार्थदोषविभागः ।

२ वाक्यवाक्यार्थदोषविभागः ।

गुणविवेचनं नाम तृतीयमधिकरणम् ।

१ गुणालङ्कारविवेकः शब्दगुणविवेकश्च ।

२ अर्थगुणविवेचनम् ।

आलङ्कारिकं नाम चतुर्थमधिकरणम् ।

१ शब्दालङ्कारविचारः ।

२ उपमाविचारः ।

३ उपमाप्रपञ्चाधिकारः ।

प्रायोगिकं नाम पञ्चमाधिकरणम् ।

१ काव्यसमयः ।

२ शब्दशुद्धिः ।

Digitized by Google

Digitized by Google

श्रीहरिर्जयति विट्ठलाऽभिधः ।

पण्डितवरवामनविरचितसवृत्ति-

काव्यालंकारसूत्राणि ।

श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितकाव्यालङ्कार-
कामधेन्वाख्यव्याख्यासहितानि ।

तत्र शारीरनाम्नि प्रथमेऽधिकरणे प्रथमोऽध्यायः ।

कल्याणानि तनोतु नः स भगवान् क्रीडावराहाकृति-
र्दंष्ट्राग्रेण नवप्ररोहपुलकां देवीं धरामुद्वहन् ॥
यस्याऽङ्गेषु वहन्ति रोमविवरालग्ना महाऽम्भोधयः
कान्तास्पर्शसुखादिव प्रकटितां स्वेदोदबिन्दुश्रियम् ॥ १ ॥
दरोन्मीलत्फालद्युतिमदऽमृतस्यन्दिशुभिकं
भ्रमन्मीनोष्णीषं पदसरणिपारीणवलयम् ॥
विराजद्दम्भावव्यतिकरितपुम्भावसुभगं
पुरस्तादाविस्तादु भुवनपितरौ तन्मम महः ॥ २ ॥
ॐङ्कारमणिघण्टाऽनुरणाद्भिगमर्हितम् ॥
चित्ते शृङ्खलितं भक्त्या चिन्तये चिन्मयं गजम् ॥ ३ ॥
करुणामसृणाऽऽलोकप्रवणा शरणार्थिषु ॥
प्रगुणाऽऽभरणावाणी स्मरणाऽनुगुणाऽस्तु नः ॥ ४ ॥
उन्मीलत्प्रतिभानकन्दमुदयत्संदर्भनालं लस-
च्छ्लेषव्याकुलशब्दपद्ममतुलं बन्धारविन्दं सदा ॥
अध्यासीनमऽलंक्रियापरिलसद्गन्धं वचोदैवतं
वन्दे रीतिविकासमाशुविगलन्माधुर्यपुष्पासवम् ॥ ५ ॥
नमस्कुर्वे खर्वेतरविविधविद्याविलसितान्
प्रवाचः प्राचोऽहं प्रथितयशसो भामहमुखान् ॥

Digitized by Google

कृता यैरर्थानां कृतिषु नयचर्चा सदसतां
प्रभेवाभिव्यक्तिं प्रजनयति भासामधिपतेः ॥ ६ ॥
पावनी वामनस्येयं पदोन्नतिपरिष्कृता ॥
गम्भीरा राजते वृत्तिर्गङ्गेव कविहर्षिणी ॥ ७ ॥
प्रबन्धं तालानां भवनुतिमिषेणाऽतनुत यः
शिवाकल्पाकारा नटनकरणानामपि भिदाः ॥
स वृत्तेर्व्याख्यानं सरलरचनं वामनकृते-
र्विधत्ते गोपेन्द्रस्त्रिपुरहरभूपालतिलकः ॥ ८ ॥
पावनपदविन्यासा समग्ररसदोहशालिनी भजताम् ॥
घटयति कामितमर्थं काव्यालङ्कारकामधेनुरियम् ॥ ९ ॥
यत्रोपयुज्यते यावत् तावत् तत्र निरूप्यते ॥
प्रसङ्गानुप्रसङ्गेन नाऽत्र किञ्चित् प्रपञ्च्यते ॥ १० ॥
अभ्यर्थके मय्यनुकम्पया वा साहित्यसर्वस्वसमीहया वा ॥
मदीयमाऽऽर्या मनसा निबन्धममुं परीक्षध्वममत्सरेण ॥ ११ ॥
अध्याये प्रथमे काव्यप्रयोजनपरीक्षणम् ॥
अधिकारिविचारश्च द्वितीये रीतिनिश्चयः ॥ १२ ॥
काव्याऽङ्गकाव्यभेदानां तृतीये प्रतिपादनम् ॥
तुर्ये पदपदार्थानां दोषतत्त्वविवेचनम् ॥ १३ ॥
वाक्यवाक्यार्थदोषाणां पञ्चमे तु प्रपञ्चनम् ॥
गुणालङ्कारभेदस्तु षष्ठे भेदगुणास्तथा ॥ १४ ॥
सप्तमेऽर्थगुणाः शब्दाऽलङ्काराः पुनरष्टमे ॥
उपमा नवमे तस्याः प्रपञ्चा दशमे भवेत् ॥ १५ ॥
काव्यस्यैकादशे संविद् द्वादशे शब्दशोधनम् ॥
इत्येष द्वादशाध्यायीप्रमेयाणामनुक्रमः ॥ १६ ॥

अथ ग्रन्थकारः स्वकर्तृकाणि सूत्राणि व्याकर्तुकामः प्रारम्भ एव प्राचीनाऽऽचार्यपरम्परासमाचारपरिप्राप्तकर्तव्यताविशेषरूपमङ्गलानुष्ठानेन स्वयं प्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहव्यूहप्रतिहननप्रगल्भसमग्रदेवताऽनुग्रहसंपन्नोऽपि व्याख्यातृश्रोतृणामवग्रव्याख्यानश्रवणलाभाय ग्रन्थाऽऽदौ तन्मङ्गलनिबन्धनपूर्वकं तत्प्रवृत्तिसिद्धये विषयप्रयोजनादि दर्शयन्नाद्येन पद्येन कर्तव्यं प्रतिजानाते ।

Digitized by Google

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ॥
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते ॥ १ ॥

काव्यं ग्राह्यम् अलङ्कारात् ॥ १ ॥

काव्यं खलु ग्राह्यमुपादेयं भवति। अलङ्कारात् । काव्यशब्दोऽयं गुणाऽलङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते। भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते ॥ १ ॥

प्रणम्येति ॥ भक्तिश्रद्धातिशयलक्षणः प्रकर्षः प्रशब्देनात्र प्रकाश्यते । तादृगेव हि मङ्गलमन्तरायसन्तानशान्ति सन्तनोति । अन्यथा कृतायामपि कृतौ प्रारिप्सितग्रन्थः परिसमाप्तिं न संपादयेत् । किरणावल्यादौ तथा दर्शनात्।अथ कथमिह नमिस्सकर्मकः स्यात् । प्रह्वीभावप्रवृत्तेरस्याकर्मकत्वात्।"नमन्ति शाखा नवमञ्जरीभि"रित्यादिप्रयोगदर्शनाच्च । नचाऽयमुपसर्गवशात् सकर्मकः । प्रशब्दस्य प्रकर्षमात्रार्थत्वेन कर्मसम्बन्धोपपादकत्वायोगात् । "नमामि देव"मित्यादावुपसर्गस्याप्यभावात् । नचायमन्तर्भावितण्यर्थः । अनौचित्यप्रसङ्गादिति । तदेतत् पाणिनिफणितिपरायणपरिणतान्तःकरणानामस्माकं चेतसि चोद्यं न चातुरीमाचरति । तथाहि । यथा जयतिरकर्मकः प्रकर्षेण वर्तने । पराजये तु सकर्मकः । तथा नमिधातुः कचित् प्रह्वीभावार्थः कचिन्नमस्कारार्थश्च भवति । तत्र यदा प्रह्वीभावार्थमात्रविवक्षया प्रयुज्यते तदानीमेषोऽकर्मकः । यदा नमस्कारार्थविवक्षया प्रयुज्यते तदा सकर्मक इति विवेकः । यद्येवं तर्हि, "देवं प्रणतः" इत्यत्र कर्तरि क्तप्रत्ययो न सिद्ध्येत् । "सकर्मकाऽकर्मकाद्धातोः क्तो भवेत् कर्मभावयो"रिति सकर्मकाद्धातोः कर्मणि क्तविधानात्। गत्यर्थाकर्मकादिषु नमेः परिगणनाभावाच्चेत्यपि न चोदनीयम् । "व्यवसितादिषु क्तः कर्तरि चकारादू" इतीहैव वक्ष्यमाणसूत्रेण नमेरपि कर्तरि क्तप्रत्ययसंभवात् । व्यवसितः प्रतिपन्न इत्यादिषु गत्यर्थादिसूत्रेण चकारादनुक्तसमुच्चायार्थात् कर्तरि क्तप्रत्ययो भवतीति तस्य सूत्रस्याऽर्थः ॥ परमम् ॥ परिदृश्यमानज्योतिःपरिपाटीमतिवर्तमानम् ॥ ज्योतिश्चिन्मयम् । परमं ज्योतिः प्रणम्ये

Digitized by Google

त्यत्र वाक्यार्थसामर्थ्येन निखिलनिगमनीरजराजिराजहंसस्य परमहंसभावनापदवीदवीयसः परस्य ब्रह्मणो यत् पारमार्थिकं रूपं तदेव प्रणिधानबलेन प्रमुषितविषयान्तरप्रसङ्गे प्रहर्षतरङ्गितेऽन्तःकरणे प्रत्यक्षतोऽनुभवन् प्रणामप्रचयेन पर्यचरदिति प्रतीतेः परमयोगित्वमस्य प्रबन्धुः प्रत्याय्यते ॥ वामनेनेति निजनामनिर्देशो यशःप्रकाशनाय । कवीन् प्रीणातीति कविप्रीः । अन्येभ्योऽपि दृश्यते इति क्विप्प्रत्ययः । तेन कविप्रिया इति तृतीयान्तं कर्तृविशेषणम् । कवीनां प्रियेति प्रथमान्तं कर्मविशेषणं वा ॥ काव्येति ॥ "कवनीयं काव्यम्" इति लोचनकारः । "कवयतीति कविः, तस्य कर्म काव्यम्" इति विद्याधरः । "कौति शब्दायते विमृशति रसभावानिति कविः । तस्य कर्म काव्यम्" इति भट्टगोपालः । "लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्" इति काव्यप्रकाशकारः । मामहोऽपि—"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता । तदनुप्राणनाज्जीवेद् वर्णनानिपुणः कविः । तस्य कर्म स्मृतं काव्यम्" इति । तदेतत् काव्यशब्दव्युत्पत्तिकथनम् । चारुताशालि शब्दार्थयुगलं काव्यमिति रूढोऽर्थः । तस्याऽलङ्कारोऽलंकृतिः।भावे घञ् । दोषहानगुणालङ्कारादानाभ्यामाधीयमानं सौन्दर्यमिति यावत् । तत्प्रतिपादकानि सूत्राणि, तेषाम् । सूत्रलक्षणमुक्तं प्राचा मामहेन । "अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम् । सम्यक्संसूचितार्थं यत् तत् सूत्रमिति कथ्यते" इति ॥ स्वेषामिति ॥ सूत्रवृत्त्योरेककर्तृकत्वप्रतिपादनेन सूत्रकाराभिमतार्थप्रतिपादिनी वृत्तिः — वृत्तेरन्यकर्तृकत्वाशङ्कानिरहायेत्युभयमपि उपक्षिप्यते । वर्ततेऽस्यां सूत्राणां यथावत् पदपदार्थविवेक इति वृत्तिः । अधिकरणार्थे क्तिन् प्रत्ययः । वृत्तिलक्षणमुक्तं भामहेन । "सूत्रमात्रस्य या व्याख्या सा वृत्तिरभिधीयते" इति ॥ काव्यालङ्कारसूत्राणां वृत्तिरित्यनेन विषयसम्बन्धौ सूचितौ ॥ कविप्रियेत्यनेन अधिकारिप्रयोजने सूचिते । तदेतदनुबन्धचतुष्टयमुत्तरत्र प्रतिपादयिष्यते विस्तरेण । काव्यस्य कः पुनरलङ्कारादुपकारो येन प्रतिज्ञायमानं तत्सूत्रवृत्तिविधानं सफलं स्यादित्याशङ्कामपनेतुमलङ्कारप्रयोजनप्रतिपादकमादिमं सूत्रमुपादत्ते ॥ काव्यमिति ॥ खलुशब्दो वाक्याऽलङ्कारे । काव्योपादाननिदानत्वादलङ्कारो भवत्युपयोगीति भावः।ननु काव्यमेव तावदुपादातव्यं चेदलङ्कारस्यापि तदुपादानहेतुत्वमुपपद्येत ।

Digitized by Google

तत्सूत्रवृत्तिविधानं च सफलं स्यात् तस्योपादेयत्वमेव कुत इति चेदत्रवक्तव्यम् । यत् काव्यमुपादेयं न भवतीति कस्य हेतोः । न तावद् ऋषिप्रणीतत्वाभावादनुपादेयत्वम् । वाल्मीकिबोधायनप्रभृतिभिरपि महर्षिभिः काव्यस्य प्रणयनात् । नाऽपि पुरुषप्रणीतत्वात् । शास्त्रनिबन्धनानामपि तथात्वेनानुपादेयत्वप्रसङ्गात् । नच काव्यत्वात् । रामायणादावनैकान्तिकत्वात् । तस्यापि पक्षसमत्वशङ्कायामेकैकाक्षरोच्चारणेऽपि फलविशेषवचनविरोधः । नाऽपि दृष्टप्रयोजनाऽभावात् । दृष्टप्रयोजनानां बहूनामुपदिष्टत्वात् । तथोक्तं काव्यप्रकाशे "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इति । नाऽप्यदृष्टप्रयोजनाभावात् । स्वर्गापवर्गलक्षणस्यादृष्टप्रयोजनस्य शिष्टैरनुशिष्टत्वात् । यदाहुः । "धर्मार्थकाममोक्षेषु वैलक्षण्यं कलासु च । करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्" इति । काव्यादर्शेऽपि । "चतुर्वर्गफलोपेतं चतुरोदात्तनायकम्" इति । इहापि 'काव्यं सद्' इति वक्ष्यमाणत्वात् । अथ मन्यसे "काव्यालापाँश्च वर्जयेद्" इति निषेधवचनादनुपादेयत्वं काव्यस्येति । तदप्यनालोचितचतुरम् । काव्यालापनिषेधवचनस्याऽसत्काव्यविषयत्वेन व्यवस्थापनात् । यदाह विद्यानाथः । "यत्र पुनरुत्तमपुरुषचरितं न निबध्यते तत् काव्यं परित्याज्यमेव । तद्विषया च स्मृतिः- काव्यालापाँश्च वर्जयेदिति" इति । न केवलं विषयवैगुण्येन काव्यस्यासाधुत्वम् । किन्तु प्रबन्धुः प्रतिभादौर्बल्यकुलवैकल्याभ्यामपि भवति । तदुक्तं काव्यादर्शे । "तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन । स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्" इति । कविगजाङ्कुशे "शुनीदुग्धमिव त्याज्यं पद्यं शूद्रकृतं बुधैः । गवामिव पयोग्राह्यं काव्यं विप्रविनिर्मितम्" इति । उत्तमपुरुषकथाकथनं तु काव्यं ग्राह्यमेव । तदुक्तं भामहेन । "उपस्कोक्यस्य माहात्म्यादुज्ज्वलाः काव्यसंपद" इति । भट्टोद्भटेनापि कथितम् । "गुणालङ्कारचारुत्वयुक्तमप्यधिकोज्ज्वलम् । काव्यमाश्रयसंपत्त्या मेरुणेवाऽमरद्रुमम्" इति । भोजराजेनापि कथितम् । "कवेरल्पापि वाग्वृत्तिर्विद्वत्कर्णावतंसति । नायको यदि वर्ण्येत लोकोत्तरगुणोत्तर" इति । किं बहुना । प्रतिपाद्यमहिम्ना प्रबन्धप्रशस्तिरिति शास्त्राणामपि समानमेतत् । तथाहि । न्यायवैशेषिकशास्त्रयोरीश्वरप्रतिष्ठापक-

510301

Digitized by Google

तया पूर्वोत्तरमीमांसयोर्धर्मब्रह्मप्रतिपादकतया महनीयत्वम् । तत्र चिन्तायां तु शास्त्राणामपि काव्यमुखप्रेक्षितया कार्यकारित्वमित्युपनिषत् । यदाहुः "स्वादुकाव्यरसान्मिश्रं शास्त्रमप्युपयुञ्जते । प्रथमालीढमधवः पिबन्ति कटुभेषजम्" इति । शास्त्रकाव्ययोरियान् विशेषो यत् प्रभुसंमिततया दुर्लभोऽनुप्रवेशःशास्त्रे, कान्तासंमिततया सुलभोऽनुप्रवेशः काव्ये इति । यदाहुः "कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् । आह्लादयत्कृतवत् काव्यमविवेकगदापहम्" इति । सा हित्यचूडामणावप्युक्तम् । "तदिदं पुण्ड्रेक्षुभक्षणाद्वैतेनवित्तलाभो यत् काव्यश्रवणाद् व्युत्पत्तिसिद्धि"रिति । तस्माद् दृष्टाऽदृष्टाऽनेकोपकारकारितया काव्यमुपादातव्यम् । ततश्च सफलोऽयमलंकारसूत्रवृत्तिविधानयत्न इति स्थितम् ॥

अथ काव्यशब्दस्याऽनेकार्थत्वेन विप्रतिपत्तौ स्वसिद्धान्तसिद्धं मुख्यार्थं तावत् प्रख्यापयति ॥ काव्यशब्दोऽयमिति ॥ लिलक्षयिषितगुणालङ्कारसंस्कृतशब्दार्थयुगलवाची नपुंसकलिङ्गः काव्यशब्द इत्यर्थः ॥ गुणाऽलङ्कारसंस्कृतयोरिति ॥ गुणैरोजः प्रमुखैः अलङ्कारैर्यमकोपमादिभिश्च संस्कृतयोरलङ्कृतयोरित्यर्थः । अत्र शब्दाऽर्थौ द्वौ सहितावेव काव्यमिति काव्यपदार्थकथनात्कर्मनीयताशालिशब्द एव काव्यमथवाऽर्थ एवेति पृथक्पक्षद्वयं प्रत्यक्षेऽपि । यतो द्वयोः संभूयाह्लादनिबन्धनत्वमिति । तदुक्तं वक्रोक्तिजीवित । "न शब्दस्य रमणीयताविशिष्टस्य केवलस्य काव्यत्वं, नाप्यर्थस्य" इति । यद्यपि काव्यपदं गुणालङ्कारसंस्कृतशब्दार्थयुगलं व्याचष्टे, तथाप्यस्मिन् सूत्रे मुख्यार्थस्यानुपयोगलक्षणं बाधं पश्यन् शब्दार्थयुगलमात्रे तदुपचर्यत इत्याह ॥ भक्त्येति ॥ भक्त्या उपचारेण । गुणालङ्कारसंस्कृतत्वस्य पृथक्करणं मात्रचोऽर्थः । ननु "मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽरोपिता क्रिया" इत्युक्तरीत्या मुख्यार्थबाधादौ सत्येवोपचारो वक्तव्यः । तथाच । गुरुरभिवाद्यो, गुरुत्वादित्यत्र यथा गुरुशब्दपरिगृहीतस्यैव गुरुत्वस्य तदभिवादहेतुत्वं दृष्टम । तथैवात्राप्यलङ्कारस्य काव्यग्रहणहेतुत्वमुपपद्यत इति कथं मुख्यार्थबाधः । चारुताशालिशब्दार्थयोः शब्दाऽर्थमात्रस्य वस्तुत एकत्वाद् भेदनिबन्धनो दुर्घटः । "काव्यं ग्राह्यमऽलङ्कारादू" इतिभेदनिर्देशेनैव गुणालङ्कारवैशिष्ट्यतदू-

Digitized by Google

व्युत्पत्तिरूपं प्रयोजनं च सम्भवतीति कथमुपचारः । अत्रोच्यते । यथा, गुरुत्वादभिवाद्य इत्युक्ते गम्यत एव गुरुरिति । तथापि गुरुरित्युच्यमानमतिरिच्यते । एवमिहापि अलङ्कारादू ग्राह्यमित्युक्ते काव्यमिति गम्यत एव । तथापि काव्यमित्युच्यमानमतिरिच्यते इति पुनरुक्तप्रायत्वादू, अनुपयुक्तमिति मुख्यार्थभङ्गः । नचानुपयुक्तत्वेऽप्यनुपपत्तेरभावात् कथं मुख्यार्थभङ्ग इति चोदनीयम् । यतो योग्यतावि रहवदाकाङ्क्षाविरहोऽपि मुख्यार्थभङ्गहेतुः । अन्वयविघटनाऽविशेषात् । ततश्चानुपयुक्तावाकाङ्क्षावैकल्यमनुपपत्तौ तु योग्यतावैकल्यमित्यवगन्तव्यम् । चारुताशालिशब्दार्थयोः शब्दमात्रस्य च गुणभेदात् । भेदे सति सादृश्यलक्षणः सम्बन्धः । गुरुपदोपलक्षिते पुंसि हितानुशासनकौशल्यादिप्रत्तिपत्तिवच्छब्दार्थयोर्गुणालङ्कारवैशिष्ट्यप्रतिपत्तिः प्रयोजनं च सम्भवतीत्युपपन्न एवोपचार इत्यलं विस्तरेण ॥ १ ॥

अलङ्कारशब्दोऽयं किं भावसाधन, उत करणसाधन इति सन्देहात् पृच्छति—

कोऽसावलंकार इत्यत आह—

सौन्दर्यमलङ्कारः ॥ २ ॥

अलंकृतिरलङ्कारः । करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयम् उपमादिषु वर्तते ॥ २ ॥

कोऽसाविति ॥ तत्रोत्तरं वक्तुमुत्तरसूत्रमवतारयति ॥ अत आहेति ॥ वृत्तिकारदशातः सूत्रकारदशा अन्यैवेति कर्तृभेदमाश्रित्योक्तम्– आहेति । अत्र भावव्युत्पत्तेर्विवक्षितत्वादू अलङ्कारशब्दो भावार्थमाचष्ट इत्याह ॥ अलङ्कृतिरलङ्कार इति ॥ अलङ्कारशब्दस्य करणव्युत्पत्तिपक्षे तु न गुणानां काव्यग्रहणहेतुत्वमिति "युवतेरिव रूपमङ्गकाव्यं स्वदते शुद्धगुणम्" इत्यादि वक्ष्यमाणं नोपपद्यते इत्यर्थाऽसङ्गतिः । "न क्त्यादृतुमुखलर्थेषु वासरूपविधिरिष्यते" इति करणे ल्युट एव प्राप्तेः शब्दासङ्गतिश्चेत्याशयः । नन्वलङ्कारशब्दस्य कटकमुकुटादाविव यमकोपमादिषु अविगीतशिष्टप्रयोगदर्शनात्

Digitized by Google

(४) एतद्विट्ठलपुरनिवासिनां काव्यमालानवमगुच्छकान्तर्गतस्य गीतिशतकस्य प्रणेतृणां श्रीवात्स्यसुन्दराचार्यकवीनां स्वहस्तलिखितमतिशुद्धं तालपत्रात्मकं सवृत्तिव्याख्यानं पुस्तकमेकम् । तत्पत्राणि ॥ ८४ ॥

एवञ्च पुस्तकाधारेण लिखितस्यास्य ग्रन्थस्यावलोकनेनावामपि सहृदयहृदयैरनुग्राह्यौ भवाव इति ।

पण्डितश्रीमदात्रेयजयपुरकृष्णमाचार्यः ।
पण्डितश्रीवाधूलालकराचार्यश्च

तिरुनेलवेलिं-समीपवर्तिविट्ठपुरनिवासिनौ सहृदयसमुदायविधेयौ॥

Digitized by Google

काव्यालङ्कारसूत्रविषयानुक्रमः ।

शारीरं नामादिममधिकरणम् ।

अध्यायः । १ प्रयोजनव्यापना ।

२ अधिकारिचिन्ता, रीतिनिश्चयश्च ।

३ काव्याङ्गानि, काव्यविशेषाश्च ।

दोषदर्शनं नाम द्वितीयमधिकरणम् ।

१ पदपदार्थदोषविभागः ।

२ वाक्यवाक्यार्थदोषविभागः ।

गुणविवेचनं नाम तृतीयमधिकरणम् ।

१ गुणालङ्कारविवेकः शब्दगुणविवेकश्च ।

२ अर्थगुणविवेचनम् ।

आलङ्कारिकं नाम चतुर्थमधिकरणम् ।

१ शब्दालङ्कारविचारः ।

२ उपमाविचारः ।

३ उपमाप्रपञ्चाधिकारः ।

प्रायोगिकं नाम पञ्चमाधिकरणम् ।

१ काव्यसमयः ।

२ शब्दशुद्धिः ।

Digitized by Google

Digitized by Google

श्रीहरिर्जयति विट्ठलाभिधः ।

पण्डितवरवामनविरचितसवृत्ति-

काव्यालंकारसूत्राणि ।

श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितकाव्यालङ्कार-
कामधेन्वाख्यव्याख्यासहितानि ।

तत्र शारीरनाम्नि प्रथमेऽधिकरणे प्रथमोऽध्यायः ।

कल्याणानि तनोतु नः स्म भगवान् क्रीडावराहाकृति-
र्दंष्ट्राग्रेण नवप्ररोहपुलकां देवीं धरामुद्वहन् ॥
यस्याऽङ्गेषु वहन्ति रोमविवरालग्ना महाऽम्भोधयः
कान्तास्पर्शसुखादिव प्रकटितां स्वेदोदबिन्दुश्रियम् ॥ १ ॥
दरोन्मीलत्फालद्युतिमदऽमृतस्यन्दिशुभिकं
भ्रमन्मीनोष्णीषं पदसरणिपारीणवलयम् ॥
विराजद्दम्भाबव्यतिकरितपुम्भावसुभगं
पुरस्तादाविस्तात् भुवनपितरौ तन्मम महः ॥ २ ॥
ॐङ्कारमणिघण्टाऽनुरणन्निगमर्षिहितम् ॥
चित्ते शृङ्खलितं मत्त्वा चिन्तये चिन्मयं गजम् ॥ ३ ॥
करुणामसृणाऽऽलोकप्रवणा शरणार्थिषु ॥
प्रगुणाऽऽमरणावाणी स्मरणाऽनुगुणाऽस्तु नः ॥ ४ ॥
उन्मीलत्प्रतिभानकन्दमुदयत्संदर्भनालं लस-
च्छ्लेषव्याकुलशब्दपद्मममतुलं बन्धारविन्दं सदा ॥
अध्यासीनमऽलंक्रियापरिलसदूगन्धं वचोदैवतं
वन्दे रीतिविकासमाशुविगलन्माधुर्यपुष्पासवम् ॥ ५ ॥
नमस्कुर्वे खर्वेतरविविधविद्याविलसितान्
प्रवाचः प्राचोऽहं प्रथितयशसो भामहमुखान् ॥

Digitized by Google

कृता यैरर्थानां कृतिषु नयचर्चा सदसतां
प्रभेवाभिव्यक्तिं प्रजनयति भासामधिपतेः ॥ ६ ॥
पावनी वामनस्येयं पदोन्नतिपरिष्कृता ॥
गम्भीरा राजते वृत्तिर्गङ्गेव कविहर्षिणी ॥ ७ ॥
प्रबन्धं तालानां भवनुतिमिषेणाऽतनुत यः
शिवाकल्पाकारा नटनकरणानामपि भिदाः ॥
स वृत्तेर्व्याख्यानं सरलरचनं वामनकृते-
र्विधत्ते गोपेन्द्रस्त्रिपुरहरभूपालतिलकः ॥ ८ ॥
पावनपदान्यासा समग्ररसदोहशालिनी भजताम् ॥
घटयति कामितमर्थं काव्यालङ्कारकामधेनुरियम् ॥ ९ ॥
यत्रोपयुज्यते यावत् तावत् तत्र निरूप्यते ॥
प्रसङ्गानुप्रसङ्गेन नाऽत्र किञ्चित् प्रपञ्च्यते ॥ १० ॥
अभ्यर्थके मय्यनुकम्पया वा साहित्यसर्वस्वसमीहया वा ॥
मदीयमाऽऽर्या मनसा निबन्धममुं परीक्षध्वममत्सरेण ॥ ११ ॥
अध्याये प्रथमे काव्यप्रयोजनपरीक्षणम् ॥
अधिकारिविचारश्च द्वितीये रीतिनिश्चयः ॥ १२ ॥
काव्याऽङ्गकाव्यभेदानां तृतीये प्रतिपादनम् ॥
तुर्ये पदपदार्थानां दोषतत्त्वविवेचनम् ॥ १३ ॥
वाक्यवाक्यार्थदोषाणां पञ्चमे तु प्रपञ्चनम् ॥
गुणालङ्कारभेदस्तु षष्ठे भेदगुणास्तथा ॥ १४ ॥
सप्तमेऽर्थगुणाः शब्दाऽलङ्काराः पुनरष्टमे ॥
उपमा नवमे तस्याः प्रपञ्चा दशमे भवेत् ॥ १५ ॥
काव्यस्यैकादशे संविद् द्वादशे शब्दशोधनम् ॥
इत्येष द्वादशाध्यायीप्रमेयाणामनुक्रमः ॥ १६ ॥

अथ ग्रन्थकारः स्वकर्तृकाणि सूत्राणि व्याकर्तुकामः प्रारम्भ एव प्राचीनाऽऽचार्यपरम्परासमाचारपरिप्राप्तकर्तव्यताविशेषरूपमङ्गलानुष्ठानेन स्वयं प्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहव्यूहप्रतिहननप्रगल्भसमग्रदेवताऽनुग्रहसंपन्नोऽपि व्याख्यातृश्रोतृणामावग्रव्याख्यानश्रवणलाभाय ग्रन्थाऽऽदौ तन्मङ्गलनिबन्धनपूर्वकं तत्प्रवृत्तिसिद्धये विषयप्रयोजनादि दर्शयन्नाद्येन पद्येन कर्तव्यं प्रतिजानीते ।

Digitized by Google

प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ॥
काव्यालङ्कारसूत्राणां स्वेषां वृत्तिर्विधीयते ॥ १ ॥

काव्यं ग्राह्यम् अलङ्कारात् ॥ १ ॥

काव्यं खलु ग्राह्यमुपादेयं भवति। अलङ्कारात् । काव्यशब्दोऽयं गुणाऽलङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते। भक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते ॥ १ ॥

प्रणम्येति ॥ भक्तिश्रद्धातिशयलक्षणः प्रकर्षः प्रशब्देनात्र प्रकाश्यते । तादृगेव हि मङ्गलमन्तरायसन्तानशान्तिं सन्तनोति । अन्यथा कृतायामपि कृतौ प्रारिप्सितग्रन्थः परिसमाप्तिं न संपादयेत् । किरणावल्यादौ तथा दर्शनात्।अथ कथमिह नमिस्सकर्मकः स्यात् । प्रह्वीभावप्रवृत्तेरस्याकर्मकत्वात्।"नमन्ति शाखा नवमञ्जरीभि"रित्यादिप्रयोगदर्शनाच्च । नचाऽयमुपसर्गवशात् सकर्मकः । प्रशब्दस्य प्रकर्षमात्रार्थत्वेन कर्मसबन्धोपपादकत्वायोगात् । "नमामि देव"मित्यादावुपसर्गस्याप्यभावात् । नचायमन्तर्भावितण्यर्थः । अनौचित्यप्रसङ्गादिति । तदेतत् पाणिनिफणितिपरायणपरिणतान्तःकरणानामस्माकं चेतसि चोद्यं न चातुरीमाचरति । तथाहि । यथा जयतिरकर्मकः प्रकर्षेण वर्तने । पराजये तु सकर्मकः । तथा नमिधातुः क्वचित् प्रह्वीभावार्थः क्वचिन्नमस्कारार्थश्च भवति । तत्र यदा प्रह्वीभावार्थमात्रविवक्षया प्रयुज्यते तदानीमेषोऽकर्मकः । यदा नमस्कारार्थविवक्षया प्रयुज्यते तदा सकर्मक इति विवेकः । यद्येवं तर्हि, "देवं प्रणतः" इत्यत्र कर्तरि क्तप्रत्ययो न सिद्ध्येत् । "सकर्मकाऽकर्मकाद्धातोः क्तो भवेत् कर्मभावयो"रिति सकर्मकाद्धातोः कर्मणि क्तविधानात्। गत्यर्थाकर्मकादिषु नमेः परिगणनाभावाच्चेत्यपि न चोदनीयम् । "व्यवसितादिषु क्तः कर्तरि चकारात्" इतीहैव वक्ष्यमाणसूत्रेण नमेरपि कर्तरि क्तप्रत्ययसंभवात् । व्यवसितः प्रतिपन्न इत्यादिषु गत्यर्थादिसूत्रेण चकारादनुक्तसमुच्चायार्थात् कर्तरि क्तप्रत्ययो भवतीति तस्य सूत्रस्याऽर्थः ॥ परमम् ॥ परिदृश्यमानज्योतिःपरिपाटीमतिवर्तमानम् ॥ ज्योतिश्चिन्मयम् । परमं ज्योतिः प्रणम्ये

Digitized by Google

तया पूर्वोत्तरमीमांसयोर्धर्मब्रह्मप्रतिपादकतया महनीयत्वम् । तत्र चिन्तायां तु शास्त्राणामपि काव्यमुखप्रेक्षितया कार्यकारित्वमित्युपनिषत् । यदाहुः "स्वादुकाव्यरसान्मिश्रं शास्त्रमप्युपयुञ्जते । प्रथमालीढमधवः पिबन्ति कटुभेषजम्" इति । शास्त्रकाव्ययोरियान् विशेषो यत् प्रभुसंमिततया दुर्लभोऽनुप्रवेशःशास्त्रे, कान्तासंमिततया सुलभोऽनुप्रवेशः काव्ये इति । यदाहुः "कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् । आह्लाद्यऽमृतवत् काव्यमविवेकगदापहम्" इति । साहित्यचूडामणावप्युक्तम् । "तदिदं पुण्ड्रेक्षुभक्षणाद्वेतेनवित्तलाभो यत् काव्यश्रवणाद् व्युत्पत्तिसिद्धि"रिति । तस्माद् दृष्टाऽदृष्टाऽनेकोपकारकारितया काव्यमुपादातव्यम् । ततश्च सफलोऽयमलंकारसूत्रवृत्तिविधानयत्न इति स्थितम् ॥

अथ काव्यशब्दस्याऽनेकार्थत्वेन विप्रतिपत्तौ स्वसिद्धान्तसिद्धं मुख्यार्थं तावत् प्रख्यापयति ॥ काव्यशब्दोऽयमिति ॥ लिलक्षयिषितगुणालङ्कारसंस्कृतशब्दार्थयुगलवाची नपुंसकलिङ्गः काव्यशब्द इत्यर्थः ॥ गुणाऽलङ्कारसंस्कृतयोरिति ॥ गुणैरोजःप्रमुखैः अलङ्कारैर्यमकोपमादिभिश्च संस्कृतयोरलङ्कृतयोरित्यर्थः । अत्र शब्दाऽर्थौ द्वौ सहितावेव काव्यमिति काव्यपदार्थकथनात्कमनीयताशालिशब्द एव काव्यमथवाऽर्थ एवेति पृथक्पक्षद्वयं प्रत्यक्षेऽपि । यतो द्वयोः संभूयाह्लादनिबन्धनत्वमिति । तदुक्तं वक्रोक्तिजीवित । "न शब्दस्य रमणीयताविशिष्टस्य केवलस्य काव्यत्वं, नाप्यर्थस्य" इति। यद्यपि काव्यपदं गुणालङ्कारसंस्कृतशब्दार्थयुगलं व्याचष्टे, तथाप्यस्मिन् सूत्रे मुख्यार्थस्यानुपयोगलक्षणं बाधं पश्यन् शब्दार्थयुगलमात्रे तदुपचर्यत इत्याह ॥ भक्त्येति ॥ भक्त्या उपचारेण गुणालङ्कारसंस्कृतत्वस्य पृथक्करणं मात्रचोऽर्थः । ननु "मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत् सा लक्षणाऽरोपिता क्रिया" इत्युक्तरीत्या मुख्यार्थबाधादौ सत्येवोपचारो वक्तव्यः । तथाच । गुरुरभिवाद्यो, गुरुत्वादित्यत्र यथा गुरुशब्दपरिगृहीतस्यैव गुरुत्वस्य तदभिवादहेतुत्वं दृष्टम् । तथैवात्राप्यलङ्कारस्य काव्यग्रहणहेतुत्वमुपपद्यत इति कथं मुख्यार्थबाधः । चारुताशालिशब्दार्थयोः शब्दाऽर्थमात्रस्य वस्तुत एकत्वाद् भेदनिबन्धनो दुर्घटः । "काव्यं ग्राह्यमऽलङ्कारात्" इतिभेदनिर्देशेनैव गुणालङ्कारवैशिष्ट्यतद्-

Digitized by Google

व्युत्पत्तिरूपं प्रयोजनं च सम्भवतीति कथमुपचारः । अत्रोच्यते । यथा, गुरुत्वादभिवाद्य इत्युक्ते गम्यत एव गुरुरिति । तथापि गुरुरित्युच्यमानमतिरिच्यते । एवमिहापि अलङ्कारादू ग्राह्यमित्युक्ते काव्यमिति गम्यत एव । तथापि काव्यमित्युच्यमानमतिरिच्यते इति पुनरुक्तप्रायत्वादू, अनुपयुक्तमिति मुख्यार्थभङ्गः । नचानुपयुक्तत्वेऽप्यनुपपत्तेरभावात् कथं मुख्यार्थभङ्ग इति चोदनीयम् । यतो योग्यतानाविरहवदाकाङ्क्षाविरहोऽपि मुख्यार्थभङ्गहेतुः । अन्वयविघटनाऽविशेषात् । ततश्चानुपयुक्तावाकाङ्क्षावैकल्यमनुपपत्तौ तु योग्यतावैकल्यमित्यवगन्तव्यम् । चारुताशालिशब्दार्थयोः शब्दमात्रस्य च गुणभेदात् । भेदे सति सादृश्यलक्षणः सम्बन्धः । गुरुपदोपलक्षिते पुंसि हितानुशासनकौशल्यादिप्रत्तिपत्तिवच्छब्दार्थयोर्गुणालङ्कारवैशिष्ट्यप्रतिपत्तिः प्रयोजनं च सम्भवतीत्युपपन्न एवोपचार इत्यलं विस्तरेण ॥ १ ॥

अलङ्कारशब्दोऽयं किं भावसाधन, उत करणसाधन इति सन्देहात् पृच्छति—

कोऽसावलंकार इत्यत आह—

सौन्दर्यमलङ्कारः ॥ २ ॥

अलंकृतिरलङ्कारः । करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयम् उपमादिषु वर्तते ॥ २ ॥

कोऽसाविति ॥ तत्रोत्तरं वक्तुमुत्तरसूत्रमवतारयति ॥ अत आहेति ॥ वृत्तिकारदशातः सूत्रकारदशा अन्यैवेति कर्तृभेदमाश्रित्योक्तम्– आहेति । अत्र भावव्युत्पत्तेर्विवक्षितत्वादू अलङ्कारशब्दो भावार्थमाचष्ट इत्याह ॥ अलङ्कृतिरलङ्कार इति ॥ अलङ्कारशब्दस्य करणव्युत्पत्तिपक्षे तु न गुणानां काव्यग्रहणहेतुत्वमिति "युवतेरिव रूपमङ्गकाव्यं स्वदते शुद्धगुणम्" इत्यादि वक्ष्यमाणं नोपपद्यते इत्यर्थोऽसङ्गतिः । "न क्त्यल्युट्तुमुन्खलर्थेषु वासरूपविधिरिष्यते" इति करणे ल्युट एव प्राप्तेः शब्दासङ्गतिश्चेत्याशयः । नन्वलङ्कारशब्दस्य कटकमुकुटादाविव यमकोपमादिषु अविगीतशिष्टप्रयोगदर्शनात्

Digitized by Google

"अध्यायन्याये"त्यादिसूत्रे चकारादनुक्तसमुच्चयार्थाद् वा, "कृत्य-ल्युटो बहुलम्" इति बहुलग्रहणाद् वा करणसाधनोऽप्यलङ्कारशब्दः सङ्गच्छत इतिचेन्मतम् । तत्तु नानिष्टमित्यभ्युपगम्यानुवदति ॥ कर-णव्युत्पत्त्या पुनरिति ॥ कथञ्चित् कल्पितायामपि करणव्युत्पत्तौ न गुणानां काव्यग्रहणहेतुत्वमिति स दोषस्तदवस्थ इत्याशयः । ननु करणसाधनोऽयमऽलङ्कारशब्दो यमकोपमादिषु वर्तमानो गुणानपि गृह्णाति, सौन्दर्यहेतुत्वाविशेषादुभयेषामिति । तदेतदविचारितरम-णीयम् । न हि व्युत्पत्तिरस्तीति शब्दः सर्वत्र वक्तुं शक्यते । किन्तु शिष्टप्रयोगे दृष्टे व्युत्पत्तिरन्विष्यते । अन्यथा पङ्कजादयः शब्दाः कु-मुदादिषु पद्मादिष्विव प्रयुज्येरन् । पङ्कजत्वेनाविशेषादिति स्याद-तिप्रसङ्गः । तस्मात् पद्मे पङ्कजशब्दवदलङ्कारशब्दः कटकमुकुटा-दिष्विव यमकोपमादिषु योगरूढ इत्यवगन्तव्यम् । एवञ्च सति य-मकोपमादेरलङ्कारस्य काव्यग्रहणहेतुत्वाभ्युपगमे, साऽलङ्कारमेव ग्राह्यं काव्यं, न तु निरलङ्कारमित्यापद्येत । नचैवं वक्तुं शक्यम् । अलङ्कारविरहेऽपि शुद्धगुणमेव काव्यमास्वाद्यमिति वक्ष्यमाणत्वात् । न केवलमियमऽस्य ग्रन्थकृतः प्रक्रिया । किन्त्वन्यैरप्यालङ्कारिकै-रलङ्कारस्य शब्दार्थयुगलस्य सगुणस्य काव्यत्वे लक्षणोदाहरण-योर्दर्शितत्वात् । तथाचोक्तं काव्यप्रकाशे— "तददोषौ शब्दार्थौ स-गुणावनलंकृती पुनः क्वापि" इति । तत्र व्याचष्ट भट्टगोपालः— निर्दोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम् इति घण्टापथः, किन्तु "सर्वं वाक्यं सावधारणम्" इत्युक्त्या यथा दोषशून्यावेव गुणव-न्तावेव शब्दार्थौ काव्यमित्यवधारणं, तथा साऽलङ्कारावेवेति न पार्यते नियन्तुम् । किन्तु वयं हि काव्यशोभासम्भावनया स्वैरम् अ-लङ्कारान् सहामहे । अलङ्कारनैयत्यं तु न सहामहे । उक्तं हि—"दोष-हानं गुणादानं कर्तव्यं नियमात् कृतौ । कामचारः पुनः प्रोक्तो-ऽलङ्कारेषु मनीषिभिः" इति । उदाहरणं तु— यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः क-दम्बानिलाः * सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते * इत्यत्र स्फुटो न क-श्चिदलङ्कारः । काशकुशावलम्बनाद्विशेषोक्तिविभावनयोरन्यतराल-ङ्कारोद्भावनायामलङ्कारनैयत्यपक्षनिर्वाह इत्यलं दुराभिनिवेशया दु-

Digitized by Google

राशया । कविसंरम्भगोचराणामलङ्काराणान्न कस्यचिदुपलम्भ इति । तथापि न काव्यत्वभङ्गः । विशेषोक्तिविभावनयोः स्वस्वविरोधमुखेन कथञ्चिदुद्भावनेऽपि न स्फुटत्वम् । कण्ठोक्त्या निषेध्ययोः कार्यकारणयोर्भावान्तरमुखेन भावाभिधानात् । अथवा साधकबाधकप्रमाणाभावाद् द्वयोः सन्देहरूपः सङ्कर एवेति । तत्रापि, अस्फुटप्रतीतिर्दुष्परिहरैवेत्यलं प्रसक्तानुप्रसक्तार्थप्रपञ्चनेन । यद्यपि, काव्यं ग्राह्यं सौन्दर्यात्, तद्दोषगुणाऽलङ्कारहानादानाभ्याम् इति विन्यासाऽन्तरे लाघवं भवति । तथापि योऽयमलङ्कारः काव्यग्रहणहेतुत्वेनोपन्यस्यते तदुत्पादकत्वाच्छास्त्रमप्यलङ्करनाम्ना व्यपदिश्यत इति शास्त्रस्यालङ्कारत्वेन प्रसिद्धिः प्रतिष्ठिता स्यादिति सूचयितुं विन्यासः कृतः— काव्यं ग्राह्यम्, अलङ्कारादिति ॥ २ ॥

इत्यमलङ्कारपदार्थं समर्थ्य तस्य कारणं वक्तुमुत्तरसूत्रमुपक्षिपति ॥

स दोषगुणालङ्कारहानादानाभ्याम् ॥ ३ ॥

स खल्वऽलङ्कारो दोषहानाद् गुणालङ्कारादानाच्च सम्पाद्यः कवेः ॥ २ ॥

स दोषेति ॥ प्रक्रान्तप्रसिद्धाऽनुभूताद्यनेकार्थत्वात् तच्छब्दोऽत्र प्रक्रान्तार्थपरामर्शीत्याह ॥ स खल्विति ॥ गुणाश्च, अलङ्काराश्च गुणालङ्कारा इति प्रथमं समस्य पश्चाद् दोषाश्च गुणालङ्कारा श्चेति द्वन्द्वः कर्तव्यः । हानं चादानं च हानादाने दोषगुणालङ्काराणां हानादाने इति विग्रहः । ततश्च दोषाणां हानं, गुणालङ्काराणां चादानमिति यथासंख्यं सम्बन्धः सम्पत्स्यते । इष्टानुवर्तनात् कुर्यात् प्रागनिष्टनिवर्तनम् * इति नीत्या गुणालङ्कारादानात् पूर्वं दोषहानमेव कर्तव्यमिति सूचयितुं प्रथमतो दोषहानस्य निर्देशः कृतः । गुणालङ्कारादानाच्चेत्यत्रेदमनुसन्धेयम् । गुणविवेचनाधिकरणप्रमेयपर्यालोचनायां नित्यत्वानित्यत्वभेदेन गुणालङ्कारव्यवस्थामास्थास्यमानेन ग्रन्थकृताऽत्र सूत्रे दोषहानवद् गुणादानवच्च नालङ्कारादानं नियतम् । किन्तु गुणकृतशोभाऽतिशयाऽऽधायकत्वसम्भावनयैवेति

Digitized by Google

विवक्षितमिति । एवञ्च सति "सौन्दर्यमलङ्कारः" इत्यत्रापि या गुणैराधीयते शोभा, यश्चाऽलङ्कारैस्तदतिशयस्तदुभयमपि सौन्दर्यपर्यायेणालङ्करणेन सङ्गृहीतमिति व्याख्येयम् । अतो न पूर्वापरप्रमेयविरोध इति सर्वमनवद्यम् ॥ कवेरिति ॥ कृत्यानां कर्तरि वा इति षष्ठी ॥ ३ ॥

शास्त्रतस्ते ॥ ४ ॥

ते दोषगुणालङ्कारहानादाने । शास्त्रादस्मात् । शास्त्रतो हि ज्ञात्वा दोषाञ्जह्यात्, गुणालङ्कारांश्चाददीत ॥ ४ ॥

ननु दोषहानगुणालङ्कारादाने किंनिबन्धने इति जिज्ञासमानं प्रत्याह ॥ शास्त्रत इति ॥ ४ ॥

ननु सालङ्कारं काव्यं फलवच्चेदलङ्कारस्य निरूपणाय शास्त्रारम्भ उपपद्यते । अतस्तदुपपत्तये फलं वक्तव्यम् । किं पुनस्तत्फलमिति प्रश्नपूर्वकमुत्तरसूत्रमुपन्यस्यति ।

किं पुनः फलम् अलङ्कारवता काव्येन? येनैतदर्थोऽयमित्याह ।

काव्यं सद् दृष्टाऽदृष्टार्थं प्रीतिकीर्तिहेतुत्वात् ॥ ५ ॥

काव्यं सत् = चारु दृष्टप्रयोजनं, प्रीतिहेतुत्वात् । अदृष्टप्रयोजनं कीर्तिहेतुत्वात् । अत्र श्लोकाः । "प्रतिष्ठां काव्यबन्धस्य यशसः सरणिं विदुः * अकीर्तिवर्तिनीं त्वेवं कुकवित्वविडम्बनाम् * कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः * अकीर्तिं तु निरालोकनरकोद्देशदूतिकाम् * तस्मात् कीर्तिमुपादातुमकीर्तिं च निबर्हितुम * काव्यालङ्कारसूत्रार्थः प्रणीतः कविपुङ्गवैः" ॥ ५ ॥ इति श्रीपण्डितवामनविरचितकाव्यालङ्कारसूत्रवृत्तौ शारीरे प्रथमेऽधिकरणे प्रथमोऽध्यायः ॥ १ ॥ ॥ इति प्रयोजनस्थापना ॥

Digitized by Google

किं पुनरिति ॥ सच्छब्दस्य विवक्षितमर्थमाह ॥ चार्विति ॥ साऽलङ्कारतया सुन्दरमित्यर्थः ।
दृष्टादृष्टवैहिकामुष्मिकावर्थौ यस्यैति विग्रहः । अत्र यथासंख्यं सम्बन्धं दर्शयति ॥ दृष्टाऽदृष्टप्रयोजनमिति ॥ अत्र प्रीतिशब्देन श्रवणसमनन्तरमेव सहृदयहृदयेषु जायमाना या रसास्वादलक्षणा, या च पुनरिष्टप्राप्तिरनिष्टपरिहारनिबन्धना सेयमुभयविधा प्रीतिर्विवक्षिता । तथाच सति साक्षात् परंपरया चैहिकप्रीतेः साधनत्वात् काव्यं दृष्टार्थमित्यर्थः । ननु कीर्तिरपिस्वर्गसाधनतयाप्रयोजनमिति वक्तव्यम् । स्वर्गपदार्थोऽपि प्रीतिरेव । तथा सति प्रीतिहेतुत्वादित्युक्ते विवक्षितार्थसिद्धेः, किं हेत्वन्तरोपदानगौरवेणेति चेत् । सत्यम् । " यन्नदुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च सुखं स्वर्गपदास्पदम्" इत्युक्तलक्षणाया इष्टप्रीतिविलक्षणाया अदृष्टप्रीतेः पृथङ्निरूपणीयत्वात् काव्यस्य तन्मूलतया लोकातिशयत्वं प्रकटितमितिहेत्वन्तरमुपात्तमिति द्रष्टव्यम् । अमुमेवार्थमभियुक्तोक्तिसंवादेन समर्थयते ॥ अत्र श्लोका इति ॥ प्रतिष्ठा सहृदयहृदयानुरञ्जकतया लोकोत्कर्षेण स्थितिः । सरणिः पद्धतिः । अकीर्तिवर्तिनीत्यत्र नञ् तद्विरोधिनमर्थमाचष्टे इति । यथा त्वनृताधर्माविद्यादय ऋतधर्मविद्यादीनां विपक्षास्तथा कीर्तिरप्यकीर्तेर्विरोधिनी । तस्या वर्तिनी एकपदी । "सरणिः पद्धतिः पद्या वर्तिन्येकपदीति च" इत्यमरः । आ संसारं, यावन्न मोक्षः । कीर्तेर्यावत्प्रसरणं वा । निरालोकस्तेजोमात्रशून्यः । तमोमय इति यावत् ॥ नरको दुर्गतिः । "स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्" इत्यमरः । तस्योद्देशः प्रदेशस्तस्य, दूतिका प्रापयित्रीतियावत् ॥ प्रसाद्यः ॥ विशेषतो विमर्शेन विशदीकर्तव्यः । अस्यालंकारशास्त्रस्य सौन्दर्यापरपर्यायेऽलंकारे परमप्रतिपाद्यत्वेन दोषगुणालंकारविषयहेयोपादेयतया तदुद्युत्पादनं प्रयोजनम् । तस्य च प्रयोजनं सत्काव्यकरणम् । तस्य च कीर्त्यादयः कवीनां प्रीतिः । शास्त्रस्य विषयस्य च प्रतिपाद्यप्रतिपादकभावः संबन्धः । काव्यस्य कीर्त्यादेश्च कार्यकारणभाव इति प्रथमाध्यायप्रमेयसंग्रहः ॥ शारीर इति ॥ प्रथमं काव्यशरीरम् । तदनु दोषाः । ततो गुणाः ॥ तदनन्तरमलङ्काराः । ततः शब्दप्रयोगशैलीति क्रमेणपञ्चाधिकरणानि ॥ तत्र काव्यशरीरमधिकृत्य कृतमिति शारीरमधिकरणम् । अधिक्रिय-

Digitized by Google

न्तेऽवान्तरप्रमेयरूपाणि प्रकरणान्यस्मिन् महाप्रमेयात्मनीत्यधिकरणम् । अध्यायोऽवान्तरप्रमेयविरतिस्थानम् । "प्रमेयविरतिस्थानमध्यायश्च प्रपाठक" इति वैजयन्ती ॥ ५ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविनिर्मितायां काव्यालंकारसूत्रवृत्तिव्याख्यायां काव्यालंकारकामधेनौ शारीरे प्रथमेऽधिकरणे प्रथमोऽध्यायः समाप्तः ॥ १ ॥ १ ॥

Digitized by Google

कवीन्द्रकैरवानन्दसुधास्यन्दपटीयसीम् ॥
विभिन्दानां तमस्स्पन्दं वन्दे वाङ्मयचन्द्रिकाम् ॥ १ ॥

अधिकारिनिरूपणार्थमाह ।

अरोचकिनः सतृणाभ्यवहारिणश्च कवयः ॥ १ ॥

इह खलु द्वये कवयः संभवन्ति । अरोचिकिनः, सतृणाभ्यवहारिणश्चेति । अरोचकिसतृणाभ्यवहारिशब्दौ गौणार्थौ। कोऽसावर्थः । विवेकित्वमविवेकित्वं चेति ॥ १ ॥

प्रयोजने काव्यस्य प्रतिष्ठापिते तदर्थितयाऽधिकारिणो निरूप्या इत्यध्यायद्वयसंगतिमधिगमयति ॥ प्रयोजनेति ॥ काव्यप्रयोजनस्य ज्ञापना कृतेति शेषः(१)।तिष्ठतेर्ण्यन्तात् "ण्यासश्रन्थो युच्" इति युच्प्रत्ययः ॥ अधिकारीति ॥ अधिकारः प्रयोजनस्वाम्यम् । तद्वानधिकारी । "अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः" इति दशरूपकम् ॥ अरोचकिन इति ॥ कृष्णसर्पपदन्यायेन अरोचकशब्दस्तत्पुरुषमेवावगमयति । कृष्णसर्पवदरण्यमितिवदरोचकिन इति प्रयुक्तम् । न त्वरोचका इति । अतो "न कर्मधारयान्मत्वर्थीयः" इति निषेधस्यानवकाशः । अरोचको नामव्याधिविशेषः। यथाह वाग्भटः । "अरोचको भवेद्दोषैर्जिह्वाहृदयसंश्रितैः" इति ॥ सतृणमिति॥"अव्ययं विभक्ती"त्यादिना सकल्यार्थेऽव्ययीभावः । सतृणमभ्यवहरन्तीति सतृणाभ्यवहारिणः ॥ द्वये इति ॥ प्रथमचरमादिसूत्रे तयपः परिगणनात् "द्वित्रिभ्यां तयस्यायज्वा" इति तत्स्थानिकायजन्तोऽपि स्थानिवद्भावात् सर्वनामसंज्ञां लभते । अतः प्रथमाबहुवचनान्तं द्वये इति रूपम् । ननु किमनेन प्रकृतानुपयोगिना रोचकित्वादिविचारेणेति चेदाह॥अरोचकीति ॥ गौणार्थाविति॥साहश्यमूललक्षणाव्यापारेण लक्षितावर्थाविति्यर्थः । गौणार्थस्वरूपजिज्ञासुं पृच्छति ॥ कोऽसाविति ॥ पृष्टमर्थं स्पष्टमाचष्टे ॥ विवेकित्वमिति ॥ १ ॥

यदाह—

(१) "इति प्रयोजनज्ञापना" इत्यस्य विवरणमेतत् ।

Digitized by Google

पूर्वे शिष्याः, विवेकित्वात् ॥ २ ॥

पूर्वे खल्वरोचकिनः शिष्याः। शासनीयाः । विवेकित्वात्। विवेचनशीलत्वात् ॥ २ ॥

उक्तस्य गौणार्थस्योपपादकमधिकारिनिश्चायकं सूत्रमवतारयति ॥ यदाहेति ॥ २ ॥

नेतरे तद्विपर्ययात् ॥ ३ ॥

इतरे सतृणाभ्यवहारिणो न शिष्याः । तद्विपर्ययात् । अविवेचनशीलत्वात् । न च शीलमपाकर्तुं शक्यम् ॥ ३ ॥

अथ "नेतर" इति सूत्रारम्भः किमर्थः । विवेकिनः शिष्या इत्युक्ते अविवेकिनः पुनरशिष्या इति गम्यत एव। तथाप्यासूत्र्यमाणं पुनरुक्तिं पुष्णाति । "अर्थादापन्नस्य पुनर्वचनं पुनरुक्तिः" इति न्यायाद् इति सत्यम् । यथा धूमध्वजाभावे धूमाभाव इति यावद् व्यतिरेको न दर्शितस्तावत् स इति । धूमध्वजे धूम इति साहचर्यमात्रदर्शनान्न कार्यकारणभावनिश्चयः । तथैवात्रापि व्यतिरेकदर्शनमन्वयदार्ढ्यायेति भाव इति युज्यते एव सूत्रारम्भः । वृत्तिःस्पष्टार्था । ननु शीलितं शास्त्रमविवेकमपाकरोति । तत्त्वविवेकस्य तज्जन्यत्वाद् । अतः कथमविवेकिनो न शिष्या इति शङ्कां शकलयति ॥ नचेति ॥ ३ ॥

यद्येवं विरलस्तर्हि विद्योपयोग इति शङ्कते ।

नन्वेवं न शास्त्रं सर्वत्रानुग्राहि स्यात्। को वा मन्यते। तदाह

न शास्त्रमद्रव्येष्वर्थवत् ॥ ४ ॥

न खलु शास्त्रमद्रव्येष्वविवेकिष्वर्थवत् ॥ ४ ॥

नन्विति ॥ अभ्युपगमेन परिहरति ॥ को वा मन्यते इति ॥ शास्त्रं सर्वानुग्राहीत्यनुषज्यते । न कश्चिदपि तथा मनुत इति फलितोऽर्थः । विधीयमानोऽपि विवेकविधुरेषु शास्त्रोपदेशो विपिनविला-

Digitized by Google

पवद् विफल इत्याह ॥ न शास्त्रमिति ॥ शास्त्रोपदेशद्वारा यत्र सन्निधीयमाना गुणाः संक्रामन्ति तद् द्रव्यमिह विवक्षितम् । तद्विपरीतान्यऽद्रव्याणि, गुणहीना अविवेकिन इति यावत् । अत्र गाथा । "अयं भस्मनि होमःस्यादियं वृष्टिर्मरुस्थले । इदमश्रवणे गानं यज्जडे शास्त्रशिक्षणम्" इति ॥ ४ ॥

प्रतिपादितं प्रमेयं प्रसिद्धदृष्टान्तेन स्पष्टयितुमाह ।

निदर्शनमाह ।

न कतकं पङ्कप्रसादनाय ॥ ५ ॥

न हि कतकं पयस इव पङ्कप्रसादनाय भवति ॥ ५ ॥

निदर्शनमिति ॥ कतकमम्भःप्रसादनबीजम् । "कतकं मेदनीयञ्च सक्षमं वारिप्रसादनम्" इति वैद्यनिघण्टुः ॥ ५ ॥

प्रकरणोचितां सङ्गतिं प्रकटयन्नुत्तरसूत्रमवतारयति ।

अधिकारिणो निरूप्य रीतिनिश्चयार्थमाह ।

रीतिरात्मा काव्यस्य ॥ ६ ॥

रीतिर्नामेयमात्मा काव्यस्य । शरीरस्येवेति वाक्यशेषः ॥६॥

अधिकारिण इति ॥ कर्तृनिरूपणानन्तरं कर्मनिरूपणमुचितमिति व्याचष्टे ॥ रीतिर्नामेति ॥ रीयन्ति गच्छन्त्यस्यां गुणा इति, रीयते क्षरत्यस्यां वाङ्मधुधारेति वा रीतिः । अधिकरणार्थे क्तिन् प्रत्ययः । करङ्गमात्रकल्पकर्कशतर्कवाक्यवैलक्षण्यप्रकटनप्रगल्भः कश्चन स्फुरत्ताहेतुस्वभावोऽत्रात्मेत्युच्यते । ननु काव्यस्यात्मेत्येतत् कथमुपपद्यते । अशरीरभूतस्यात्मावच्छेदकत्वासम्भवादित्याशङ्क्य शब्दार्थयुगलं शरीरं, तस्याधिष्ठाता रीतिर्नामात्मेत्युपपत्तिमुन्मीलयितुमाकाङ्क्षितपदमापूरयति ॥ शरीरस्येवेति वाक्यशेष इति ॥ अत्र रीतेरात्मत्वमिव शब्दार्थयुगलस्य शरीरत्वमौपचारिकमित्यवगन्तव्यम् ॥ ६ ॥

Digitized by Google

रीतेः काव्यशरीरं प्रत्यात्मत्वेनोक्तमुत्कर्षमुपश्रुत्य कौतुकोत्कलिकाकरम्बितान्तःकरणस्तां प्रतिपित्सुः पृच्छति ।

किं पुनरियं रीतिरित्याह ।

विशिष्टा पदरचना रीतिः ॥ ७ ॥

विशेषवती पदानां रचना रीतिः ॥ ७ ॥

किं पुनरिति ॥ किमित्यव्ययं प्रश्नार्थे । "किमव्ययं च कुत्सायां विकल्पप्रश्नयोरपि" इति नानार्थरत्नमाला । इयं रीतिर्नाम किं पुनः ? किंलक्षणेत्यर्थः । प्रतिपित्सितमर्थं प्रतिपादयितुमनन्तरं सूत्रमवतारयति ॥ आहेति ॥ विशिष्टेति पदं व्याचष्टे ॥ विशेषवतीति ॥ पदानामिति ॥ अर्थेष्वौपचारिकी रीतिरङ्गीकर्तव्या । अन्यथाऽर्थानामात्मभूतरीतिवैधुर्ये काव्यशरीरान्तःपातो दुष्करः । यद्वक्ष्यति "तस्यामर्थसम्पदास्वाद्या, साऽपि वैदर्भी तात्स्थ्याद् इति ॥

किमयं वैशेषिकपरिभाषितः पञ्चमः पदार्थो विशेषोऽन्य एवेति सन्दिहानः पृच्छति ॥ ७ ॥

कोऽसौ विशेष इत्याह ।

विशेषो गुणात्मा ॥ ८ ॥

वक्ष्यमाणगुणरूपो विशेषः ॥ ८ ॥

कोऽसाविति ॥ विवक्षितं विशेषं विवरीतुमुत्तरसूत्रमवतारयति ॥ आहेति ॥ गुणात्मा ओजःप्रसादादिगुणस्वभाव इत्यर्थः ॥८॥

रीतिं विवेक्तुमाह ।

सा त्रेधा वैदर्भी गौडीया पाञ्चाली चेति ॥ ९ ॥

सा चेयं रीतिस्त्रेधा भिद्यते । वैदर्भी, गौडीया, पाञ्चाली चेति ॥ ९ ॥

Digitized by Google

सा त्रेधेति ॥ सकलगुणसम्प्रतीनत्वेनाभ्यर्हितत्वाद् वैदर्भ्याः प्रथमं निर्देशः । अनन्तरयोरुभयोः श्लोकगुणत्वेऽपि प्रशस्तगुणसंस्कृतत्वाद् अनन्तरं गौडीयाया, अवशिष्टाया अन्ते निवेशः ॥ ९ ॥

किं पुनर्देशवशाद् द्रव्यगुणोत्पत्तिःकाव्यानां, येनाऽयं देशविशेषव्यपदेशः । नैवं, यदाह ।

विदर्भादिषु दृष्टत्वात् तत्समाख्या ॥ १० ॥

विदर्भगौडपाञ्चालेषु तत्रत्यैः कविभिर्यथास्वरूपमुपलब्धत्वात् तत्समाख्या । न पुनर्देशैः किञ्चिदुपक्रियते काव्यानाम् ॥ १० ॥

किं पुनरिति ॥ यथा लवणादयः पदार्थाः सिन्ध्वादिदेशवशाद् विशिष्टगुणा भवन्ति, तथा किं देशवशाद्विशिष्टानि काव्यानीति शङ्कार्थः । समाधत्ते ॥ नैवमिति ॥ विदर्भादिपदैरुपचाराद्विदर्भादिदेशस्थाः कवयो लक्ष्यन्ते । अन्यथा विदर्भादिपदानां क्षत्रियत्वेऽर्थासङ्गतिः । जनपदवृत्तित्वे "जनपदतदवध्योश्च" इति, गौडशब्दाद्, "अवृद्धादपि बहुवचनविषयाद्" इति विदर्भपाञ्चालशब्दाभ्यां च वुञ्प्रत्ययप्राप्तौ शब्दासङ्गतिश्चेत्यनुसन्धेयम् । विदर्भपाञ्चालशब्दाभ्यां "शेषे" इत्यण् प्रत्ययः । गौडशब्दाद् "वृद्धाच्छः" इति छप्रत्ययः । स्पष्टमवशिष्टम् ॥ १० ॥

तासां गुणभेदाद् भेदमाह ।

समग्रगुणा वैदर्भी ॥ ११ ॥

समग्रैरोजःप्रसादप्रमुखैर्गुणैरुपेता वैदर्भी नाम रीतिः । अत्र श्लोकौ ॥

अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥
तामेतामेवं कवयः स्तुवन्ति—
सति वक्तरि सत्यर्थे सति शब्दानुशासने ।

Digitized by Google

अस्ति तत्र विना येन परिस्रवति वाङ्मधु ॥

उदाहरणम्—

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितम्
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ॥
विस्रब्धं क्रियतां वराहविततिर्मुस्ताक्षतिं पल्वले
विश्राम्यन्ति लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥ ॥ ११ ॥

प्रतिपादितेऽर्थे प्राचामुपपद्यं प्रमाणयति ॥ अत्र श्लोकाविति ॥ दोषमात्राभिः ॥ असाधुत्वादिदोषलेशैरपि ॥ अस्पृष्टा ॥ असम्बद्धा । अनुपगतदोषमात्रसम्बन्धेति यावत् । "मात्रा परिच्छदे वर्णमाने कर्णादिभूषणे । सैवाल्पपरिमाणे च" इति नानार्थरत्नमाला । समग्रैरन्यूनैर्गुणैरोजःप्रसादादिभिर्गुम्फिता सङ्घटिता विपञ्ची वीणा "वीणा तु बल्लकी । विपञ्ची" इत्यमरः । तस्याः स्वराः श्रोतृमनोरञ्जकाः षड्जादयोऽत्र विवक्षिताः । न तु क्वणनमात्रम् । तस्य मनोरञ्जकत्वाभावात् । तदुक्तं सङ्गीतरत्नाकरे "श्रुत्यनन्तरभावी यः शब्दोऽनुरणनात्मकः । स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते इति । षड्जादिषु रूढश्चायम् । तथाचाञ्जनेय "स्वरशब्दो मयूरादिसमुत्पन्नेषु सप्तसु । षड्जादिष्वेष रूढोऽयम्" इति । तेषां सौभाग्यमिव सौभाग्यं यस्या इति विग्रहः । किञ्च । अस्याश्च वर्णनीयरसचमत्कारकारितया समग्रसौन्दर्यशालितया च कविकुलोपलालनीयतामाकलयति ॥ तामेतामिति ॥ सतीति ॥ सच्छब्दोऽत्र साध्वर्थः । "सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्" इत्यमरः ॥ वक्ता कविः ॥ अर्थोऽपूर्वतयालिखितः ॥ शब्दानुशासनमनुशिष्टशब्दः । आकाङ्क्षायोग्यतादिविशिष्टश्च । वक्तरि शब्दे चार्थे च साधौ सत्यपि येन विना, वाङ्मधु वाचां मधु, न परिस्रवति न स्पन्दते तद् वैदर्भीनामकं वस्त्वस्तीति योजना । इह मधुशब्देन मुख्यार्थासम्भवात् सहृदयहृदयैरास्वाद्यः समग्रसौन्दर्यसमुन्मिषितो रसो लक्ष्यते । उक्तायाः रीतेरुदाहरणमुपदर्शयितुमाह ॥ उदाहरणमिति ॥ उच्यते इति शेषः । "वैदर्भीरीतिसंदर्भे कालिदासः प्रगल्भते" इति तदीयं पद्यमुदाहरति ॥ गाहन्तामिति ॥ एषा हि शकुन्तलाविलोकनोत्कलिकावशं-

Digitized by Google

वद्दृढस्य मृगयाविहाराद्विरंस्यतो दुष्यन्तस्योक्तिः । महिष्यश्च महिषाश्च महिषाः । "पुमान् स्त्रिया" इत्येकशेषः । एवं मृगकुलमित्यत्राप्येकशेषो वेदितव्यः ॥ निपानानि कूपसमीपकल्पिता जलाधाराः । "आहावस्तु निपानं स्यादुपकूपजलाशये" इत्यमरः । तेषु सलिलम् । तदेव विशिनष्टि ॥ शृङ्गैर्मुहुस्ताडितमिति ॥ महिषा हि जलमवगाह्य क्षणात् शिरसि क्षणान्तरमुत्क्षिप्य शृङ्गैर्मुहुस्ताडयन्तीति स्वभावोक्तिः । गाहन्तामित्यादिषु सर्वत्राऽऽमन्त्रणे लोट् । छायास्वऽनातपेषु बद्धानि कदम्बकानि येनेति विग्रहः । "निकुरम्बं कदम्बकम्" इत्यमरः । कदम्बकानां बहुत्वविवक्षायां मृगकुलस्यान्यपदार्थत्वमुपपद्यते । अतो न पौनरुक्त्यमाशङ्कनीयम् । उद्गीर्णस्य वाऽवगीर्णस्य वा मन्थो रोमन्थः । चर्वितचर्वणमित्यर्थः । "विस्रब्धं कुरुतां वराहततिर्मुस्ताङ्कुरं पल्वले" इति प्राचीनः पाठ इति संप्रदायविदः । "विस्रब्धैः क्रियतां वराहततिभिर्मुस्ताङ्कुरः पल्वले" इति पाठान्तरं तु प्रक्रमभङ्गशङ्कनकलङ्कम् अङ्कुरयेत् । अस्मदिति पञ्चमीबहुवचनान्तं पृथक्पदम् । विभ्रान्तेर्व्यापारावरामार्थत्वात् पञ्चमी । षष्ठीसमासो वा । अत्रौजःप्रसादादयो गुणाः परां प्रतिष्ठां लभन्ते । तथाहि । "छायाबद्धकदम्बकम्" "शिथिलज्याबन्धम्" इत्यत्र बन्धस्य गाढत्वादोजः । छायाबद्धकदम्बकं मृगकुलम्" इत्यत्र बन्धस्य गाढत्वशैथिल्ययोः संपलवात् प्रसादः । "महिषा निपानसलिलम्" इत्यत्र मसृणत्वाच्छ्लेषः । "गाहन्ताम्" इत्यारभ्य येनैव मार्गेण प्रक्रमस्तेनैव मार्गेणोपसंहार इति मार्गाभेदात् समता । "गाहन्ताम्" इत्यत्रारोहः । "महिषाः" इत्यत्रावरोहः । एवमन्यत्राप्यारोहावरोहक्रमस्फुरणात् समाधिः । शृङ्गैर्मुहुस्ताडितम्" इति पृथक्पदत्वान्माधुर्यम् । "रोमन्थमभ्यस्यतु" इत्यादौ बन्धस्याऽजरठत्वात् सौकुमार्यम् । "शिथिलज्याबन्धमस्मद्धनुः" इत्यत्र बन्धस्य विकटत्वादुदारता । पदानामुज्ज्वलत्वात् कान्तिः । अर्थाभिव्यक्तिहेतुत्वादर्थव्यक्तिरिति दिङ्मात्रप्रदर्शनम् । गुणस्वरूपनिरूपणं तु गुणविवेचनेऽधिकरणे करिष्यते ॥ ११ ॥

क्रमप्राप्तां गौडीयामाह ।

ओजःकान्तिमती गौडीया ॥ १२ ॥

Digitized by Google

ओजः कान्तिश्च विद्येते यस्यां सा ओजःकान्तिमती । गौडीया नाम रीतिः । माधुर्यसौकुमार्ययोरभावात् समासबहुला अत्युल्बणपदा च । अत्र श्लोकः—

समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् ।
गौडीयामिति गायन्ति रीतिं रीतिविचक्षणाः ॥

उदाहरणम्—

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ॥
द्राक्पर्यस्तकपालसंपुटमितब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाऽद्यापि विश्राम्यति ॥ ॥१२॥

ओजः कान्तिमतीति ॥ प्रत्ययार्थं प्रत्याययति ॥ ओजः कान्तिश्च विद्येते इति ॥ अत्र भूमार्थेन मतुपा ओजःकान्त्योः प्राचुर्यप्रतिपादनानुकूलानामनुल्बणानामन्येषां गुणानामनिराकरणम् । प्रतिकूलयोस्तु माधुर्यसौकुमार्ययोरपवारणम् । अत एव दीर्घसमासत्वमत्युद्भटपदत्वं च सूचितम् । तदिदमभिसन्धायाह ॥ माधुर्यसौकुमार्ययोरभावादिति ॥ प्रतिपादितेऽर्थे प्राचामाभाणकं प्रमाणयति ॥ समस्तेति ॥ समस्तानि समासवृत्तिमापन्नानि, अत्युद्भटानि पदानि यस्या इति विग्रहः । लक्षिताया रीतेर्लक्ष्यमुपक्षिपति ॥ उदाहरणमिति ॥ एषा खलु, धनुर्धरधुरन्धरेण रघुनन्दनेन गाढाकर्षणात् खण्डिते खण्डपरशोः कोदण्डे तद्भङ्गसंघटितनिराघातघोषवर्णनोपोद्घातेन तस्यैव भुजबलभूमानमभिलक्षयतो लक्ष्मणस्योक्तिः । दोर्दण्डेन अञ्चितमाकृष्टम् । औचित्यादञ्चतिरत्र आकर्षणे वर्तते । ननु यद्याकर्षणमञ्चतेरर्थस्तर्हि, अपूजनार्थस्य तस्य "नाञ्चेः पूजायाम्" इति नलोपप्रतिषेधो न सिद्ध्येत् । "अञ्चेः पूजायाम्" इति इडागमश्च न स्यादिति न चोदनीयम् । अत्र कर्तृकर्मणोरभेदोपचारात् धुराधर्षधनुराकर्षणमेव पूजनं विवक्षितमित्यविरोधः । आर्योऽग्रजः । तदुक्तं मामहेन "भगवन्तोऽवरैर्वाच्या विद्वद्देवर्षिलिङ्गिनः । विप्रामात्याग्रजास्त्वार्यो नटीसूत्रभृतौ मिथः" इति ।

Digitized by Google

तस्य यद् बालचरितं ताडकावधादि धनुर्भङ्गान्तं तदेव प्रस्तावना । तत्र डिण्डमः । अत्र बालचरितस्य प्रस्तावनात्वनिरूपणेन रावणवधान्तस्य तस्य कुमारचरितस्यापि नाटकत्वमासूत्र्यते । तथाच कुमारचरितनाटकस्य बालचरितं प्रस्तावना प्राथमिकमङ्गलमिति परम्परितरूपकौचित्यमपि परिगृहीतं भवति । प्रस्तावनास्वरूपं दशरूपके प्रदर्शितम् । "सूत्रधारो नटीं ब्रूते पारिषं वा विदूषकम् । स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् । प्रस्तावना वा यत्र स्याद्" इति । अन्यच्च "वस्तुनः प्रतिपाद्यस्य तीर्थे प्रस्तावनोच्यते" इति । द्राक्पर्यस्ते झटिति चलिते कपाले शकले तयोः संपुटः समुद्रकस्तेन मितं परिमितं परिच्छिन्नं यद् ब्रह्माण्डं तदेव माण्डम् । तस्योदरे भ्राम्यन् समन्तात् पर्यटन् पिण्डितः संकोचितभण्डिमा यस्येति विग्रहः । तथाच पुराणम् । "अप एव ससर्जादौ तासु वीर्यमपासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः । तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरान् । स्वयमेवात्मनो ध्यानात् तदण्डमकरोद् द्विधा । ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे" इति । अद्यापि चिरातीतेऽपि टङ्कारे, ध्वनिः प्रतिश्रुतं, न विश्राम्यति न विरमति। अत्र बन्धस्य गाढौज्ज्वल्ययोरुत्कटत्वाद् उल्वणावोजःकान्तिगुणौ । समासभूयस्त्वोल्वणपदत्वे चातिस्फुटे ॥ १२ ॥

अथ पाञ्चालीं प्रपञ्चयति ।

माधुर्यसौकुमार्योपपन्ना पाञ्चाली ॥ १३ ॥

माधुर्येण सौकुमार्येण च गुणेनोपपन्ना पाञ्चाली नाम रीतिः। ओजःकान्त्यभावादनुल्वणपदा विच्छाया च । तथाच श्लोकः—

अश्लिष्टश्लथभावां तां पूरणच्छायया श्रिताम् ।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥

यथा—

ग्रामेऽस्मिन् पथिकाय नैव वसतिः पान्थाऽधुना दीयते
रात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवा ॥

Digitized by Google

तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत् कृतं
येनाऽद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति ॥

एतासु तिसृषु रीतिषु रेखास्विव चित्रं काव्यं प्रतिष्ठितमिति ॥ १३ ॥

माधुर्येति ॥ माधुर्यसौकुमार्यप्रतिपक्षयोरोजःकान्त्योरभावाद् बन्धस्य शैथिल्यमनुल्बणपदत्वं चेत्याह ॥ ओज इति ॥ अस्निष्टेति ॥ श्लोकः स्पष्टार्थः । उदाहरति ॥ ग्राम इति ॥ इयं हि कस्यचिद् ग्रामीणस्य गृहे निद्रातुं भद्रवेदिमधिशय्य पर्जन्यगर्जितैस्तर्जिते निजनिदेशाऽपचारनिष्कृपकुपितकुसुमशरशरव्रातपातक्लिष्टतया निर्विष्टवति कष्टां दशां वैदेशिके तद्दण्डपातभीतिसमाकुलायाः कुलवृद्धायाः पुनरन्यमध्वन्यं प्रत्युक्तिः । "पथः ष्कन्" "पन्थो ण नित्यम्" इति नित्यं गच्छतः पान्थत्वम् । अन्यस्य पथिकत्वमिति वृत्तिकारवचनादर्थभेदमाश्रित्य पथिकाय यदि वसतिर्न दीयेत तत् पान्थेन किमपराद्धमिति न चोदनीयम् । पान्थपथिकशब्दयोः पर्यायतयाभिधानदर्शनात् कविभिरविशेषेण प्रयुज्यमानत्वात् । "अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि" इत्यमरः ॥ तदिति ॥ अमङ्गलतयोच्चारयितुमनुचितत्वान्मरणं तच्छब्देन व्यपदिश्यते । करङ्कः शवः ।
रीतिस्वरूपं निरूप्य तदुपयोगं सदृष्टान्तमाचष्टे ॥ एतास्विति ॥१३॥

नन्वेतास्तिस्रो वृत्तयः समशीर्षकतया किं कविभिरुपादेयाः ? । नेत्याह ।

तासां पूर्वा ग्राह्या गुणसाकल्यात् ॥ १४ ॥

तासां तिसृणां रीतीनां पूर्वा वैदर्भी ग्राह्या । गुणानां साकल्यात् ॥ १४ ॥

तासामिति ॥ वृत्तिः स्पष्टार्था ॥ १४ ॥

न पुनरितरे स्तोकगुणत्वात् ॥ १५ ॥

इतरे गौडीयपाञ्चाल्यौ न ग्राह्ये । स्तोकगुणत्वात् ॥ १५ ॥

Digitized by Google

प्रयोजकत्वाभावादन्ययोर्न ग्राह्यत्वमित्याह । नेति ॥ १५ ॥

तदारोहणार्थमितराभ्यास इत्येके ॥ १६ ॥

तस्यां वैदर्भ्यां एवारोहणार्थमितरयोरपि रीतीरभ्यास इत्येके मन्यन्ते ॥ १६ ॥

वाहारोहपालस्य मेषारोहानुशीलनवद् वैदर्भीसन्दर्भलाभाय तदितराभ्यास इति केचिदाचक्षते । तत्पक्षं प्रतिक्षेप्तुमुपक्षिपति ॥ तदारोहणार्थमिति ॥ १६ ॥

तेषां मतं दूषयति ।

तच्च न, अतत्त्वशीलस्य तत्त्वानिष्पत्तेः ॥ १७ ॥

न ह्यतत्त्वं शीलयतस्तत्त्वं निष्पद्यते ॥ १७ ॥

तच्च नेति ॥ न ह्येतादृशं कर्म परिशीलयतस्तादृशकर्मकौशलं सिद्ध्यति ॥ १७ ॥

निदर्शनार्थमाह ।

न शणसूत्रवानाभ्यासे त्रसरसूत्रवान-
वैचित्र्यलाभः ॥ १८ ॥

न हि शणसूत्रवानमभ्यस्यन् कुविन्दस्त्रसरसूत्रवानवैचित्र्यं लभते ॥ १८ ॥

यथा लोके वाजिनमरुक्षतो राजपुत्रादेस्तदुपयोगिजान्यवश्यमजवगतिमण्डलीक्रियादिसिद्धये मेषारोहाभ्यासो दृश्यते । न तथा कस्यचिदपि कुविन्दस्य सूक्ष्मतन्तुवानकौशलसिद्धये गोणीवानाभ्यासो दृष्टः । तयाचैसादृश्येनोपयोगाभावात् । अतो वैदर्भीसन्दर्भलाभाय गौडीयपाञ्चालरीत्योरभ्यास इति मतमनादरणीयम् । शणसूत्रं गोण्यादुपादानम् । त्रसरसूत्रं श्लक्ष्णवस्त्रादुपादानम् ॥ वानमिति वयतेर्ल्युटिरूपम् ॥ १८ ॥

Digitized by Google

साऽपि समासाभावे शुद्धवैदर्भी ॥ १९ ॥

साऽपि वैदर्भी शुद्धवैदर्भी भण्यते । यदि समासवद् पदं न भवति ॥ १९ ॥

साऽपीति । स्पष्टम् ॥ १९ ॥

तस्यामर्थगुणसम्पदास्वाद्या ॥ २० ॥

तस्यां वैदर्भ्यामर्थगुणसम्पदास्वाद्या भवति ॥ २० ॥

शब्दभाग इवार्थभागेऽपि गुणसम्पत्तिर्वैदर्भ्युपरागादास्वादनीयेत्याह ॥ तस्यामिति ॥ वैदर्भरीत्यवष्टम्भादर्थेऽप्यारोपिता गुणसम्पदास्वादनीयेत्यर्थः ॥ २० ॥

अमुमेवार्थं कैमुतिकन्यायेन समर्थयते ।

तदुपारोहादर्थगुणलेशोऽपि ॥ २१ ॥

तदुपधानतः खल्वर्थलेशोऽपि स्वदते । किमङ्ग ! पुनरर्थगुणसम्पत् । तथाचाहुः । किन्त्वस्ति काचिददपरैव पदानुपूर्वी यस्यां न किञ्चिदपि किञ्चिदिवावभाति । आनन्दयत्यथ च कर्णपथं प्रयाता चेतः सतामऽमृतदृष्टिरिव प्रविष्टा । "वचसि यमधिगम्य स्पन्दते वाचकश्रीर्वितथमवितथत्वं यत्र वस्तु प्रयाति । उदयति हि स तादृक् क्वापि वैदर्भरीतौ सहृदयहृदयानां रञ्जकः कोऽपि पाकः" ॥२१॥

तदुपधानत इति ॥ उपधानमुपरञ्जनम् । "अङ्गेत्यामन्त्रणेऽव्ययम्" इत्यमरः । उक्तार्थेऽभियुक्तोक्तिमभिव्यनक्ति । तथाचाहुरिति ॥ किन्त्वस्तीति ॥ अत्र "जीवन् पदार्थपरिरम्भणमन्तरेण शब्दाऽवधिर्भवति न स्फुरणेन सत्यम्" इति पूर्वार्धं पठन्ति ।
ननु पदपदार्थयोर्गुणचमत्कारो वैदर्भीप्रसादलभ्य इति यदुक्तं, तदयुक्तम् । पदार्थपरिरम्भणमन्तरेण वैदर्भीस्फुरणमात्रेण जीवन्त्या वाक्यविभान्तेरसम्भवादिति शङ्कानमनुभाषते ॥ जीवन्निति ॥

Digitized by Google

जीवन् = तर्कवाक्यवैलक्ष्येण सहृदयहृदयाह्लादकारीत्यर्थः । शब्दावर्थवाक्यविभान्तिः । यदुक्तं शङ्कुनवादिना तत् सत्यमस्त्येव । किन्तु पदार्थव्यतिरिक्ता तत उत्कृष्टा पदसंघटनापरिपाटी काचिदस्ति । सा च पदपदार्थयोः सञ्जीवत्त्वायावश्यमङ्गीकरणीयेत्याह ॥ किन्त्विति ॥ यस्यां पदानुपूर्व्यां, न किञ्चिदपि = असदपिवस्तु, किञ्चिदिव सदिवावभाति । प्रबन्धप्रौढिप्रकटितपदकल्पनापरिपाटीवशात् कल्प्यं वस्तु प्रत्यक्षायमाणं प्रतिभासत इत्यर्थः । यदाहुः "अपारे काव्यसंसारे कविरेकः प्रजापतिः । यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते" इति ॥ वचसीति ॥ काव्यात्मके वाक्य इत्यर्थः । वाचकश्रीः शब्दसम्पत् ॥ यमधिगम्याधिशय्येत्यर्थः । स्पन्दते रसवर्षिणी भवति ॥ यत्र यस्मिन् वैदर्भीपाके ॥ वितथं नीरसं वस्तु ॥ अवितथत्वं सरसत्वं, प्रथाति । तदुक्तं लोचने । "जगद् ग्राव्णप्रख्यं निजरसभरात् पूरयति च" इति । अन्यच्च । "भावानचेतनानपि चेतनवच्चेतनानचेतनवत् । व्यवहारयति यथेच्छं सुकविः काव्ये स्वतन्त्रतया" इति ॥ शिष्टं स्पष्टम् ॥ २१ ॥

वैदर्भीनिष्ठत्वादर्थगुणसम्पदि वैदर्भीति व्यवहारोऽप्युपचर्यत इत्याह ।

साऽपि वैदर्भी तात्स्थ्यात् ॥ २२ ॥

साऽपीयमर्थगुणसम्पद् वैदर्भीत्युक्ता । तात्स्थ्यादित्युपचारतो व्यवहारं दर्शयति ॥ २२ ॥ इति श्रीपण्डितवरवामनविरचितकाव्यालङ्कारसूत्रवृत्तौ शारीरे प्रथमेऽधिकरणे द्वितीयोऽध्यायः ॥ अधिकारिचिन्ता, रीतिनिश्चयश्च ॥ १ ॥ २ ॥

साऽपीयमिति ॥ तस्मिन् तिष्ठतीति तत्स्थः । तस्य भावस्तात्स्थ्यम् । तस्माद् इत्युपचारे सम्बन्ध उक्तः ॥ २२ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां वामनालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालंकारकामधेनौ शारीरे प्रथमेऽधिकरणे द्वितीयोऽध्यायः समाप्तः ॥ १ ॥ २ ॥

Digitized by Google

प्रथमेऽधिकरणे तृतीयोऽध्यायः ।

वरिवस्यामि मनसा वचसामधिदैवतम् ।
लीलालाक्ष्यपदं यस्य चतुर्मुखचतुर्मुखी ॥ १ ॥

अध्यायान्तरमारभमाणः प्रागध्यायप्रपञ्चितमर्थं सङ्क्षिप्य दर्शयन्नध्यायद्वयमैदम्पर्यमासूत्रयति ।

अधिकारिचिन्तां रीतितत्त्वं च निरूप्य काव्याङ्गान्युपदर्शयितुमाह ।

लोको विद्या प्रकीर्णञ्च काव्याङ्गानि ॥ १ ॥

अधिकारिचिन्तामिति ॥ अङ्गिनि निरूपितेऽङ्गानां निरूपणमुचितमिति सङ्गतिः । अङ्गान्युद्दिशति ॥ लोक इति ॥ वर्णनीयमन्तरेण किं वर्ण्यत इति लोकः प्रथममुद्दिष्टः । ततश्च संस्कृताः शब्दाः । तदनु तदर्थाः । अथ वृत्तम् । अनन्तरमितिवृत्तवैचित्र्यहेतुः स्फुटरागं कलाकौशलम् । ततो रसोपयोगिकामव्यवहारः । ततश्चार्थानर्थविवेकहेतुर्दण्डनीतिः । पश्चाल्लक्ष्यज्ञत्वादय इत्युद्देशक्रमः । अत्र "नैसर्गकी च प्रतिभा श्रुतं च बहु निर्मलम् । अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः" इति । "शक्तिर्निपुणतालोकशास्त्राकाव्याद्यवेक्षणम् । काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे" इति उक्तनीत्या कवित्वबीजं प्रथमं परिगणनीयम् । यत्तु पश्चात् परिगणितमिति तद्भिन्नत्वम् ॥ १ ॥

उद्देशक्रमेणैतद् व्याचष्टे ।

लोकवृत्तं लोकः ॥ २ ॥

लोकः स्थावरजङ्गमात्मा । तस्य वर्तनं वृत्तमिति ॥ २ ॥

लोकशब्दोऽयमुपचाराल्लोकवर्तने वर्तत इत्याह ॥ लोकवृत्तमिति ॥ २ ॥

अथ विद्या उद्दिशति ।

शब्दस्मृत्यभिधानकोशाच्छन्दोविचितिकला-

Digitized by Google

कामशास्त्रदण्डनीतिपूर्वा विद्याः ॥ ३ ॥

शब्दस्मृत्यादीनां तत्पूर्वकत्वं पूर्वं काव्यबन्धेषु अपेक्षणीयत्वात् ॥ ३ ॥

शब्दस्मृतीति ॥ "शास्त्रतस्ते" इत्यत्र सूत्रे अलङ्कारविद्योपयोगस्य प्रागेव दर्शितत्वान्नात्र विद्यामध्ये परिगणितमित्यवगन्तव्यम् । शास्त्रशब्दः कलाकामशब्दाभ्यामभिसम्बन्धनीयः । तत्सम्बन्धं विनाऽपि अन्यत्र शास्त्रत्वप्रतिपत्तेः । पूर्वा इत्यनेन गणितविद्यादिपरिग्रहः । प्रधानस्योपकारकमङ्गमिति न्यायेन क्रमादङ्गानामङ्गिन्युपयोगं दर्शयिष्यन्नन्तरसूत्रावताराय पीठिकां प्रतिष्ठापयति ॥ शब्दस्मृत्यादीनामिति ॥ ३ ॥

तासां काव्याङ्गत्वं योजयितुमाह ।

शब्दस्मृतेः शब्दशुद्धिः ॥ ४ ॥

शब्दस्मृतेर्व्याकरणात् । शब्दानां शुद्धिः साधुत्वनिश्चयः कर्तव्यः । शुद्धानि हि पदानि निष्कम्पैः कविभिः प्रयुज्यन्ते ॥४॥

व्याकरणं हि मूलं सर्वविद्यानामिति युक्त्या प्रथमोद्दिष्टायाः शब्दविद्याया उपयोगं दर्शयति ॥ शब्दस्मृतेरिति ॥ व्याचष्टे ॥ शब्दस्मृतेर्व्याकरणादिति ॥ साधुत्वनिश्चयः । अस्मिन्नर्थे शब्दः साधुरिति निश्चयः । निष्कम्पैर्निर्भयैरित्यर्थः । अपशब्दप्रयोगे तु कविकाव्ययोरनादरणीयत्वप्रसङ्ग इति द्रष्टव्यम् । तदुक्तम् । "यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले । सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चाऽपशब्दैः" इति । दण्डिनाऽप्युक्तम् । "गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः । दुष्प्रयुक्ता पुनर्गौस्त्वं प्रयोक्तुः सैव शंसति" इति ॥ ४ ॥

अभिधानकोशतः पदार्थनिश्चयः ॥ ५ ॥

पदं हि रचनाप्रवेशयोग्यं भावयन् सन्दिग्धार्थत्वेन गृह्णीयान्न

Digitized by Google

वा जघ्नादिति काव्यबन्धविघ्नः । तस्मादभिधानकोशतः पदार्थनिश्चयः कर्तव्य इति । अपूर्वाभिधानलाभार्थत्वं त्वयुक्तमभिधानकोशस्य । अप्रयुक्तस्याप्रयोज्यत्वात् । यदि तर्हि प्रयुक्तं प्रयुज्यते किमितिसन्दिग्धार्थत्वमाशङ्कितं पदस्य । तन्न । तत्र सामान्येनार्थावगतिः सम्भवति । यथा नीवीशब्देन जघनवस्त्रग्रन्थिरुच्यत इति कस्यचिन्निश्चयः । स्त्रिया वा पुरुषस्य वेति संशयो "नीवी संग्रथनं नार्या जघनस्थस्य वाससः" इति नाममालाप्रतीकमपश्यत इति । अथ कथम् "विचित्रभोजनाभोगवर्धमानोदरास्थिना । केनचित् पूर्वमुक्तोऽपि नीवीबन्धः श्लथीकृतः" इति प्रयोगः । भ्रान्तेरुपचाराद्वा ॥ ९ ॥

पदं हीति । "आधानोद्धरणे तावद् यावद्दोलायते मनः" इत्युक्तनीत्या किमपि पदं काव्यबन्धे प्रयोगयोग्यं पुनः पुनश्चेतसि विनिवेशयन् कविरभिधानकोशपरिशीलनमन्तरेण सन्दिग्धार्थतया प्रयोक्तुं परित्यक्तुं वा नोत्सहते । अतो बन्धविघ्नो जायेत । तस्मादभिधानकोशतः पदस्यार्थं निश्चित्य निर्विचिकित्सं प्रयुञ्जीतेति । नन्वभिधानकोशस्येदमेव प्रयोजनमिति कोऽयं नियमः । अपूर्वपदप्रयोगलाभोऽपि किन्न स्यादिति चोद्यमनूद्यावद्यति ॥ अपूर्वेति ॥ तत्र हेतुमाह ॥ अप्रयुक्तस्येति ॥ कविभिरिति शेषः । "यदप्रयुक्तं कविभिरप्रयुक्तं तदुच्यते" इत्यप्रयुक्तस्य दोषस्य पददोषेषु लक्षितत्वात् । अप्रयोज्यत्वं चार्थाभिव्यक्तेरविलम्बेन समर्पकत्वाभावादिति द्रष्टव्यम् । यदि प्रयुक्तमेव पदं कविना प्रयुज्येत तर्हि कुतः सन्देहः स्यादिति शङ्कते ॥ यदि तर्हीति ॥ समाधत्ते ॥ सामान्येनेति ॥ "एषा हि मे रणगतस्य दृढप्रतिज्ञा द्रक्ष्यन्ति यन्न रिपवो जघनं हयानाम् ।" इति प्रयोगदर्शनात् । जघनशब्दः पृष्ठवंशाधरत्रिकमात्रमभिधत्त इत्यभिमन्यमानस्य कस्यचिन्नीवीशब्दो जघनवस्त्रग्रन्थिमेवाभिधत्त इति प्रतिपत्तिर्जायते । तच्च स्त्रिया वा पुरुषस्य वेति संशय उपपद्यत इत्यर्थः । नाममाला अभिधानकोशः । तस्यां प्रतीकमवयवम् । "अङ्गं प्रतीकोऽवयव" इत्यमरः । अपश्यतोऽपरिशीलयत इति या-

Digitized by Google

वत् । यद्येवं तर्हि प्रयोगविरोधः किं न स्यादिति शङ्कते ॥ अथ कथमिति ॥ विचित्रभोजनाभोगेत्यस्मिन् पद्ये पुंसि विषय नीवीशब्दप्रयोगः कथमिति शङ्कितुरभिप्रायः । परिहरति ॥ भ्रान्तेरिति ॥ भ्रान्तिप्रयुक्तोऽयं प्रयोगः । अथवा नीवीशब्दः पुरुषविषये लक्षणया प्रयुक्तः । पौरुषराहित्यप्रतिपत्तिः प्रयोजनमिति भावः ॥ ५ ॥

वृत्तविद्यायाः प्रयोजनं प्रस्तौति ।

छन्दोविचितेर्वृत्तसंशयच्छेदः ॥ ६ ॥

काव्याभ्यासाद् वृत्तसंक्रान्तिर्भवत्येव । किन्तु मात्रावृत्तादिषु क्वचित् संशयः स्यात् । अतो वृत्तसंशयच्छेदश्छन्दोविचितेर्विधेय इति ॥ ६ ॥

छन्दोविचितेरिति ॥ काव्येति ॥ नानावृत्तात्मकत्वात् काव्यस्य तत्परिशीलनाद् वृत्तस्वरूपप्रतिफलनमस्त्येव । तथापि मात्रावृत्तादिषु मात्राकल्प्येषु वैतालीयादिषु छन्दश्शास्त्रं विना निर्णयो दुष्कर इत्यर्थः । वैतालीयलक्षणं तु वृत्तरत्नाकरे । "षड् विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नोऽनिरन्तराः । न समाऽत्र पराश्रिताः कला वैतालीयेऽन्ते रलौ गुरुः" इति ॥ ६ ॥

कलाशास्त्रेभ्यः कलातत्त्वस्य संवित् ॥ ७ ॥

कला गीतनृत्यचित्रादिकास्तासामभिधायकानि शास्त्राणि विशाखिलादिप्रणीतानि कलाशास्त्राणि तेभ्यः कलातत्त्वस्य संवित् संवेदनम् । न हि कलातत्त्वानुपलब्धौ कलावस्तु सम्यग् निबद्धुं शक्यमिति ॥ ७ ॥

कला इति ॥ दिङ्मात्रं तु लोकतो विज्ञायते । तत्त्वज्ञानं तु तच्छास्त्रत एव संपद्यते इत्यर्थः । कला नृत्यगीतादयश्चतुःषष्टिः । उपकलाश्चतुश्शतम् । अत्र कलानामुद्देशः कृतो भामहेन । "नृत्तं गीतं तथा वाद्यमालेख्यं मणिभूमिकाः । दशनाद्यङ्गरागश्च माल्यगुम्फविचित्रता । वेणुवीणादिकालापपाटवं शेखरक्रिया । नेपथ्यं गन्धयुक्तिश्च कर्णपत्रक्रियाभिधा । विशेषभेद्यक्लृप्तिश्च नानाभू-

Digitized by Google

षणयोजनम् । इन्द्रजालं कौचिमारं सामुद्रं हस्तलाघवम् । सूची-वानक्रिया सूत्रक्रिया सलिलवाद्यकम् । सूपशास्त्रपरिज्ञानं शारिका-शुकवादनम् । रसवादो वास्तुविद्या तक्षणं मेधिकोत्करः । स-जीवनिर्जीवद्यूतशास्त्रं संपाद्यपाटवम् । धोरणामातृकायन्त्रं मातृ-काकाव्यलक्षणम् । आकर्षकक्रीडितं च निमित्तागमवेदनम् । अग्न्य-म्बुसेनादिस्तम्भो विषप्रतिविषागमः । पाञ्चालीनृत्तकरणं तण्डुला-दिपालिक्रिया । प्रहेलिकादुर्वचकप्रतिमायादियोजनम् । मन्त्रवाद-परिज्ञानं विशीर्णाक्षरमुष्टिका । सर्वाभिधानकोशोक्तिः परकायप्रवे-शनम्।जयव्यायामचित्राप्तिः पत्रिकाचित्रकर्तनम् । रत्नोत्पत्तिस्थान-शास्त्रं दर्पणादिलिपिक्रिया । तिरस्करिण्याद्यावाप्तिः पुष्पशाटकि-कागमः । हस्त्यश्वलक्षणज्ञानं तिर्यग्हृदयवेदनम् । परेङ्गितपरिज्ञानं जलयानागमज्ञता । परचेतःप्रवेशश्च चतुष्षष्टिरिमाः कलाः । अ-न्या उपकलाः प्रोक्तास्तासां संख्याश्चतुश्शतम् । आभिरेव प्रपञ्चो-ऽयं वर्तते विजयी स्फुटम्" । अत्र ग्रन्थविस्तरभयादुपकलानामुद्देशो न कृतः । कलातत्त्वसंवित्तेरुपयोगं दर्शयति ॥ न हीति ॥ ७ ॥

कामशास्त्रतः कामोपचारस्य ॥ ८ ॥

संविदित्यनुवर्तते । कामोपचारस्य संवित् कामशास्त्रत इति। कामोपचारबहुलं हि वस्तु काव्यस्येति ॥ ८ ॥

कामोपचारबहुलमिति ॥ वस्तु काव्यप्रतिपाद्यमितिवृत्तम् । काव्यस्य रसवत्त्वावश्यम्भावाद्रसस्य च शृङ्गारप्रमुखत्वात् । तस्य च कामोपचारप्रचुरत्वात् । काव्यवस्त्वपि कामोपचारबहुलमिति भावः ॥ ८ ॥

दण्डनीतेर्नयापनययोः ॥ ९ ॥

दण्डनीतेरर्थशास्त्रान्नयस्यापनयस्य च संविदिति । तत्र षाड्गुण्यस्य यथावत् प्रयोगो नयः । तद्विपरीतोऽपनयः । न ता-ऽविज्ञाय नायकप्रतिनायकयोर्वृत्तं शक्यं काव्ये निबद्धुमिति॥ ९ ॥

दण्डनीतेरुपयोगं दर्शयति ॥ दण्डनीतेरिति ॥ षाड्गुण्यस्ये-ति ॥ संधिविग्रहयानासनद्वैधीभावसमाश्रयाः षड् गुणाः । षड्गुणा

Digitized by Google

एव षाड्गुण्यम् । स्वार्थकः ष्यञ् ॥ ९ ॥

इतिवृत्तकुटिलत्वं च ततः ॥ १० ॥

इतिहासादिरितिवृत्तम् । काव्यशरीरम् । तस्य कुटिलत्वम् । ततो दण्डनीतेराबलीयसप्रभृतिप्रयोगव्युत्पत्तौ व्युत्पत्तिमूलत्वात्तस्याः । एवमन्यासामपि विद्यानां यथास्वमुपयोगो वर्णनीय इति ॥ १० ॥

कुटिलत्वमिति ॥ यथा तापसवत्सराजादौ ॥ आबलीयसेति ॥ आबलीयांसमधिकृत्य कृतमधिकरणमाबलीयसम् । तत्प्रभृतौ । प्रयोगा मित्रभेदसुहृल्लाभादयः । तेषां व्युत्पत्तौ । सा दण्डनीतिर्मूलमिति ॥ एवमन्यासामिति ॥ गणितादिविद्यानामित्यर्थः । एवमष्टादशभेदभिन्नानामशेषाणामपि विद्यानां काव्याङ्गत्वमुक्तं भवति । तासामुपयोगश्च यथास्वं लब्धवर्णैर्द्रष्टव्यः । यदाहुः । " न स शब्दो न तद्वाच्यं न सा विद्या न सा कला । जायते यन्न काव्याङ्गं महाभारो गुरुः कवेः" इति ॥ १० ॥

लक्ष्यज्ञत्वमभियोगो वृद्धसेवाऽवेक्षणं प्रतिभानमवधानं च प्रकीर्णम् ॥ ११ ॥

प्रकीर्णं वर्णयति ॥ लक्ष्यज्ञत्वमिति ॥ ११ ॥

तत्र काव्यपरिचयो लक्ष्यज्ञत्वम् ॥ १२ ॥

अन्येषां काव्येषु परिचयो लक्ष्यज्ञत्वम् । ततो हि काव्यबन्धस्य व्युत्पत्तिर्भवति ॥ १२ ॥

अन्येषामिति ॥ कवीनामिति शेषः ॥ १२ ॥

काव्यबन्धोद्यमोऽभियोगः ॥ १३ ॥

बन्धनं बन्धः । काव्यस्य बन्धो रचना काव्यबन्धः । तत्रोद्यमोऽभियोगः । स हि कवित्वप्रकर्षमादधाति ॥ १३ ॥

Digitized by Google

बन्धशब्दो भावसाधन इत्याह ॥ बन्धनं बन्ध इति ॥ पूर्वं कथापरीक्षा । तत्राऽधिकावापोद्वापौ फलपर्यन्ततानयनम् । रसं प्रतिजागरूकता । रसोचितविभावादिवर्णनायाम् अलङ्कारौचित्यम् इत्याद्युल्लेखपूर्वकं गुम्फनं काव्यबन्धः । तत्रोद्यमोऽभियोगः ॥ १३ ॥

काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा ॥ १४ ॥

काव्योपदेशे गुरव उपदेष्टारः । तेषां शुश्रूषणं वृद्धसेवा । ततः काव्यविद्यायाः संक्रान्तिर्भवति ॥ १४ ॥

काव्योपदेश इति ॥ यद्यपि श्रोतुमिच्छा शुश्रूषेति शब्दव्युत्पत्तिः । तथापि "वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्" इति निरूढत्वेनाभिधानात् सामानाधिकरण्यं घटते ॥ १४ ॥

पदाधानोद्धरणमवेक्षणम् ॥ १५ ॥

पदस्याधानं न्यासः । उद्धरणमपसारणम् । तयोः खल्ववेक्षणम् । अत्र श्लोकौ ।

आधानोद्धरणे तावद् यावद्दोलायते मनः ।
पदस्य स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती ॥
यत् पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम् ।
तं शब्दन्यासनिष्णाताः शब्दपाकं प्रचक्षते ॥ ॥ १५ ॥

अवेक्षणमाह ॥ पदाधानेति ॥ अत्र भामहेन भणितं प्रमाणयति ॥ आधानोद्धरणे इति ॥ श्लोकद्वयेन क्रमादन्वयव्यतिरेकाभ्यां पदानां स्थैर्यं सम्पादनीयमित्युक्तम् । इत्थमर्थपाकोऽपि समर्थनीयः ॥ १५ ॥

कवित्वबीजं प्रतिभानम् ॥ १६ ॥

कवित्वस्य बीजं कवित्वबीजम् । जन्मान्तरागतसंस्कारविशेषः कश्चित् । यस्माद्विना काव्यं न निष्पद्यते । निष्पन्नं वा हास्याऽऽस्पदं स्यात् ॥ १६ ॥

Digitized by Google

कवित्वस्येति ॥ बीजमभिनवपदार्थस्फुरणहेतुः । संस्कारो वासनात्मा । यदाह भट्टगोपालः । "कवित्वस्य लोकोत्तरवर्णनानैपुणलक्षणस्य बीजमुपादानस्थानीयः संस्कारविशेषः । कार्यकल्पनीया काचिद्वासनाशक्तिः" इति । काव्यादर्शेऽपि । "न विद्यते यद्यपि पूर्ववासना गुणानुबन्धि प्रतिभानमद्भुतम्" इति ॥ यस्माद्विनेति ॥ पृथग्विनादिसूत्रे विकल्पेन तृतीयाविधानात् पक्षे पञ्चमी । हास्यायतनं परिहासास्पदम् । तादृशं हि काव्यमनर्थाय भवति कवेः । तदुक्तम् । "नाऽकवित्वमधर्माय मृतये दण्डनाथ वा । कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः" इति ॥ १६ ॥

चित्तैकाग्र्यमवधानम् ॥ १७ ॥

चित्तस्यैकाग्र्यं बाह्यार्थानिवृत्तिस्तदवधानम् । अवहितं हि चित्तमर्थान् पश्यति ॥ १७ ॥

चित्तस्येति ॥ बहिरिन्द्रियव्यापारविरामान्मनसो बाह्यार्थाप्रक्रियवधानम् । अवधानस्य प्रयोजनमभिधत्ते ॥ अवहितमिति ॥ अर्थान् पश्यति ॥ अभिनवपदार्थानप्रतिबन्धमुल्लिखतीत्यर्थः ॥ १७ ॥

तद्देशकालाभ्याम् ॥ १८ ॥

तदवधानं देशात् कालाच्च समुत्पद्यते ॥ १८ ॥

तद्देशकालाभ्यामिति ॥ अर्थाद्विशिष्टाभ्यां समुच्चिताभ्यामिलक्षणलक्ष्यम् ॥ १८ ॥

कौ पुनर्देशकालावित्याह ।

विविक्तो देशः ॥ १९ ॥

विविक्तो निर्जनः ॥ १९ ॥

विविक्तो निर्जनप्रदेशः । "विविक्तौ पूतविजनौ" इत्यमरः ॥१९॥

रात्रियामस्तुरीयः कालः ॥ २० ॥

रात्रेर्यामो रात्रियामः प्रहरस्तुरीयश्चतुर्थः काल इति । तद्व-

Digitized by Google

शाद्विषयोपरतं चित्तं प्रसन्नमवधत्ते ॥ २० ॥

तुरीय इति ॥ प्रथमादिषु त्रिषु प्रहरेष्वाहारविहारनिद्रासु सांमुख्यं मनसः । पाश्चमे तु प्रहरे प्रसादः सम्भवतीति तुरीय इत्युक्तम् । यद्वा, यद्यपि प्रथमादीनामपि चतुःसंख्यापूरकत्वं तथाऽप्युपादानसामार्थ्यादिह पश्चिमो यामस्तुरीय इति गम्यते । तथाच कालिदासः । "पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना" इति। माघोऽपि । "गहनमपरारात्रप्रासबुद्धिप्रसादाः कवय इव महीपाश्चिन्तयन्त्यर्थजातम्" इति ॥ २० ॥

एवं काव्याङ्गान्युपदिश्य काव्यविशेषकथनार्थमाह ।

काव्यं गद्यं पद्यं च ॥ २१ ॥

गद्यस्य पूर्वनिर्देशो दुर्लक्ष्यविशेषत्वेन दुर्बन्धत्वात् । तथाहुः- "गद्यं कवीनां निकषं वदन्ति" ॥ २१ ॥

वृत्तवर्तिष्यमाणयोः सङ्गतिमुल्लिङ्घयन् काव्यभेदान् कथयितुमाह ॥ एवमिति ॥ गद्यमिति । "गद व्यक्तायां वाचि" इति धातोः "गदमदचरयमश्चानुपसर्गे" इति कर्मणि यत्प्रत्यये सति गद्यमिति रूपम् । यद्वा "स्तनगदी देवशब्दे" इति चौरादिकणिजन्तात् "अचो यत्" इति यत्प्रत्यये सति गद्यमिति रूपम् । पादेषु भवं पद्यम् । शरीरमिति विवक्षायां "शरीरावयवाच्च" इति भवार्थे यत्प्रत्यये भसंज्ञायां पदादेशे च सति पद्यमिति रूपम् । अनेन पद्यसामान्यलक्षणं सूचितं भवति । तदुक्तं काव्यादर्शे । "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" इति । गद्यस्य पूर्वनिर्देशे हेतुमाह ॥ गद्यस्येति ॥ दुर्लक्ष्याः कृच्छ्रेण लक्ष्या विशेषा गुरुलघुनियमादयो यस्य तस्य भावः । तेन हेतुना दुर्बन्धं कृच्छ्रेण बन्धुमशक्यम् । तस्य भावस्तस्मात् पूर्वनिर्देशः कृत इति शेषः । अत्राभाणकमपि दर्शयति ॥ तथाहुरिति ॥ निकषो हेमादिकषणोपलः । "निकषस्तु घृषिर्घृष्यो हेमादिनिकषोपलः" इति वैजयन्ती । कनकानामिव कवीनां प्रकर्षापकर्षपरीक्षास्थानमिति यावत् ॥ २१ ॥

गद्यभेदान् गणयितुमाह ।

Digitized by Google

तच्च त्रिधाभिन्नमिति दर्शयितुमाह ।

गद्यं वृत्तगन्धि चूर्णमुत्कलिकाप्रायं च ॥ २२ ॥

तच्चेति ॥ वृत्तगन्धि क्वचिदंशे वृत्तच्छायानुकारि । चूर्णपदेनोपचारादव्यस्तपदसमाहारो लक्ष्यते । तेन व्यस्तपदबहुलं चूर्णम् ॥ उत्कलिकाप्रायमिति ॥ उत्कलिकोत्कण्ठा । "उत्कण्ठोत्कलिके समे" इत्यमरः । उत्कलिकायाः प्रयोगबाहुल्यं यस्मिंस्तद् उत्कलिकाप्रायं गद्यम् । यस्मिञ्छ्रूयमाणे श्रोतृणामुत्कण्ठा बहुला भवतीत्यर्थः । कलिकाशब्दोऽत्र लक्षणया रुहरुहिकायां वर्तते । उल्लसन्तीं कलिकां रुहरुहिकां प्रैति प्राप्नोतीत्युत्कलिकाप्रायम् । यत्र पदसन्दर्भपरिपाटी काण्डोपकाण्डसंरोहशालिनी कलिकेवोल्लसति तदुत्कलिकाप्रायमित्यर्थः ॥ २२ ॥

तल्लक्षणान्याह ।

पद्यभागवद् वृत्तगन्धि ॥ २३ ॥

पद्यस्य भागाः पद्यभागाः । तद्वद् वृत्तगन्धि । यथा "पातालतालुतलवासिषु दानवेषु" इति । अत्र हि वसन्ततिलकारूपवृत्तस्य भागः प्रत्यभिज्ञायते ॥ २३ ॥

विशेषलक्षणानि विवरीतुमाह ॥ तल्लक्षणानीति ॥ वसन्ततिलकेति ॥ "उक्तं वसन्ततिलकं तभजा जगौ गः" इति ॥ २३ ॥

अनाविद्धललितपदं चूर्णम् ॥ २४ ॥

अनाविद्धान्यदीर्घसमासानि ललितान्यनुद्धतानि पदानि यस्मिंस्तदनाविद्धललितपदं चूर्णमिति । यथा "अभ्यासो हि कर्मणां कौशलमावहति । न हि सकृच्छिपातमात्रेणोदबिन्दुरपि प्रावणिं निम्नतामादधाति" ॥ २४ ॥

अनाविद्धेति ॥ वृत्तिः स्पष्टार्था । उदाहरति ॥ अभ्यास इति ॥ न हि सकृदिति ॥ न हीति निपातसमुदायः प्रतिषेधवाचकः सकृद्धि-

Digitized by Google

त्यनेन सम्बद्ध्यते । तथाचासकृदित्यर्थः सम्पद्यते । मात्रशब्देन सहकारिमात्रादिर्व्यावर्त्यते । तेनोदबिन्दुरप्यसकृन्निपातमात्रेण प्रावणि पाषाणे निम्नतामाद्धातीत्यन्वयमुखेन पूर्ववाक्यार्थः समर्थितो भवति ॥ २४ ॥

विपरीतमुत्कलिकाप्रायम् ॥ २५ ॥

विपरीतमाविद्धोद्धतपदमुत्कलिकाप्रायम् । यथा "कुलिशशिखरखरनखरमचयप्रचण्डचपेटापाठितमचमातङ्गकुम्भस्थलगलन्मदच्छटाच्छुरितचारुकेसरभारभासुरमुखे केसरिणि" ॥ २५ ॥

विपरीतमिति ॥ सुगमम् । चपेटा करतलाघातः । "चपेटः प्रत्तले पाणौ तदाघाते स्त्रियाम्" इत्यमरशेषः ॥ २५ ॥

पद्यं विभजते ॥

पद्यमनेकभेदम् ॥ २६ ॥

पद्यं खल्वनेकेन समार्धसमविषमादिना भेदेन भिन्नं भवति॥२६

समेति ॥ समवृत्तमर्धसमवृत्तं विषमवृत्तम् । आदिशब्देनार्यावैतालीयादिमात्रावृत्तानां परिग्रहः । समवृत्तादिलक्षणमुक्तं भामहेन । "सममर्धसमं वृत्तं विषमं च त्रिधा मतम् । अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः । तच्छन्दःशास्त्रतत्त्वज्ञाः समवृत्तं प्रचक्षते । प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् । द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते । यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् । तदाहुर्विषमं वृत्तं छन्दश्शास्त्रविशारदाः" ॥ २६ ॥

गद्यपद्ययोरप्यवान्तरभेदावाह ।

तदनिबद्धं निबद्धं च ॥ २७ ॥

तदिदं गद्यपद्यरूपं काव्यमनिबद्धं निबद्धं च । अनयोः प्रसिद्धत्वाल्लक्षणं नोक्तम् ॥ २७ ॥

तदिति ॥ गद्यपद्यात्मकं काव्यं प्रकृतं तच्छब्देन परामृश्यत इति व्याचष्टे ॥ तदिदं गद्यपद्यरूपमिति ॥ व्याख्याने ज्ञाऽवमव्या-

Digitized by Google

स्थाने मौख्यमित्यत आह ॥ अनयोः प्रसिद्धत्वादिति ॥ अनिबद्धं मुक्तकं निबद्धं प्रबन्धरूपमिति प्रसिद्धिः । मुक्तकलक्षणमुक्तं भामहेन । "प्रथमं मुक्तकादीनामृजुलक्षणमुच्यते । यदेव गाम्भीर्यौदार्यशौर्यैरीतिमतिस्पृशा । भवेन्मुक्तकमेकेन द्विकं ह्याभ्यां त्रिकं त्रिभिः" इति । निबद्धानि सर्गबन्धादीनि । तल्लक्षणं काव्यादर्शे । "सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्" इत्यादिना द्रष्टव्यम् ॥ २७ ॥

अनयोरभ्यासक्रममाह ।

क्रमसिद्धिस्तयोः स्रगुत्तंसवत् ॥ २८ ॥

तयोरित्यनिबद्धं निबद्धं च परामृश्यते । क्रमेण सिद्धिः क्रमसिद्धिः । अनिबद्धसिद्धौ निबद्धसिद्धिः स्रगुत्तंसवत् । यथा स्रजि मालायां सिद्धायामुत्तंसः शेखरः सिद्ध्यतीति ॥ २८ ॥

क्रमसिद्धिरिति ॥ अनिबद्धमभ्यस्य निबद्धरचनायां यतितव्यमित्यर्थः । अत्र दृष्टान्तः ॥ स्रगुत्तंसवदिति ॥ २८ ॥

अनिबद्धसिद्धिमात्रेण कविम्मन्यमानानपवदितुमाह ।

केचिदनिबद्ध एव पर्यवसितास्तद्दूषणार्थमाह ।

नानिबद्धं चकास्त्येकतेजःपरमाणुवत् ॥ २९ ॥

न खल्वनिबद्धं काव्यं चकास्ति दीप्यते । यथैकतेजःपरमाणुरिति । अत्र श्लोकः—

असङ्कुलितरूपाणां काव्यानां नास्ति चारुता ।
न प्रत्येकं प्रकाशन्ते तैजसाः परमाणवः ॥ २९ ॥

केचिदिति ॥ प्रावादुकसम्मतिं दर्शयति ॥ अत्र श्लोक इति ॥ असङ्कुलितरूपाणामनिबद्धरूपाणामित्यर्थः ॥ २९ ॥

निबद्धेषु तरतमभावं निरूपयति ।

सन्दर्भेषु दशरूपकं श्रेयः ॥ ३० ॥

सन्दर्भेषु प्रबन्धेषु दशरूपकं नाटकादि श्रेयः ॥ ३० ॥

Digitized by Google

सन्दर्भेष्विति ॥ रूपकस्वरूपं निरूपितं दशरूपके । "अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते । रूपकं तत्समारोपाद्दशधैव रसाऽऽश्रयम् " इति । भावप्रकाशनेऽपि "रूपकं तद्भवेद्रूपं दृश्यत्वात् प्रेक्षकैरिदम् । रूपकत्वं तदारोपात् कमलारोपवन्मुखे" इति । दशरूपकादि— "नाटकं सप्रकरणं भाणः प्रहसनं डिमः । व्यायोगसमवाकारौ वीथ्यङ्केहामृगा दश" इति । दशानां रूपकाणां समाहारो दशरूपकम् । पात्रादित्वात् स्त्रीत्वप्रतिषेधे नपुंसकत्वम् । श्रेयः=अतिशयेन प्रशस्यमित्यर्थः ॥ ३० ॥

श्रेयस्त्वे हेतुं पृच्छति ।

कस्मात् तदाह ।

तद्धि चित्रं चित्रपटवद्विशेषसाकल्यात् ॥ ३१ ॥

तद्दशरूपकं हि यस्माच्चित्रं चित्रपटवत् । विशेषाणां साकल्यात् ॥ ३१ ॥

कस्मादिति ॥ हेतुमुपन्यस्यति ॥ तदिति ॥ ३१ ॥

विशेषाणां भाषाभेदादिरूपाणां कथाख्यायिकादीनां महाकाव्यभेदानामस्मादेव वस्तुविन्यासकल्पनमिति प्रकारान्तरेणाऽपि श्रेयस्त्वमस्य प्रतिपादयितुमाह ।

ततोऽन्यभेदकल्पनिः ॥ ३२ ॥

ततो दशरूपकादन्येषां भेदानां कल्पनिः कल्पनमिति । दशरूपकस्यैव हीदं सर्वं विलसितम् । यच्च कथाख्यायिकं महाकाव्यमिति, तल्लक्षणं च नातीव हृदयङ्गमित्युपेक्षितमस्माभिः । तदन्यतो ग्राह्यम् ॥ ३२ ॥ इति श्रीकाव्याऽलङ्कारसूत्रवृत्तौ शारीरे प्रथमेऽधिकरणे तृतीयोऽध्यायः ॥ १ ॥ ३ ॥ ॥ काव्याङ्गानि काव्यविशेषाश्च ॥ समाप्तं चेदं शारीरं प्रथममधिकरणम् ॥

तत इति ॥ इदं सर्वमिति ॥ कथाख्यायिकादिमहाकाव्यस्वरूपं विलसितमित्यस्य व्याख्यानं खण्डशः कृतमिति । कथा चाख्या-

Digitized by Google

यिका च महाकाव्यमिति व्यपदिश्यते ॥ तदिदं सर्वमिति व्याक्रम्य योजनीयम् । यदि कथाख्यायिके महाकाव्ये तर्हि तल्लक्षणं किमिति न प्रदर्शितमिति तत्राह ॥ तल्लक्षणमिति ॥ यदि केनचित्तल्लक्षणमपेक्षितं तदू भामहालङ्कारादौ द्रष्टव्यमित्यत आह ॥ तदन्यत इति ॥ नाटकादिलक्षणं तु ग्रन्थविस्तरभयादस्माभिर्न लिखितम् ॥ ३२ ॥

इति कृतरचनायामिन्दुवंशोद्भवेन
त्रिपुरहरधरित्रीमण्डलाखण्डलेन ॥
ललितवचसि काव्यालंक्रियाकामधेना-
वऽधिकरणमयासीदादिमं पूर्तिमेतत् ॥ १ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां वामनालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालङ्कारकामधेनौ शारीरे प्रथमेऽधिकरणे तृतीयोऽध्यायः ॥ १ ॥ ३ ॥



Digitized by Google

अथ द्वितीयाधिकरणम् । तत्र प्रथमोऽध्यायः ।

निष्कलङ्कनिशाकान्तगर्वसर्वङ्कषप्रभाम् ।
कविकामगवीं वन्दे कमलासनकामिनीम् ॥ १ ॥

दोषदर्शनं द्वितीयमधिकरणमारभ्यते । अधिकरणद्वयसंबन्धमेव बोधयति ।

काव्यशरीरे स्थापिते काव्यसौन्दर्यापक्षेपहेतवस्त्यागाय दोषा विज्ञातव्या इति दोषदर्शनं नामाधिकरणमारभ्यते । दोषस्वरूपकथनार्थमाह ।

गुणविपर्ययात्मानो दोषाः ॥ १ ॥

गुणानां वक्ष्यमाणानां ये विपर्ययास्तदात्मानो दोषाः ॥ १ ॥

काव्यशरीर इति ॥ सौन्दर्यस्य गुणालङ्कारघटितचारुत्वस्याऽऽक्षेपः स्वस्थानात् प्रच्यावनं तस्य हेतवस्तथाविधा दोषाः कविना ज्ञातव्या इत्यनेन दोषज्ञानस्यावश्यकर्तव्यतोक्ता । तेषामज्ञाने परित्यागात्मनः फलस्य दुर्लभत्वादिति भावः । दृश्यन्तेऽस्मिन् दोषा इति दोषदर्शनम् । अधिकरणार्थे ल्युट् । दोषसमान्यलक्षणं वक्तुं सूत्रमवतारयति ॥ दोषस्वरूपेति ॥ गुणानामिति ॥ विपरीयन्त इति विपर्यया, विपरीताः । कर्मार्थेऽच् प्रत्ययः । त एवात्मानो येषां ते विपर्ययात्मानो विपरीतस्वरूपाः, न त्वऽभावरूपा इत्यर्थः । अनेन गुणविपरीतस्वरूपत्वं दोषसामान्यलक्षणमुक्तं भवति ॥ १ ॥

अर्थतस्तदवगमः ॥ २ ॥

गुणस्वरूपनिरूपणात्तेषां दोषाणामर्थादवगमोऽर्थसिद्धिः॥२॥

ननु गुणेष्ववगतेषु तद्विपर्ययस्वरूपा दोषा विनापि लक्षणोदाहरणाभ्यां सामर्थ्यात् प्रेक्षावद्भिरुत्प्रेक्षितुं शक्यन्ते । किं लक्षणादिप्रपञ्चनेनेत्याशङ्क्य सूत्रमनुभाषते ॥ अर्थत इति ॥ २ ॥

आशङ्कामिमामपाकर्तुमनन्तरसूत्रं व्याचष्टे ।

Digitized by Google

किमर्थं ते पृथक् प्रपञ्च्यन्त इत्याह ।

सौकर्याय प्रपञ्चः ॥ ३ ॥

सौकर्यार्थं प्रपञ्चो विस्तरो दोषाणाम् । उद्दिष्टा लक्षिता हि दोषाः सुज्ञाना भवन्ति ॥ ३ ॥

सौकर्यायेति ॥ दोषस्वरूपे हि प्रेक्षावतामुत्प्रेक्षितुं शक्येऽपि व्युत्पित्सूनधिकृत्य प्रवृत्तत्वाच्छास्त्रस्य । तैस्तु पदपदार्थवाक्यवाक्यार्थदोषाणां स्थूलसूक्ष्माणामुद्देशलक्षणपरीक्षाभिर्विना दुरवगमत्वात् तेषां दोषविवेकस्य सौकर्याय प्रपञ्च इत्यर्थः ॥ उद्दिष्टा इति ॥ उद्दिष्टा नामतः परिगणिताः । लक्षिताः परस्परव्यावृत्त्या दर्शिताः । दोषाः ॥ सुज्ञानाः ॥ सुखेन ज्ञातव्या भवन्ति । "आतो युच्" इति ज्ञलर्थे युच् प्रत्ययः । अस्मिन्नधिकरणे लक्षणीया दोषाः काव्यस्याप्रसाधुत्वापादकाः स्थूला इत्यवगन्तव्यम् । यद् वक्ष्यति "ये त्वन्ये शब्दार्थदोषाः सूक्ष्माश्ते गुणविवेचने वक्ष्यन्त" इति ॥ ३ ॥

पददोषान् दर्शयितुमाह ।

दुष्टं पदमसाधु कष्टं ग्राम्यमप्रतीतमनर्थकं च ॥ ४ ॥

शब्दार्थशरीरं हि काव्यम् । अत्र शब्दः पदवाक्यात्मकः । अर्थश्च पदार्थवाक्यार्थरूपः । तत्र पदपदार्थप्रतिपत्तिपूर्विका वाक्यवाक्यार्थप्रतिपत्तिरिति क्रममभिसन्धाय प्रथमं पददोषान् प्रतिपादयितुमाह ॥ पददोषानिति ॥ दुष्टं पदमिति प्रत्येकं सम्बन्धनीयम् ॥ ४ ॥

यथोद्देशं लक्षणं वक्तुमाह ।

क्रमेण व्याख्यातुमाह ।

शब्दस्मृतिविरुद्धमसाधु ॥ ५ ॥

शब्दस्मृत्या व्याकरणेन विरुद्धपदमसाधु । यथा "अन्यकारकवैयर्थ्यम्" इति । अत्र हि "अषष्ठ्यतृतीयास्थस्याऽन्यस्य दुषाक्षीराक्षास्थास्थितोत्सुकोतिकारकरागच्छेष्वि" ति दुका भवितव्यमिति ॥ ५ ॥

Digitized by Google

क्रमेणेति ॥ शब्दस्मृतीति ॥ शब्दशास्त्रमर्यादामुल्लङ्घ्य प्रयुक्तं शब्दस्मृतिविरुद्धम् । तदुदाहरति ॥ अन्यकारकेति ॥ "अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्तोत्सुकोतिकारकरागच्छेष्वि" ति आशीरादिषु परतोऽन्यपदस्य दुगागमेन भवितव्यम् । स तु न कृतः । दुगागमो विशेषेण वक्तव्यः । कारकस्थयोः षष्ठीतृतीययोर्नेष्ट, आशीरादिषु सप्तस्विति कारकपदे परतो दुगागमो नियत इत्यन्यकारकपदमसाधु ॥ ५ ॥

श्रुतिविरसं कष्टम् ॥ ६ ॥

श्रुतिविरसं श्रोत्रकटु पदं कष्टम् । तद्धि रचनागुम्फितमप्युद्वेजयति । यथा "अचूचुरच्चण्डिकपोलयोस्ते कान्तिद्रवं द्राग्विशदः शशाङ्कः ॥ ६ ॥

श्रुतिविरसं कष्टमिति ॥ कर्णोद्वेगकरमित्यर्थः । यदुक्तं भामहेन । "सन्निवेशविशेषात् तु तदुक्तमभिशोभत" इति । तन्निराचष्टे ॥ तद्धीति ॥ विशिष्टसन्दर्भगर्भगतमपि सहृदयहृदयोद्वेगमाविर्भावयतीत्यर्थः ॥ अचूचुरदिति ॥ अत्र, द्रागिति पदं कष्टम् ॥ ६ ॥

लोकमात्रप्रयुक्तं ग्राम्यम् ॥ ७ ॥

लोकएव यत् प्रयुक्तं पदं न शास्त्रे तद् ग्राम्यम् । यथा "कष्टं कथं रोदिति फूत्कृतेयम्" । अन्यदपि तल्लगल्लादिकं द्रष्टव्यम् ॥ ७ ॥

ग्रामे भवं ग्राम्यमिति व्युत्पत्तिः । लोकमात्रसिद्धमित्यर्थः । ग्राम्यं— कथमिति ॥ अत्र, फूत्कृतेति पदं ग्राम्यम् । तस्य काव्ये प्राचुर्येण प्रयोगादर्शनात् । "ताम्बूलभृतगल्लोऽयं तल्लं जल्पति मानवः" इत्यादौ यत्तल्लगल्लादिपदं प्रयुज्यते तदपि ग्राम्यं द्रष्टव्यम् ॥ ७ ॥

शास्त्रमात्रप्रयुक्तमप्रतीतम् ॥ ८ ॥

शास्त्र एव प्रयुक्तं यन्न लोके, तदप्रतीतं पदम् । यथा—

किं भाषितेन बहुना रूपस्कन्धस्य सन्ति मे न गुणाः ।
गुणनान्तरीयकं च प्रेमेति न तेऽस्त्युपालम्भः ॥

Digitized by Google

अत्र रूपस्कन्धनान्तरीयकपदे न लोक इत्यप्रतीतम् ॥ ८ ॥

किम्भाषितेन बहुना रूपस्कन्धस्येति ॥ इयं हि कस्याश्चिद्वि-प्रलब्धायाः शठनायकं प्रत्युक्तिः । रूपविज्ञानवेदनासंज्ञासंस्कारलक्ष-णाः पञ्चस्कन्धा सौगतमते प्रसिद्धाः । अत्र विषयेन्द्रियलक्षणस्य रूपस्कन्धस्य गुणा मे न सन्ति ॥ गुणनान्तरीयकम् ॥ अन्तरशब्दो-ऽत्र विनार्थः । "अन्तरमवकाशावधिपरिधानान्तार्धिभेदतादर्थ्ये । छि-द्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च" इत्यमरः । न अन्तरं नान्तरम् । ततो भवार्थे छप्रत्यये स्वार्थे च कप्रत्यये सति नान्तरीय-कमिति रूपं सिद्धम् । अविनाभूतमित्यर्थः । प्रेम च गुणनान्तरीय-कमिति हेतोरुपालम्भो निन्दावचनम् । ते तव नास्ति । व्यापकपर्या-वृत्तौ व्याप्यपरावृत्तिरुचितेति भावः । अत्र रूपस्कन्धनान्तरीयकपदे अप्रतीते ॥ ८ ॥

पूरणार्थमनर्थकम् ॥ ९ ॥

पूरणमात्रप्रयोजनमव्ययपदमनर्थकम् । दण्डापूपन्यायेन पदम-न्यदप्यनर्थकमेव । यथा "उदितस्तु हास्तिकविनीलमयं तिमिरं निपीय किरणैः सविता" । अत्र तुशब्दस्य पादपूरणार्थमेव प्रयोगः । न वाक्यालङ्कारार्थम् । वाक्यालङ्कारप्रयोजनं तु नानर्थकम् । अप-वादार्थमिदम् । यथा "न खल्विह गतागता नयनमोचरं मे गता" इति तथा हि खलु हन्तेति ॥ ९ ॥

पूरणार्थमिति ॥ पूरणं पादपूरणमर्थः प्रयोजनं यस्येति विग्रहः । दण्डापूपेति ॥ दण्डप्रोता, अपूपा दण्डापूपाः । तथाच दण्डानयन-प्रेरणायां दण्डानयनेनैवापूपानयने सिद्धे पुनरपूपानयनप्रेरणं व्यर्थ-मिति दण्डापूपन्यायः । अथवा, दण्डो मूषकैर्भक्षित इत्युक्ते पुनरपूप-भक्षणप्रश्नवचनं व्यर्थमिति दण्डापूपन्यायः । तन्न्यायेन चादीनाम-ऽसत्त्ववचनानामसत्यपि योगे तदर्थस्यान्यतोऽवगतत्वान्नैराकाङ्क्ष्येण वाक्यार्थविश्रान्तिसिद्धाविह प्रयुज्यमानानां तेषामव्ययानां द्योत्य-राहित्येनानर्थकत्वं भवति । किमु वक्तव्यमात्मोपजीव्यवाच्यार्थवि-

Digitized by Google

रहे वाचकानां पदानामनर्थकत्वमिति भावः ॥ उदित इति ॥ हास्तिकम् । "अचित्तहस्तिधेनोष्ठक्" इति ठक् प्रत्ययः । हास्तिकं गजता वृन्दे" इत्यमरः । तद्वद्विनीलम् ॥ अत्र तुशब्दस्येति ॥ भेदावधारणादेर्द्योत्यस्यानाकाङ्क्षितत्वादित्यर्थः ॥ वाक्येति ॥ पूरणं तु प्रतिभादौर्बल्यसूचकतया काव्यविद्भिः प्रयोजकत्वेन नाङ्गीकृतम् ॥ ९ ॥

सम्प्रति पदार्थदोषानाह ।

अन्यार्थनेयगूढार्थाश्लीलक्लिष्टानि च ॥ १० ॥

दुष्टं पदमित्यनुवर्तते । अर्थश्च वचनविपरिणामः । अन्यार्थादीनि पदानि दुष्टानीति सूत्रार्थः ॥ १० ॥

पदार्थदोषान् प्रपञ्चयितुमाह ॥ सम्प्रतीति ॥ अन्यादिभिस्त्रिभिरर्थशब्दः प्रत्येकमभिसम्बन्धनीयः । तेषामश्लीलक्लिष्टशब्दयोरिवार्थपदप्रयोगमन्तरेण न हठादर्थप्रतिपत्तिहेतुत्वमित्यर्थपदं प्रयुक्तम् ॥ अन्यार्थादीनीति ॥ अर्थदोषत्वात् पदान्यपि दुष्टानीत्यर्थः ॥ १० ॥

एषां क्रमेण लक्षणान्याह ।

रूढिच्युतमन्यार्थम् ॥ ११ ॥

रूढिच्युतम् ॥ रूढिमनपेक्ष्य यौगिकार्थमात्रोपादानात् । अन्यार्थं पदम् । स्थूलत्वात् सामान्येन घटशब्दः पटशब्दार्थ इत्यादिकमन्यार्थं नोक्तम् । यथा "ते दुःखमुच्चावचमावहन्ति ये प्रस्मरन्ति प्रियसङ्गमानाम्" । अत्राऽऽवहतिः करोत्यर्थो धारणार्थे प्रयुक्तः । प्रस्मरतिर्विस्मरणार्थः प्रकृष्टस्मरण इति ॥ ११ ॥

रूढिः प्रसिद्धिः । ततश्च्युतं रूढिच्युतम् । रूढेषु पदेषु रूढिमनादृत्य यौगिकार्थे यत् प्रयुज्यते तदन्यार्थं पदम् । ननु यद् घटादिपदं पटादिषु प्रयुज्यते तदन्यार्थं पदं दुष्टमिति किमिति नोच्यत इत्याशङ्क्याह ॥ स्थूलत्वादिति ॥ पटादिषु प्रयुज्यमानं घटादिपदमिति सामान्येन नोक्तम् । कुतः ? स्थूलत्वात् । उत्तानबुद्धिभिरुपलब्धुं शक्यत्वात् । ये केचित् स्थूलमपि दोषमविज्ञाय तथा प्रयुञ्जते

Digitized by Google

ते पुनरविवेकिनः शासनयोग्या न भवन्तीति प्राक् प्रतिपादितम् । उदाहरणमुपदर्शयितुमाह ॥ यथेति ॥ ये प्रियसङ्गमानां प्रणयप्रयुक्तसम्बन्धानां प्रस्मरन्ति प्रकर्षेण स्मरन्ति ॥ "अधीगर्थदयेशां कर्मणी" ति कर्मणि षष्ठी । ते जना उच्चावचमनेकभेदम् । "उच्चावचं नैकभेदम्" इत्यमरः । दुःखमावहन्ति धारयन्तीति कवेर्विवक्षितोऽर्थः । अन्यार्थमुपपादयति ॥ अत्रेति ॥ आङ्पूर्वो वहिधातुः करोत्यर्थे रूढः । तथाच प्रयोगः "व्रीडमावहति मे स सम्प्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि" इति । स च रूढिमनाहत्य धारणे यौगिकार्थे प्रयुक्त इत्यन्यार्थत्वम् । प्रपूर्वः स्मरतिरपि विस्मरणार्थे रूढः । तथाच प्रयोगः "नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि" इति । स च रूढिमगणयित्वा प्रकृष्टस्मरणे यौगिकार्थे प्रयुक्त इत्यन्यार्थत्वम् । किञ्च रूढिच्युतमित्यत्र रूढीति सामान्येनोपात्तत्वाद्योगरूढिरपि परिगृह्यते । तेन पङ्कजादयः शब्दाः कुमुदादिषु न प्रयोज्याः ।११।

कल्पितार्थं नेयार्थम् ॥ १२ ॥

अश्रौतस्याप्युन्नेयस्य पदार्थस्य कल्पनात् कल्पितार्थं नेयार्थम् । यथा ।

सपदि पङ्क्तिविहङ्गमनाममृ-
त्तनयसंवलितं बलशालिना ॥
विपुलपर्वतवर्षिशितैः शरैः
प्लवगसैन्यमुलूकजिता जितम् ॥

अत्र विहङ्गमश्चक्रवाकोऽभिप्रेतः । तन्नामानि चक्राणि । तानि बिभ्रतीति विहङ्गमनाममृतो रथाः । पङ्क्तिरिति दशसंख्या लक्ष्यते । पङ्क्तिर्दश विहङ्गमनाममृतो रथा यस्यस पङ्क्तिविहङ्गमनाममृद् दशरथः । तत्तनयाभ्यां रामलक्ष्मणाभ्यां संवलितं प्लवगसैन्यं जितम् । उलूकजिता इन्द्रजिता । कौशिकशब्देनेन्द्रोलूकयोरभिधानमिति कौशिकशब्दवाच्यत्वेनेन्द्र उलूक उ-

Digitized by Google

क्तः । ननु चैवं रथाङ्गनामादीनामपि प्रयोगोऽनुपपन्नः । न । तेषां निरूढलक्षणत्वात् ॥ १२ ॥

नेयार्थं लक्षयति ॥ कल्पितार्थमिति ॥ अश्रौतस्येति ॥ सङ्केतसहायः शब्दव्यापारस्तद्विशिष्टः शब्दव्यापारो वा श्रुतिः । तत आगतोऽर्थः श्रौतः । स न भवतीति अश्रौतः । अनभिधेय इत्यर्थः । नन्विदमश्रौतत्वमर्थस्य किं लाक्षणिकत्वम्? नेत्याह ॥ उन्नेयस्य ॥ "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते" इत्येवं लक्षणलक्षणाकन्यामधिक्षिप्य कस्यचिदर्थस्य कल्पने कल्पितार्थं, न तु लाक्षणिकार्थमित्यर्थः । उदाहरणमाह ॥ यथेति ॥ उदाहरणवाक्यार्थं विवृणोति ॥ अत्रेति ॥ पक्षिसामान्यवाचिना विहङ्गमपदेन तद्विशेषश्चक्रपरनामा चक्रवाको लक्ष्यते । "कोकश्चक्रश्चक्रवाक" इत्यमरः । तस्य नामेव नाम येषां तानि तन्नामानि चक्राणीत्यर्थः ॥ पङ्क्तिरिति ॥ पङ्क्तिश्छन्दसः पादस्य दशाक्षरात्मकत्वात् पङ्क्तिपदेन दशसंख्या लक्ष्यते ॥ विपुलपर्वतवर्षीति । प्लवगसैन्यविशेषणम् ॥ कौशिकशब्देनेति ॥ महेन्द्रगुग्गुलूलूकव्यालग्राहिषुकौशिक" इत्यमरः । कौशिकशब्देनेन्द्रोलूकयोरभिधानादित्यर्थः । उलूकशब्देन कौशिकशब्द उन्नीयते । तेनेन्द्रोऽभिधीयत इति, उलूकजित्पदेन इन्द्रजिदुन्नीयत इत्यभिप्रायः । एवं तर्हि प्राचीनकविप्रयोगः पर्याकुलः स्यादिति शङ्कते ॥ नन्विति ॥ रथाङ्गनामादीनामित्यादिपदेन रथाङ्गपाणिप्रभृतीनां परिग्रहः । रथाङ्गनामादिपदानां चक्रवाकादौ निरूढत्वेन रूढ्या योगस्य निर्गीर्णत्वान्न काचिदनुपपत्तिरिति परिहरति ॥ नेति ॥ निरूढा लक्षणा येषामिति बहुव्रीहिः । लक्षणा हि रूढिप्रयोजनवशाद् द्विविधा भवति ॥ तत्र रूढलक्षणाः कुशलादयः शब्दाः प्रयोगप्राचुर्यबलेन वाचकशब्दवत् प्रयुज्यन्ते । प्रयोजनलक्षणास्तु "मुखं विकसितस्मितं वशितवक्त्रिमप्रेक्षणम्" इत्यादौ विकसितादयः शब्दाः स्मितविलासादिलक्षकतयाऽद्यापि प्रयुज्यन्ते । तदुक्तं "निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् । क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तित" इति ॥ १२ ॥

गूढार्थं लक्षयितुमाह ।

अप्रसिद्धार्थप्रयुक्तं गूढार्थम् ॥ १३ ॥

Digitized by Google

यस्य पदस्य लोकेऽर्थः प्रसिद्धश्चाप्रसिद्धश्च तदप्रसिद्धेऽर्थे प्रयुक्तं गूढार्थम् । यथा "सहस्रगोरिवानीकं दुस्सहं भवतः परैः" इति । सहस्रं गावोऽक्षीणि यस्य स सहस्रगुरिन्द्रः । तस्येवेति गोशब्दस्याऽक्षिवाचित्वं कविष्वप्रसिद्धमिति ॥ १३ ॥

अप्रसिद्धेति ॥ अभिमतमनेकत्वमर्थस्य दर्शयति ॥ प्रसिद्धश्चेति ॥ उदाहरणमुपदर्शयितुमाह ॥ यथेति ॥ गोशब्दस्येति ॥ "गौर्नाके वृषभे चन्द्रे वाग्भूदिग्धेनुषु स्त्रियाम् । द्वयोस्तुरश्मिहग्बाणस्वर्गवज्राम्बुलोमसु" इत्यभिधाने सत्यपि गोशब्दस्य प्राचुर्येणाऽक्षिण प्रयोगाऽदर्शनादक्षिवाचकत्वमप्रसिद्धमित्यर्थः । एतेन "तीर्थान्तरेषु स्नानेन समुपार्जितसत्पथः । सुरस्रोतस्विनीमेष हन्ति सम्प्रति सादरम्" इत्यादिषु हन्तीत्यादीनां गमनाद्यर्थेषु प्रयोगाः प्रत्युक्ताः ॥ १३ ॥

अश्लीलं लक्षयितुमाह ।

असभ्यार्थान्तरमसभ्यस्मृतिहेतुश्चाश्लीलम् ॥ १४ ॥

यस्य पदस्यानेकार्थस्यैकोऽर्थोऽसभ्यः स्यात् तदसभ्यार्थान्तरम् । यथा "वर्चः" इति पदं तेजसि विष्ठायां च । यत्तु पदं सभ्यार्थवाचकमप्येकदेशद्वारेणासभ्यार्थं स्मारयति तदसभ्यस्मृतिहेतुः । यथा "कृकाटिका" इति ॥ १४ ॥

असभ्येति ॥ सूत्रार्थं विवृण्वन् क्रमेण लक्षणोदाहरणे लक्षयति ॥ यस्येति ॥ यस्यानेकार्थवाचकस्य पदस्यैकोऽर्थोऽसभ्यः स्यात् तदसभ्यार्थान्तरं पदमश्लीलम् ॥ वर्च इति ॥ "वर्चोऽसि ज्वालविड्भाराः" इत्यभिधानाज्ज्वालप्रभावाचकत्वेऽपि विड्वाचितया वर्च इति पदमसभ्यार्थान्तरम् ॥ यत्त्विति ॥ सभायां साधुः सभ्यः । "समाया यः" इति यप्रत्ययः । यत्तु पदं सभ्यार्थवाचकमप्येकदेशेन यद्यऽसभ्यार्थस्मृतिं जनयेत् तदप्यश्लीलम् ॥ कृकाटिकेति ॥ "प्रेतयानं खटिः काटीरि"ति वैजयन्त्यां शवयानपर्यायत्वेनाभिधानात् कर्णापरभागवाचकमपि कृकाटिकापदं काटीत्येकदेशेनासभ्यार्थस्मृतिहेतुरित्यश्लीलमित्यभिप्रायः ॥ १४ ॥

Digitized by Google

न गुप्तलक्षितसंवृतानि ॥ १५ ॥

अपवादार्थमिदम् । गुप्तं लक्षितं संवृतं च नाश्लीलम् ॥१५॥

अश्लीलस्य क्वचिदपवादं वक्तुमाह ॥ न गुप्तेति ॥ १५ ॥

एषां लक्षणान्याह ।

अप्रसिद्धासभ्यं गुप्तम् ॥ १६ ॥

अप्रसिद्धासभ्यार्थान्तरं पदमप्रसिद्धासभ्यं तद् गुप्तम् । यथा "सम्बाधः" इति पदम् । तद्धि सङ्कटार्थं प्रसिद्धं, न गुह्यार्थमिति ॥ १६ ॥

अप्रसिद्धेति ॥ यस्यानेकार्थस्य पदस्यैकोऽर्थोऽसभ्योऽपि यद्यप्रसिद्धो भवति तदप्रसिद्धासभ्यं गुप्तमित्यर्थः । तदिदमभिसन्धायाह ॥ असभ्यार्थान्तरमिति ॥ सम्बाध इति ॥ "वेशेऽपि गन्धः सम्बाधो गुह्यसङ्कटयोर्द्वयोः" इत्यभिधाने सत्यपि "सम्बाधे सुरभीणाम्" "आसने मिलसम्बाधे" इत्यादिषु प्रयोगप्रचुर्यात् सम्बाधशब्दः सङ्कटार्थः प्रसिद्धः । तदभावाद् गुह्यार्थोऽप्रसिद्ध इत्यर्थः ॥ १६ ॥

लाक्षणिकासभ्यं लक्षितम् ॥ १७ ॥

तदेवासभ्यार्थान्तरं लाक्षणिकेनासभ्येनार्थेनान्वितं पदं लक्षितम् । यथा "जन्मभूमिः" इति । तद्धि लक्षणया गुह्यार्थं न स्वशक्त्येति ॥ १७ ॥

लाक्षणिकासभ्यमिति ॥ लक्षणया सान्तरार्थनिष्ठशब्दव्यापारेण प्रतिपाद्यं लाक्षणिकम् । अध्यात्मादित्वाद् भवार्थे ठञ् । तथाविधमसभ्यमर्थान्तरं यस्य तल्लक्षितमिति सूत्रार्थः । अमुमर्थमभिसन्धायाह ॥ तदेवेति ॥ लाक्षणिकं च तदसभ्यं चेति कर्मधारयः । अर्थविशेषणम् । तेनार्थेनान्वितं तादृगर्थप्रतिपादकमित्यर्थः । जन्मभूमिशब्देन जननस्थानसामान्यमभिधया प्रतिपाद्यते । तद्विशेषस्तु

Digitized by Google

लक्षणयेति व्याचष्टे ॥ तद्धीति ॥ न स्वशब्देनेति ॥ मुख्यव्यापारेणेत्यर्थः ॥ १७ ॥

लोकसंवीतं संवृतम् ॥ १८ ॥

लोकेन संवीतं लोकसंवीतम् । यत्तत् संवृतम् । यथा "सुभगा, भगिनी, उपस्थानम्, अभिमेतम्, कुमारी, दोहदम्" इति । अत्र हि श्लोकः—

संवीतस्य हि लोकेन न दोषान्वेषणं क्षमम् ॥
शिवलिङ्गस्य संस्थाने कस्यासभ्यत्वभावना ॥ १८ ॥

लोकेन संवीतमावृतं परिगृहीतमिति यावत् । सुभगादिपदान्येकदेशेनासभ्यार्थस्मृतिहेतुत्वेऽपि लोकपरिगृहीतत्वात् प्रयोज्यानि । तदुक्तं दण्डिना "भगिनी-भगवत्यादिसर्वत्रैवानुमन्यते" इत्यादि ॥ दोहद इति ॥ "हद पुरीषोत्सर्गे" इति धातुं स्मारयन्नेकदेशेन असभ्यार्थस्मृतिहेतुः । अत्र प्राचीनाचार्यसंवादं प्रकटयति ॥ अत्र हि श्लोक इति ॥ १८ ॥

तत्त्रैविध्यं व्रीडाजुगुप्सामङ्गलातङ्कदायिभेदात् ॥ १९ ॥

तस्याश्लीलस्य त्रैविध्यं भवति । व्रीडाजुगुप्सामङ्गलातङ्कदायिनां भेदात् । किञ्चिद् व्रीडादायि । यथा "वाक्काटवम्, हिरण्यरेता" इति । किञ्चिज्जुगुप्सादायि । यथा "कपर्दकः" इति । किञ्चिदमङ्गलातङ्कदायि । यथा "संस्थितः" इति ॥ १९ ॥

द्विविधमश्लीलं त्रेधा विभजते ॥ तत्त्रैविध्यमिति ॥ तिस्रो विधा यस्य तत् त्रिविधं, त्रिप्रकारमिति यावत् । "विधा विधौ प्रकारे च" इत्यमरः । तस्य भावस्त्रैविध्यम् । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । तस्याश्लीलस्य त्रैविध्यम् । अमङ्गलस्यातङ्कः शङ्का । "रुक्तापशङ्कोत्त्रासातङ्कः" इत्यमरः । दायि—शब्दः प्रत्येकमभिसम्बध्यते । तत्राद्यमुदाहर्तुमाह ॥ किञ्चिदिति ॥ वाक्काटवमिति कटोर्भावः काटवम् । वाचः काटवं = वचस्तैक्ष्ण्यमित्यर्थः । अत्र काटव इत्येकदेशेन

Digitized by Google

लिङ्गप्रतीतेर्दीक्षादायि "काठवच्चार्णववच्च" इत्यत्र मन्त्रभाष्ये तथादर्शनात् । द्वितीयं दर्शयितुमाह ॥ किञ्चिदिति ॥ पर्दः पायवीयपवनध्वनिः "पर्दस्तु शुदज्जे शब्दे कुर्दः कुक्षिजनिःस्वने" इति वैजयन्ती । अवशिष्टमश्लीलं दर्शयति ॥ किञ्चिदिति ॥ संस्थितो मृत इत्यर्थः॥१९॥

क्लिष्टमाचष्टे ।

व्यवहितार्थप्रत्ययं क्लिष्टम् ॥ २० ॥

अर्थस्य प्रतीतिरर्थप्रत्ययः । स व्यवहितो यस्माद् भवति तद् व्यवहितार्थप्रत्ययं क्लिष्टम् । यथा "दक्षात्मजादयितवल्लभवेदिकानां ज्योत्स्नाजुषां जललवास्तरलं पतन्ति" । दक्षात्मजास्ताराः । तासां दयितो दक्षात्मजादयितश्चन्द्रः । तस्य वल्लभाश्चन्द्रकान्ताः । तद्वेदिकानामिति ॥ अत्र हि व्यवधानेनार्थप्रत्ययः ॥ २० ॥

व्यवहितेति ॥ समासार्थं विग्रहेण दर्शयति ॥ अर्थस्य प्रतीतिरिति ॥ प्रत्ययोऽत्र ज्ञानम् "प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमरः । उदाहरति ॥ दक्षात्मजेति ॥ ननु नेयार्थे क्लिष्टमिदं किमिति नान्तर्भवति । व्यवहितार्थप्रत्ययहेतुत्वाविशेषादित्याशङ्क्य ततो वैषम्यं दर्शयँल्लक्ष्ये लक्षणमनुगमयति ॥ अत्र हि व्यवधानेनेति ॥ व्यवधानमर्थप्रातिपत्तेर्विलम्बः । विलम्बेनार्थाभिधायकं क्लिष्टम् । नेयार्थे तु कल्पितोऽर्थमिति ततो भेदः ॥ २० ॥

अन्यार्थेऽपि चेज्ज्ञानान्तर्भवतीत्याह ।

अरूढार्थत्वात् ॥ २१ ॥

अरूढार्थत्वेऽपि यतोऽर्थप्रत्ययो झटिति न, तत् क्लिष्टम् । यथा "काञ्चीगुणस्थानमनिन्दितायाः" इति ॥ २१ ॥

अरूढार्थत्वादिति ॥ प्रकृतादर्थादर्थान्तरे क्वचिदप्यरूढत्वादप्रसिद्धत्वाद् विलम्बेनापि योगवशात् प्रकृतमर्थमभिधत्त इत्यर्थः । अप्रसिद्धमप्यविलम्बेनार्थमभिधायकं चेन्न तत् क्लिष्टमित्याह ॥ अरूढार्थत्वेऽपीति ॥ उदाहरति ॥ यथेति ॥ २१ ॥

Digitized by Google

अथाऽश्लीलक्लिष्टाक्यवृत्तपदवृत्तदोषसादृश्यात् अश्लीलं क्लिष्टवाक्यवृत्तमपि लक्षितप्रायमेवेत्युपपादयितुं सूत्रमुपादत्ते ।

अन्त्याभ्यां वाक्यं व्याख्यातम् ॥ २२ ॥

अश्लीलं क्लिष्टं चेत्यन्ते पदे । ताभ्यां वाक्यं व्याख्यातम् । तदप्यऽश्लीलं क्लिष्टं च भवति । अश्लीलं यथा ।

न सा धनोन्नतिर्या स्यात् कलत्ररतिदायिनी ।
परार्थबद्धकक्ष्याणां यत् सत्यं पेलवं धनम् ॥
सोपानपथमुत्सृज्य वायुवेगः समुद्यतः ।

महापथेन गतवान् कीर्त्यमानगुणो जनैः । क्लिष्टं यथा "धम्मिल्लस्य न कस्य मेऽस्य निकामं कुरङ्गशावाक्ष्याः * रज्यत्पूर्वबन्धच्युत्पत्तेर्मानसं शोभाम्" । एतान् पदपदार्थदोषान् ज्ञात्वा कविस्त्यजेदिति तात्पर्यार्थः ॥ २२ ॥ ॥ इति श्रीकाव्यालङ्कारसूत्रवृत्तौ दोषदर्शने द्वितीयेऽधिकरणे प्रथमोऽध्यायः पदपदार्थदोषविभागः ॥

अन्त्याभ्यामिति ॥ प्रतिपत्तिलाघवार्थमप्रकरणेऽप्यभिधानमित्यवगन्तव्यम् । अश्लीलं वाक्यमपि त्रिविधम् । तत्र व्रीडादाव्यश्लीलमुदाहरति ॥ यथेति ॥ सा तादृशी धनोन्नतिः = अर्थसंपत्तिः न भवति । या कलत्ररतिदायिनी । कलत्रस्य रतिं प्रीतिं दातुं शीलमस्या इति कलत्ररतिदायिनी । न तु परप्रीतिदायिनी यस्मात्, तस्मात्, परार्थबद्धकक्ष्याणां, परेषामर्थे प्रयोजने बद्धा कक्ष्या कक्षो यैस्तेषां परोपकारबद्धप्रतिज्ञानामित्यर्थः । "कक्ष्या कक्षे वरत्रायाम्" इति वैजयन्ती । धनमर्थो यत् सत्यं परमार्थतः पेलवं मनोज्ञमिति प्रकृतार्थः । अर्थान्तरस्तु साधनस्य शेफस उन्नतिः । "साधनमुपगमनत्योः शेफसि सिद्धौ निवृत्तिदापनयोः" इति नानार्थमाला । यस्मात् कलत्रस्य रतिं सुरतं दातुं शीलमस्या इति तादृशी न भवति । तस्मात् परासामर्थे बद्धकक्ष्याणां परस्त्रीवशंवदचित्तानामित्यर्थः । घनं पेलवं विरलं भवति । "पेलवं विरलं तनु" इत्यमरः ।

Digitized by Google

अत्र व्रीडादायित्वमतिरोहितम् । अवशिष्टमश्लीलद्वयमुदाहरति ॥ सोपानेति ॥ सोपानपथमुत्सृज्य, वायुवेगः = वायोर्वेग इव वेगो यस्य स तादृशः, समुद्यतः सन् जनैः स्तूयमानगुणः सन्, महापथेन राजमार्गेण गतवानिति प्रकृतार्थः । वायुवेगोऽपानपथमुत्सृज्य समुद्यत इति जुगुप्सादायि । महापथेन परलोकमार्गेण गतवानित्यमङ्गलातङ्कदायि । क्लिष्टमुदाहरति ॥ धम्मिल्लस्येति ॥ कुरङ्गशावाक्ष्या धम्मिल्लस्य संयतकचनिचयस्याऽपूर्वोऽदृष्टचरो बन्धो ग्रथनं तस्य व्युत्पत्तेश्चातुर्यस्य शोभां वीक्ष्य कस्य मानसं निकामं न रज्यति । सर्वस्याऽपि मानसं रज्यतीत्यर्थः । रज्यतीति कर्मकर्तरि रूपम् "कुषिरजोः प्राचां श्यन् परस्मैपदं च" इति परस्मैपदम् । अपूर्वबन्धव्युत्पत्तेरिति धम्मिल्लविशेषणं वा । अत्रान्वयव्यवधानान्न हाटिकी वाक्यार्थप्रतिपत्तिरिति स्पष्टमेव क्लिष्टत्वम् । ननु किं फलमेषां दोषाणामवबोधनेनेत्याशङ्क्य, परित्यागमेव फलमित्याह ॥ एतानिति ॥२२॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां वामनालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालंकारकामधेनौ दोषदर्शने
द्वितीयेऽधिकरणे प्रथमोऽध्यायः
संपूर्णः ॥ २ ॥ १ ॥ (४) ॥

Digitized by Google

चिन्तयामि चिदाकाशचन्द्रलेखां सरस्वतीम् ॥
शिरसा श्लाघनाद् यस्याः सार्वज्ञ्यं समवाप्यते ॥ १ ॥
अध्यायद्वयसौहार्दमुन्मुद्रयति ।

पदपदार्थदोषान् प्रतिपाद्य वाक्यदोषान् दर्शयितुमाह—

भिन्नवृत्तयतिभ्रष्टविसंधीनि वाक्यानि ॥ १ ॥

दुष्टानीत्यभिसम्बन्धः ॥ १ ॥

पदपदार्थेति ॥ पदपदार्थदोषनिरूपणानन्तरं वाक्यवाक्यार्थदोषनिरूपणं लब्धावसरमिति सङ्गतिः । वाक्यदोषानुद्दिशति ॥ भिन्नवृत्तेति ॥ दुष्टं पदमित्यादिसूत्राद् दुष्टमित्येतद् वचनविपरिणामेन वाक्यविशेषणतयाऽनुवर्तत इत्याह ॥ दुष्टानीति ॥ १ ॥

क्रमेण व्याचष्टे—

स्वलक्षणच्युतवृत्तं भिन्नवृत्तम् ॥ २ ॥

स्वस्माल्लक्षणाच्च्युतं वृत्तं यस्मिँस्तत् स्वलक्षणच्युतं वृत्तं वाक्यं भिन्नवृत्तम् । यथा "अयि पश्यसि सौधमाश्रितामविरलसुमनोमालभारिणीम्" । वैतालीययुग्मपादे लघ्वक्षराणां षण्णां नैरन्तर्यं निषिद्धम् । तच्च कृतमिति भिन्नवृत्तत्वम् ॥ २ ॥

यथोद्देशमेषां लक्षणानि दर्शयिष्यन्ननन्तरसूत्रमवतारयति ॥ क्रमेणेति । स्वलक्षणच्युतवृत्तमिति स्वलक्षणच्युतवृत्तानुबन्धि वाक्यमित्यर्थः । उदाहरति ॥ यथेति ॥ अयि पश्यसीति ॥ सुमनोमालभारिणीमित्यत्र "इष्टकेषीकामालानां चिततूलभारिष्वि" ति मालाशब्दस्य ह्रस्वः । वैतालीयलक्षणं प्रागुक्तम् । तत्र, ताश्च समे स्युर्नो निरन्तरा इति समपादे लघ्वक्षरषट्कस्य नैरन्तर्यं निषिद्धम् । अत्राविरलसुमेति समपादे षडपि लघ्वक्षराणि प्रयुक्तानीति लक्षणच्युतत्वम् ॥ २ ॥

विरसविरामं यतिभ्रष्टम् ॥ ३ ॥

विरसः श्रुतिकटुर्विरामो यस्मिँस्तद् विरसविरामं यतिभ्रष्टम् ॥ ३ ॥

Digitized by Google

द्वितीयं व्याख्यातुं सूत्रमुपादत्ते ।

विरसविरामिति ॥ विरामो विच्छेदनियमः । शेषं सुगमम् ॥ ३ ॥

तद्धातुनामभागभेदे स्वरसंध्यकृते प्रायेण ॥ ४ ॥

तद् यतिभ्रष्टं धातुभागभेदे नामभागभेदे च सति भवति । स्वरसंधिना कृते प्रायेण बाहुल्येन । धातुभागभेदे मन्दाक्रान्तायां यथा "एतासां राजति सुमनसां दामकण्ठावलम्बि । नामभागभेदे शिखरिण्यां यथा । कुरङ्गाक्षीणां गण्डतलफलके स्वेदविसरः । मन्दाक्रान्तायां यथा "दुर्दशश्चक्रश्चिक्किकपिशः शार्ङ्गिणो बाहुदण्डः" । धातु—नामभागपदग्रहणात् तद्भागातिरिक्तभेदे न भवति यतिभ्रष्टत्वम् । यथा मन्दाक्रान्तायाम् । शोभां पुष्यत्सयमाभनवः सुन्दरीणां प्रबोधः । शिखरिण्यां यथा "विनिद्रः श्यामान्तेष्वधरपुटसीत्कारविरुतैः" । स्वरसंध्यकृत इति वचनात् स्वरसन्धिकृते भेदे न दोषः । यथा "किञ्चिद्भ्रावालसमरलं प्रेक्षितं सुन्दरीणाम्" ॥ ४ ॥

तद्विभागं दर्शयितुमाह ॥ तदिति ॥ धातुर्भूवादिः । नाम प्रातिपदिकम् । धातोः प्रातिपदिकस्य वा भागतो भेदेऽशतो विच्छेदे । भागभेदमेव विशिनष्टि ॥ स्वरसन्ध्यकृत इति ॥ स च भागभेदो यदि स्वरसन्धिना कृतो न स्यात् तस्मिन् भागभेदे सति यतिभ्रष्टं नाम दुष्टं भवति । स्वरसन्धिकृते तु भागभेदे न दुष्टमिति सूचितम् । तत्र प्रथममुदाहर्तुमाह ॥ धातुभागभेद इति ॥ एतासामिति ॥ मन्दाक्रान्ताख्यमिदं वृत्तम् । "मन्दाक्रान्ता जलधिषड्गैर्भौ नतौ तो गुरू चेत्" इति तल्लक्षणादादितश्चतुर्भिस्ततः षड्भिस्ततः सप्तभिर्यतेर्विरामः कर्तव्यः । तथा सति, एतासां रा, इत्यत्र धातुभागभेदे प्राप्तस्य तस्य वैरस्यादिदं वाक्यं यतिभ्रष्टं नाम दुष्टं भवति । द्वितीयमुदाहरति ॥ नामभागभेद इति ॥ कुरङ्गाक्षीणामिति ॥ शिखरिणीवृत्तमिदम् । "रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणादादितः षड्भिस्तत एकादशभिर्यतिः कर्तव्या । ततश्च कुरङ्गाक्षी-

Digitized by Google

र्णा गण् — इत्यत्र प्रातिपदिकभागभेदे प्राप्तायास्तस्या वैरस्याद् यतिभ्रष्टं भवति । उदाहरणान्तरमाह ॥ दुर्दर्श इति ॥ मन्दाक्रान्ता-लक्षणमुक्तम् । दुर्दर्शश्च, इत्यत्र विरामो विरसः । ननु, पदभागभेद इति सूत्रकरणे धातुनाम्नोरुभयोरपि संग्रहाल्लाघवं भवति, किं धातु-नामग्रहणगौरवेणेत्याशङ्क्य, पदग्रहणे प्रकृतिप्रत्ययमध्यविरामेऽपि यतिभ्रंशः स्यात् । स मा भूदिति धातुनामग्रहणं कृतमित्याशयवा-नाह ॥ धातुनामेति ॥ तयोर्धातुनाम्नोर्भागास्तद्भागाः । तेभ्योऽतिरि-क्तभेदे धातुनामभागभेदव्यतिरिक्त भागच्छेद इत्यर्थः । उदाहरति ॥ यथेति ॥ शोभां पुष्येत्यत्र विरामो न वैरस्यमावहतीति भावः । धातुप्रत्ययमध्यविरामे दोषाभावं निरूप्य प्रातिपदिकप्रत्ययमध्यभेदे-ऽप्युदाहरति ॥ विनिद्र इति ॥ श्यामा रात्रिः । श्यामान्त इत्यत्र प्रा-तिपदिकप्रत्ययमध्यविरामो न दुष्यति । विशेषणव्यावर्त्यं कीर्तयति ॥ स्वरसन्धीति ॥ उदाहरति ॥ किञ्चिद्बालसामिति । अत्र चतु-र्थाक्षराऽवसाने यतिर्विहिता । तथाचालसामित्यत्र, अकारस्य सवर्ण-दीर्घैकादेशेन कबलितत्वात् स्वरसन्धिकृतोऽर्धं नामभागभेद इति न यतिभ्रष्टत्वम् ॥ ४ ॥

न वृत्तदोषात् पृथग् यतिदोषो वृत्तस्य यत्स्वात्मकत्वात् ॥ ५ ॥

वृत्तदोषात् पृथग् यतिदोषो न वक्तव्यः । वृत्तस्य यत्स्वा-त्मकत्वात् ॥ ५ ॥

ननु भिन्नवृत्तयतिभ्रष्टयोरर्थतो भेदाभावाद्, न पृथक् कथन-मर्थवदिति शङ्कामङ्कुरयितुमुपरितनं सूत्रमुपन्यस्यति ॥ न वृत्तेति ॥ गुरुलघुनियमवद् यतानियमस्यापि वृत्तलक्षणवाक्येनैवावगन्तव्यत्वाद् यतिर्विशेषं च वृत्तमिति वृत्तदोषे एव यतिदोषोऽन्तर्भवतीति शङ्कि-तुरभिप्रायः ॥ ५ ॥

यत्स्वात्मकं हि वृत्तमिति भिन्नवृत्त एव यतिभ्रष्टस्यान्तर्भावान्न पृथग्ग्रहणं कार्यमत आह ।

न लक्ष्मणः पृथक्त्वात् ॥ ६ ॥

Digitized by Google

नाऽयं दोषः । लक्ष्मणो लक्षणस्य पृथक्त्वात् । अन्यद्धि लक्षणं वृत्तस्यान्यद् यतेः । गुरुलघुनियमात्मकं वृत्तम् । विरामात्मिका च यतिरिति ॥ ६ ॥

शङ्कामिमां शकलयितुमुत्तरसूत्रमुपादत्ते ॥ न लक्ष्मणः पृथक्त्वादिति ॥ यतिवृत्तयोर्लक्षणभेदात् स्वरूपभेदोऽङ्गीकर्तव्यः । तथाच वृत्तदोषे यतिदोषस्यान्तर्भावो दुर्भण इति भावः । लक्षणभेदमेवाह ॥ गुरुलघ्विति ॥ स्थानविरामेऽपि गुरुलघुविपर्यासे भवति वृत्तभङ्गः । अस्थानविरामात्मके यतिभङ्गेऽपि यथोक्तगुरुलघुनियमे सति न वृत्तभङ्ग इत्यन्वयव्यतिरेकाभ्यां भिन्नवृत्तयतिभ्रष्टयोर्भिन्नत्वात् पृथक्कथनमर्थवदित्यर्थः ॥ ६ ॥

अथ विसन्धिवाक्यं विवरीतुमाह ।

विरूपपदसन्धिर्विसन्धिः ॥ ७ ॥

पदानां सन्धिः पदसन्धिः । स च स्वरसमवायरूपः प्रत्यासत्तिमात्ररूपो वा । स विरूपो यस्मिन्निति विग्रहः ॥ ७ ॥

विरूपपदसन्धिरिति ॥ स चेति । "किञ्चिद् भाषालसार्मि" त्यत्र स्वरसमवायरूपः । "ते गच्छन्ति प्रभुपरिवृढमित्यत्र प्रत्यासत्तिरूपः ॥ ७ ॥

विसन्धिनस्त्रैविध्यं वक्तुमाह ।

पदसन्धिवैरूप्यं विश्लेषोऽश्लीलत्वं कष्टत्वञ्च ॥ ८ ॥

विश्लेषो विभागेन पदानां संस्थितिरिति ॥ अश्लीलत्वमऽसभ्यस्मृतिहेतुत्वम् ॥ कष्टत्वं पारुष्यमिति ॥ विश्लेषो यथा "मेघाऽनिलेन अमुना एतस्मिन्नद्रिकानने। कमले इव लोचने इमे अनुबध्नाति विलासपद्धतिः। लोलालकानुबद्धानि आननानि चकासति । अश्लीलत्वं यथा "विरेचकमिदं नृत्तमाचार्याभासयोजितम्।

Digitized by Google

चकासे पनसप्रायैः पुरी षण्डमहाद्रुमैः । विना शपथदानाभ्यां पदवादसमुत्सुकम्" । कष्टत्वं यथा । "मज्जर्युदूगमगर्भाऽऽस्ते गुर्वीभोगा द्रुमा बभुः" ॥ ८ ॥

पदसन्धीति ॥ विश्लेषोऽवग्रह इत्यत्र पदकालप्रसिद्धोऽवग्रहो न विवक्षितः, किन्तु मात्राकालव्यवधानसाम्यादसंहिताप्रगृह्यलक्षण इत्यभिसन्धायाह ॥ विभागेनेति ॥ स च विश्लेषो द्विविधः—प्रगृह्यनिबन्धनः, सन्ध्यविवक्षानिबन्धनश्च । तत्राद्यमुदाहरति ॥ कमले इति ॥ यदवादि दण्डिना "न संहितां विवक्षामीत्यसन्धानं पदेषु यत् । तद्विसन्धीति निर्दिष्टं, न प्रगृह्यादिहेतुकम्" इति । अत्र प्रगृह्यादिहेतुकं विसन्धि न भवतीति सकृत्प्रयोगविषयमिदं द्रष्टव्यम् । असकृत्प्रयोगे तु दुष्टमेव । तदुक्तं साहित्यचूडामणौ । "प्रगृह्यादिनिबन्धनत्वे पुनरसकृद्दोषः । यथा "धीदोर्बले अति तते उचिताऽर्थवृत्ती" इत्यादि । सकृत्तु न दोष इति । तथाच प्रयोगः । "लीलयैव धनुषी अधिज्यताम्" । "सहंसपाते इव लक्ष्यमाणे" इति च । द्वितीयमुदाहरति ॥ लोलालकेत्यादिं ॥ अत्र, न संहितां विवक्षामि इति कामचारप्रयुक्तः सकृदपि दोष एव । "नित्यं संहितैकपदवत् पादेष्वर्धान्तवर्जम्" इति काव्यसमयाऽध्याये वक्ष्यमाणत्वात् । त्रिविधमश्लीलं क्रमेणोदाहरति ॥ अश्लीलं यथेति ॥ रेचका नाम नृत्ते पाणिपादादिभ्रमणरूपाश्चत्वारो भरतशास्त्रे प्रसिद्धाः । तदुक्तं सङ्गीतरत्नाकरे । "रेचकानथ वक्ष्यामश्चतुरो भरतोदितान् । पदयोः करयोः कट्या ग्रीवायाश्च भवन्ति ते" इति । आचार्येण सता नृत्ते सरेचकं योजनीयम् । इदं तु नृत्तं विरेचकं रेचकविहीनम् । अत एवाचार्याभासयोजितम् । यः स्वयमनाचार्य आचार्यवदवभासते सोऽयमाचार्याभासः । तेन योजितम् । अत्र विरेचक-याभ—पुरीष-विनाश-पदविन्यासैः, विरेचन-मिथुनीभाव—पुरीष-विनाश-प्रतीतेस्त्रिविधान्यश्लीलानि द्रष्टव्यानि । कष्टत्वमुदाहर्तुमाह ॥ कष्टत्वं यथेति ॥ ८ ॥

उक्तवक्तव्यसङ्गतिपूर्वकमुत्तरसूत्रमवतारयति ।

एवं वाक्यदोषानभिधाय वाक्यार्थदोषान् प्रतिपादयितुमाह ।

Digitized by Google

व्यर्थैकार्थसन्दिग्धाप्रयुक्तापक्रमलोकविद्या-
विरुद्धानि च ॥ ९ ॥

वाक्यानि दुष्टानीति सम्बन्धः ॥ ९ ॥

एवमिति ॥ चकारेण समुच्चयमाह ॥ वाक्यानि दुष्टानीति सम्बन्ध इति ॥ ९ ॥

क्रमेण व्याख्यातुमाह ।

व्याहतपूर्वोत्तरार्थं व्यर्थम् ॥ १० ॥

व्याहतौ पूर्वोत्तरावर्थौ यस्मिंस्तद् व्याहतपूर्वोत्तरार्थं वाक्यं व्यर्थम् । यथा । "अद्यापि स्मरति रसालसं मनो मे मुग्धायाः स्मरचतुराणि चेष्टितानि" । मुग्धायाः कथं स्मरचतुराणि चेष्टितानि । तानि चेत् कथं मुग्धा । अत्र पूर्वोत्तरयोरर्थयोर्विरोधाद् व्यर्थमिति ॥ १० ॥

व्याहतौ परस्परविरुद्धाविति यावत् ॥ मुग्धायाः कथं स्मरचतुराणि चेष्टितानीति ॥ न कथञ्चित् सम्भवन्ति, व्याहतत्वादित्यर्थः । व्याहतिमेव व्याहरति ॥ स्मरचतुराणीति ॥ १० ॥

एकार्थं समर्थयितुमाह ।

उक्तार्थपदमेकार्थम् ॥ ११ ॥

उक्तार्थानि पदानि यस्मिँस्तदुक्तार्थपदमेकार्थम् । यथा । "चिन्तामोहमनङ्गमङ्ग! तनुते विप्रेक्षितं भ्रूभ्रुवः" । अनङ्गः भ्रूभ्रूः । तस्य चिन्तामोहात्मकत्वाच्चिन्तामोहशब्दौ प्रयुक्तावुक्तार्थौ भवतः । एकार्थपरत्वाद् वाक्यमेकार्थमित्युक्तम् ॥ ११ ॥

उक्तार्थपदमिति ॥ उक्ताः पदान्तरैः प्रतिपादिता अर्था येषां तान्युक्तार्थानि । तथाविधानि पदानि यस्मिन् वाक्ये तदुक्तार्थपदं वाक्यमेकार्थं नाम दुष्टं भवतीति वाक्यार्थः ॥ चिन्तामोहमिति ॥

Digitized by Google

कामिनीकटाक्षपातकलुषिताऽन्तःकरणस्य विरहवेदनामसहमानस्य कस्यचित् कामुकस्येयमुक्तिः अनङ्गशब्देनात्र विप्रलम्भशृङ्गारो विवक्षितः । तस्य चिन्तामोहाद्युपचितात्मकस्यैव शृङ्गारपदार्थत्वात् । तत्कथनेनैव चिन्तामोहयोरवगतत्वाच्चिन्तामोहशब्दौ गतार्थावित्येकार्थौ । नन्वेकार्थलक्षणपरीक्षायामेकार्थत्वं पदस्य प्रतीयते, न तु वाक्यस्य । तत् कथमयं वाक्यदोषः स्यादित्याशङ्क्य छत्रिन्यायेनैकदेशधर्मः समुदाये पर्यवस्यतीत्याशयवानाह ॥ एकार्थपदत्वादिति ॥ ११ ॥

क्वचिदपवादं वक्तुमाह ।

न विशेषश्चेत् ॥ १२ ॥

न गतार्थं दुष्टं, विशेषश्चेत् प्रतिपाद्यः स्यात् ॥ १२ ॥

न विशेषश्चेदिति ॥ यदि विशेषः प्रतिपाद्यस्तदानीमेकार्थं दुष्टं न भवतीति सूत्रार्थः ॥ १२ ॥

तं विशेषं प्रतिपादयितुमाह ।

धनुर्ज्याध्वनौ धनुःश्रुतिरारूढेः प्रतिपत्त्यै ॥ १३ ॥

धनुर्ज्याध्वनाविह यत्र ज्याशब्देनोक्तार्थत्वेऽपि धनुःश्रुतिः प्रयुज्यते । आरूढेः प्रतिपत्त्यै । आरोहणस्य प्रतिपत्त्यर्थम् । न हि धनुःश्रुतिमन्तरेण धनुष्यारूढा ज्या धनुर्ज्येति शक्यं प्रतिपत्तुम् । यथा । "धनुर्ज्याकिणचिह्नेन दोष्णा विस्फुरितं तव" इति ॥ १३ ॥

धनुर्ज्याध्वनाविति ॥ श्रुतिरत्रवाचकः शब्दः । स्पष्टमवशिष्टम् ॥ धनुर्ज्याकिणेति ॥ ज्याशब्दमात्रप्रयोगे ज्यावन्धनेनापि किणसम्भवाद् भवेदनौचित्यम् । तथाच प्रयोगः । "ज्याबन्धनिष्पन्दभुजेन यस्य" इति ॥ १३ ॥

उक्तन्यायमन्यत्रापि सञ्चारयितुमाह ।

कर्णावर्तंसश्रवणकुण्डलशिरःशेखरेषु कर्णादिनिर्देशः सन्निधेः ॥ १४ ॥

Digitized by Google

कर्णावतंसादिशब्देषु कर्णादीनामवतंसादिपदैरुक्तार्थानामपि निर्देशः सन्निधेः प्रतिपत्त्यर्थमिति सम्बन्धः । न हि कर्णादिशब्द-निर्देशमन्तरेण कर्णादिसन्निहितानामवतंसादीनां शक्या प्रतिपत्तिः कर्तुमिति । यथा । "दोलाविलासेषु विलासिनीनां कर्णावतंसाः कलयन्ति कम्पम् । लीलाचलच्छ्रवणकुण्डलमापतन्ति । आययुर्भृङ्ग-मुखराः शेखरशालिनः" ॥ १४ ॥

कर्णावतंसेत्यादि ॥ उक्तार्थानामपीति ॥ अवतंसादिभिः क-र्णाभरणादीन्येवोच्यन्त इति अवतंसादिप्रयोगे कर्णादीनां गतार्थत्व-मित्यभिप्रायः । अन्वयं द्रढयितुं व्यतिरेकमाह ॥ न हीति ॥ कर्णाव-तंसाः कलयन्तिं कम्पम् । लीलाचलच्छ्रवणकुण्डलमापतन्तीत्यत्र लीलाचलनक्रियायोगादारूढप्रतिपत्तिर्भवत्येव । अतः, "अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् । तथैव शोभतेऽत्यन्तमस्याः श्रव-णकुण्डलम्" इत्याद्युदाहर्तव्यम् ॥ आययुरिति ॥ स्पष्टार्थम् । धनु-र्ज्यादिसूत्र एवैकत्र कर्णावतंसादीनामपि परिगणने कर्तुं शक्येऽपि प्रयोजनभेदं प्रतिपादयितुं सूत्रभेदः कृत इति द्रष्टव्यम् ॥ १४ ॥

मुक्ताहारशब्दे मुक्ताशब्दः शुद्धेः ॥ १५ ॥

मुक्ताहारशब्दे मुक्ताशब्दो हारशब्देनैव गतार्थः प्रयुज्यते, शुद्धेः प्रतिपत्त्यर्थमिति संबन्धः । शुद्धानामन्यरत्नैरमिश्रितानां हारो मुक्तहारः । यथा—

प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः ।
मुक्ताहारेण लसता हसतीव स्तनद्वयम् ॥ ॥ १५ ॥

मुक्ताहारेत्यादि सुबोधम् । ननु हसतीव स्तनद्वयमिति हासो-त्प्रेक्षणसामर्थ्यादेव हारस्य रत्नान्तरासंवलनलक्षणा शुद्धिः प्रतीयते, न मुक्ताशब्दसंनिधानात् । अन्यथा हासोत्प्रेक्षैव नोदयमासादयेत् । अतो नेदमुदाहरणमिति चेन्नैवम् । हारशुद्धिप्रतिपत्त्या हासोत्प्रेक्षा हासोत्प्रेक्षया च हारशुद्धिप्रतिपत्तिरिति परस्पराश्रयप्रसङ्गात् । अतो मुक्ताशब्दसन्निधानादेव हारशुद्धिप्रतिपत्तिरिति भवत्युदाहरणमिद-

Digitized by Google

म्। "हारो मुक्तावली"त्यभिधानादत्र हारशब्दो मुख्यया वृत्त्या रत्नान्तरासंवलितमुक्तागुणमभिधत्ते । अतः शुक्लेः प्रतिपत्तिः शब्दत एव सिद्धेति यदि पक्षस्तदा पुष्पमालाशब्दे पुष्पपदवन्मुक्ताहारशब्देऽपि मुक्तापदं कस्यचिदुत्कर्षस्य प्रतिपत्त्यै प्रयुज्यते । स चोत्कर्षस्त्रासादिदोषशून्यत्वं, स्थूलवृत्तत्वं, स्वच्छतातिशयश्चेति व्याख्येयम् ॥१५॥

पुष्पमालाशब्दे पुष्पपदमुत्कर्षस्य ॥ १६ ॥

पुष्पमालाशब्दे मालाशब्देनैव गतार्थं पुष्पपदं प्रयुज्यते ॥ उत्कर्षस्य प्रतिपत्त्यर्थमिति ॥ उत्कृष्टानां पुष्पाणां माला पुष्पमालेति । यथा । " प्रायशः पुष्पमालेव कन्या सा कं न लोभयेत्" । ननु मालाशब्दोऽन्यत्राऽपि दृश्यते । यथा, रत्नमाला, शब्दमालेति । सत्यम् । स तावदुपचरितस्य प्रयोगः । निरुपपदो हि मालाशब्दः पुष्परचनाविशेषमेवाभिधत्त इति ॥ १६ ॥

पुष्पमालेत्यादि ॥ स्पष्टार्थम् । ननु मालाशब्दस्य रूपहंसमेघादिमालासु प्रयोगदर्शनात् तद्व्यावृत्तिः प्रयोजनं पुष्पपदस्य, न पुनरुक्त इति शङ्कते ॥ नन्विति ॥ मालाशब्दः पुष्परचनायां मुख्यो, लाक्षणिकः पुनरन्यत्रेति, वृत्तिभेदान्नायं दोष इति परिहरति ॥ स तावदिति ॥ १६ ॥

करिकलभशब्दे करिशब्दस्ताद्रूप्यस्य ॥ १७ ॥

करिकलभशब्दे करिशब्दः कलभेनैव गतार्थः प्रयुज्यते ॥ ताद्रूप्यस्य प्रतिपत्त्यर्थमिति ॥ करी प्रौढकुञ्जरः । तद्रूपः कलभः करिकलभ इति । यथा "व्रज करिकलभ त्वं प्रीतिबन्धं करिण्याः" ॥१७

करिकलभेत्यादिव्यक्तार्थम् ॥ १७ ॥

विशेषणस्य च ॥ १८ ॥

विशेषणस्य विशेषप्रतिपत्त्यर्थमुक्तार्थस्य पदस्य प्रयोगः ।

Digitized by Google

यथा "जगाद मधुरां वाचं विशदाक्षरशालिनीम् ॥ १८ ॥

विशेषणस्येति ॥ शब्दान्तरस्य सन्निधानादुक्तार्थोऽपि विशेष्यशब्दः प्रयुज्यते । स च विशेषणस्य प्रतिपत्त्यै भवति । जगादेत्यनेन गतार्थस्य वाक्शब्दस्य माधुर्यवर्णवैशद्यलक्षणविशेषणप्रतिपत्त्यै प्रयोग इष्यत इति वाक्यार्थः । "जगाद मधुरोदारविशदाक्षरमीश्वरः" इति विन्यासकल्पनायां विशेषणस्य प्रयोगः क्रियाविशेषणत्वेऽप्युपपद्यते । अतो "नीलनीरजविकासहारिणा कान्तमीक्षणयुगेन वीक्षते" इत्युदाहार्यम् ॥ १८ ॥

तदेतत् सार्थकत्वसमर्थनमभियुक्तपदनिर्वाहाय, न सर्वत्रेति नियन्तुमाह ।

तदिदं प्रयुक्तेषु ॥ १९ ॥

तदिदमुक्तं प्रयुक्तेषु, नाप्रयुक्तेषु । न हि, भवति यथा "श्रवणकुण्डलमि"ति । तथा "नितम्बकाञ्ची"त्यपि । यथा वा "करिकलभ" इति । तथा "उष्ट्रकलभ" इत्यपि । अत्र श्लोकः—

कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः ।
सन्निधानादिबोधार्थं स्थितेष्वेतत् समर्थनम् ॥ ॥ १९ ॥

तदिदमिति ॥ प्रयुक्तेषु, अभियुक्तैरिति शेषः । नाऽप्रयुक्तेषु । तथोक्तं काव्यप्रकाशे "कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः । सन्निधानादिबोधार्थं स्थितेष्वेतत् समर्थनम्" इति । अप्रयुक्तानि दर्शयति ॥ यथेति ॥ १९ ॥

इत्थमेकार्थं समर्थ्य, सन्दिग्धं समर्थयितुमाह ।

संशयकृत् सन्दिग्धम् ॥ २० ॥

यद्वाक्यं साधारणानां धर्माणां श्रुतेर्विशिष्टानां वा श्रुतेः संशयं करोति तत् संशयकृत् सन्दिग्धमिति । यथा "स महात्मा भाग्यवशान्महापदमुपागतः" । किं भाग्यवशान्महापदमुपागत,

Digitized by Google

आहोस्विद्भाग्यवशान्महतीमापदमिति संशयकृद् वाक्यं, प्रकरणाद्यऽभावे सतीति ॥ २० ॥

संशयकृत्सन्दिग्धमिति ॥ व्याचष्टे ॥ यद्वाक्यमिति ॥ विशिष्टानामिति ॥ असाधारणानामित्यर्थः । उक्तलक्षणमुदाहरणे योजयति ॥ किम्भाग्यवशादिति ॥ लक्षणं विशिनष्टि ॥ प्रकरणादीति ॥ अत्रादिपदेन संयोगादयो गृह्यन्ते । यथोक्तं हरिणा—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्याऽन्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्याऽनवच्छेदे विशेषस्मृतिहेतवः, इति ॥ ॥ २० ॥

अप्रयुक्तं व्यक्तयितुमाह ।

मायादिकल्पितार्थमप्रयुक्तम् ॥ २१ ॥

मायादिना कल्पितोऽर्थो यस्मिंस्तन्मायादिकल्पितार्थमप्रयुक्तम् । अत्र श्लोकमुदाहरणम् ॥ २१ ॥

मायादिकल्पितार्थमप्रयुक्तमिति ॥ मायादिना कुशलमतिकुण्ठनपटिष्ठकुहनादिना कल्पितोऽर्थो यस्मिंस्तद्वाक्यमप्रयुक्तं भवति ॥ अत्र श्लोकमुदाहरणमिति ॥ विवृतं हि विदग्धमुखमण्डने—

प्राद्युर्व्यस्तं समस्तं च द्विर्व्यस्तं द्विस्समस्तकम् ।
तथा व्यस्तसमस्तं च द्विर्व्यस्तकसमस्तके, इत्यादिना ॥ ॥२१॥

अपक्रममालोचयितुमुपक्रमते ।

क्रमहीनार्थमपक्रमम् ॥ २२ ॥

उद्देशितानामनुद्देशितानां च क्रमः सम्बन्धः । तेन विहीनोऽर्थो यस्मिंस्तत् क्रमहीनार्थमपक्रमम् । यथा "कीर्तिप्रतापौ भवतः सूर्याचन्द्रमसोः समौ" । अत्र कीर्तिश्चन्द्रमसस्तुल्या । प्रतापः सूर्यस्य तुल्यः । सूर्यस्य पूर्वनिपातादक्रमः । अथवा प्रधानस्यार्थस्य

Digitized by Google

निर्देशः क्रमः । तेन विहीनोऽर्थो यस्मिंस्तदपक्रमम् । "यथा तुरङ्गमथ मातङ्गं प्रयच्छास्मै मदालसम्" ॥ २२ ॥

क्रमहीनार्थमपक्रममिति ॥ प्रतियोगिप्रतिपत्तिपूर्वकत्वात् क्रमाभावप्रतिपत्तेः प्रथमतः क्रममेकं प्रथयितुमाह ॥ उद्देशितानामिति॥ तेन विहीनस्तदभाववान् । उदाहरति ॥ यथेति ॥ उज्ज्वलार्थमन्यं क्रममभिधत्ते ॥ अथवेति ॥ प्रधानस्य अभ्यर्हितस्येत्यर्थः । मातङ्गं, तुरङ्गं वा प्रयच्छेति वक्तव्ये व्युत्क्रमेणोक्तं वाक्यमस्य कवेरनभिज्ञतामापादयतीति दुष्टम् ॥ २२ ॥

लोकविरुद्धं दर्शयितुमाह ।

देशकालस्वभावविरुद्धार्थानि लोकविरुद्धानि ॥ २३ ॥

देशकालस्वभावैर्विरुद्धोऽर्थो येषु तानि देशकालस्वभावविरुद्धार्थानि वाक्यानि लोकविरुद्धानि । अर्थद्वारेण लोकविरुद्धत्वं वाक्यानाम् । देशविरुद्धं यथा—

सौवीरेष्वस्ति नगरी मधुरा नाम विश्रुता ।
आक्षोटनालिकेराढ्या यस्याः पर्यन्तभूमयः ॥

कालविरुद्धं यथा "कदम्बकुसुमस्मेरं मधौ वनमशोभत" । स्वभावविरुद्धं यथा । "मत्तालिमङ्क्षुमुखरासु च मञ्जरीषु सप्तच्छदस्य तरतीव शरन्मुखश्रीः" । सप्तच्छदस्य स्तबका भवन्ति, न मञ्जर्य इति स्वभावविरुद्धम् । तथा—

भृङ्गेण कलिकाकोशस्तथा भृशमपीड्यत ।
यथा गोष्पदपूरं हि ववर्ष बहुलं मधु ।

कलिकायाः सर्वस्या मकरन्दस्यैतावद् बाहुल्यं स्वभावविरुद्धम् ॥ २३ ॥

देशकालस्वभावविरुद्धार्थानीति ॥ अर्थद्वारेणेति ॥ विरुद्धा-

Digitized by Google

र्थप्रतिपादकत्वाद्वाक्यानि विरुद्धानि व्यपदिश्यन्ते । क्रमेणोदाहरति ॥ देशविरुद्धमिति ॥ सौवीरेष्विति ॥ आक्षोटाः शैलोत्पन्ना गुडफलवृक्षाः । "पीलौ गुडफलस्रंसी तस्मिंस्तु गिरिसम्भवे । आक्षोटकन्दरालौ द्वौ" इत्यमरः । यमुनातीरवर्तिन्या मधुरायाः नगर्याः सौवीरेषु देशेष्वऽसम्भवाद् देशविरोधः ॥ कदम्बेति ॥ मधुर्वसन्तः । "चैत्रवसन्तमधुद्रुमदैत्यविशेषेषु पुंसि मधुशब्दः" इति नानार्थरत्नमाला । प्रावृषि प्रसवोद्गमशालिनः कदम्बस्य वसन्ते प्रसूनप्रसङ्गासम्भवात् कालविरोधः ॥ मत्तालिमञ्जुरेति ॥ मञ्जुः स्तुतिपाठकः । "नान्दीकारश्चाटुकारो मञ्जुश्च स्तुतिपाठकः" इति वैजयन्ती । स्तवका गुच्छाः । "स्याद् गुच्छकस्तु स्तवकः" इत्यमरः । ते नाम स्तवकाः पुष्पाणि पुञ्जीभूय यत्र प्रवर्तन्ते । मञ्जर्यो वल्लुर्यः । "वल्लुरी मञ्जरी स्त्रियाम्" इत्यमरः । यत्राऽऽयामवती प्रसूनपरिपाटी ता एव मञ्जर्यः । अतः सप्तच्छदस्य स्वभावतो गुच्छा एव, न तु मञ्जर्यः सम्भवन्तीति स्वभावविरुद्धम् ॥ भृङ्गेणेति ॥ कलिका कोरकः । अनुद्भिन्नमुकुला कलिका कलिकाकोशः । तत्र गोष्पदपूरणपर्याप्तस्य मधुनोऽसम्भवात् स्वभावविरुद्धम् । गोष्पदपूरमित्यत्र, गोः पदं प्रमाणतयाऽवच्छेदकमस्य वर्षस्येत्यस्मिन्नर्थे गोष्पदमिति भवति । "गोष्पदं सेवितासेवितप्रमाणेषु" इति गोष्पदशब्दो निपातितः । गोष्पदं पूरयित्वा ववर्ष गोष्पदपूरं ववर्ष । "वर्षप्रमाण ऊलोपश्चान्यतरस्याम्" इति णमुल् । लोकविरुद्धमपि क्वचित् कविसमयप्रसिद्धेः प्राबल्यान्न दुष्टम् । यथा "सुसितवसनालङ्कारायां कदाचन कौमुदीमहसि सुहृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः । तदनु भवतः कीर्तिः केवाप्यगीयत येन सा प्रियगृहमगान्मुक्ताशङ्का क नाऽसि शुभप्रदः" इति। एवमन्यत्र लोकयात्रा कविमर्यादयोर्विप्रतिषेधे पूर्वदौर्बल्यमवगन्तव्यम् ॥ २३ ॥

विद्याविरुद्धानि विवरीतुमाह ।

कलाचतुर्वर्गशास्त्रविरुद्धार्थानि विद्या-
विरुद्धानि ॥ २४ ॥

कलाशास्त्रैश्चतुर्वर्गशास्त्रैश्च विरुद्धोऽर्थो येषु तानि कलाचतु-

Digitized by Google

वर्गशास्त्रविरुद्धार्थानि वाक्यानि विद्याविरुद्धानि । वाक्यानां विरोधोऽर्थद्वारकः । कलाशास्त्रविरुद्धं यथा । "कालिङ्गं लिखितमिदं वयस्य पत्रं पत्रद्वैरपतिततकोटिकण्टकाग्रम् । कालिङ्गं पतिततकोटिकण्टकाग्रमिति पत्रविदामाम्नायः । तद्विरुद्धत्वात् कलाशास्त्रविरुद्धम् । एवं कलान्तरेष्वपि विरोधोऽभ्यूह्यः । चतुर्वर्गशास्त्रविरुद्धानि तूदाह्रियन्ते । "कामोपभोगसाफल्यफलो राज्ञां महीजयः" । धर्मफलोऽश्वमेधादियज्ञफलो वा राज्ञां महीजय इत्यागमः । तद्विरोधाद्धर्मशास्त्रविरुद्धमेतद्वाक्यमिति । "अहङ्कारेण जीयन्ते द्विषन्तः किं नयाश्रया" । द्विषज्जयस्य नयमूलत्वं स्थितं दण्डनीतौ । तद्विरोधादर्थशास्त्रविरुद्धं वाक्यमिति । "दशनाङ्कपवित्रितोत्तरोष्ठं रतिखेदालसमाननं स्मरामि" । उत्तरोष्ठमन्तर्मुखं नयनान्तमिति मुक्त्वा चुम्बननखरदशनस्थानानि इति कामशास्त्रे स्थितम् । तद्विरोधात् कामशास्त्रविरुद्धार्थं वाक्यमिति । "देवताभक्तितो मुक्तिर्न तत्त्वज्ञानसंपदा" । एतस्यार्थस्य मोक्षशास्त्रे स्थितत्वात् तद्विरुद्धार्थम् । एते वाक्यवाक्यार्थदोषास्त्यागाय ज्ञातव्याः । ये त्वऽन्ये शब्दार्थदोषाः सूक्ष्मास्ते गुणविवेचने वक्ष्यन्ते । उपमादोषाश्चोपमाविचार इति ॥२४॥ इति श्रीकाव्यालङ्कारसूत्रवृत्तौ दोषदर्शने द्वितीयेऽधिकरणे द्वितीयोऽध्यायः ॥ वाक्यवाक्यार्थदोषविभागः ॥ समाप्तं चेदं दोषदर्शनं द्वितीयमधिकरणम् ॥ २ ॥ २ ॥

कलाश्चतुर्वर्गेति ॥ शास्त्रपदस्योभयत्र सम्बन्धः । प्रतिपाद्यस्य दुष्टत्वे प्रतिपादकमपि दुष्टं भवतीत्याह ॥ वाक्यानामिति ॥ कलाशास्त्रविरुद्धमुदाहरति ॥ कलाशास्त्रेति ॥ कालिङ्गमिति ॥ कलिङ्गजनेषु दृष्टं पत्रं कालिङ्गमित्युच्यते । तच्च पतिततकोटिकण्टकाग्रतया लेखनीयम् । तत्रार्थे तच्छास्त्रफक्किकामाह ॥ कालिङ्गं पतिततकोटिकण्टकाग्रमिति ॥ पत्रविदामाम्नाय इति ॥ विरोधस्तु परिस्फुट एव ॥ एवमिति ॥

Digitized by Google

भरतकलाविरोधो यथा । "रणद्भिराघट्टनया नभस्वतः" इत्यादावानुलोम्येन प्रातिलोम्येन वा नभस्वत्संचारक्रमेण स्वरा उत्पद्यन्ते, न पुनर्वैचित्र्येणेति कुतो रागसम्बन्धिनीनां मूर्च्छनानां स्फुटीभाव इत्यादि द्रष्टव्यम् । धर्मार्थकाममोक्षाश्चतुर्वर्गः । "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः । तत्प्रतिपादकशास्त्राणि चतुर्वर्गशास्त्राणि । तद्विरुद्धानि क्रमेणोदाहर्तुं प्रतिजानीते ॥ चतुर्वर्गेति ॥ तत्र धर्मशास्त्रविरुद्धमुदाहरति ॥ कामोपभोगेति ॥ तत्रागमवाक्यं दर्शयति ॥ अश्वमेधादीति ॥ महीजयस्य राज्ञामश्वमेधादिफलत्वेन धर्मशास्त्रेऽभिधानात् । तद्विरुद्धं कामोपभोगसाकल्यफलवाक्यम् । यथा वा "सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः । नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च" । अत्र प्रहोपरागं विना रात्रौ स्नानं, धर्मशास्त्रविरुद्धम् । "रात्रौ स्नानं न कुर्वीत राहोरन्यत्र दर्शनात्" इति स्मृतेः । अर्थशास्त्रमत्र दण्डनीतिः । यत्र पुनरर्थकामौ प्रधानं, लोकयात्रानुवृत्तिमात्राय धर्मः सा दण्डनीतिः । यस्या भगवान् बृहस्पतिः संवक्ता । तद्विरुद्धमुदाहरति ॥ अहङ्कारेणेति ॥ विरोधं विवृणोति ॥ द्विषज्जयस्येति ॥ कामशास्त्रविरुद्धं दर्शयति ॥ दशनेति ॥ विरोधं विवेचयति ॥ उत्तरोष्ठमिति ॥ यत्र त्रिवर्गस्य परस्परानुपरोधादुपयोगोपदेशः । यस्य भगवान् भार्गवः प्रणेता । उक्तं हि रतिरहस्ये । "अङ्कुष्ठे पदगुल्फजानुजघने" इत्यादि । मोक्षशास्त्रविरुद्धमुदाहरति ॥ देवताभक्तित इति ॥ विरोधं व्युत्पादयति ॥ एतस्येति ॥ "चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ । तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते" इत्युक्तनीत्या या ज्ञानलक्षणा भक्तिः साऽत्र न विवक्षिता । किन्त्वार्तत्वादिप्रयुक्ता त्रिरूपा । ज्ञानरूपायास्तु भक्तेर्मोक्षो भवत्येव । तदुक्तं तत्रैव । "ज्ञानी त्वात्मैव मे मतम्" इति । अतो, न तत्त्वज्ञानसंपदेत्येतत्, "ज्ञानादेव तु कैवल्यम्" इत्यादिमोक्षशास्त्रविरुद्धम् । प्रतिपादितानाममीषां दोषाणां परिज्ञानस्य फलमाह ॥ एत इति ॥ ये त्वन्य इति ॥ सूक्ष्माः काव्यसौन्दर्याक्षेपाऽनतिक्षमाः । ओजोविपर्ययात्मा दोष इत्यारभ्य तदुदाहरणप्रत्युदाहरणाभ्यां वक्ष्यन्ते । ते गुणविवेचने यथायथमवबोध्याः । यद्येवं तर्हि स्थूलत्वादुपमादोषादयो दोषविवेचने विविच्यन्तामित्यत आह ॥

Digitized by Google

उपमादोषाश्चेति ॥ उपमाविचारे तद्दोषविचारणं प्रति सौकर्यं भवतीति भावः ॥ २४ ॥

इति कृतरचनायामिन्दुवंशोद्वहेन
त्रिपुरहरधरित्रीमण्डलाखण्डलेन ॥
ललितवचसि काव्यालंक्रियाकामधेना-
वधिकरणमयासीत् पूर्तिमेतद् द्वितीयम् ॥ १ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां वामनालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालङ्कारकामधेनौ दोषदर्शने द्वितीयेऽधिकरणे द्वितीयोऽध्यायः ॥ २ ॥ २ ॥ (५) ॥

Digitized by Google

अथ तृतीयमधिकरणम् ।

देव्याः कृतिषु दीव्यन्त्या वाचां वैचित्र्यकारिणीम् ॥
चेतोहरचमत्कारां प्रस्तौमि गुणविस्तृतिम् ॥ १ ॥
अथ गुणविवेचनं तृतीयमधिकरणमारभ्यते ।

यद्विपर्ययात्मनो दोषास्तान् गुणान् विचारयितुं गुणविवेचनमधिकरणमारभ्यते । तत्रौजःप्रसादादयो गुणा यमकोपमादयस्त्वलङ्कारा इति स्थितिः काव्यविदाम् । तेषां किं भेदनिबन्धनमित्याह ।

काव्यशोभायाः कर्तारो धर्मा गुणाः ॥ १ ॥

ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः । ते चौजःप्रसादादयः । न यमकोपमादयः । कैवल्येन तेषामकाव्यशोभाकरत्वात् । ओजःप्रसादादीनां तु केवलानामस्ति काव्यशोभाकरत्वमिति ॥ १ ॥

उक्तवक्तव्यसङ्गतिमुल्लिङ्घयति ॥ यद्विपर्ययात्मानो दोषा इति ॥ निर्वृत्ते दोषनिरूपणे तत्प्रतिभटानां गुणानां निरूपणं लब्धावसरमिति सङ्गतिः । गुणा अलङ्कारेभ्यो विविच्यन्ते । ते च परस्परं विविच्यन्ते विभज्यन्तेऽस्मिन्निति गुणविवेचनं नामाधिकरणमारभ्यते । "काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते । काञ्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः" इति दण्डिमतं खण्डयितुं गुणालङ्कारभेदं दर्शयिष्यन् पीठिकां प्रतिष्ठापयति ॥ तत्रेति ॥ काव्यविदां कविकर्मधर्मविदाम् ओजःप्रसादादीनां गुणा इति यमकोपमादीनामलङ्कारा इति च विभिन्नव्यवहारविषयत्वं व्यवस्थितमित्यर्थः । उत्तरसूत्रं प्रश्नपूर्वकं प्रसञ्जयति ॥ तेषामिति ॥ तेषां गुणालङ्काराणां भेदस्य किं निबन्धनं कारणमिति प्रश्नः । व्याचष्टे ॥ ये खल्विति ॥ गुणा वस्तुतो रीतिनिष्ठा अपि, उपचाराच्छब्दधर्मा इत्युक्तम् । एतच्च गुणोद्देशसूत्रे कुशलमुपपादयिष्यामः । गुणशब्दप्रवृत्तिनिमित्तमयोगा-

Digitized by Google

न्ययोगव्यवच्छेदाभ्यां परिच्छेत्तुं प्रक्रमते ॥ ते चेति ॥ अन्ययोगव्यवच्छेदं तावदाख्याति ॥ कैवल्येनेति ॥ तेषामलङ्कुराणां कैवल्येन गुणसाहचर्याभावेन काव्यशोभाकलनाक्षमत्वादित्यर्थः । अयोगं व्यवच्छिनत्ति ॥ ओजःप्रसादादीनां त्विति ॥ केवलानामसाहचर्याणामस्त्येवेति सम्बन्धः ॥ १ ॥

अलङ्कारपदप्रवृत्तिनिमित्तमावेदयितुमाह ।

तदतिशयहेतवस्त्वलङ्काराः ॥ २ ॥

तस्याः काव्यशोभाया अतिशयस्तदतिशयस्तस्य हेतवः । तुशब्दो व्यतिरेके । अलङ्काराश्च यमकोपमादयः । अत्र श्लोकौ—

युवतेरिव रूपमङ्गकाव्यं स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणयं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः ॥
यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः ।
अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते ॥ ॥२॥

तदतिशयहेतव इति ॥ जडबुद्धिषु जातानुग्रहो विग्रहमाह ॥ तस्या इति ॥ तुशब्द इति ॥ व्यतिरेको भेदः । "तुः स्याद्भेदेऽवधारणे" इत्यमरः । अमुमेवार्थमन्वयव्यतिरेकाभ्यामभियुक्तसंवादेन द्रढयति ॥ अत्र श्लोकाविति ॥ शुद्धा अलङ्काराऽऽसङ्गलिता गुणा ओजःप्रसादादयो लावण्यादयश्च यस्य तत् । गुणमात्रविशिष्टमपि काव्यं युवते रूपमिव स्वदते रोचते रसिकेभ्य इति । निरन्तराभिर्निबिडाभिः । अलङ्कारा यमकोपमादयः कटकादयश्च तेषां विकल्पा विच्छित्तयस्तेषां कल्पनाभी रचनाभिः । विहितप्रणयं रचितानुबन्धं सत् काव्यं युवतेरूपमिवातीवातिमात्रं स्वदते । इत्यन्वयमुक्त्वा व्यतिरेकमाह ॥ यदीति ॥ वचः काव्यात्मकं, गुणेभ्यश्च्युतं यदि, तद्वचो, यौवनवन्ध्यं लावण्यशून्यमङ्गनाया वपुरिव भाति । तदा जनदयितान्यपि लोकप्रियाण्यपि, अलङ्करणानि, नियतमवश्यं, दुर्भगत्वं सौन्दर्यवैधुर्यादनादरणीयत्वं संश्रयन्ते इति श्लोकद्वयार्थः ॥ २ ॥

विरुद्धधर्माध्यासो भावं भिन्द्यादिति न्यायेन नित्यत्वानित्यत्वाभ्यां गुणालङ्कारभेदः सिद्ध इति दर्शयितुमाह ।

Digitized by Google

पूर्वे नित्याः ॥ ३ ॥

पूर्वे गुणा नित्याः । तैर्विना काव्यशोभानुपपत्तेः ॥ ३ ॥

पूर्वे नित्या इति ॥ पूर्वे गुणा नित्या इत्युक्तेऽन्ये पुनरलङ्कारा अनित्या इति गम्यते एव । गुणानां नित्यत्वे हेतुस्तैर्विनेति ॥ गुणान्वयव्यतिरेकानुविधायित्वात् काव्यशोभाया इत्यर्थः ॥ ३ ॥

एवमभेदमतं खण्डितम् । अथोक्तानुवादपूर्वकमुद्देशसूत्रमुदीरयति ।

एवं गुणालङ्काराणां भेदं दर्शयित्वा शब्दगुणनिरूपणार्थमाह ।

ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारता-ऽर्थव्यक्तिकान्तयो बन्धगुणाः ॥ ४ ॥

बन्धः पदरचना, तस्य गुणा बन्धगुणाः ओजःप्रभृतयः ॥४॥

एवमिति ॥ वस्तुतो रीतिधर्मत्वेऽपि गुणानामात्मलाभस्य शब्दार्थाधीनत्वात् तस्य निरूप्यत्वाच्च शब्दार्थधर्मत्वमुपचारादुक्तम् । अथ शब्दनिष्ठा गुणा इदानीं मुख्यया वृत्त्या रीतिधर्मत्वमिति आत्मसिद्धान्तमाविष्कुर्वन् सौत्रं पदं व्याकरोति ॥ बन्धः पदरचना तस्य गुणा इति ॥ न तु शब्दार्थयोरिति शेषः । एवञ्च सत्युपक्रमोपसंहारलिङ्गैराचार्यतात्पर्यपर्यालोचनायामात्मभूतरीतिनिष्ठा गुणास्तच्छरीरभूतशब्दार्थनिष्ठाः पुनरलङ्कारा इति निश्चीयते । अतो मन्यामहे गुणत्वादोजःप्रभृतीनामात्मनि समवायवृत्त्या स्थितिरलङ्कारत्वाद्यमकोपमादीनां शरीरे संयोगवृत्त्या स्थितिरिति ग्रन्थकारस्याभिमतमिति । न ह्यविपश्चिदपि कश्चिदभिजानीयादभिवदेद्वा न गुणानामात्मनि रीताविवालङ्काराणां शरीरभूते शब्दार्थयुगले समवायवृत्त्या स्थितिरिति । एवञ्च गुणाऽलङ्काराणामुभयेषामपि समवायवृत्त्या स्थितिरित्यभिमन्यमानैर्भेदाभिधानं गण्डुरिकाप्रवाहन्यायेनेति यदुक्तं तन्निरस्तम् । किञ्च । रीतिरात्मा काव्यस्येति शब्दार्थयुगलकाव्यशरीरस्य रीतिमात्मानमुपपाद्य, विशिष्टा पदरचना रीतिरिति रीतिं लक्ष-

Digitized by Google

यित्वा, विशेषो गुणात्मेति गुणमात्रस्यैवात्मभूतरीतिविशिष्टत्वे प्रतिष्ठापिते यमकोपमादीनामलङ्काराणां तच्छरीरभूतशब्दार्थनिष्ठत्वमर्यात् समर्थितं भवति । अत एवौजःप्रसादादीनां गुणत्वं यमकोपमादीनामलङ्कारत्वमिति च व्यपदेशभेदोऽप्युपपद्यते । एवञ्च सति पूर्वं नित्या इति सूत्रे गुणानां नित्यत्वमलङ्काराणाम् अनित्यत्वमित्यादि सूत्रयता सूत्रकृता गुणानां काव्यव्यवहारप्रयोजकत्वमुक्तं भवति । तथाच परमते व्यङ्ग्यस्य प्राधान्ये ध्वनिरुत्तमं काव्यं, गुणभावे गुणीभूतव्यङ्ग्यं मध्यमं काव्यं, सम्भावनामात्रे चित्रमपरं काव्यमिति काव्यभेदाः कथिताः । तथात्रापि गुणसामग्र्ये वैदर्भी, अविरोधगुणान्तरानिरोधेन ओजःकान्तिभूयिष्ठत्वे गौडीया, माधुर्यसौकुमार्यप्राचुर्ये पाञ्चालीति काव्यभेदाः कथ्यन्ते । रीतिध्वनिवादमतयोरियाँस्तु भेदः । ध्वनिरात्मा काव्यस्य, स एव तद्व्यवहारप्रयोजक इत्युभयत्राप्यात्मनिष्ठा गुणाः । शब्दार्थयुगलं शरीरं, तन्निष्ठा अलङ्कारा इति च सर्वमविशिष्टम् । किं समस्तैर्गुणैः काव्यव्यवहारः ? उत कतिपयैः ? । यदि समस्तैस्तत् कथमसमस्तगुणा गौडीया पाञ्चाली वा रीतिः काव्यस्यात्मा । अथ कतिपयैः । "अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः" इत्यादावोजःप्रभृतिषु गुणेषु सत्सु काव्यव्यवहारप्राप्तिः । "स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनि । अस्या रदच्छदरसो न्यक्करोतितरां सुधाम्" इत्यादौ गुणनैरपेक्ष्येण विशेषोक्तिव्यतिरेकालङ्कारयोरेव काव्यव्यवहारप्रयोजकत्वं च दृश्यत इति स्वसंकल्पमात्रकल्पितविकल्पानां नावश्यमवकाशं पश्यामः । अथापि यदि पाण्डित्यकण्डूलवैतण्डिकचण्डिम्ना चिक्षण्डयिषा परस्य तर्हि स्वमतं पृष्टः स्वयमवाचष्टाम् । "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति काव्यसामान्यलक्षणे शब्दार्थयोर्गुणसाहित्यमिष्यते । किं गुणसमष्टिविशिष्टं काव्यं, तद्व्यष्टिविशिष्टं वा । नाद्यो निरवद्यः । एकैकगुणोदाहरणेषु काव्यत्वाभावप्रसङ्गात् । गुणसमष्टिवैशिष्ट्याभावान्न द्वितीयः । वस्त्वलङ्कारध्वनिषु गुणिनो रसस्याऽभावेन गुणस्यैवाभावात् । किञ्च, सर्वे रसाः संभूय काव्यात्मीभवन्ति ? उत एको रसः ? । आद्ये न कुत्रापि काव्यात्मसम्भावना । विरोधिरसानामेकाधिकरण्यासम्भवात् । द्वितीये वस्त्वलङ्कारध्वनिषु रसासम्भवात् ।

Digitized by Google

आत्मविधुरेषु काव्यव्यवहारासम्भवप्रसङ्ग इत्यलं परमतदोषोद्घाटन-पाटवप्रकटनेन । प्रकृतमनुसरामः ॥ ४ ॥

उद्देशक्रमादमीषां गुणानामसाधारणधर्मानाख्यातुमारभते ।

तान् क्रमेण दर्शयितुमाह ।

गाढबन्धत्वमोजः ॥ ५ ॥

बन्धस्य गाढत्वं यत् तदोजः । यथा "विलुलितमकरन्दा मञ्जरीर्नर्तयन्ति" । न पुनः "विलुलितमधुधारा मञ्जरीर्लोलयन्ति" ॥ ५

तान् क्रमेणेति ॥ बन्धस्य पदरचनाया गाढत्वं कनकशलाका-वयवघटनवन्निबिडत्वम् । तत्र हेतवः— संयुक्ताक्षरत्वं, निरन्तरेफ-शिरस्कैर्वर्गाणां प्रथमद्वितीयैस्तृतीयचतुर्थैः प्रथमैस्तृतीयैश्च संयोगा, विसर्जनीयजिह्वामूलीयोपध्मानीया, । गुर्वन्ता समासाश्चेत्येवमादय-स्तत्तत्प्रमाणेनावस्थितत्वम् । तत्रोदाहरणप्रत्युदाहरणे दर्शयति ॥ य-थेति ॥ उभयत्र गाढत्वशैथिल्ये स्फुटे ॥ ५ ॥

शैथिल्यं प्रसादः ॥ ६ ॥

बन्धस्य शैथिल्यं शिथिलत्वं प्रसादः ॥ ६ ॥

शैथिल्यमिति ॥ अस्य वृत्तिः स्पष्टार्था ॥ ६ ॥

शिथिलत्वमोजोगुणविपर्ययरूपम् । तदात्मकत्वे प्रसादस्य दो-षत्वमेव स्यादिति परशङ्कां पुरस्कृत्य तां पराकर्तुमुत्तरसूत्रमवता-रयति ।

नन्वयमोजोविपर्ययात्मा दोषः, तत् कथं गुण इत्याह ।

गुणः संश्लेषात् ॥ ७ ॥

गुणः प्रसादः । ओजसा सह संश्लेषात् ॥ ७ ॥

नन्विति ॥ संश्लेषो मेलनम् । प्रसादो गुणो भवत्येव । ओजसा सह गुणेन संश्लेषात् ॥ ७ ॥

न शुद्धः ॥ ८ ॥

Digitized by Google

शुद्धस्तु दोष एवेति ॥ ८ ॥

तदमिश्रं तु शैथिल्यं दोष एवेत्याह ॥ शुद्धस्त्विति ॥ ८ ॥

ननु गाढत्वशैथिल्ययोस्तमःप्रकाशवद् विरुद्धस्वभावयोः संप्लव एव न सम्भवतीति शङ्कामनूद्यानन्तरसूत्रेणापवदितुमाह ।

ननु विरुद्धयोरोजःप्रसादयोः कथं संप्लव इत्याह ।

स त्वनुभवसिद्धः ॥ ९ ॥

स तु संप्लवस्त्वनुभवसिद्धः । तद्विदां रत्नादिविशेषवत् ।

अत्र श्लोकः—

करुणप्रेक्षणीयेषु संप्लवः सुखदुःखयोः ।
यथाऽनुभवतः सिद्धस्तथैवौजःप्रसादयोः ॥ ॥ ९ ॥

नन्विति ॥ व्याचष्टे ॥ स तु संप्लव इति ॥ रत्नविशेषवत् ॥ परीक्षानुभवसाक्षिक इत्यर्थः । विरुद्धयोरपि क्वचित् संप्लवः सम्भवतीत्यभियुक्तोक्तिमभिदर्शयति ॥ करुणेति ॥ यानि करुणानि कारुण्यावहानि यानि मनोज्ञानि च वस्तूनि तेषु युगपदनुभूयमानेषु समसमयसमुत्पन्नयोः सुखदुःखयोः संप्लवो यथाऽनुभवतः स्वसंवेदनात् सिद्धस्तथौजःप्रसादयोरपि संप्लवः स्वसंवित्संवेद्यतया सिद्ध इति श्लोकार्थः ॥ ९ ॥

अत्रौजःप्रसादयोः साम्ये पर्यायतः प्रकर्षे च त्रिप्रकारो भवति । ते च प्रकारा अप्यनुभवगम्या इति दर्शयितुमाह ।

साम्योत्कर्षौ च ॥ १० ॥

साम्यमुत्कर्षश्चौजःप्रसादयोरेव । साम्यं यथा । "अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्वा यूने सितातपवारणम्" । क्वचिदोजः प्रसादादुत्कृष्टम् । यथा । "व्रजति गगनं भल्लातक्याः फलेन सहोपमाम्" । क्वचिदोजसः प्रसादस्योत्कर्षः । यथा । "कुसुमशयनं न प्रसग्रं न चन्द्रमरीचयो न च

Digitized by Google

मलयजं सर्वाङ्गीणं न वा मणियष्टयः" ॥ १० ॥

साम्योत्कर्षौ चेति ॥ क्रमेण त्रिविधं प्रसादमुदाहृत्य दर्शयति ॥ साम्यं यथेति ॥ विषयव्यावृत्तात्मेत्यादावोजः, यथाविधि सूनव इत्यादौ प्रसादः । भिन्नदेशयोरप्योजःप्रसादयोः परस्परच्छायाऽनुकारितया सम्प्लवः । उभयोरत्र साम्यं वेदितव्यम् । ओजसः प्रसादादुत्कर्षमुदाहरति ॥ व्रजतीति ॥ भल्लातकी नाम वीरवृक्षः । "वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु" इत्यमरः । कुसमशयनमित्यत्र प्रसादस्योत्कर्षो द्रष्टव्यः ॥ १० ॥

श्लेषं विशदयितुमाह ।

मसृणत्वं श्लेषः ॥ ११ ॥

मसृणत्वं नाम यस्मिन् संति बहून्यपि पदान्येकवद्भासन्ते । यथा "अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः" । न पुनः— सूत्रं ब्राह्ममुरःस्थले । भ्रमरीवल्गुगीतयः । तडित्कलिलमाकाशम्" इति । एवं तु श्लेषो भवति "ब्राह्मं सूत्रमुरःस्थले । भ्रमरीमञ्जुगीतयः । तडिज्जटिलमाकाशम् इति ॥ ११ ॥

मसृणत्वं श्लेष इति ॥ मसृणत्वं विशिष्य दर्शयति ॥ यस्मिन्निति ॥ यत्र हि व्यासेऽपि समासवदवभासः स श्लेषः । अस्त्युत्तरस्यामिति सामान्येनोदाहरणमुक्त्वा श्लेषस्य व्यतिरेकमुखेनान्वयमाविष्करोति ॥ न पुनरिति ॥ सूत्रं ब्राह्ममुरःस्थले, भ्रमरीवल्गुगीतयः, तडित्कलिलमाकाशम् इत्यत्र श्लेषः पुनर्नास्तीति सम्बन्धः । सूत्रं ब्राह्ममित्यत्र परसवर्णेऽपि परुषाक्षरोत्थानान्न श्लेषः । तर्हि कीदृशि विन्यासे श्लेषो भवतीत्यत आह ॥ एवं त्विति ॥ अस्य गुणस्य विपर्ययो विसन्धेर्वाक्यदोषस्य विश्लेषात्मा भेदः ॥ ११ ॥

समतां समाख्यातुमाह ।

मार्गभेदः समता ॥ १२ ॥

मार्गस्याभेदो मार्गभेदः समता । येन मार्गेणोपक्रमस्तस्या-

Digitized by Google

Sत्याग इत्यर्थः। श्लोके प्रबन्धे चेति पूर्वोक्तमुदाहरणम्। विपर्ययस्तु यथा—

प्रसीदचण्डि! सज्य मन्युमञ्जसा
जनस्तवाऽयं पुरतः कृताञ्जलिः॥
किमर्थमुत्कम्पितपीवरस्तन-
द्वयं त्वया लुप्तविलासमास्यते॥॥ १२॥

मार्गोभेद इति॥ आदिमध्यावसानेष्वेकरूप्यं समतेत्यर्थः। तस्या विषयं दर्शयति॥ श्लोके प्रबन्धे चेति॥ किमश्लोकलक्षणमिति चेदाह॥ पूर्वोक्तमिति॥ अस्त्युत्तरस्यामित्यादि। प्रत्युदाहरणमाह॥ विपर्ययस्त्विति॥ प्रसीद, त्यजेति कर्तृवाचितया प्रक्रान्तस्य मार्गस्यास्यत इत्यत्र त्यागाश्च समता॥ १२॥

पञ्चमगुणं प्रपञ्चयितुमाह।

आरोहावरोहक्रमः समाधिः॥ १३॥

आरोहावरोहयोः क्रम आरोहावरोहक्रमः समाधिः परिहारः। आरोहस्यावरोहे सति परिहारः, अवरोहस्य वाऽऽरोहे सतीति। तत्रारोहपूर्वकोऽवरोहो यथा। "निरानन्दः कौन्दे मधुनि परिभुक्तोज्झितरसे"। अवरोहपूर्वस्त्वारोहो यथा। "नराः शीलभ्रष्टा व्यसन इव मज्जन्ति तरवः"। आरोहस्य क्रमोऽवरोहस्य च क्रम आरोहावरोहक्रमः। क्रमेणारोहणमवरोहणं चेति केचित्। यथा "निवेशः स्वःसिन्धोस्तुहिनगिरिवीथीषु जयति"॥ १३॥

आरोहावरोहक्रम इति॥ अत्र स्वाभिमतं तावदेकमर्थं लक्षणवाक्यस्य समर्थयते॥ समाधिः परिहार इति॥ अवरोहे प्रवर्तमाने सत्यारोहस्य प्रवृत्तस्य परिहारः परित्यागः। आरोहे च सत्यवरोहस्य परिहारः। आरोहावरोहयोर्विरुद्धत्वेन यौगपद्यासम्भवादिति भावः। दीर्घादिगुर्वक्षरप्राचुर्ये, आरोहः। लघ्वादिशिथिलप्रायत्वे चावरोह इति द्रष्टव्यम्। तथाचारोहपूर्वकोऽवरोहः, क्वचिदवरोहपू-

Digitized by Google

र्वक आरोह इति समाधेर्वैविध्यमुक्तं भवति । तत्राद्यमुदाहरति ॥ आरोहपूर्वक इति ॥ निशानन्दः कौन्द इत्यत्र गुर्वक्षरप्राचुर्यादारोहः । मधुनीत्यत्र लघ्वक्षरप्राचुर्यादवरोहः । द्वितीयमुदाहरति ॥ अवरोह-पूर्वक इति ॥ मरा इत्यत्र शैथिल्यादवरोहः । श्रीलभ्रष्टा इत्यत्र गुर्व-क्षरप्राचुर्यादारोहः । अस्यैव लक्षणवाक्यस्यान्यैरभिहितमर्थमभ्य-नुजिघृक्षुरनुवदति ॥ आरोहस्य क्रम इति ॥ निःश्रेणिकारोहावरोह-न्यायेन क्रमेणारोहणं, क्रमेण चावरोहणमिति लक्षणवाक्यार्थः । उदाहरति ॥ निवेश इति ॥ निवेशः स्वःसिन्धोरित्यत्र निःश्रेणिका-क्रमेणारोहः । तुहिनगिरीत्यत्रावरोहः ॥ १३ ॥

ननु लक्षणवाक्यार्थपर्यालोचनया समाधेरोजःप्रसादाभ्यतिरे-कात्र पृथक्त्वमिति शङ्कामुद्भावयितुमुत्तरसूत्रमुपक्षिपति ।

न पृथगारोहावरोहयोरोजःप्रसाद-रूपत्वात् ॥ १४ ॥

न पृथक्समाधिर्गुणः । आरोहावरोहयोरोजःप्रसादरूपत्वात् । ओजोरूपश्चारोहः, प्रसादरूपश्चावरोह इति ॥ १४ ॥

न पृथगिति ॥ व्याचष्टे ॥ न पृथक् समाधिरिति ॥ १४ ॥

आरोहावरोहावोजःप्रसादरूपौ न भवतः । असम्पृक्तत्वात् । अतः परस्परच्छायानुकारितया सम्पृक्तयोरोजःप्रसादयोर्न समा-धिरन्तर्भवतीत्यभिसन्धाय सिद्धान्तसूत्रं व्याचष्टे ।

न संपृक्तत्वात् ॥ १५ ॥

यदुक्तमोजःप्रसादरूपत्वमारोहावरोहयोस्तन्न । सम्पृक्तत्वात् । सम्पृक्तौ खल्वोजःप्रसादौ नदीवेणिकावद् वहतः ॥ १५ ॥

यदुक्तमिति ॥ संपृक्तत्वं सदृष्टान्तमुपपादयति ॥ संपृक्तौ खल्विति ॥ संपृक्तसरिद्द्वयसलिलन्यायेन संपृक्तावोजःप्रसादा-विति । तद्विलक्षणयोरारोहावरोहयोः संपृक्तावव्यतिरेकात्संपृक्त-त्वहेतोरसिद्धिरुद्भूता ॥ १५ ॥

ननु, न केवलं नदीद्वयवेणिकान्यायेनौजःप्रसादयोः साम्येना-

Digitized by Google

ऽवस्थिनिः, किन्तु साम्योत्कर्षौ वेत्युक्तत्वात् समुद्रकस्थमणिप्रभा-समूहन्यायादुद्भावचभावेन स्थितिः । तस्मिन् पक्षे कथमयं समाधिः पृथग्गुण इति शङ्कामपनेतुमाह ।

अनैकान्त्याच्च ॥ १६ ॥

न चायमेकान्तः । यदोजस्यारोहः प्रसादे चावरोह इति॥१६॥

अनैकान्त्याच्चेति ॥ ओजःप्रसादयोरारोहावरोहसाहचर्यनियमो न सम्भवति । व्यभिचारात् । व्यभिचारस्तु "उद्गच्छदच्छसुभगच्छविगुच्छकच्छम" इत्यादौ । "यतो यतो निवर्तते ततस्ततो विमुच्यते" इत्यादौ च, आरोहशून्यस्यौजसः, अवरोहशून्यस्य प्रसादस्य च स्थितत्वादित्यभिप्रायः ॥ १६ ॥

नन्वारोहावरोहावोजःप्रसादयोरवस्थाविशेषौ स्यातामतो न पृथक् समाधिरिति यदि चोद्यते, तर्हि समाधेर्दत्तो हस्तावलम्ब इति दर्शयितुमनन्तरसूत्रमवतारयति ।

ओजःप्रसादयोः क्वचिद्भागे तीव्रावस्थायां तावितिचेदभ्युपगमः ॥ १७ ॥

ओजःप्रसादयोः क्वचिद्भागे तीव्रावस्थायामारोहोऽवरोहश्चेत्येवं चेन्मन्यसे, अभ्युपगमः— न विप्रतिपत्तिः ॥ १७ ॥

ओजःप्रसादयोः क्वचिद्भाग इति ॥ शङ्कां सङ्कलय्य दर्शयति ॥ ओजःप्रसादयोरिति ॥ १७ ॥

परोक्तस्याभ्युपगमे पर्यवसितमर्थं समर्थयितुमाह ।

विशेषापेक्षित्वात्तयोः ॥ १८ ॥

स विशेषो गुणान्तरात्मा ॥ १८ ॥

विशेषेति ॥ विशेषस्तीव्रावस्थात्मा । तमपेक्षितुं शीलमनयोरिति विशेषापेक्षिणौ तयोर्भावस्तत्त्वं तस्मात् । आरोहावरोहाभ्यामोजःप्रसादयोस्तीव्रावस्था हि स्वनिमित्तत्वेनापेक्षिता । सोऽय-

Digitized by Google

ओजःप्रसादव्यतिरेकेण समाधिरन्यो गुण इति सूत्रार्थः ॥ १८ ॥

नन्वमुमर्थमभिधातुं समाधिलक्षणवाक्यं न क्षमत इत्याशङ्क्य गौणवृत्तिराश्रयणीयेत्याह ।

आरोहावरोहनिमित्तं समाधिराख्यायते ॥ १९ ॥

आरोहावरोहक्रमः समाधिरिति गौण्या वृत्त्या व्याख्येयम् ॥ १९ ॥

आरोहावरोहेति ॥ क्रमपदेन तन्निमित्तं लक्ष्यत इत्यर्थः ॥ १९ ॥

ननु पुनरवस्थाऽवस्थावतो यदा न भिद्यते तदा तीव्रावस्था ओजःप्रसादात्मिकैव भवति । यद्यपि, यद् यदोजस्तंस्तदारोह इति नास्ति नियमः, तथापि यो य आरोहस्तत्तदोज इति भवति । ततः सत्यं न समाधिना प्रसादः स्वीक्रियते, प्रसादेन च समाधिः संगृह्यत एवेति किमर्थमस्योपादानमित्यत आह ।

क्रमविधानार्थत्वाद्वा ॥ २० ॥

पृथक्करणमिति । पाठधर्मत्वं च न सम्भवतीति "न पाठधर्माः सर्वत्रादृष्टेः" इत्यत्र वक्ष्यामः ॥ २० ॥

क्रमविधानेति ॥ नात्र क्रमः परस्परम् । अपि तु क्रमेणारोहणं क्रमेणाऽवरोहणमित्येवंरूपः क्रमो ज्ञेयः । नन्वारोहावरोहक्रमः पाठधर्मः किन्न स्यादिति चोद्यं, वक्ष्यमाणयुक्त्या विघटितमित्याह ॥ पाठधर्मत्वं चेति ॥ २० ॥

माधुर्यमवधारयितुमाह ।

पृथक्पदत्वं माधुर्यम् ॥ २१ ॥

बन्धस्य पृथक्पदत्वं यत् तन्माधुर्यम् । पृथक्पदानि यस्य स पृथक्पदः । तस्य भावः पृथक्पदत्वम् । समासदैर्घ्यनिवृत्तिपरं चैतत् । पूर्वोक्तमुदाहरणम् । विपर्ययस्तु यथा । "चलितशबरसेनादत्तगोभृङ्गचण्डध्वनिचकितवराहव्याकुला विन्ध्यपादाः" ॥२१॥

Digitized by Google

पृथक्पदत्वमिति ॥ सूत्रार्थं विविक्ते ॥ बन्धस्येति ॥ अ-व्याप्तिं परिहरति ॥ समासदैर्घ्यनिवृत्तिपरमिति ॥ पूर्वोक्तमिति ॥ अस्त्युत्तरस्यामित्याद्युदाहरणम् । प्रत्युदाहरणमाह ॥ विपर्ययस्त्विति ॥ समासपददैर्घ्यादिपर्ययः । दत्तं धृतम् ॥ २१ ॥

सौकुमार्यं पर्यालोचयितुमाह ।

अजरठत्वं सौकुमार्यम् ॥ २२ ॥

बन्धस्याजरठत्वमपारुष्यं यत् तत् सौकुमार्यम् । पूर्वोक्तमुदाहरणम् । विपर्ययस्तु यथा—"निदानं निर्द्वैतं प्रियजनसहवक्त्वव्यवसितिः । सुधासेकप्लोषौ फलमपि विरुद्धं मम हृदि" ॥ २२ ॥

अजरठत्वं सौकुमार्यमिति ॥ बन्धस्याजरठत्वं कोमलत्वं श्रुतिसुखत्वमिति यावत् । पूर्वोक्तमिति ॥ अस्त्युत्तरस्यामित्याद्युदाहरणम् । प्रत्युदाहरणमाह ॥ विपर्ययस्त्विति ॥ सौकुमार्यस्य विपर्ययः कष्टत्वमभिन्नवृत्तत्वे । निर्द्वैतं संशयाभावः । अत्र निर्द्वैतमिति कष्टम् ॥ २२ ॥

उदारतामुदीरयितुमाह ।

विकटत्वमुदारता ॥ २३ ॥

बन्धस्य विकटत्वं यदसावुदारता । यस्मिन् सति नृत्यन्तीव पदानीति जनस्य वर्णभावना भवति तद्विकटत्वम् । लीलायमानत्वमित्यर्थः । यथा । "स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां झणिति रणितमासीत् तत्र चित्रं कलं च" । न पुनः—"चरणकमललग्नैर्नूपुरैर्नर्तकीनां झटिति रणितमासीन्मञ्जु चित्रं च तत्र" ॥ २३ ॥

विकटत्वमिति ॥ क्रमशो वर्धमानाक्षरपदत्वम् । पदप्रथमाद्यक्षराणां पदान्तरप्रथमाद्यक्षरैः सादृश्यं च । उदाहरणप्रत्युदाहरणे दर्शयति ॥ यथेति ॥ २३ ॥

अर्थव्यक्तिं समर्थयितुमाह ।

अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः ॥ २४ ॥

Digitized by Google

यत्रशब्दैरर्थप्रतिपत्तिहेतुत्वं स गुणोऽर्थव्यक्तिरिति । पूर्वोक्तमुदाहरणम् । प्रत्युदाहरणं तु भूयः सुलभं च ॥ २४ ॥

अर्थव्यक्तीति ॥ वृत्तिः स्पष्टार्था ॥ पूर्वोक्तमस्त्युत्तरस्यामिति ॥ सुलभं चेति ॥ सपदि पङ्क्तिविहङ्गनामेत्यादि । अव्यवहितान्वयप्रसिद्धार्थपदत्वे हि भवत्यर्थव्यक्तिः । अस्य च विपर्ययः— असाध्वप्रतीतानर्थकान्यार्थेनेयार्थगूढार्थयतिभ्रष्टक्लिष्टसन्दिग्धाऽप्रयुक्तानि । असाधुत्वे हि भवति नार्थव्यक्तिः । यत्र च भवति तत्र "असाधुरनुमानेन वाचकः कैश्चिदिष्यते" इत्युक्तत्वादसाधुशब्दः साधुशब्दानुमानद्वारेणार्थबोधक इति नार्थव्यक्तिः । पूरणार्थमव्ययं च, कस्मादस्य प्रयोग इति सन्देहावहत्वादर्थव्यक्तिं व्यवदधाति । यतिभ्रंशो चार्थव्यक्तिहतिः । एवमन्यत्रापि द्रष्टव्यम् ॥ २४ ॥

कान्तिं कथयितुमाह ।

औज्ज्वल्यं कान्तिः ॥ २५ ॥

बन्धस्योज्ज्वलत्वं नाम यदसौ कान्तिरिति । यदभावे पुराणच्छायेत्युच्यते । यथा "कुरङ्गीनेत्रालीस्तबकितवनालीपरिसरः" । विपर्ययस्तु भूयान् सुलभश्च ।

श्लोकाश्चात्र भवन्ति—

पदन्यासस्य गाढत्वं वदन्त्योजः कवीश्वराः ।
अनेनाधिष्ठिताः प्रायः शब्दाः श्रोत्ररसायनम् ॥
श्लथत्वमोजसा मिश्रं प्रसादं च प्रचक्षते ।
अनेन न विना सख्यं स्वदते काव्यपद्धतिः ॥
यत्रैकपदवद्भावं पदानां भूयसामपि ।
अनालक्षितसन्धीनां स श्लेषः परमो गुणः ॥
प्रतिपादं प्रतिश्लोकमेकमार्गपरिग्रहः ।
दुर्बन्धो दुर्विभावश्च समतेति मतो गुणः ॥
आरोहन्त्यवरोहन्ति क्रमेण यतयो हि यत् ।

Digitized by Google

समाधिर्नाम स गुणस्तेन पूता सरस्वती ॥
बन्धे पृथक्पदत्वं च माधुर्यमुदितं बुधैः ।
अनेन हि पदन्यासाः कामं धारामधुच्युताः ॥
यथा हि छिद्यते रेखा चतुरं चित्रपण्डितैः ।
तथैव वागपि प्राज्ञैः समस्तगुणगुम्फिता ॥
बन्धस्याजरठत्वं च सौकुमार्यमुदाहृतम् ।
एतेन वर्जिता वाचो रूक्षत्वान्न श्रुतिक्षमाः ॥
विकटत्वं च बन्धस्य कथयन्ति सुदारताम् ।
वैचित्र्यं न प्रपद्यन्ते यया शून्याः पदक्रमाः ॥
पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः ।
यत्रार्थव्यक्तिहेतुत्वात् सोऽर्थव्यक्तिः स्मृतो गुणः ॥
औज्ज्वल्यं कान्तिरित्याहुर्गुणं गुणविशारदाः ।
पुराणचित्रस्थानीयं तेन वन्ध्यं कवेर्वचः ॥ ॥ २५ ॥

औज्ज्वल्यमिति ॥ पत्रमिति वक्तव्ये किसलयमित्यादि । जलधाविति वक्तव्येऽधिजलधीति । राधीति वक्तव्ये राजनीति । कमलमिवेति वक्तव्ये कमलायत इत्यादिः कान्तिहेतुः । विपर्ययस्य विषयं दर्शयति ॥ यदभाव इति ॥ अत्र संवादं संदर्शयन्नमून् गुणान् अन्यश्लोकैरुपश्लोकयति ॥ पदन्यासस्येत्यादि ॥ श्लोकाः स्पष्टार्थाः ॥ २५ ॥

नन्वेते गुणाः स्वसंकल्पनामात्रसारा रूपरसादिवदपरोक्षतयाऽधिगन्तुमशक्यत्वादिति शङ्कामुद्भावयितुमाह ।

नाऽसन्तः संवेद्यत्वात् ॥ २६ ॥

न खल्वेते गुणा असन्तः । संवेद्यत्वात् ॥ २६ ॥

नाऽसन्त इति ॥ ओजःप्रमुखा एते गुणा, असन्तः = तुच्छा न भवन्ति । कुतः ? संवेद्यत्वात् ॥ सहृदयसंवेदनस्य विषयत्वात् ॥ २६ ॥

असार्वजनीनत्वादियं प्रतीतिर्भ्रान्तिरेव किं न स्यादिति शङ्कामङ्कुरयित्वा समुन्मूलयितुमाह ।

Digitized by Google

तद्विदां संवेद्यत्वेऽपि भ्रान्ताः स्युरित्याह ।

न भ्रान्ता निष्कम्पत्वात् ॥ २७ ॥

न गुणा भ्रान्ताः । एतद्विषयायाः प्रवृत्तेर्निष्कम्पत्वात् ॥२७॥

न भ्रान्ता इति ॥ निष्कम्पत्वादसाधारणजनीनत्वेऽप्यबाधितत्वादित्यर्थः ॥ २७ ॥

ओजःप्रभृता गुणाः पाठधर्मा इति प्रत्यवस्थातारमप्रत्याह ।

न पाठधर्माः सर्वत्रादृष्टेः ॥ २८ ॥

नैते गुणाः पाठधर्माः । सर्वत्राऽदृष्टेः । यदि पाठधर्माः स्युस्तर्हि विशेषानपेक्षाः सन्तः सर्वत्र दृश्येरन् । न च सर्वत्र दृश्यन्ते । विशेषापेक्षया विशेषाणां गुणत्वाद् गुणाभ्युपगम एवेति ॥ २८ ॥

इति श्रीकाव्यालङ्कारसूत्रवृत्तौ गुणविवेचने तृतीयेऽधिकरणे प्रथमोऽध्यायः ॥ गुणालङ्कारविवेकः, शब्दगुणविवेकश्च ॥ ३ ॥ १ ॥

न पाठधर्मा इति ॥ व्याचष्टे ॥ नैते गुणा इति ॥ सर्वत्रोदाहरणे प्रत्युदाहरणे पाठधर्मत्वे बाधकमाह ॥ यदि पाठधर्माः स्युरिति ॥ सहृदयसंविदालम्बनतया विशेषाः केचिदपेक्षणीयाः । त एव विशेषा गुणा इत्यभ्युपगन्तव्या इति ॥ २८ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां काव्यालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालंकारकामधेनौ गुणविवेचने तृतीयेऽधिकरणे प्रथमोऽध्यायः संपूर्णः ॥ ३ ॥ १ ॥ (६) ॥

Digitized by Google

कारुण्यसम्पदुत्कूललावण्यगुणशालिनीम् ॥
स्वच्छस्वच्छन्दवाचालां भावये हृदि भारतीम् ॥ १ ॥

सम्प्रत्यर्थगुणविवेचनार्थमाह ।

त एवार्थगुणाः ॥ १ ॥

त एवौजःप्रभृतयोऽर्थगुणाः ॥ १ ॥

शब्दगुणविवेचने कृते लब्धावसरमर्थगुणविवेचनमिति सङ्गतिमुल्लिङ्घ्यान्तरसूत्रमवतारयति ॥ सम्प्रतीति ॥ १ ॥

शब्दगुणा एव चेदर्थगुणाः किमनेन विधान्तरविधानव्यसनेन । लक्षितत्वात् तेषामित्याशङ्क्य शब्दार्थगुणानामामतो भेदाभावेऽपि शब्दार्थोपश्लेषवशादस्ति भेद इत्याह ।

शब्दार्थगुणानां वाच्यवाचकद्वारेण भेदं दर्शयति ।

अर्थस्य प्रौढिरोजः ॥ २ ॥

अर्थस्याभिधेयस्य प्रौढिः प्रौढत्वमोजः ।

पदार्थे वाक्यवचनं वाक्यार्थे चं पदाभिधा ।
प्रौढिर्व्याससमासौ च साभिप्रायत्वमेव च ॥

पदार्थे वाक्यवचनं यथा । "अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः" । अत्र चन्द्रपदवाच्येऽर्थे नयनसमुत्थं ज्योतिरत्रेरिति वाक्यं प्रयुक्तम् । पदसमूहश्च वाक्यमभिप्रेतम् । अनया दिशाऽन्यदपि द्रष्टव्यम् । तद्यथा—

पुरः पाण्डुच्छायं तदनु कापिलिम्ना कृतपदं
ततः पाकोत्सेकादरुणगुणसंसर्गितवपुः ।
शनैः शोषारम्भे स्थपुटनिजविष्कम्भविषमं
वने वीतामोदं बदरमरसत्वं कलयति ॥

नचैवमतिप्रसङ्गः । काव्यशोभाकरत्वस्य गुणसामान्यलक्षण-

Digitized by Google

स्यावस्थितत्वात् । वाक्यार्थे पदाभिधानं यथा, दिव्येयं न भवति किन्तु मानुषी इति वक्तव्ये—निमिषति इत्याहेति । अस्य वाक्यार्थस्य व्यासस्समासौ । व्यासो यथा—

अयं नानाकारो भवति सुखदुःखव्यतिकरः
सुखं वा दुःखं वा न भवति भवत्येव च ततः ।
पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्
पुनस्तस्मादूर्ध्वं भवति न च दुःखं, न च सुखम् ॥

समासो यथा—

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धञ्चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥ साभिप्रायत्वं यथा "सोऽयं सम्प्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो युवा जातो भूपतिराश्रयः कृतधियां दिष्ट्या कृतार्थश्रमः" ॥ आश्रयः कृतधियामित्यस्य च सुबन्धुं साचिव्योपक्षेपपरत्वात् साभिप्रायत्वम् । एतेन "रतिविगलितबन्धे केशपाशे सुकेश्या" इत्यत्र सुकेश्या इत्यस्य च साभिप्रायत्वं व्याख्यातम् ॥ २ ॥

वाक्येति ॥ प्रागुद्देशपरिपाट्या प्रथमप्राप्तमोजः प्रतिपादयितुमाह ॥ अर्थस्येति ॥ वृत्तिः स्पष्टार्था।प्रौढिं पद्येन पञ्चधा प्रपञ्चयति ॥ पदार्थ इति ॥ तत्राद्यमुदाहरति ॥ पदार्थं इति ॥ लक्ष्यलक्षणयोरानुकूल्यमुन्मीलयति ॥ चन्द्रपदेति ॥ "तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता" इत्युक्तलक्षणवाक्यं न विवक्षितम् । किन्तु पदसमुदायमात्रमभिमतमित्याह ॥ पदसमूहश्चेति ॥ अयं न्यायोऽन्यत्रापि सञ्चारणीय इत्याह ॥ अनयेति ॥ अन्यदपि दर्शयति ॥ पुरः पाण्डुच्छायमिति ॥ स्थपुटो निम्नोन्नतः ॥ विष्कम्भ आभोगः ॥ अत्र कपिलमिति वक्तव्ये कपिलिम्ना कृतपदमिति । शुष्कमिति वक्तव्ये शनैः शोषारम्भ इत्यादि च वाक्यं प्रयुक्तमिति पदार्थे वाक्यरचना । "दक्षात्मजादयितवल्लभवेदिकासु" इत्यादावतिप्रसङ्गं परिहरति ॥ न चैवमिति ॥ तत्र हेतुः—काव्यशोभाकरत्वस्येति ॥ तत्र गुणसामा-

Digitized by Google

व्यलक्षणाभावाच्चातिप्रसङ्ग इत्यर्थः । द्वितीयां प्रौढिं द्रढयति ॥ वाक्यार्थ इति ॥ किमियं देव्युत मानुषीति पृष्टः कश्चिदुत्तरमाह ॥ निमिषतीति ॥ अनेन मानुषधर्मवाचिना पदेन देवीयं न भवति । किं तर्हि, मानुषीति वाक्यार्थः प्रतिपादितो भवति । पदार्थे वाक्यं, वाक्यार्थे पदमिति प्रौढेर्भेदाभ्यां व्याससमासौ पुनरुक्तौ स्यातामिति न शङ्कनीयम् । तत्र हि पदार्थो वाक्यार्थतां, वाक्यार्थश्च पदार्थतां प्रतिपद्यते । इह तु वाक्यार्थस्यैव व्यासो विस्तरः समासश्च संक्षेपो वाक्येनैवेति भेदादित्याह ॥ अस्य वाक्यार्थस्येति ॥ व्यासमुदाहरति ॥ अयं नानाकार इति ॥ अयमविसंवादित्याऽनुभूयमानः सुखदुःखव्यतिकरः । नानाकारो विचित्ररूपो भवतीति वाक्यार्थः । अस्यैव विस्तरः- सुखं वा, दुःखं वेत्यादिना कृत इति व्यासः । समासं समुन्मेषयति ॥ ते हिमालयमिति ॥ अत्र संक्षेपः स्फुटः । पञ्चमीं प्रौढिं प्रपञ्चयति ॥ साभिप्रायत्वमिति ॥ पदान्तरप्रयोगमन्तरेण तदर्थप्रत्याययनप्रागल्भ्यं साभिप्रायत्वम् । लक्ष्यलक्षणयोरानुरूप्यं निरूपयति ॥ आश्रयः कृतश्चियामिति ॥ एतेनेति ॥ न्यायेनेति शेषः । सुकेश्या इत्यत्र कवेः केशसौष्ठवमभिप्रेतम् । कलापिकलापकदर्थनसामर्थ्यं केशहस्तस्य समर्पयतीति स्वाभिप्रायत्वम् । अत्र च विपर्ययो-व्यर्थमपुष्टार्थं च । अपुष्टार्थस्य दोषत्वं "नापुष्टार्थत्वात्" इति सूत्रे वक्ष्यते । व्यर्थं यथा "इयामां इयामलिमानमानयत भोः" इत्यत्र इयामाशब्दः कृष्णत्वमपि प्रतिपादयतीति इयामलिमानमानयतेति इयामलिम्नः करणं व्याहतमिति व्यर्थम् । "चापाचार्यस्त्रिपुरविजयी" इत्यादौ, तारकारिरिति स्थानेऽनुप्रासानुरोधात् प्रयुक्तं, कार्तिकेय इति पदमपुष्टार्थम् ॥ २ ॥

प्रसादं प्रसञ्जयितुमाह ।

अर्थवैमल्यं प्रसादः ॥ ३ ॥

अर्थस्य वैमल्यं प्रयोजकमात्रपरिग्रहः प्रसादः । यथा— "सवर्णा कन्यका रूपयौवनारम्भशालिनी" । विपर्ययस्तु "उपास्तां हस्तो ते विमलमणिकाञ्चीपदमिदम्" । काञ्चीपदमित्यनेनैव नितम्बस्य लक्षितत्वाद् विशेषणस्याप्रयोजकत्वमिति ॥ ३ ॥

Digitized by Google

अर्थवैमल्यमिति ॥ प्रयोजकमात्रपदपरिग्रह इति विवक्षिताऽर्थसमर्पकपदमात्रप्रयोगः । ततोऽर्थस्य यद्वैमल्यं स प्रसादः । नच पञ्चमप्रौढिप्रसादयोः को भेद इति वाच्यम् । तयोः परस्परपरिहारेण दर्शनात् । यथा "रतिविगलतबन्धे केशहस्ते" इत्यादौ "कृशाङ्ग्या" इति पाठे वैमल्येऽपि, न साभिप्रायत्वम् । "अवन्ध्यकोपस्य निहन्तुरापदाम्" इत्यादौ साभिप्रायत्वेऽपि नार्थवैमल्यम् । सवर्णेत्यादि स्पष्टम् । अस्य विपर्ययोऽपुष्टार्थमनर्थकं च तत्राद्यमुदाहरति ॥ विपर्ययस्त्विति ॥ विशेषणस्याप्रयोजकत्वमित्यपुष्टार्थत्वमित्यर्थः । अनर्थकं तु प्रागुदाहृतम् ॥ ३ ॥

श्लेषमुन्मेषयितुमाह ।

घटना श्लेषः ॥ ४ ॥

क्रमकौटिल्यानुल्वणत्वोपपत्तियोगो घटना । स श्लेषः ।

यथा—

दृष्ट्वैकासनसङ्गते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥

शूद्रकादिरचितेषु प्रबन्धेष्वस्य भूयान् प्रपञ्चो दृश्यते ॥ ४ ॥

घटनेति ॥ मणिपुत्रिकादिषु मुखाद्यवयवयोजनेऽपि श्लेषर्ण घटना भवति, सा मा भूदित्याह ॥ क्रमेति ॥ नेत्रनिमीलनादीनां यः क्रमः परिपाटी कौटिल्यञ्च तयोरनुल्वणत्वेनोपपत्त्या युक्ततया पृच्छाश्लेषरूपतया बाधाभावस्वभावतया च योजनं घटना विवक्षिता । उदाहरति ॥ दृष्ट्वेति ॥ प्रियतमयोरेका स्वकीया, अपरा तत्सखी प्रच्छन्नाऽनुरागा । अन्यथा नास्त्येकासनसङ्गतिः।निमील्यमाननयना च न द्रष्टव्या । तथात्वे हि प्रियतमे इति कथम् । क्रीडामनुबध्नातीति क्रीडानुबन्धं तच्च तच्छलं च । विहितं क्रीडानुबन्धच्छलं येन स तथोक्तः । अस्य विपर्ययो लोकविरुद्धत्वम् । यथा हि मधुरा या सौवीरेषु सक्ता, यथा मधुरा या म्लेच्छेषु सक्ता, तथैवैकासने प्रसिद्धस-

Digitized by Google

पत्योरवस्थितिः । यथा मधौ कदम्बविकासः, तथा सपत्नीसन्निधावेकस्याः क्रीडा । यथा कलिका-मकरन्दो गोष्पदपूरः, तथा क्रमेण युगपद् वा, द्वयोरेकस्या वा निधुवनमिति देशकालस्वभावैर्विरुद्धम् । प्रबन्धान्तरेषु भूयिष्ठमुदाहरणमस्ति तदूहनीयमित्याह ॥ शुद्धकेति ॥४॥

समतां समुन्मीलयितुमाह ।

अवैषम्यं समता ॥ ५ ॥

अवैषम्यं प्रक्रमाभेदः समता । क्वचित् क्रमोऽपि भिद्यते । यथा—

च्युतसुमनसः कुन्दाः पुष्पोद्गमेष्वलसा द्रुमा
मलयमरुतः सर्पन्तीमे वियुक्तधृतिच्छिदः ।
अथ च सवितुः शीतोल्लासं लुनन्ति मरीचयो
न च जरठतामालम्बन्ते क्रमोदयदायिनीम् ॥

ऋतुसन्धिप्रतिपादनपरेऽत्र द्वितीये पादे क्रमभेदो, मलयमरुतामसाधारणत्वात् । एवं द्वितीयः पादः पठितव्यः— "मनसि च गिरं बध्नन्तीमे किरन्ति न कोकिलाः" इति ॥ ५ ॥

अवैषम्यमिति ॥ अवैषम्यं नाम प्रक्रमाभेदः, सुगमत्वं वा भवतीत्यभिसन्धाय प्राथमिकं पक्षमुपक्षिपति ॥ अवैषम्यं प्रक्रमाभेद इति ॥ प्रक्रमस्याभेदो भेदाभावः । तत्प्रतिपत्तेः प्रक्रमभेदप्रतिपत्तिपूर्वकत्वात् प्रक्रमभेदं दर्शयितुं प्रथमतः प्रत्युदाहरणं दर्शयति ॥ क्वचिदिति ॥ अत्र प्रक्रमभेदं प्रतिपादयति ॥ ऋतुसन्धीति ॥ ऋत्वोः शिशिरवसन्तयोः सन्धिः ॥ असाधारणत्वाद् वसन्तैकधर्मत्वादित्यर्थः । इदमेवोदाहरणयितुं पाठान्तरं प्रकल्पयति ॥ एवं द्वितीय इति ॥ "मनसि च गिरं बध्नन्तीमे किरन्ति न कोकिलाः" इति पाठे प्रक्रमाऽभेदः स्फुटः ॥ ५ ॥

विवेकिनोऽत्रशिष्या इति कथमवैषम्यं प्रक्रमाभेद इति । तत्रारुच्या पक्षान्तरमुपक्षिपति ।

Digitized by Google

सुगमत्वं वाऽवैषम्यमिति ॥ ६ ॥

सुखेन गम्यते ज्ञायत इत्यर्थः । यथा "अस्त्युत्तरस्यां दिशि देवतात्मा" इत्यादि । यथा वा—

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥

प्रत्युदाहरणं सुलभम् ॥ ६ ॥

सुगमत्वं वेति ॥ उदाहरति ॥ का स्विदिति ॥ अत्र सुगमत्वं सुगमम् । प्रत्युदाहरणं सुलभमिति ॥ अस्य विपर्ययः—क्रमादपक्रमं, क्लिष्टत्वं च । तदुभयमपि पूर्वमुदाहृतं द्रष्टव्यम् ॥ ६ ॥

समाधिं सम्प्रधारयितुमाह ।

अर्थदृष्टिः समाधिः ॥ ७ ॥

अर्थस्य दर्शनं दृष्टिः । समाधिकारणत्वात् समाधिः । अवहितं हि चित्तमर्थान् पश्यतीत्युक्तं पुरस्तात् ॥ ७ ॥

अर्थदृष्टिरिति । ननु समाधिरवधानं, दर्शनं तु ज्ञानविशेषः । कथमुभयोः सामानाधिकरण्यमित्यत आह ॥ समाधिकारणत्वादिति ॥ समाधिः कारणं यस्येति बहुव्रीहिः । कार्यकारणयोरुभयोरभेदमुपचर्योक्तमित्यर्थः । कार्यकारणभावमेव ज्ञापयति ॥ अवहितं हीति । "चित्तैकाग्र्यमवधानमि"ति सूत्रे प्रागुक्तमित्यर्थः । "सद्यः कृत्तद्विरदरदनच्छेदगौरैः" इत्यादौ यथा छेद्यदृश्यमाने दन्तादौ पर्यवस्यति तथा दर्शनमत्र दृश्यमानेऽर्थे पर्यवस्यतीति भवत्ययमर्थगुणः ॥ ७ ॥

द्वैविध्यमर्थस्य दर्शयितुमाह ॥

अर्थो द्विविधोऽयोनिरन्यच्छायायोनिर्वा ॥ ८ ॥

यस्यार्थस्य दर्शनं समाधिः सोऽर्थो द्विविधः—अयोनिरन्य-

Digitized by Google

च्छायायोनिर्वेति । अयोनिरकारणः । अवधानमात्रकारण इत्यर्थः। अन्यस्य काव्यस्य छायाऽन्यच्छाया तद्योनिर्वा । तद्यथा—

आश्वपेहि मम शीधुभाजनाद् यावदग्रदशनैर्न दश्यसे ।
चन्द्र पद्दशनमण्डलाङ्कितः खं न यास्यसि हि रोहिणीभयात् ॥
मा भैः शशाङ्क मम शीधुनि नास्ति राहुः
खे रोहिणी वसति कातर किं बिभेषि ।
प्रायो विदग्धवनितानवसङ्गमेषु
पुंसां मनः प्रचलतीति किमत्र चित्रम् ॥

पूर्वस्य श्लोकस्यार्थोऽयोनिः । द्वितीयस्य च छायायोनिरिति ॥ ८ ॥

अर्थो द्विविध इति ॥ व्याख्यातुं पूर्वसूत्रार्थमनुवदति ॥ यस्येति ॥ अयोनिरिति ॥ न विद्यते योनिः कारणं यस्येति विग्रहमभिसन्धायाभिधत्ते ॥ अयोनिरकारण इति ॥ कथमसति कारणमात्रे कार्योत्पत्तिरित्याशङ्क्य कविव्यवहारबीजप्रतिभोन्मेषप्रयोजकमवधानमेवाऽत्र कारणमित्यवगमयितुं नञा प्रसिद्धकारणं प्रतिषिद्धयत इत्याह ॥ अवधानेति ॥ विधान्तरं व्याकरोति ॥ अन्यस्य काव्यस्येति ॥ तद्योनिरित्यत्र सा छाया योनिर्यस्येति बहुव्रीहिः । प्रथमं भेदं दर्शयति ॥ आश्वपेहीति ॥ स्पष्टम् । विधान्तरं व्युत्पादयति ॥ मा भैरिति ॥ बिभेषीत्यत्र मत्त इत्यध्याहार्यम् । स्त्रीणां प्रियस्य पुरतः स्ववैदग्ध्यप्रकटनमुचितमेवेत्यवगन्तव्यम् । लक्ष्ये लक्षणमवगमयति ॥ पूर्वस्येति ॥ पूर्वभाविना कविना कृतत्वात् ॥ ८ ॥

अर्थो व्यक्तः सूक्ष्मश्च ॥ ९ ॥

यस्यार्थस्य दर्शनं समाधिरिति, स द्वेधा व्यक्तः सूक्ष्मश्च । व्यक्तः स्फुट उदाहृत एव ॥ ९ ॥

द्विविधस्याप्यर्थस्य द्वैविध्यं दर्शयितुमाह ॥ व्यक्तः सूक्ष्मश्चेति ॥ व्यक्तार्थद्वयस्य प्रागुक्तमुदाहरणद्वयं प्रत्येतव्यमित्याह ॥ उदाहृत एवेति ॥ ९ ॥

Digitized by Google

सूक्ष्मविभागं दर्शयितुं सूत्रमवतारयति ।

सूक्ष्मं व्याख्यातुमाह ।

सूक्ष्मो भाव्यो वासनीयश्च ॥ १० ॥

सूक्ष्मो द्वेधा भवति—भाव्यो, वासनीयश्च । शीघ्रनिरूपणागम्यो भाव्यः । एकाग्रताप्रकर्षगम्यो वासनीय इति । भाव्यो यथा—

अन्योन्यसंवलितमांसलदन्तकान्ति
सोल्लासमाविरलसंवलितार्धतारम् ।
लीलागृहे प्रतिकलं किलिकिञ्चितेषु
व्यावर्तमाननयनं मिथुनं चकास्ति ॥

वासनीयो यथा—

अवहित्थवलितजघनं विवर्तिताभिमुखकुचतटं स्थित्वा ।
अवलोकितोऽहमनया दक्षिणकरकलितहारलतम् ॥ ॥ १० ॥

सूक्ष्ममिति ॥ विभागं व्युत्पादयति ॥ सूक्ष्म इति ॥ भावकानामऽवधानमात्रेण विमर्शो भावना । तद्योग्यो भाव्यः । सहृदयसङ्घवहारसमुल्लसितसंस्कारसम्पन्नो योऽवधानप्रकर्षस्तेन गम्यो वासनीयः । तदिदमभिसन्धायाह ॥ शीघ्रेति ॥ आद्यमुदाहरति ॥ भाव्यो यथेति ॥ लीलागृहे मिथुनमुक्तविधं चकास्तीति वाक्यार्थः । अन्योन्यसंवलितमांसलदन्तकान्तीत्यनेन स्मितसँल्लापाधरास्वादादयः, सोल्लासमित्यनेन हर्षौत्सुक्यादयः, अलसमित्यनेन श्रमाङ्गदौर्बल्यादयः, किलिकिञ्चितेषु व्यावर्तमाननयनमित्यनेन प्रणयकलहगर्वभयकम्पादयश्च व्यज्यन्ते । "क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलिकिञ्चितम्" इति दशरूपके तल्लक्षणकथनात् । अत्र मिथुनमालम्बनविभावः । लीलागृहमुद्दीपनविभावः । अधरास्वादाङ्गकुमस्मितकम्पनयनव्यावर्तनभ्रूभेदादयोऽनुभावाः । उल्लसितोन्मीलितहर्षौत्सुक्यादयः किंलिकिञ्चिताक्षिप्तक्रोधशोकभयगर्वाश्च सञ्चारिणः । इत्थं विभावानुभावसञ्चारिभिरास्वादनीयतामापाद्यमानो रतिलक्षणः

Digitized by Google

स्थायी भावः साधारण्येन वर्ण्यमानतैकप्राणः सम्भोगभृङ्गारो रसः। तदुक्तं दशरूपके—

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।

आनीयमानः स्वादुत्वं स्थायी भावो रसः स्मृतः, इति। वासनीयमुद्भासयति ॥ वासनीय इति ॥ अवहित्थेति ॥ अवहित्थमाकारगोपनम्। दुर्लभस्त्वत्संभोगः, त्वय्येव लग्नमिदं मदीयं मनः, दुरन्तसन्तापशान्तये हारलतिकेयमेका मयि दाक्षिण्यमवलम्बत इत्येवं स्वाभिप्रायप्रकाशनमवधानप्रकर्षेणात्र सहृदयहृदयसंवेद्यम्। अत्र विप्रलम्भशृङ्गारः। विभावादयः स्वयमूह्याः। अस्य गुणस्य विपर्ययो—ग्राम्यत्वम्, "स्वपिति यावद्" इत्यादौ द्रष्टव्यम् ॥ १० ॥

माधुर्यं पर्यालोचयितुमाह।

उक्तिवैचित्र्यं माधुर्यम् ॥ ११ ॥

उक्तेर्वैचित्र्यं यत्तन्माधुर्यमिति ॥ यथा—

रसवदऽमृतं, कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ॥
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्ञनो
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात् ॥ ॥ ११ ॥

उक्तिवैचित्र्यमिति ॥ वर्ण्यमानस्यार्थस्य प्रकर्षे प्रतिपाद्ये भङ्गयन्तरेणोक्तिरुक्तिवैचित्र्यम् ॥ रसवदऽमृतमिति ॥ कयाचिद्भङ्गयन्तरिकयेयमुक्तिः। अमृतं रसवद्बलेव। मधून्यपि नान्यथा रसवन्त्येव। प्रसन्नरसं चूतस्यापि फलमधिकं मधुरमेव। कः सन्देह इति। सर्वानुषज्यते। तथापि रसान्तरवित् सकृदपि रसविशेषाभिज्ञो जनो मध्यस्थः सन् वदतु। इह लोके प्रियादशनच्छदादन्यत् यद्वस्तु स्वादु स्यात् तद् वदतु। रसज्ञोऽपक्षपाती चेदन्यत् स्वादु भवतीति न वदेत्। तादृशवस्त्वन्तरासम्भवादित्यर्थः। नानाविधोपभोगातिशायि दशनच्छदमिति वक्तव्ये, रसवदऽमृतमित्यादिभङ्गयन्तरेण प्रतिपादनादत्र माधुर्यम्। अस्य गुणस्य विपर्ययो—हेतोरर्थस्य पुनः पुनः कथनमित्येकार्थत्वम्। प्राग् एकार्थभूतेर्वैरस्यात् कृतं वा ॥ ११ ॥

Digitized by Google

सौकुमार्यं समाख्यातुमाह ।

अपारुष्यं सौकुमार्यम् ॥ १२॥

परुषेऽर्थे अपारुष्यं सौकुमार्यमिति । यथा "मृतं, यशःशेषमि-त्याहुः । एकाकिनं देवताद्वितीयमिति । मन्ये इति साध्येति च॥१२॥

अपारुष्यमिति ॥ परुषे अमङ्गलानुद्दायिन्यर्थे वर्णनीये यद-पारुष्यं तत् सौकुमार्यमिति लक्षणार्थः । उदाहरणानि स्पष्टानि । अस्य गुणस्य विपर्ययोऽश्लीलत्वम् ॥ १२ ॥

उदारतामुदीरयितुमाह ।

अग्राम्यत्वमुदारता ॥ १३ ॥

ग्राम्यत्वमसङ्गे अग्राम्यत्वमुदारता । यथा—

त्वमेवं सौन्दर्या स च रुचिरतायां परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अयि द्वंद्वं दिष्ट्या तदिति सुभगे संवदति वा-
मतः शेषं चेत् स्वाज्जितमिह तदानीं गुणितया ॥

विपर्ययस्तु—

स्वपिति यावदयं निकटे जनः
स्वपिमि तावदहं किमपैति ते ।
इति निगद्य शनैरनुमेखलं
मम करं स्वकरेण रुरोध सा ॥ ॥ १३ ॥

अग्राम्यत्वमिति ॥ अत्र कन्ये ! कामयमानं कान्तं कामयस्वे-ति वक्तव्ये ग्राम्यार्थे यदौचित्येन प्रतिपादनं सोदारता ॥ त्वमेवमि-ति ॥ एवं वर्णनापथोत्तीर्णतयाऽनुभूयमानं सौन्दर्यं यस्याः सा तथो-क्ता । स च माधवो रुचिरतायां सौन्दर्यविषये परिचितः संस्तुतः, प्रसिद्ध इति यावत् । युवां, स च त्वं च । युवामेव परमिह लोके

Digitized by Google

कलानां सीमानं भजथः। अयि हे मालति। वां युवयोः द्वंद्वं मिथुनं दिष्ट्या भाग्येन संवदति सदृशं भवतीत्यर्थः। अतः शेषं पाणिग्रहरूपं मङ्गलं कर्म स्याद्यत् तदानीं गुणितया गुणवत्त्वेन जितम्। युवयोर्गुणसम्पत्तिर्विश्वातिशायिनी भवेदित्यर्थः। अत्र प्रथमं त्वं स चेति पृथक्कृतयोक्तेः, ततो युवामिति मिश्रीकरणेन, तदनन्तरं द्वन्द्वमिति, ततः शेषमिति च विवक्षितार्थव्यञ्जनमुखेन फलपर्यवसायित्वमित्यौचित्यशालिना क्रमेण कामन्दक्या मालतीमुद्दिश्योक्तमिति स्पष्टमुदाहरणत्वम्। प्रत्युदाहरणं प्रत्याययितुमाह॥विपर्ययस्त्विति॥ स्वपितीति॥ अत्र कश्चित् कामी वयस्याय रहस्यं कथयति। अयं निकटे जनः परिसरसञ्चारी जनो यावत् स्वपिति, यावता कालेन नियतं कर्म निर्वृत्य निद्राति। तावत्, तावन्तं कालं, स्वपिमि। ते किमपैति तावता कालविलम्बेन तव का हानिर्भवति। इत्युक्तप्रकारेण शनैरुपांशु निगद्य कथयित्वा, अनुमेखलं मेखलासमीपे प्रसारितं मम मे करं स्वकरेण रुरोध निरुद्धवती। स्पष्टं ग्राम्यत्वम्॥ १३॥

अर्थव्यक्तिं समर्थयितुमाह।

वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः॥ १४॥

वस्तूनां भावानां स्वभावस्य स्फुटत्वं यदसावर्थव्यक्तिः। यथा—

पृष्ठेषु शंखशकलच्छविषु च्छदानां
राजीभिरङ्कितमलक्तकलोहिनीभिः।
गोरोचनाहरितबभ्रुबहिःपलाश-
मामोदते कुमुदमम्भसि पल्वलस्य॥

यथा वा—

प्रथममलसैः पर्यस्ताग्रं स्थितं पृथुकेसरै-
र्विरलविरलैरन्तःपत्रैर्मनाङ्मिलितं ततः।
तदनु वलनामात्रं किञ्चिद् व्यधायि बहिर्दलै-
र्मुकुलनविधौ वृद्धाऽब्जानां बभूव कदर्थना॥॥ १४॥

Digitized by Google

वस्त्विति ॥ व्याचष्टे ॥ वस्तूनामिति ॥ अशेषविशेषैर्वर्णने पुरः इव प्रतिभासमानत्वमर्थस्य स्फुटत्वम् । उदाहरति ॥ पृष्ठेष्विति ॥ शङ्खशकलच्छविषु पृष्ठेषु चरमभागेषु, अलक्तकलांहिनीभी रेखाभिरङ्कितं, गोरोचनावद्धारितानि बभ्रूणि कपिशानि बहिःपलाशानि यस्य तत् कुमुदं, पल्वलस्य वेशन्तस्याऽम्भसि, आमोदते, आमोदमुद्गिरतीति योजना । उदाहरणान्तरमाह ॥ प्रथममिति ॥ प्रथममलसैः पृथुकेसरैः पर्यस्ताग्रं शैथिल्यशालिशिखरं स्थितम् । ततः परं विरलविरलैरत्यन्तशिथिलैरन्तःपत्रैर्मनागीषन्मिलितम् । तदनु बहिर्दलैर्वलनामात्रं सङ्कोचक्रियारम्भमात्रं किञ्चिद् व्यधायि । इत्थं वृद्धाऽज्ञानां कदर्थना क्लेशदशा बभूवेति योजना । अस्य विपर्ययः—सन्दिग्धत्वं, क्लिष्टत्वं च ॥ १४ ॥

कान्तिं कथयितुमाह ।

दीप्तरसत्वं कान्तिः ॥ १५ ॥

दीप्ता रसाः शृङ्गारादयो यस्य स दीप्तरसः । तस्य भावो दीप्तरसत्वं कान्तिः । यथा—

प्रेयान् सायमपाकृतः संशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद् यावन्न यात्युन्मनाः ।
तावत् प्रत्युत पाणिसम्पुटलसन्नीवीनितम्बं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥

एवं रसान्तरेष्वप्युदाहार्यम् । अत्र श्लोकाः—

गुणस्फुटत्वसाकल्यं काव्यपाकं प्रचक्षते ।
चूतस्य परिणामेन स चाऽयमुपमीयते ॥
मुद्गिरुत्संस्कारसारं यत् क्लिष्टवस्तुगुणं भवेत् ।
काव्यं वृन्ताकपाकं स्याज्जुगुप्सन्ते जनास्ततः ॥
गुणानां दशतामुक्तो यस्यार्थस्तदपार्थकम् ।
दाडिमानि दशेत्यादि न विचारक्षमं वचः ॥ ॥ १५ ॥ इति

Digitized by Google

श्रीपण्डितवरवामनविरचितकाव्यालङ्कारसूत्रवृत्तौ गुणविवेचने तृतीयेऽधिकरणे द्वितीयोऽध्यायः ॥ अर्थगुणविवेचनम् ॥ ३ ॥२ ॥

॥ समाप्तं चेदं गुणविवेचनं तृतीयमधिकरणम् ॥

दीप्तरसत्वमिति ॥ व्याचष्टे ॥ दीप्ता इति ॥ दीप्ता विभावानुभावव्यभिचारिभिरभिव्यक्ताः ॥ प्रेयानिति ॥ अत्र विप्रलम्भपूर्वकसम्भोगशृङ्गारः ॥ एवं रसान्तरेष्विति ॥ शृङ्गारो द्विविधः—सम्भोगो विप्रलम्भश्च । तत्राद्यः परस्परावलोकनपरिचुम्बनाद्यनन्तभेदादपरिच्छेद्यः । तत्रैको भेद उदाहृतः । विप्रलम्भस्तु परस्पराभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः । तत्राद्यो यथा—

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसासरिति कल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥

एवमन्येऽपि विप्रलम्भभेदा ज्ञातव्याः ।

वीरो यथा—

क्षुद्राः सन्त्रासमेते विजहतु हरयो मिन्नशङ्केभकुम्भा
युष्मद्बाणेषु लज्जां दधति परममी सायकाः सम्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषो नन्वहं मेघनादः
किञ्चिद् रूक्षभ्रूकलीलानियमितजलधिं राममन्वेषयामि ॥

करुणो यथा—

हा मातस्त्वरिताऽसि कुत्र किमिदं हा देवताः क्वाऽऽशिषो
धिक् प्राणान् परितोऽशनिर्हुतवहो गात्रेषु दग्धे दृशौ ।
इत्थं गद्गदकण्ठरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥

अद्भुतो यथा—

चित्रं महानेष बताधिकारः क्व कान्तिरेषाऽभिनवैव भङ्गी ।
लोकोत्तरं धैर्यमहो प्रभावः काव्याकृतिर्नूतन एष सर्गः ॥

हास्यो यथा—

आकुञ्च्य पाणिमशुचिर्ममूर्ध्नि वेश्या
मन्त्राऽम्भसां प्रतिपदं पृषतैः पवित्रे ।

Digitized by Google

तारस्वनं व्यहितसीत्कमदात् प्रहारं
हा हा हतोऽस्मिति रोदिति विष्णुशर्मा ॥
भयानको यथा—
ग्रीवाभङ्गाऽभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभिया भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्व्रियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥
रौद्रो यथा—
एतत्कारालकरवालनिकृत्तकण्ठ-
नालोच्चलद्बहुलबुद्बुदफेनिलौघैः ।
सार्धं डमड्डमरुडाक्तिहुतभूत-
वर्गेण भर्गगृहिणीं रुधिरैर्धिनोमि ॥
बीभत्सो यथा—
उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथत्सेधभूयांसि मासा-
न्यस्थिस्फिक्पृष्ठपीठाद्यवयवजटिलान्युग्रपूतीनि जग्ध्वा ।
आत्तस्नाय्वान्त्रनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्क-
दङ्कस्थादस्थिसन्धिस्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥
शान्तो यथा—
अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ॥

एवं भावा अप्युदाहार्याः । इत्थमर्थगुणान् समर्थ्य काव्यस्य गुणस्फुटत्वसाकल्याभ्यां तदभावेन चोपादेयत्वानुपादेयत्वे सदृष्टान्तमाचष्टे ॥ गुणस्फुटत्वेति ॥ गुणानां स्फुटत्वं साकल्यं च, स चार्यं काव्यपाकः । सुस्निग्धां संस्कारो यथाशास्त्रं प्रकृतिषु प्रत्ययोजनमेव सारः स्थिरांशो यस्य । क्लिष्टा अस्फुटा वस्तुनोऽर्थस्य गुणा यस्य । अनेन स्फुटगुणव्यावृत्तिः सूचिता । वृन्ताकस्य पाक इव पाको यस्य । तत् काव्यम् । ततो जना जुगुप्सन्ते । किमुत कवय इति भावः ॥ गुणानामिति ॥ दशता दशसंख्यापरिमितेन वर्गेणेत्यर्थः । "पञ्चदशतो वर्गे वा" इति निपातितो दशच्छब्दः । अपार्थं वाक्यमुदाहरति ॥

Digitized by Google

दाडिमानीति ॥ दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्ड इति वाक्यं विचारयोग्यं न भवति । अतोऽलङ्कारशास्त्रात् दोषगुणस्वरूपं विज्ञाय कविर्दोषाञ्जह्यात् गुणानादद्दीतेत्युपदेशः ॥ १५ ॥

इति कृतरचनायामिन्दुवंशोद्भवेन
त्रिपुरहरधरित्रीमण्डलाखण्डलेन ॥
ललितवचसिकाव्यालंक्रियाकामधेना-
वर्थाधिकरणमयासीत् पूर्तिमेतत् तृतीयम् ॥ १ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां वामनालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालङ्कारकामधेनौ गुणविवेचने तृतीयेऽर्थाधिकरणे द्वितीयोऽध्यायः समाप्तः ॥

॥ ३ ॥ २ ॥ (७) ॥



Digitized by Google

अथ चतुर्थमधिकरणम् ।

निजसौन्दर्यनिर्धौतस्फुरन्मौक्तिकभूषणा ॥
प्रसादविशदालोका शारदा वरदाऽस्तु मे ॥ १ ॥

आलङ्कारिकं चतुर्थमधिकरणमारभ्यते । अधिकरणद्वयसङ्गतिमुद्घाटयति ।

गुणनिर्वर्त्या काव्यशोभा । तस्याश्चातिशयहेतवोऽलङ्काराः । तन्निरूपणार्थमालङ्कारिकमधिकरणमारभ्यते । तत्र शब्दालङ्कारौ द्वौ यमकानुप्रासौ क्रमेण दर्शयितुमाह ।

पदमनेकार्थमक्षरं वा वृत्तं स्थाननियमे

यमकम् ॥ १ ॥

पदमेकार्थं भिन्नार्थमेकमनेकं वा तद्वदक्षरमात्रं वृत्तं स्थाननियमे सति यमकम् । स्ववृत्त्या सजातीयेन वा कात्स्न्र्येनैकदेशाभ्यामनेकपादव्याप्तिः स्थाननियम इति । यानि त्वेकपादभागवृत्तीनि यमकानि दृश्यन्ते तेषु श्लोकान्तरस्थसंस्थानयमकापेक्षयैव स्थाननियम इति ॥ २ ॥

गुणनिर्वर्त्येति ॥ गुणैर्निर्वर्त्या निष्पाद्या । अलङ्कारः प्रयोजनमस्येति आलङ्कारिकम् । प्रयोजनमिति ठक् । अलङ्कारा द्विविधाः—शब्दाः, अर्थाश्च । तत्र शब्दप्रतिपत्तिपूर्विकार्थप्रतिपत्तिरिति प्रथमं प्रतिपिपादयिषुस्तद्विभागं दर्शयति ॥ तत्रेति ॥ यमकं विवरीतुं यतते ॥ क्रमेणेति ॥ पदमनेकार्थमिति ॥ अनेकार्थमिति पदविशेषणं, न त्वक्षरविशेषणम् । गवादिशिष्टपदवज्ज्ञानार्थमात्रं न भवति । किन्तु स्वरमपि भिन्नार्थं पदं हि विवक्षितमित्याह ॥ भिन्नार्थमिति ॥ अनेकमिति ज्ञातावेकवचनम् । "तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम् । वर्णानां यः पुनर्वादो यमकं तद्विगद्यत" इति भामहेनोक्तं

Digitized by Google

प्रत्याख्यातुमाह ॥ स्थाननियमे सतीति ॥ यमनमत्र गुणनमावृत्तिरिति यावत् । यम्यते गुण्यते, आवर्त्यते पदमक्षरं वेति यमः । बहुलग्रहणात् कर्मणि घप्रत्ययः । यम एव यमकम् । अयमत्र वाक्यार्थः । भिन्नार्थमेकमनेकं वा पदं तद्वदेकमनेकं वाक्षरं च स्थाननियमे सत्यावृत्तं यमकं भवतीति । तथाच पदयमकमक्षरयमकमिति च द्वैविध्यं दर्शितं भवति । कीदृगत्र स्थाननियम इति तत्राह ॥ स्ववृत्त्येति ॥ यदेव पदमक्षरं वा यमकनिबन्धनं तदेव यदि पादान्तरे वर्तते, यथा "भ्रमर द्रुमपुष्पाणि" इत्यादौ, तत्र स्ववृत्त्यावृत्तिः । सजातीयनैरन्तर्यं चास्य प्रकर्ष इतीहैव वक्ष्यमाणयुक्त्या सजातीयं यत्र पदान्तरे वर्तते यथा "हन्त हन्तः" इत्यादौ, तत्र सजातीयस्यावृत्तिः । नियतस्थानाऽऽवृत्तसमानसंख्याक्षरसन्निवेशोऽत्र साजात्यम् । कात्स्न्र्येन समस्तपादगतत्वेन । एकदेशेन पादस्यादिमध्यान्तभागगतत्वेनेत्यर्थः । ननु "अथ समावृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम् । यमकुबेरजलेश्वरवज्रिणां समधुरं मधुरश्चितविक्रमम्" इत्यादौ पादान्तरव्याप्तिलक्षणस्थाननियमासम्भवेन यमकता न स्यात् । अतो लक्षणस्याव्याप्तिरिति । तत्राह ॥ यानि त्विति ॥ एकस्यैव पादस्य भागेषु वृत्तिर्येषां तानि, एकपादभागवृत्तीनि, तेषु "द्रुमवतीमवतीर्य वनस्थलीम्" इत्यादिश्लोकान्तरस्थं संस्थानं यस्य तत्तथाभूतं यमकम् । तदपेक्षया सजातीयेनानेकपादव्याप्तिर्भवतीति भवत्येव स्थाननियमः ॥ १ ॥

यमकस्थानानि दर्शयितुं सूत्रमवतारयति ।

स्थानकथनार्थमाह ।

पादः पादस्यैकस्यानेकस्य चादिमध्यान्तभागाः स्थानानि ॥ २ ॥

पादः, एकस्य च पादस्यादिमध्यान्तभागाः, अनेकस्य च पादस्य त एव स्थानानि । पादयमकं यथा—

असज्जनवचो यस्य कलिकामधुमर्हितम् ।
तस्य न स्याद्विषतरोः कलिकामधु गर्हितम् ॥

Digitized by Google

एकपादस्थादिमध्यान्तयमकानि यथा—

हन्त हन्तरातीनां धीर धीरर्चिता तव ।
कामं कामन्दकीनीतिरस्या रस्या दिवानिशम् ॥
वसुपरासु परासुमिवोज्झती-
ष्वविकलं विकलङ्कशशिप्रभम् ।
प्रियतमं यतमन्तुमनीश्वरं
रसिकता सिकतास्विव तासु का ॥
मुदृशो रसरेचकितं चकितं
भवतीक्षितमस्ति मितं स्तिमितम् ।
अपि हासलवस्तवकस्तव क-
स्तुलयेन्नु कामधुरां मधुराम् ॥

पादयोरादिमध्यान्तयमकानि यथा—

भ्रमर द्रुमपुष्पाणि भ्रम रसै पिबन् मधु ।
का कुन्दकुसुमे प्रीतिः काकुन्दत्वा विरौषि यत् ॥
अप्यशक्यं तया दत्तं दुःखं शक्यन्तरात्मनि ।
बाष्पो बाहीकनारीणां वेगवाही कपोलयोः ॥
सपदि कृतपदस्त्वदीक्षितेन
स्मितशुचिना स्मरतत्त्वदीक्षितेन ।
भवति बत जनः सचित्तदाहो न
खलु मृषा कुत एव चित्तदाहो ॥

एकान्तरपादान्तयमकं यथा—

उद्वेजयति भूतानि यस्य राज्ञः कुशासनम् ।
सिंहासनवियुक्तस्य तस्य क्षिप्रं कुशासनम् ॥

एवमेकान्तरपादादिमध्ययमकान्यूह्यानि ।

समस्तपादान्तयमकं यथा—

Digitized by Google

ननोन्नतभ्रूगतिबद्धलास्यां
विलोक्य तन्वीं शशिपेशलास्याम् ।
मनः किमुत्ताम्यसि चञ्चलास्यां
कृती स्मराज्ञा यदि पुष्कलास्याम् ॥

एवं समस्तपादादिमध्ययमकानि व्याख्यातव्यानि । अन्य च सङ्करजातिभेदाः सुधियोत्प्रेक्ष्याः । अक्षरयमकं त्वेकाक्षरमनेकाक्षरं च । एकाक्षरं यथा—

नानाकारेण कान्ताभ्रूराराधितमनोभुवा ।
विविक्तेन विलासेन ततक्ष हृदयं नृणाम् ॥

एवं स्थानान्तरयोगेऽपि द्रष्टव्यः । सजातीयनैरन्तर्यादस्य प्रकर्षो भवति । स चाऽयं हरिप्रबोधे दृश्यते । यथा—

विविधधववना नागगर्द्धनाना
विविततगगनानाममज्जज्जनाना ।
रुरुशशललनां नावबन्धुन्धुनाना
मय हि हिततनानाननस्वस्वनाना ॥

अनया च वर्णयमकमालया पदयमकमाला व्याख्याता ॥२॥

स्थानकथनार्थमिति ॥ व्याचष्टे ॥ पाद इति ॥ अत्रायं विभागः । प्रथमपादो द्वितीये तृतीये चतुर्थे क्रमेण यम्यते । एवं द्वितीयस्तृतीये चतुर्थे च । तृतीयश्चतुर्थे । तथा प्रथमो द्वितीयादिषु त्रिषु युगपद् यम्यत इति सप्तधा भवति । प्रथमो द्वितीये तृतीयश्चतुर्थे, प्रथमश्चतुर्थे द्वितीयस्तृतीये इति द्वौ भेदाविति पादयमकं नवधा । पादस्य त्रेधा विभागपक्षे प्रथमादिपादादिभागो द्वितीयादिपादादिभागेषु पूर्ववत् । प्रथमादिपादमध्यभागो द्वितीयादिपादमध्यभागेषु । प्रथमादिपादान्तभागो द्वितीयादिपादान्तभागेषु यम्यत इति सप्तविंशतिधा, खण्डभेदकल्पनया परिगणनायां भूयसी भेदसंख्येत्युपरम्यते । तत्र दिङ्मात्रं दर्शयितुं पादयमकं तावदुदाहरति ॥ पादयमकमिति ॥ कलेः कामं दोग्धीति कलिकामधुक् । तथाविधमसज्जनस्य कलस्य

Digitized by Google

वचो यस्यार्हितं पूजितं भवति । तस्य पुंसः, विषतरोः कलिकासु कोरकमकरन्दः गर्हितं न स्यात् । तदप्युपादेयं स्यादित्यर्थः । अथैकस्य पादस्यादिमध्यान्तेषु यमकं क्रमेणोदाहरति ॥ एकपादस्येति ॥ हन्तेति ॥ अरातीनां हन्तः, धीर प्राज्ञ । "धीरो मनीषी ज्ञः प्राज्ञः"इत्यमरः । तत्र धीरर्चिता । हन्तेति हर्षे । अतः कामन्दकसबन्धिनी नीतिः कामन्दकप्रणीता दण्डनीतिरित्यर्थः । अस्यास्तव धियः काममत्यर्थं रस्याऽऽस्वादनीया । नन्वत्र पदयमके द्वयोरपि पदत्वाभावं कथं पदयमकमिति न चोदनीयम् । यमकनिबन्धनयोर्द्वयोरेकस्य पदत्वे सति तदन्यस्य संहिताकाले तदाकारानुकारितया पदावभासजनकत्वाद् भवत्येव पदयमकमिति ॥ वसुपरास्विति ॥ अविकलं संपूर्णमित्यर्थः । विकलङ्कशशिप्रभं, यत उपरतो मन्तुरपराधो यस्य तथाविधं निरागसामित्यर्थः । "आगोऽपराधो मन्तुश्च" इत्यमरः । अनीश्वरमैश्वर्यरहितं प्रियतमं परासुं मृतमिवोज्झितासु लक्ष्मवतीषु वसुपरासु वेश्यासु सिकतास्विव, रसिकता रस आसामस्तीति रसिकाः । "अत इनिठनौ" इति ठन् प्रत्ययः । तासां भावो रसिकता, का, न काचित् तासु रसिकतेत्यर्थः । अत्र प्रियतममित्यक्षरयमकत्वेन पदावृत्त्यसम्भवाद्भेदमुदाहरणम् ॥ सुदृशइति ॥ रसेन रागविशेषेण रचकितं भ्रमितं, चाकितं भयसम्भ्रान्तम् । "चकितं भयसम्भ्रमः" इत्यमरः । मितं स्तोकं स्तिमितं निभृतं सुदृशं ईक्षणं भवति स्वव्यस्ति । अपि किञ्च, हासस्य लवो लेशः । "लवलेशकणाणवः" इत्यमरः।स्तबक इव हासलवो हासलवस्तबकः । "उपमितं व्याघ्रादिभिः" इति समासः । सोऽपि त्वय्यस्तीत्यनुषज्ज्यते । अतः कः पुमान् तव । वयोरभेदः । मधुरां मनोज्ञां कामस्य धूः कामधुरा ताम् । "ऋक्पूरब्धूःपथामानक्षे" इत्यकारः समासान्तः । न तुलयेन्न कोऽपि तुलयेत् । तव कामधुरां परिक्षेप्तुं न शक्नुयादित्यर्थः । अथ पादयोरादिमध्यान्तभागेषु यमकं क्रमेणोदाहरति ॥ पादयोरिति ॥ हे भ्रमर मधु पिबन् रत्यै सुखाय द्रुमपुष्पाण्युद्दिश्य भ्रम सञ्चर । कुन्दकुसुमे का प्रीतिः । काकुं ध्वनिविकारं दत्वा "काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः" इत्यमरः । किं विरौषि । रुशब्द इति धातुः ॥अप्यशक्यमिति॥ अशक्यम् असह्यं दुःखं शकीनां शाक्यजनपदस्त्रीणामन्तरात्मनि तया दत्तम् । तयेति

Digitized by Google

कर्तृपदम् । तदर्थस्तु प्रकरणानुसारेण द्रष्टव्यः । अपि किञ्च,बाहीकनारीणां कपोलयोर्वेगवाही वेगेन वहति प्रवहतीति वेगवाही बाष्पोदक इत्यनुषज्यते ॥ सपदीति ॥ स्मितशुचिना कामतत्त्वदीक्षितेन त्वदीक्षितेन सपदि कृतपदो जनस्तदैव सञ्चित्तदाहो भवति । न कृतश्चित् = कुतोऽपि न मृषा खलु अहो । एकान्तरितपादान्तयमकमाह ॥ एकान्तरेति ॥ यस्य राज्ञः कुशासनं कुत्सितं शासनं भूतानि प्राणिन उद्वेजयति । सिंहासनवियुक्तस्य तस्य कुशासनं कुशमयमासनं भवति ॥ एवमिति ॥ एकान्तरितपदादियमकं यथा—

करोऽतिताम्रो रामाणां तन्त्रीताडनविभ्रमम् ।
करोति सेर्ष्यं कान्ते च श्रवणोत्पलताडनम् ॥

एकान्तरितपादमध्ययमकं यथा—

यान्ति यस्यान्तिके सर्वेऽप्यन्तकान्तमुपाश्रयः ।

तं शान्तचित्तवृत्तान्तं गौरीकान्तमुपास्महे, इति । चतुर्ष्वपि पादेषु यमकमुदाहरति ॥ नतोन्नतेति ॥ हे चञ्चल मनः, नते उन्नते च ये भ्रुवौ तयोर्गतिभिर्वलनभङ्गीभिर्बद्धं लास्यं शृङ्गारनटनं यस्यास्ताम् । शशीव पेशलं मनोज्ञमास्यं यस्यास्तां तन्वीं विलोक्य किमुत्साम्यसि । अस्यां तन्व्यां स्मराज्ञा यदि पुष्कला भवेत्तर्हि कृती स्यामिति सम्बन्धः ॥ एवमिति ॥ समस्तपदादियमकं यथा—

सारसाऽलंकृताकारा सारसामोदनिर्भरा ।
सारसालवृतप्रान्ता सा रसाढ्या सरोजिनी ॥

समस्तपादमध्ययमकं यथा—

स्थिरायते यतेन्द्रियो न भूयते यतेर्भवान् ।
आमायतेयतेऽप्यभूत् सुखाय ते यतेऽक्षयम् ॥

अन्ये चेति—

सनाकवनितं नितम्बरुचिरं
चिरं सुनिनदैर्नदैर्वृतममुम् ।
मता फणवतोऽवतो रसपरा
परास्तसुधा सुधार्ऽधवसति ॥ इत्यादि । अक्षरयमकम् अध्यक्षयितुं नाद्विभागमाह ॥ अक्षरयमकमिति ॥ तत्राद्यमुदाहरति ॥ नानेति ॥ नानाकारेण विविक्तेन शुद्धेनाराधितमनोभुवा विलासेन कान्ताऽरूः, नूणां हृदयं ततक्ष । "अडादीनां व्यवस्थार्थं पृथक्त्वेन

Digitized by Google

प्रकल्पितम् । यत्सूपसर्गयोः शास्त्रे धातुरेव हि तादृशः" इति वचनाद् विशब्दस्य धात्वंशत्वेनाक्षतवृत्तिरेवेति न पदावृत्तिशङ्कावकाशः ॥ यथेति ॥ स्थानान्तरयोगे यथा—

सभासु राजन्नसुराहृतैर्मुखै-
र्महीसुराणां वसुराजितैः स्तुताः ।
न भासुरा भान्ति सुराज्ञ ते गुणाः
प्रजासु रागात्मसु राशितां गताः ॥ इति ।

अकलङ्कशशाङ्कनिमेन्दुमौलेर्मतिर्मम" इत्यादि । इत्थमक्षरयमकमुदाहृत्य तदेव नैरन्तर्येण वृत्तमुदाहर्तुमुपक्रमते ॥ सजातीयेति ॥ विविधेति ॥ अत्र पाराशरपरिसरभुवमभिलक्ष्य हलधरे हरिराह । विविधानि बहुविधानि धवानामर्जुनानां वनानि । "धवो हृते नरे पत्यावर्जुने च द्रुमान्तरे" इति वैजयन्ती । यस्यां सा विविधवनवना । नागाः कुञ्जराः सर्पा वा तान् गृध्यति अभिलषन्तीति नागगर्द्धाः । तथाविधा ऋद्धाः समृद्धा ये नानाविधा वयः पक्षिणस्तैर्विततं व्याप्तं गगनं यस्याः सा नागगर्द्धर्द्धनानाविवितगगना । न विद्यते नामो नमनं यस्मिन् कर्मणि तत्तथा मज्जन्तो जना यस्यां सा । अनतममज्जज्जना । अनिति प्राणतीत्यना, स्फुरन्तीति वाक्यात् । अथवा विद्यन्ते नरो यस्यां सा अना । समासान्तविधेरनित्यत्वात् कबभावः । रूरूणां शशानां च ललनं विलसनं यस्यां सा रुरुशललना । मौ आवयोः, भवन्धुं शत्रुं धुनाना हि यस्मात् कारणात् । भव हितं तनोतीति हिततना । न विद्यते आननं यस्याऽसौ अननः, स्व आत्मीयः स्वन एवानः प्राणनं यस्याः सा अनाननस्वस्वनाना । एवंविधा समुद्रभूमिरिति वाक्यार्थः ॥ पदयमकमालेति ॥ स्वभुवे स्वभुवे भयोभयोर्भवतां भवतां भासिते भासिते" । इत्यादि द्रष्टव्यम् ॥ २ ॥

अथ यमकगोचरमेव किञ्चिद्वैचित्र्यमासूत्रयितुमाह ।

भङ्गादुत्कर्षः ॥ ३ ॥

उत्कृष्टं खलु यमकं भङ्गाद्भवति ॥ ३ ॥

भङ्गादुत्कर्ष इति ॥ व्याचष्टे ॥ उत्कृष्टमिति ॥ भङ्गो नाम वर्णविच्छेदः ॥ ३ ॥

Digitized by Google

भङ्गभेदान् भणितुमाभाषते ।

शृङ्खलापरिवर्तकश्चूर्णमिति भङ्गमार्गः ॥ ४ ॥

एते खलु शृङ्खलादयो यमकभङ्गानां प्रकारा भवन्ति ॥ ४ ॥

शृङ्खलेति ॥ वृत्तिः स्पष्टार्था ॥ ४ ॥
शृङ्खलादीन् सङ्कथयितुं सूत्रमवतारयति ।

तान् क्रमेण व्याचष्टे ।

वर्णविच्छेदचलनं शृङ्खला ॥ ५ ॥

वर्णानां विच्छेदो वर्णविच्छेदः । तस्य चलनं यत् सा शृङ्खला । यथा कालकामधुशब्दे कामशब्दविच्छेदे मधुशब्दविच्छेदे च तस्य चलनम् । लि–म–वर्णयोर्विच्छेदात् ॥ ५ ॥

तानिति ॥ विग्रहं विवृण्वन् व्याचष्टे ॥ वर्णानामिति ॥ लक्ष्यलक्षणयोरानुकूल्यमुन्मीलयति ॥ यथेति ॥ कलिकेति ॥ अत्र चस्त्वर्थे । पदद्वयात्मके कलिकामधुशब्दे, कामशब्दस्य तु विच्छेदे पृथक्कारे तस्य कलिकामधुशब्दस्य चलनं भवति । कुत इत्यत आह ॥ लि–मवर्णयोरिति ॥ यद्वा–"कलिकामधुशब्दे कामशब्दविच्छेदे मधुशब्दविच्छेदे च तस्य चलनम्" इति पाठान्तरम् । अत्र चः समुच्चये । अत्र कामशब्दस्य विच्छेदे पृथक्कारे कलिकाविच्छेदस्य चलनं भवति । लिवर्णस्य विच्छेदात् । मधुशब्दस्य विच्छेदे पृथक्कारे कामविच्छेदस्य चलनं भवति । मवर्णस्य विच्छेदादित्यर्थः । एवं शृङ्खलारूपवर्णावच्छेदप्रतीतिरयं भङ्गमार्गः शृङ्खलेति व्यपदिश्यते ॥ ५ ॥

परिवर्तकं कीर्तयितुमाह ।

सङ्गविनिवृत्तौ स्वरूपापत्तिः परिवर्तकः ॥ ६ ॥

अन्यवर्णसंसर्गः सङ्गः । तद्विनिवृत्तौ स्वरूपस्यान्यवर्णैरकृतस्यापत्तिः प्राप्तिः परिवर्तकः । यथा, कलिकामधुगर्हितम्

Digitized by Google

इत्रत्राऽर्हितमिति पदं मकारस्य व्यञ्जनस्य सङ्गाद् गर्हितमिलन्यस्य रूपमापन्नम् । तत्र व्यञ्जनसङ्गे विनिवृत्ते स्वरूपमाधत्ते— अर्हितमिति । अन्यवर्णसंक्रमेण भिन्नरूपस्य पदस्य तद्रूप्यविधिरयमिति तात्पर्यार्थः । एतेनेतरावपि व्याख्यातौ ॥ ६ ॥

सङ्गेति ॥ तद्विनिवृत्तौ = अन्यवर्णसङ्गस्य विनिवृत्तौ । अन्यवर्णो व्यञ्जनं, तेन तिरस्कृतस्य तिरोहितस्य स्वरूपस्यापत्तिः । अर्थान्तरभ्रमं निवारयति ॥ प्राप्तिरिति ॥ लक्ष्ये लक्षणं योजयति ॥ यथेति ॥ स्पष्टमन्यत् । नन्वन्यवर्णसंयोगे हि यमकत्वं सङ्गच्छते, कथं तद्विनिवृत्तिरुपयुज्यत इत्याशङ्क्य तात्पर्यमाविष्करोति ॥ अन्यवर्णसंक्रमेणेति ॥ एतेनेति ॥ नानाविच्छेदशालिपदमलने स्वरूपलाभः भिन्नयोर्हलोः पिण्डीकरणे च स्वरूपलाभ इति द्वौ भेदौ द्रष्टव्यौ ॥ ६ ॥

चूर्णकं वर्णयितुमाह ।

पिण्डाक्षरभेदे स्वरूपलोपश्चूर्णम् ॥ ७ ॥

पिण्डाक्षरस्य भेदे सति पदस्य स्वरूपलोपश्चूर्णम् । यथा—

योऽचलकुलमवति चलं
दूरसमुन्मुक्तशुक्तिमीनां कान्तः ।
साग्नि बिर्भति च सलिलं
दूरसमुन्मुक्तशुक्तिमीनाक्रान्तः ॥

अत्र शुक्तिपदे, क्तीति पिण्डाक्षरं, तस्य भेदे शुक्तिपदं लुप्यते । ककारतिकारयोरन्यत्र संक्रमात् । दूरसमुन्मुक्तशुक, अचलकुलं, तिमीनां कान्तः समुद्रः । अत्र श्लोकाः—

अखण्डवर्णविन्यासचलनं शृङ्खलाऽमला ।
अनेन खलु भङ्गेन यमकानां विचित्रता ॥
यदन्यसङ्गमुत्सृज्य नेपथ्यमिव नर्तकः ।
शब्दस्वरूपमारोहेत् स ज्ञेयः पारिवर्तकः ॥

Digitized by Google

पिण्डाक्षरस्य भेदेन पूर्वापरपदाश्रयात् ।
वर्णयोः पदलोपो यः स भङ्गश्चूर्णसंज्ञकः ॥
अप्राप्तचूर्णभङ्गानि यथास्थानस्थितान्यपि ।
अलकानीव नार्थं यमकानि चकासति ॥
विभक्तिपरिणामेन यत्र भङ्गः क्वचिद्भवेत् ।
न तदिच्छन्ति यमकं यमकोत्कर्षकोविदाः ॥
आरूढं भूयसा यत्तु पदं यमकभूमिकाम् ।
दुष्येच्चेन्न पुनस्तस्य युक्तानुप्रासकल्पना ॥
विभक्तीनां विभक्तत्वं संख्यायाः कारकस्य च ।
आवृत्तिः सुप्तिङन्तानां मिथश्च यमकादभुतम् ॥ ॥ ७ ॥

पिण्डाक्षरस्येति ॥ पिण्डाक्षरस्य संयुक्ताक्षरस्य । उदाहरति ॥ योऽचलकुलमिति ॥ दूरं समुन्मुक्ता शुक्र शंको येन । तिमीनां मत्स्यानां कान्तः प्रियः । उन्मुक्ता उद्गतमुक्ताः शुक्तय उन्मुक्तशुक्तयो मीनाश्चाऽङ्का यस्य स तादृगन्तः पर्यन्तो यस्य तादृशो यः समुद्रः । चलं भयचञ्चलं दूरसमुन्मुक्तशुगचलकुलमवति । दूरसं दुष्टरसं, सान्नि सलिलं बिभर्ति च । लक्ष्ये लक्षणानुगममभिलक्षयति ॥ अत्रेति ॥ पिण्डाक्षरं दर्शयति ॥ शुक्तिपदे कीति ॥ तस्य पिण्डाक्षरस्य वर्णयोः शुगित्यत्र ककारस्य तिमीत्यत्र तिकारस्य च भेदे शुक्तिपदरूपं लुप्यते । तत्र हेतुमाह ॥ ककारेति ॥ ककारतिकारयोरन्यत्र शुक्तिपदे तिमिपदे च संक्रमादित्यर्थः । संक्रमणमेव दर्शयति ॥ दूरसमुन्मुक्तशुगिति ॥ तिमीनामिति च ॥ विशेषणद्वयस्य यथासङ्ख्यं विशेष्यद्वयं दर्शयति ॥ अचलकुलमिति ॥ कान्तः समुद्र इति च । प्रतिपादितेऽर्थे परसंवादं प्रकटयति ॥ अत्र श्लोका इति ॥ पदत्रयं स्पष्टार्थम् । भङ्गादुत्कर्ष इत्युपक्रम्य भङ्गमार्गेषु प्रकर्षं प्रतिपद्यान्यत्राऽकर्षमवगमयितुमाह ॥ अप्राप्तेति । अप्राप्तचूर्णभङ्गानीति विशेषणमलकेष्वपि योजनीयम् ॥ विभक्तीति ॥ विभक्तीनां परिणामो विपरिणामोऽन्यथाभाव इति यावत् । उदाहरणं तु "शिवमात्मनि सर्वस्यान् पश्यतः पश्यतः शिवौ" इत्यादि द्रष्टव्यम् ॥ आरूढमिति ॥ यत्पदं

Digitized by Google

भूयसा भूम्ना, यमकभूमिकां यमकवदवभासमानत्वमारूढं तद् दुष्येद्, दुष्टं भवेत् । ननु, न चेत् तद् यमकं तर्ह्यनुप्रासोऽस्त्विति शङ्कां शकलीकरोति ॥ न पुनरिति ॥ यथा दण्डिनोक्तम्-"कालकालमलकालकालमुखंकालकाल कालकालघनकालकालपनकाल काल । कालकालसितकालका ललनिकालकालकालकाऽऽलगतु कालकाल कलिकालकाल" इति ॥ विभक्तीनामिति ॥ प्रथमादीनां विभक्तीनां विभक्तत्वं विविधत्वम् । एकवचनादिलक्षणायाः संख्यायाः कर्तृकर्मादेः कारकस्य सुबन्तानां तिङन्तानाञ्च पदानामावृत्तिर्यत्र तद्यमकादद्भुतमतिशयितं यमकमित्यर्थः । क्रमेणोदाहरणानि "विश्वप्रमाश्रा भवता ऊर्गान्त व्याप्तानि मात्राऽपि न मुञ्चति त्वाम् । " इति । "एताः सद्भाभयो बाला यासां सद्भामयः प्रियः" इति। "यतस्ततः प्राप्तगुणा प्रभावे यतस्ततश्चेतसि भासतेयम्" । इति । सरति सरति कान्तस्ते ललामो ललामः" इत्यादीनि । अत्र विभक्तिविपरिणामभाजे यमकत्वहानिः । प्रकृत्यर्थस्यापि भेदे यमकादद्भुतमिति विवेकः ॥७॥

इत्थं यमकं लक्षयित्वाऽनुप्रासं लक्षयितुमाह ।

शेषः सरूपोऽनुप्रासः ॥ ८ ॥

पदमेकार्थमनेकार्थं च स्थानानियतं तद्विधमक्षरं च शेषः । सरूपोऽन्येन प्रयुक्तेन तुल्यरूपोऽनुप्रासः । ननु शेषोऽनुप्रास इत्येतावदेव सूत्रं कस्मान्न कृतम् । आवृत्तिशेषोऽनुप्रास इत्येव हि व्याख्यास्यते । सत्यम् । सिद्धयत्येवावृत्तिशेषे, किन्त्वव्याप्तिप्रसङ्गः विशेषार्थं च सरूपग्रहणम् । कात्स्न्र्येनैवावृत्तिः । कात्स्न्र्यैकदेशाभ्यां तु सारूप्यमिति ॥ ८ ॥

शेष इति ॥ शेषशब्दार्थमाह ॥ पदमिति ॥ स्थानानियतं प्रागुक्तस्थानरहितमित्यर्थः । एकार्थं पदं स्थानानियतमनेकार्थं च, तद्विधं तथाविधमस्थाननियतमक्षरं शेषः । सरूपपदार्थमाह ॥ सरूपेति ॥ प्रयुक्तेन पदान्तरेण तुल्यरूपः शेषोऽनुप्रासो भवति । अत्र सूत्रे सरूपपदवैयर्थ्यमाशङ्क्यते ॥ नन्विति ॥ शेषोऽनुप्रास इत्येव कृते सूत्रे, आवृत्तपदानुषङ्गात्स्थानानियमं पदमक्षरं वा वृत्तमनुप्रासो भ-

Digitized by Google

वतीति सूत्रार्थे सम्पन्ने सारूप्यमर्थात् सम्पत्स्यते, किं सरूपग्रहणेनेति शङ्कार्थः । अर्धाङ्गीकारेण परिहरति ॥ सत्यमिति ॥ अङ्गीकृतमंशमाह ॥ सिद्ध्यत्येवेति ॥ सारूप्यमिति शेषः । तथाप्यावृत्तेरविशेषत्वेन सामान्येन तद्व्याप्तं कात्स्न्र्येनावृत्तत्व तन्मात्रप्रसङ्गः स्यादू, विशेषस्तु न सिद्ध्येदिति शेषः । तमेव विशेषं दर्शयितुमाह ॥ विशेषार्थं चेति ॥ यद्यपि सामान्येन कात्स्न्र्येनावृत्तिर्भवति तथापि कात्स्न्र्यैकदेशाश्रयां सारूप्यमत्र वक्तव्यमिति सरूपग्रहणं कृतमित्यर्थः ॥ ८ ॥

अनुल्वणो वर्णाऽनुप्रासः श्रेयान् ॥ ९ ॥

वर्णानामनुप्रासः स खल्वनुल्वणो लीनः श्रेयान् । यथा—

क्वचिन्मसृणमांसलं क्वचिदतीव तारास्पदं
प्रसन्नसुभगं मुहुः स्वरतरङ्गलीलाङ्कितम् ।
इदं हि तव वल्लकीरणितनिर्गमैर्गुम्फितं
मनो मदयतीव मे किमपि साधु सङ्गीतकम् ॥

उल्वणस्तु न श्रेयान्। यथा—"वल्लीबद्धोर्ध्वजूटोद्भटमटति रटत्कोटिकोदण्डदण्डः" इति ॥ ९ ॥

अनुप्रासो द्विविधः—उल्वणोऽनुल्वणश्च । तत्रोल्वणादनुल्वण उत्कृष्ट इत्युपपादयितुमाह ॥ अनुल्वण इति ॥ व्याचष्टे॥वर्णानामिति॥ अनुल्वणपदव्याख्यानं, लीन इति ॥ मसृण इत्यर्थः । उदाहरणं तु स्पष्टार्थम् । यथा वा—

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला, इति ॥

उल्वणमुदाहरति ॥ यथेति ॥ वल्लीबद्धेति ॥ ९ ॥

पादानुप्रासः पादयमकवत् ॥ १० ॥

ये पादयमकस्य भेदास्ते पादानुप्रासस्येत्यर्थः । तेषामुदाहरणानि यथा—

Digitized by Google

कविराजमविज्ञाय कुतः काव्यक्रियाऽऽदरः ।
कविराजं च विज्ञाय कुतः काव्यक्रियादरः ॥
आखण्डयन्ति मुहरामलकीफलानि
बालानि बालकपिलोचनपिङ्गलानि ॥
वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसङ्काशकाशाः
काशाभा भान्ति तासां नवपुलिनगताः श्रीनदीहंस हंसाः ।
हंसाभाऽम्भोदमुक्तः स्फुरदमलरुचिर्मेदिनी चन्द्रचन्द्र-
श्चन्द्राङ्कः शारदस्ते जयकुदुपगतो विद्विषां कालकालः ॥
कुवलयदलश्यामा मेघा विहाय दिवं गताः
कुवलयदलश्यामो निद्रां विमुञ्चति केशवः ।
कुवलयदलश्यामा श्यामा लताऽद्य विजृम्भते
कुवलयदलश्यामं चन्द्रो नभः प्रतिगाहते ॥
एवमन्येऽपि द्रष्टव्याः ॥ ॥ १० ॥

इति श्रीपाण्डितवरवामनविरचितायां काव्यालङ्कारसूत्रवृत्ता-वालङ्कारिके चतुर्थेऽधिकरणे प्रथमोऽध्यायः ॥४॥ १ ॥ ॥ शब्दा-ऽलङ्कारविचारः ॥

पादानुप्रासः पादयमकवदिति ॥ अतिदेशप्रासमर्थमावेद-यति ॥ ये पादयमकस्येति ॥ कविराजमिति ॥ एकत्रादरः । अन्यत्र दरः । "दरत्रासौ भीतिर्भीः साध्वसं भयम्" । इत्यमरः । उभयत्र दर इति वा व्याख्येयम् । आखण्डयन्तीति ॥ अत्र "ला-नी" त्यक्षरा-नुप्रासः ॥ वस्त्रायन्त इति ॥ हे शक्रसंकाश, सितकुसुमधराः का-शाः नदीनां वस्त्रायन्ते, दुकूलवदाचरन्तीत्यर्थः । हे श्रीनदीहंस, श्री राज्यलक्ष्मीरेव नदी तत्र हंस, तासां नदीनां नवपुलिनगताः का-शाभा हंसा भान्ति । हे मेदिनीचन्द्र ! चन्द्रः, हंसाभैरम्भोदैर्मुक्तः, अत एव स्फुरदमलरुचिर्भवति । हे विद्विषां काल, चन्द्राङ्कः शारदः कालः, ते जयकुदुपगत इति । अत्र समस्तपादान्तपदानुप्रासः । पा-

Digitized by Google

दान्तपदानामुपरि प्रादादिषु पुनर्ग्रहणान्मृक्पदग्रहाक्यमन्यदपि द्रष्टव्यम् ॥ कुवलयदलेति ॥ अत्र सर्वपादादिपदानुप्रासः। एवमन्येऽपीति ॥

सितकरकररुचिरविभा
विभाकराकार धरणिधर कीर्तिः।
पौरुषकमला कमला
साऽपि तवैवास्ति नान्यस्य, इत्यादयः प्रत्येतव्याः ॥ ॥ १० ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां काव्यालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालंकारकामधेनावालङ्कारिके चतुर्थेऽधिकरणे प्रथमोऽध्यायः समाप्तः ॥ ४ ॥ १ ॥ (८) ॥

Digitized by Google

उत्खण्डिततमस्तोममुपेयमुपरि श्रुतेः ॥
उदर्चिरुपमामिन्दोरुक्तिज्योतिरुपास्महे ॥ १ ॥

शब्दालङ्कारेषु, चर्वितेषु, खले-कपोतन्यायादखिलानामर्थालङ्काराणामशेषेण प्राप्तौ प्रकृतित्वात् तेषां प्रथममुपमां प्रस्तौति ।

सम्प्रत्यर्थालङ्काराणां प्रस्तावः । तन्मूलं चोपमेति सैव विचार्यते ।

उपमानेनोपमेयस्य गुणलेशतः साम्यमुपमा ॥ १ ॥

उपमीयते सादृश्यमानीयते येनोत्कृष्टगुणेनान्यत्तदुपमानम् । यदुपमीयते न्यूनगुणं तदुपमेयम् । उपमानेनोपमेयस्य गुणलेशतः साम्यं यदसावुपमेति । ननूपमानमित्युपमेयमिति च सम्बन्धिशब्दावेतौ, तयोरेकतरोपादानेनैवान्यतरासिद्धिरिति । यथा "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इत्यत्रोपमितग्रहणमेव कृतं, नोपमानग्रहणमिति । तद्वदत्रोभयग्रहणं न कर्तव्यम् । सत्यम् । तत् कृतं लोकप्रसिद्धिपरिग्रहार्थम् । यदेवोपमेयमुपमानञ्च लोकप्रसिद्धं तदेव परिगृह्यते, नेतरत् । न हि यथा "मुखं कमलमिव" इति, तथा "कुमुदमिव" इत्यपि भवति ॥ १ ॥

सम्प्रतीति ॥ व्याख्यातुं सूत्रमुपादत्ते ॥ उपमानेनेति ॥ उपमानोपमेयपदव्युत्पत्तिं प्रदर्शयति ॥ उपमीयत इति ॥ उत्कृष्टगुणेन येन चन्द्रादिना सादृश्यमानीयतेऽन्यन्मुखादिकं तदुपमानम् । यत्तु न्यूनगुणमुत्कृष्टगुणेनान्येनोपमीयते तदुपमेयम् । उपमानेन सादृश्यं प्रापयितुमर्हमित्यर्थः ॥ गुणलेशत इति ॥ गुणा उपमानोपमेययोरुत्कृष्टधर्माः । तेषां लेशतः एकदेशतः । क्वचिदपि सर्वाकारसादृश्यासम्भवादिति भावः । ननु सम्बन्धिशब्दयोरेकतरग्रहणेऽन्यतरस्यानुक्तसिद्धत्वमिति शङ्कते ॥ नन्विति ॥ अमुमर्थमभियुक्तोक्तिसंवादेन समर्थयते ॥ यथेति ॥ उपमितं व्याघ्रादिभिरिति पाणिनीयसूत्रे यथोपमितपदग्रहणेनैव व्याघ्रादीनामुपमानत्वमवगम्यते, तद्वात्राप्युप-

Digitized by Google

मानग्रहणं न कर्तव्यमिति भावः। परिहरति ॥ तत्कृतमिति॥तदुभयग्रहणं कृतम्। किमर्थम्? लोकप्रसिद्धस्योपमानस्य परिग्रहार्थम्। न ह्यत्र व्युत्पत्तिबलादागतमुपमानं न विवक्षितं, किन्तु लोकप्रसिद्धमेवेत्यवगमायतुमुभयग्रहणे कृतमित्यर्थः। तत्प्रसिद्धप्रसिद्धी दर्शयति ॥ यथेति ॥ यथा मुखं पद्ममिवेत्यत्र पद्मं मुखोपमानत्वेन प्रसिद्धं, तथा कुमुदमिवेत्यपि ॥ १ ॥

लौकिकी कल्पिता चेत्युपमा द्विविधा। कल्पितां प्रकटयितुमाह।

गुणबाहुल्यतश्च कल्पिता ॥ २ ॥

गुणानां बाहुल्यं गुणबाहुल्यं, तत उपमानोपमेययोः साम्यात् कल्पितोपमा। कविभिः कल्पितत्वात् कल्पिता। पूर्वा तु लौकिकी। ननु कल्पनाया लोकप्रसिद्धयभावात् कथमुपमानोपमेयनियमः? गुणबाहुल्यस्योत्कर्षापकर्षकल्पनाभ्याम्। तद्यथा—

उद्भर्भहूणतरुणीरमणोपमर्द-
भुग्नोन्नतिस्तननिवेशनिभं हिमांशोः।
बिम्बं कठोरविसकाण्डकडारगौरै-
र्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति ॥
मध्ये मुण्डितमत्तहूणचिबुकप्रस्पर्द्धि नारङ्गकम्।
अभिनवकुशसूचिस्पर्धि कर्णे शिरीषम् इति।
इदानीं प्लक्षाणां जरठदलविश्लेषचतुर-
स्तिभीनामावद्धस्फुरितशुकचञ्चूपुटनिभम् ॥
ततः स्त्रीणां हंत क्षममधरकान्ति तुलयितुं
समन्तान्निर्याति स्फुटसुभगरागं किसलयम् ॥ ॥ २ ॥

गुणबाहुल्यत इति ॥ उपमायाः कल्पितत्वव्यपदेशे कारणमाह ॥ कविभिरिति ॥ या पुनरुपमा गुणलेशतः साम्यलक्षणा सा लौकिकी प्रागुक्तवेत्याह ॥ पूर्वा तु लौकिकीति ॥ प्रसिद्धयभावात्

Digitized by Google

कल्पितसाधर्म्यमुपमानमिदमुपमेयमिति व्यवस्था न घटत इति शङ्कते ॥ नन्विति ॥ इह खलूपमानोपमेययोर्मुखचन्द्रयोर्गुणोत्कर्षकार्ये व्यवस्थापकौ । तत्तत्कल्पनया कल्पितायामुपमानोपमेयव्यवस्थायां घटते । अतो न लोकविरोध इति परिहरति ॥ गुणबाहुल्यस्तोत्रे ॥ तदेव हरति ॥ तद्यथेति ॥ उद्भर्भा व्यक्तगर्भा या हूणाख्यजनपदतरुणी तस्या रमणेन भर्त्रा, उपमर्दो गाढालिङ्गनं, तेन भुग्नः । स चाऽसावुन्नतः स्तनश्च भुग्नोन्नतस्तनस्तस्य स्तिवेशः = सन्निवेशो गण्डकाकार इति यावत् । तन्निभं हिमांशोर्बिम्बम् । कठोरार्बुसकाण्डा इव कठोरगौराः कपिशावदातास्तैरभ्रकैः, प्रथममग्रे, विष्णोः पदमाकाशं व्यनक्ति । विषयव्याप्त्यर्थमुदाहरणान्तराण्याह ॥ सद्य इति ॥ मुण्डितेन मस्तकस्थ कुणजनपदपुरुषस्थ स्निग्धेन प्रस्पर्द्धितुं श्लिलमस्याऽस्तीति तत्सन्निभं भवति नारङ्गकमिति॥ इदानीमिति ॥ जरठदलानां जीर्णपर्णानां विश्लेषेण चतुरा मनोज्ञाः स्तिमयोऽङ्कुरा येषाम् । "स्तिमिश्च स्तिमितः शुक्लोऽप्यङ्कुरेऽङ्कुर एव च" इति हलायुधः । तेषां प्लक्षाणां किसलयम् । आबद्धो घटितः स्फुरित ईषद्विवृतः शुकस्य पक्षच्चुपुटस्तत्सन्निभं भवति । ततोऽनन्तरम् । स्फुटसुभगसगं व्यक्तमनोज्ञाकूत्यं, स्त्रीणामधरकान्ति तुलयितुं सम्यक्यां सन्निधत्ते ॥२॥

उपमाविभागमुदीरयितुमाह ।

तद्द्वैविध्यं पदवाक्यार्थवृत्तिभेदात् ॥ ३ ॥

तस्या उपमाया द्वैविध्यम् । पदवाक्यार्थवृत्तिभेदात् । एका पदार्थवृत्तिः, अन्या वाक्यार्थवृत्तिरिति । पदार्थवृत्तिर्यथा—

हरिततनुषु बभ्रुत्वप्रविमुक्तासु यासां
कनककपिसगर्भा मान्मथो रोमभेदः ।

वाक्यार्थवृत्तिर्यथा—

पाण्ड्योऽयंसार्पितलम्बहारः
कृताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः
सनिर्झरोद्गार इवाद्रिराजः ॥ ॥ ३ ॥

Digitized by Google

तद्द्वैविध्यमिति ॥ व्याचष्टे ॥ तस्या इति ॥ पदार्थवृत्तिमुपमां प्रतिपादयति ॥ पदार्थेति ॥ हरिततनुष्विति ॥ कनककणसधर्मेत्यत्र पदार्थवृत्तिरुपमा । वाक्यार्थवृत्तिमुपमामुदाहरति ॥ पाञ्चजन्योऽयमिति ॥ ३ ॥

सा पूर्णा लुप्ता च ॥ ४ ॥

सा उपमा पूर्णा लुप्ता च भवति ॥ ४ ॥

पुनर्भेदं प्रादुर्भावयितुमाह ॥ सा पूर्णा लुप्ता चेति ॥ ४ ॥ पूर्णां वर्णयितुमाह ।

गुणद्योतकोपमानोपमेयशब्दानां सामग्र्ये पूर्णा ॥ ५ ॥

गुणादिशब्दानां सामग्र्ये साकल्ये पूर्णा । यथा—"कमलमिव मुखं मनोज्ञमेतत्" इति ॥ ५ ॥

गुणद्योतकेति ॥ व्याचष्टे ॥ गुणादीति ॥ उपमानोपमेयसमानधर्मसादृश्यप्रतिपादकानामन्यूनत्वेन प्रयोगे पूर्णा ॥ कमलमिवेति ॥ अत्र कमलमुपमानम् । मुखमुपमेयम् । इवशब्दः सादृश्यद्योतकः । मनोज्ञशब्दः समानधर्मवचनः । एतेषामन्यूनतया प्रयोगादियमुपमा पूर्णा ॥ ५ ॥

लुप्तां लक्षयति ।

लोपे लुप्ता ॥ ६ ॥

गुणादिशब्दानां वैकल्ये लोपे लुप्ता । गुणशब्दलोपे यथा "शशीव राजा" इति । द्योतकशब्दलोपे यथा "दूर्वाश्यामेयम्" । उभयलोपे यथा "शशिमुखी"ति । उपमानोपमेयलोपस्तूपमाप्रपञ्चे द्रष्टव्यः ॥ ६ ॥

लोप इति ॥ गुणादिशब्दानामिति ॥ उपमानोपमेयगुणसादृश्यप्रतिपादकानां मध्ये, एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता । शशीव

Digitized by Google

राजेत्यत्र साधारणधर्मस्याप्रयोगादेकस्य लोपः । दूर्वाश्यामेत्यत्रोदाहरणे सादृश्यद्योतकस्याप्रयोगादेकस्य लोपः । श्यामाशब्देनैव धर्मधर्मिणोरुक्तत्वात् ।

दूर्वामरकतश्यामं दुष्टराक्षसहारि यत् ।
अचलं लोचनाग्राह्यं मा चलत्वनिशं महः ॥

इत्युदाहरणान्तरमपि द्रष्टव्यम् । शशिमुखीत्यत्र सादृश्यधर्मवचनस्यालोपः । उपमानस्योपमेयस्य वा लोपः समासोक्त्यादावुदाहरिष्यत इत्याह ॥ उपमानेति ॥ समासोक्त्यादावुपमेयस्याक्षेपादुपमानस्य लोप इति द्रष्टव्यम् ॥ ६ ॥

उपमामात्रस्य विषयं दर्शयितुमाह ।

स्तुतिनिन्दातत्त्वाख्यानेषु ॥ ७ ॥

स्तुतौ निन्दायां तत्त्वाख्याने चाऽस्याः प्रयोगः । स्तुतिनिन्दयोर्यथा "स्निग्धं भवत्सऽमृतकल्पमहो कलत्रं, हालाहलं विषमिवापगुणं तदेव" तत्त्वाख्याने यथा—

तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले ।
यस्तन्वितारकान्यासः शकटाकारमाश्रितः ॥ ७ ॥

स्तुतीति ॥ स्निग्धमित्यादौ स्तुतिः । हालाहलमित्यादौ निन्दा ॥ तां रोहिणीमित्यत्र तत्त्वाख्यानम् ॥ ७ ॥

उपमादोषानुद्घाटयितुमाह ।

हीनत्वाधिकत्वलिङ्गवचनभेदासादृश्याऽसम्भवास्तद्दोषाः ॥ ८ ॥

तस्या उपमाया दोषा भवन्ति । हीनत्वमाधिक्यं लिङ्गभेदो वचनभेदोऽसादृश्यमसम्भव इति ॥ ८ ॥

हीनत्वेति ॥ समासार्थं विविच्य दर्शयति ॥ तस्या इति ॥ ८ ॥

तत्र प्रथमोद्दिष्टं हीनत्वं प्रथयितुमाह ।

Digitized by Google

तान् क्रमेण व्याख्यातुमाह ।

जातिप्रमाणधर्मन्यूनतोपमानस्य हीनत्वम् ॥ ९ ॥

जात्या प्रमाणेन धर्मेण चोपमानस्य न्यूनता या तद्धीनत्वमिति । जातिन्यूनत्वरूपं हीनत्वं यथा— "चाण्डालैरिव युष्माभिः साहसं परमं कृतम्" । प्रमाणन्यूनत्वरूपं हीनत्वं यथा "वह्निस्फुलिङ्ग इव भानुरयं चकास्ति" । उपमेयादुपमानस्य धर्मतो न्यूनत्वं यत् तद्धर्मन्यूनत्वम् । तद्रूपं हीनत्वं यथा—

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।

व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥ अत्र मौञ्जीप्रतिवस्तु तडिन्नास्त्युपमान इति हीनत्वम् । नच कृष्णाजिनपटमात्रस्योपमेयत्वं युक्तम् । मौञ्ज्या व्यर्थत्वप्रसङ्गात् । ननु नीलजीमूतग्रहणेनैव तडित्प्रतिपाद्यते । तन्न । व्यभिचारात् ॥ ९ ॥

जातीति ॥ व्याचष्टे ॥ जात्येति ॥ जातिर्ब्राह्मणत्वादिः । प्रमाणं परिमाणम् । धर्मः समानगुणः । एतेषामन्यतमेन न्यूनत्वमुपमानस्य हीनत्वम् । तत्राद्यमुदाहरति ॥ जातिन्यूनत्वरूपमिति ॥ चाण्डालैरित्यत्र साहसकारित्वं साधर्म्यम् । जातिन्यूनत्वं स्फुटम् । वह्निस्फुलिङ्ग इत्यत्र परिमाणन्यूनत्वमतिरोहितमेव ॥ स मुनिरिति ॥ नीलजीमूतेन कृष्णमेघेन, भागे एकत्र प्रदेशे, आश्लिष्टः । धर्मतो न्यूनत्वमुपमानस्य दर्शयति ॥ अत्रेति ॥ मौञ्ज्याः समानं वस्तु प्रतिवस्तु तडित् साऽत्र नास्ति । उपमानविशेषणतयाऽनुपादानादित्यर्थः । ननु, उपमाने यावद् दृष्टं तावदेव साधर्म्यमुपमेये विवक्षितम् । मौञ्जीलाञ्छनं तु स्वरूपकथनार्थमिति शङ्कां शकलयति ॥ नचेति ॥ नीलजीमूतस्य तडित्साहचर्य्यात् तद्ग्रहणेनैव तडित्संविच्चिरप्युपलक्ष्यते । ततो न काचिन्न्यूनतेति शङ्कते ॥ नन्विति ॥ तडितमन्तरेणापि नीलजीमूतस्य सद्भावान्नैवमिति परिहरति ॥ तन्न, व्यभिचारादिति ॥९॥

व्यभिचाराभावे तु सहचरितधर्मप्रतीतिरस्त्येवेति प्रदर्शयितुमनन्तरसूत्रमवतारयति ।

Digitized by Google

अव्यभिचारे तु भवन्ती प्रतिपत्तिः केन वार्यते तदाह—

धर्मयोरेकनिर्देशोऽन्यस्य संवित् साहचर्यात् ॥ १० ॥

धर्मयोरेकस्यापि धर्मस्य निर्देशोऽन्यस्य धर्मस्य संवित् प्रतिपत्तिर्भवति । कुतः । साहचर्यात् । सहचरितत्वेन प्रसिद्धयोरवश्यमेकस्य निर्देशेऽन्यस्य प्रतिपत्तिर्भवति । तद्यथा—

निर्वृष्टेऽपि बहिर्घनेन विरमन्त्यन्तर्जरद्वेश्मनो
लूतातन्ततिच्छिदो मधुपृषत्पिङ्गाः पयोबिन्दवः ।
चूडाबर्बरके निपत्य कणिकाभावेन जाताः शिशो-
रङ्गास्फालनभग्ननिद्रगृहिणीचित्तव्यथादायिनः ॥

अत्र मधुपृषतां वृत्तत्वपिङ्गत्वे सहचरिते । तत्र पिङ्गशब्देन पिङ्गत्वे प्रतिपन्ने वृत्तत्वप्रतीतिर्भवति । एतेन "कनकफलकचतुरस्रं शोणिबिम्बम्" इति व्याख्यातम् । कनकफलकस्य गौरत्वचतुरस्रत्वयोः साहचर्याच्चतुरस्रत्वश्रुतेव गौरत्वप्रतिपत्तिरिति । ननु च यदि धर्मन्यूनत्वमुपमानस्य दोषः, कथमयं प्रयोगः—

सूर्यांशुसम्मीलितलोचनेषु
दीनेषु पद्मानिलनिर्मदेषु ।
साध्व्यः स्वगेहेष्विव भर्तृहीनाः
केका विनेशुः शिखिनां मुखेषु ॥

अत्र बहुत्वमुपमेयधर्माणामुपमानात् । न विशिष्टानामेव मुखानामुपमेयत्वात् । तादृशेष्वेव केकाविनाशस्य सम्भवात् ॥ १० ॥

अव्यभिचारे त्विति ॥ व्याचष्टे ॥ धर्मयोरिति ॥ कार्यत्वानित्यत्वबद्विनाभूतयोर्धर्मयोरेकस्य ग्रहणेन अशाब्दस्याऽप्यन्यस्य प्रतिपत्तिर्भवति । तयोरव्यभिचारादिति वाक्यार्थः । उदाहरति ॥ तद्यथेति ॥ निर्वृष्ट इति ॥ बहिर्घने निर्वृष्टे । निर्गतं वृष्टं वर्षणं यस्मात् । तादृशि सत्यपि, जरद्वेश्मनः शिथिलगृहस्य, लूतास्तन्तुजालकराः

Digitized by Google

कृमयः। "लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः" इत्यमरः। तत्तन्तूनां तनीश्छिन्दन्तीति तथोक्ताः। मधुपूषत्पिङ्गा मधुबिन्दुपिङ्गलाः, पयोबिन्दवो न विरमन्ति। विरतेऽपि वर्षे वेश्माबन्दवो न विरमन्तीत्यर्थः॥ अत्रेति॥ मधुपूषतां वृत्तत्वपिङ्गत्वे सहचरिते = मधिनाभूते। तत्र पिङ्गशब्देनैव पिङ्गत्वप्रतिपत्तौ, अशाब्दत्वपि वृत्तत्वप्रतीतिभवतीति। उदाहरणान्तरमाह॥ कनकफलकेति॥ उक्तं सूत्रार्थमुदाहरणे योजयति॥ अत्रेति॥ कनकफलकस्य चतुरस्रत्वश्रुत्या तत्सहचरितं गौरत्वमपि प्रतीयते। अव्यभिचारादित्यर्थः। धर्मन्यूनत्वस्योपमादोषत्वे प्रयोगविरोधमाशङ्क्ते॥ नन्विति॥ प्रयोगविरोधं दर्शयति॥ सूर्येति॥ मुखेष्वित्युपमेयस्य लोचनसंमीलनदैन्यनिमेदत्वानां धर्माणां बाहुल्यं प्रतीयत इति विरोधः। परिहरति॥ नेति॥ भर्तृहीनजनाश्रयत्वेन गृहेष्वपि दैन्यमवगम्यते। नाहरेषु गृहेषु साध्वीनामिव दैन्यविशिष्टेषु शिखिमुखेषु केकानां विलया वक्तव्यः। अन्यथा तदसम्भवात्। दैन्यं च नेत्रनिमीलननिमेदत्वाभ्यां तदनुभावाभ्यामुपपादितमिति नास्ति धर्मन्यूनतेत्याह॥ विशिष्टानामिति॥

घर्मागमे दुर्मदतिग्मरश्मिसन्तापसम्मीलितलोचनेषु।
साध्व्यः खगेहेष्विव भर्तृहीनाः केका विलीनाः शिखिनां मुखेषु॥

इति विधाऽन्तरं विधातुं न प्रबन्धकर्ता न प्रगल्भते। किन्तु भर्तृहीनत्वस्य निमेदत्वादेश्चोपपादकस्य भेदेऽप्युभयत्र दैन्यमेव साधर्म्यमिति विवक्षितमिति न कश्चिद्विरोधः॥ १०॥

अधिकत्वं व्याख्यातुं सूत्रं व्याहरति।

तेनाधिकत्वं व्याख्यातम्॥ ११॥

तेन हीनत्वेनाधिकत्वं व्याख्यातम्। जातिप्रमाणधर्माधिक्यमधिकत्वमिति। जात्याधिक्यरूपमधिकत्वं यथा "विशन्तु विष्टपः शीघ्रं रुद्रा इव महौजसः"। प्रमाणाधिक्यरूपं यथा—

पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ।
वेणीदण्डः पुनरयं कालिन्दीपातसंनिभः॥

धर्माधिक्यरूपं यथा—

Digitized by Google

सरश्मि चञ्चलं चक्रं दधदेवो व्यराजत ।

सबाडवाग्निः सावर्तः स्रोतसामिव नायकः ॥ सबाडवाग्निरित्यस्योपमेयेऽभावाद् धर्माधिक्यमिति । अनयोर्दोषयोर्विपर्ययाख्यस्य दोषस्यान्तर्भावान्न पृथगुपादानम् । अत एवास्माकं मते षड् दोषा इति ॥ ११ ॥

तेनेति ॥ हीनत्वमिवाधिकत्वमपि जात्यादिभिस्त्रिविधम् । तस्य क्रमेणोदाहरणानि दर्शयति ॥ जात्येति ॥ विष्टयः कारवो भृत्या वा । "विष्टिः कारौ कर्मकरे" इति वैजयन्ती ॥ पातालमित्यादि स्पष्टम् । सबाडवाग्निः सावर्त इत्यत्राधिक्यमप्युपमाने दर्शयति ॥ सबाडवेति ॥ अत्र सरश्मीति चक्रविशेषणवदावर्तविशेषणानुपादानान्न्यूनत्वमपि द्रष्टव्यम् । जातिप्रमाणहीनत्वाधिकत्वे पदार्थोपमायां दोषौ, धर्मन्यूनत्वाधिकत्वे तु वाक्यार्थोपमायाः । पदार्थोपमायां न धर्मन्यूनाधिकभावः सम्भवति । समानधर्मस्यैकत्वेन वाक्यार्थोपमायामिवानेकविशेषवैशिष्ट्यासम्भवादिति द्रष्टव्यम् ॥ विपर्ययाख्यस्येति ॥ उपमेयधर्मस्य हीनत्वमधिकत्वं च विपर्ययः । तदात्मकस्य दोषस्य हीनत्वाधिकत्वानतिरेकात् । तत्रैवान्तर्भाव इति तन्निरूपणेनैव निरूपितप्रायत्वान्न पृथगभिधानं कृतमित्यर्थः ॥ अस्माकमिति ॥ ११ ॥

लिङ्गभेदमुल्लिङ्गयितुमाह ।

उपमानोपमेययोर्लिङ्गव्यत्यासो लिङ्गभेदः ॥ १२ ॥

उपमानस्योपमेयस्य च लिङ्गयोर्व्यत्यासो विपर्ययो लिङ्गभेदः । यथा " सैन्यानि नद्य इव जग्मुरनर्गलानि" ॥ १२ ॥

उपमानोपमेययोरिति ॥ सूत्रार्थविवरणोदाहरणे सुगमे एव । "गङ्गाप्रवाह इव तस्य निरर्गला वाक्" इत्यादिषु स्त्रीपुंसयोरपि द्रष्टव्यः ॥ १२ ॥

उक्तयुक्त्या पुन्नपुंसकयोर्दोषत्वप्रसङ्गे लिङ्गभेदस्य क्वचिदपवादं दर्शयितुमाह ॥

इष्टः पुन्नपुंसकयोः प्रायेण ॥ १३ ॥

Digitized by Google

पुन्नपुंसकयोरुपमानोपमेययोर्लिङ्गभेदः प्रायेण बाहुल्येनेष्टः । यथा "चन्द्रमिव मुखं पश्यति" इति । "इन्दुरिव मुखं भाति" एवम्प्रायं तु नेच्छन्ति ॥ १३ ॥

इष्ट इति ॥ एवम्प्रायमिति ॥ एवम्प्रायं तु नेच्छन्तीत्यात्मनस्तत्रौदासीन्यमवगमयति । यत्र हि लिङ्गभेदेऽपि विशेषणमुभयान्वयक्षमं तत्र न दोषः । यत्र तु विशेषणमेकत्रान्वितं सदितरत्र नान्वयक्षमं तत्र दोष इति तात्पर्यम् ॥ १३ ॥

लिङ्गान्तरेऽप्यपवादं दर्शयितुमाह ।

लौकिक्यां समासाभिहितायामुपमाप्रपञ्चे च ॥१४॥

लौकिक्यामुपमायां समासाभिहितायामुपमायामुपमाप्रपञ्चे चेष्टो लिङ्गभेदः प्रायेणेति । लौकिक्यां यथा "छायेव स तस्याः, पुरुष इव स्त्री" इति । समासाभिहितायां यथा "भुजलता नीलोत्पलसदृशी" इति । उपमाप्रपञ्चे यथा—

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥
एवमन्यदपि प्रयोगजातं द्रष्टव्यम् ॥ १४ ॥

लौकिक्यामिति ॥ लोकतः प्रसिद्धोपमा लौकिकी । समासेनाभिहिता समा । उपमाप्रपञ्चः प्रतिवस्तूप्रभृतिः । तत्र लिङ्गभेदः प्रायेणेष्टः । उदाहरणानि दर्शयति ॥ लौकिक्यामिति ॥ उदाहरणानि स्पष्टार्थानि ॥ शुद्धान्तदुर्लभमित्यत्र प्रतिवस्तूपमा ॥ एवमिति ॥ "भेदं क्षमोमण्डलमम्बुराशिः" इत्याद्यपन्हुत्यादौ द्रष्टव्यम् ॥ १४ ॥

वचनभेदं विवेचयितुमाह ।

तेन वचनभेदो व्याख्यातः ॥ १५ ॥

तेन लिङ्गभेदेन वचनभेदो व्याख्यातः । यथा "पास्यामि लोचने तस्याः पुष्पं मधुलिहो यथा" ॥ १५ ॥

Digitized by Google

तेनेति ॥ पास्यामीति ॥ पास्याम इति वक्तव्ये पास्यामीति प्रयुक्तत्वाद् वचनभेदः ॥ १५ ॥

असादृश्यं प्रकाशयितुमाह ।

अप्रतीतगुणसादृश्यमसादृश्यम् ॥ १६ ॥

अप्रतीतरेव गुणैर्यत् सादृश्यं तदप्रतीतगुणसादृश्यमसादृश्यम् । यथा "ग्रथ्नामि काव्यशशिनं वितत्यर्थरश्मिम्" । काव्यस्य शशिना सह यत् सादृश्यं तदप्रतीतरेव गुणैरिति । ननु च अर्थानां रश्मितुल्यत्वे सति काव्यस्य शशितुल्यत्वं भविष्यति । नैवम् । काव्यस्य शशितुल्यत्वे सिद्धेऽर्थानां रश्मितुल्यत्वं सिद्ध्यति । न ह्यर्थानां रश्मीनां च काश्चित् सादृश्यहेतुः प्रतीतो गुणोऽस्ति । तदेवमितरेतराश्रयदोषो दुरुत्तर इति ॥ १६ ॥

अप्रतीतैरिति ॥ अप्रतीतैः सहृदयसंवादिप्रतिपत्त्यविषयैरित्यर्थः । ग्रथ्नामीति ॥ काव्यशशिनोः सादृश्यमप्रतीतगुणमित्यसादृश्यम् । नन्वर्थानां रश्मिसादृश्यप्रतीत्या काव्यशशिनोरपि सादृश्यवत्त्वं सम्भवतीति शङ्कते॥ नन्विति ॥ परस्पराश्रयपराहतमिदं चोद्यमिति परिहरति ॥ नैवमिति ॥ अर्थानां रश्मिसादृश्ये सिद्धे शशिसादृश्यं काव्यस्य सिद्ध्यति । सिद्धे च काव्यस्य शशिसादृश्येऽर्थानां रश्मिसादृश्यमिति परस्पराश्रय इत्यर्थः । ननु काव्यसादृश्यनिरपेक्षमेवाऽर्थरश्मिसादृश्यं सम्भवति । कुतः परस्पराश्रयप्रसङ्ग ? इत्यत आह ॥ न ह्यर्थानामिति ॥ दुरुत्तरो दुष्परिहारः ॥ १६ ॥

सादृश्यैकसारायामुपमायां परां काष्ठामतिक्रमन्तः कविभिरसादृश्यमवश्यमपोहनीयमिति ख्यापयितुं सूत्रमुपक्षिपति ।

असादृश्यहता उपमा, तन्निष्ठाश्च कवयः ॥ १७ ॥

असादृश्येन हता असादृश्यहता उपमा । तन्निष्ठा उपमाननिष्ठाश्च कवय इति ॥ १७ ॥

असादृश्येति ॥ उपमानिष्ठा उपमापरावधा इत्यर्थः ॥ १७ ॥

Digitized by Google

परपक्षं प्रतिक्षेप्तुं पूर्वपक्षसूत्रमुपक्षिपति।

उपमानाधिक्यात् तदपोह इत्येके ॥ १८ ॥

उपमानाधिक्यात् तस्यासादृश्यस्याऽपोह इत्येके मन्यन्ते। यथा "कर्पूरहारहरहाससितं यशस्ते" । कर्पूरादिभिरुपमानैर्बहुभिः सादृश्यं यशसः सुस्थापितं भवति। तेषां शुक्लगुणातिरेकात्॥१८॥

उपमानेति ॥ तदपोहः=तस्यासादृश्यस्यापोहः परिहारः। उदाहरति ॥ कर्पूरेति ॥ श्वेतिमातिशयविशिष्टतया वर्णनीये यशसि सितिमगुणाप्रतीतौ वैसादृश्यशङ्कायां सितगुणातिशयविशिष्टैर्बहुभिरुपमानैः सादृश्यदृढीकरणे उपमेये शौक्ल्यगुणातिरेकावगमाद्। वैसादृश्यमपोह्यत इत्यभिसन्धाय व्याचष्टे॥ अत्रेति ॥ अत्र हेतुमाह ॥ तेषामिति ॥ १८ ॥

बाहुल्येऽप्युपमानानामर्थप्रकर्षाधायकत्वाभावान्नायं पक्षो युज्यत इति दूषयितुं सूत्रमनुभाषते।

नापुष्टार्थत्वात् ॥ १९ ॥

उपमानाधिक्यात् तदपोह इति यदुक्तं, तन्न। अपुष्टार्थत्वात्। एकस्मिन्नुपमाने प्रयुक्ते उपमानान्तरप्रयोगो न कञ्चिदर्थविशेषं पुष्णाति। तेन "बलसिन्धुः सिन्धुरिव क्षुभितः" इति प्रयुक्तम्। ननु सिन्धुशब्दस्य द्विःप्रयोगात्पौनरुक्त्यम्। न। अर्थाविशेषात्। बलं सिन्धुरिव वैपुल्याद् बलसिन्धुः सिन्धुरिव क्षुभित इति क्षोभसारूप्यात्। तस्मादर्थभेदान्न पौनरुक्त्यम्। अर्थपुष्टिस्तु नास्ति। सिन्धुरिव क्षुभित इत्यनेनैव वैपुल्यं प्रतिपत्स्यते। उक्तं हि "धर्मयोरेकनिर्देशेऽन्यस्य संवित्साहचर्यात्" ॥ १९ ॥

नापुष्टार्थत्वादिति ॥ परपक्षमनूद्य प्रतिक्षिपति ॥ उपमानेति ॥ अत्र हेतुमुपन्यस्यति ॥ अपुष्टार्थत्वादिति ॥ हेतुं विवृणोति ॥ एकस्मिन्निति ॥ एकेनैवोपमानेन सितिमगुणावगमे सिद्धे पुनः सहस्रमप्युपमानानि यशसि सितिम्नः परप्रकर्षमाधातुं न पारयन्तीत्यर्थः।

Digitized by Google

ननु कर्पूरादयः शब्दा यशसि सितिमानं प्रतिपादयन्तः सहृदयचर्वणीयत्वं परिष्कारत्वं व्यापकत्वं च गुणान्तरमवगमयन्ति । अतोऽस्त्येवार्थपरिपोष इतिचेन्नैवम् । कर्पूरादयः शब्दाः सितपदसमभिव्याहारेण सितिमनि शङ्कुलितशक्तयो न किमपि गुणान्तरमुदीरयितुमुत्सहन्ते । यदि कनकफलकचतुरस्रत्वं तद्वौरत्वमिव कर्पूरादिपदैः सितिमगुणोऽवगम्यमानः स्वसहचरितमपि चर्वणीयत्वं परिष्कारत्वं व्यापनशीलत्वं च गुणान्तरमवगमयेत्, तदा भवत्वपुष्टार्थत्वम् । उक्तं दूषणमन्यत्राप्यतिदिशति॥ तेनेति॥ नन्वसत्यर्थभेदे सिन्धुशब्दस्य द्विरुक्तौ पौनरुक्त्यमिति वक्तव्यमिति शङ्कामनुभाषते ॥ नन्विति ॥ दूषयति ॥ नेति ॥ हेतुमाह ॥ अर्थेति ॥ अर्थभेदादित्यर्थः । अर्थभेदमेव समर्थयते ॥ बलं सिन्धुरिवेति॥बलसिन्धुरित्यत्र वैपुल्यं प्रतिपाद्यम् । अन्यत्र तु क्षोभसारूप्यमिति भेदः । निगमयति॥तस्मादिति ॥ अपुष्टार्थत्वं स्पष्टयति ॥ अर्थपुष्टिस्त्विति ॥ सिन्धुक्षोभोऽत्र गम्यमानः स्वसहचरितं वैपुल्यमप्यवगमयतीति । अत्र सूक्तं संवादयति ॥ उक्तं हीति ॥ "इह राजति राजेन्दुरिन्दुः क्षीरनिधाविव" इत्यत्र द्वयोरिन्दुशब्दयोः श्रेष्ठचन्द्रवाचकत्वेनैकार्थ्याभावान्नाऽपुष्टार्थत्वमित्यवगन्तव्यम् ॥ १९ ॥

असम्भवं व्याख्यातुमाह ।

अनुपपत्तिरसम्भवः ॥ २० ॥

अनुपपत्तिरनुपपन्नत्वमुपमानस्यासम्भवः । यथा—

चकास्ति वदनस्यान्तः स्मितच्छायाविकासिनः ।
उन्निद्रस्यारविन्दस्य मध्ये मुग्धेव चन्द्रिका ॥

चन्द्रिकायामुन्निद्रत्वमरविन्दस्येत्यनुपपत्तिः।नन्वर्थविरोधोऽयमस्तु । किमुपमादोषकल्पनया । न । उपमायाम् अतिशयस्येष्टत्वात् ॥ २० ॥

अनुपपत्तिरिति ॥ अनुपपन्नत्वमिति ॥ उपपत्तिशून्यत्वमनुपपत्तिरित्यर्थः । उदाहरति ॥ चकास्तीति॥विकासिनो वदनस्यान्तर्मध्ये स्मितच्छाया उन्निद्रस्यारविन्दस्य मध्ये मुग्धा मनोज्ञा चन्द्रिकेव चकास्ति । अत्रासम्भवमवगमयति ॥ चन्द्रिकायामिति । असम्भवस्या-

Digitized by Google

र्थदोषत्वमपाकर्तुमनुभाषते ॥ नन्विति ॥ उन्निद्रारविन्दतन्मध्यवर्ति-चन्द्रिकार्थयोर्विरोधित्वाद्यमसम्भवोऽर्थदोषोऽस्तु, नोपमादोषत्वं कल्पनीयमित्यर्थः । परिहरति ॥ नेति ॥ विकासिनो मुखस्य स्मित-विकासे वर्णनीये तदुपमानभूतयोन्निद्रारविन्दसम्बन्धिन्या चन्द्रि-कया सादृश्ये सति कस्यचिदतिशयस्याभिमतत्वादित्यर्थः ॥ २० ॥

कथं तर्हि दोष इत्यत आह ।

न विरुद्धोऽतिशयः ॥ २१ ॥

विरुद्धस्यातिशयस्य संग्रहो न कर्तव्य इति अस्य सूत्रस्य ता-त्पर्यार्थः । तानेतान् पदुपमादोषान् ज्ञात्वा कविः परिहरेत् ॥ २१ ॥ इति श्रीकाव्यालङ्कारसूत्रवृत्तावालङ्कारिके चतुर्थेऽधिकरणे द्वितीयोऽध्यायः ॥ उपमाविचारः ॥ ४ ॥ २ ॥

कथं तर्हीति ॥ इष्टोद्भेदयमतिशयस्तर्हि गुण एवायं, न तु दो-ष इत्यर्थः । परिहरति ॥ नेति ॥ अतिशयो विरुद्ध इति यतोऽतो दो-ष एवेत्यर्थः । निर्वृत्तमर्थं सूत्रस्य निगमयति ॥ विरुद्धस्येति ॥ प्रदर्शि-तानामेषामुपमादोषाणां परित्याग एव फलमित्यत आह ॥ तानेता-नितिं ॥ २१ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां काव्यालङ्कारसूत्र-वृत्तिव्याख्यायां काव्यालंकारकामधेनावालङ्कारिके चतुर्थेऽधिकरणे द्वितीयोऽध्यायः समाप्तः ॥ ४ ॥ २ ॥ (९) ॥

Digitized by Google

सुधारसाभे सुषमाप्रवाहे मुक्तायमानैर्मणिभिर्विचित्रैः ॥
ज्योत्स्नेव तारामिरलंकृता मे सा शारदा चेतसि सन्निधत्ताम् ॥१॥
मूलं वस्तुनिगुम्फनोदितकनद्वाक्यानि शाखाः परं
दीव्यद्वाचकसंहतिर्दलगणा राजद्गुणाः पल्लवाः ॥
अर्थाः पुष्पकदम्बकं सुरुचिरा भूषाः फलं रीतयो
जीवो यस्य विभाति सोऽयमतुलो वाग्दिव्यशाखी चिरम् ॥२॥

सर्वालङ्कारप्रकृतिभूतामुपमामुपपाद्य तत्प्रपञ्चं प्रपञ्चयितुम् आरभते ।

सम्प्रत्युपमाप्रपञ्चो विचार्यते । कः पुनरसाविसाह ।

प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः ॥ १ ॥

प्रतिवस्तु प्रभृतिर्यस्य स प्रतिवस्तुप्रभृतिः । उपमायाः प्रपञ्च उपमाप्रपञ्च इति ॥ १ ॥

सम्प्रतीति ॥ अनुयोगपूर्वकमनन्तरसूत्रमवतारयति ॥ कः पुनरिति ॥ व्याचष्टे ॥ प्रतिवस्त्विति ॥ प्रभृतिशब्द आद्यर्थः । प्रतिवस्तुप्रमुखाणाम् अलङ्काराणामुपमागर्भत्वादुपमाप्रपञ्च इति व्यपदेशः कृतः ।

प्रतिवस्तुप्रभृतय उद्दिश्यन्ते यथाक्रमम् ।
प्रतिवस्तु समासोक्तिरथाप्रस्तुतशंसनम् ॥
अपन्हुती रूपकं च श्लेषो वक्रोक्त्यलंकृतिः ।
उत्प्रेक्षातिशयोक्तिश्च सन्देहः सविरोधकः ॥
विभावनाऽनन्वयः स्यादुपमेयोपमा ततः ।
परिवृत्तिः क्रमः पञ्चाहीपकं च निदर्शना ॥
अर्थान्तरस्य न्यसनं व्यतिरेकस्ततः परम् ।
विशेषोक्तिरथ व्याजस्तुतिर्व्याजोक्त्यलंकृतिः ॥
स्यात्तुल्ययोगिताक्षेपः सहोक्तिश्च समासतः ।
अथ संसृष्टिभेदौ द्वावुपमा रूपकं तथा ॥
उत्प्रेक्षाऽवयवश्चेति विज्ञेयोऽलंकृतिक्रमः ॥ ॥ १ ॥

ननु प्रतिवस्तुनो वाक्यार्थरूपत्वेन वाक्यार्थोपमानिरूपणमेव

Digitized by Google

गतार्थत्वमिति न लक्षणान्तरापेक्षेति शङ्कां शकलयन् लक्षणभेदं दर्शयितुमाह ।

वाक्यार्थोपमायाः प्रतिवस्तुनो भेदं दर्शयितुमाह ।

उपमेयस्योक्तौ समानवस्तुन्यासः प्रतिवस्तु ॥२॥

समानं वस्तु वाक्यार्थः । तस्य न्यासः समानवस्तुन्यासः । उपमेयस्यार्थाद्वाक्यार्थस्योक्तौ सत्यामिति । अत्र द्वौ वाक्यार्थौ । एको वाक्यार्थोपमायामिति भेदः । तद्यथा—

देवीभावं गमिता परिवारपदं कथं भजस्येषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥ ॥ २ ॥

वाक्यार्थेति ॥ सूत्रार्थं विवृणोति ॥ समानं वस्त्विति ॥ किमिदं समानं वस्तु पदार्थरूपमुत वाक्यार्थरूपमिति विशयो माभूदित्याह ॥ वाक्यार्थ इति ॥ समानवस्तुन उपमानस्य वाक्यार्थत्वाभ्युपगमबलादुपमेयस्याऽपि वाक्यार्थत्वसिद्धिरित्याह ॥ उपमेयस्येति ॥ उपमेयस्य वाक्यन प्रतिपादने उपमानस्यापि वाक्यान्तरेण प्रतिपादनं प्रतिवस्त्विति लक्षणार्थः । अत एव वाक्यार्थोपमायाः प्रतिवस्तुनो भेद इत्याह ॥ अत्रेति ॥ देवीभावमिति ॥ अत्र पूर्वोत्तरवाक्याभ्यां वस्तुप्रतिवस्तुनोः प्रतिपादनात् प्रतिवस्त्वलङ्कारः ॥ २ ॥

समासोक्तिं वक्तुमाह ।

प्रतिवस्तुनः समासोक्तेर्भेदं दर्शयितुमाह ।

अनुक्तौ समासोक्तिः ॥ ३ ॥

उपमेयस्यानुक्तौ समानवस्तुन्यासः समासोक्तिः । सङ्क्षेपवचनात् समासोक्तिरित्याख्या । यथा—

श्लाघ्या ध्वस्ताऽध्वगग्लानेः करीरस्य मरौ स्थितिः ।
धिङ्मेरौ कल्पवृक्षाणाव्युत्पन्नार्थिनां श्रियः ॥ ॥ ३ ॥

प्रतिवस्तुन इति ॥ लक्षणवाक्यार्थं विवृणोति ॥ उपमेयस्येति ॥ समानवस्तुन उपमानस्य न्यासः, वाक्येनोपपादनमित्यर्थः । समासो-

Digitized by Google

किरिति संज्ञाऽन्वर्थेत्याह ॥ संक्षपेति ॥ उदाहरति ॥ श्लाघ्येति ॥ करीरो वंशो बर्बूरो वा । "करीरोऽस्त्री दन्तिदन्तमूले चक्रकरे घटे । सलक्ष्यामपि बर्बूरे काचे वंशे तदङ्कुरे" इत्यमरशेषः ॥ अव्युत्पन्नार्थिनाम् = अर्थिपदार्थव्युत्पत्तिरहितानाम् । अत्र करीरस्य मरुस्थितिश्लाघनेन कल्पवृक्षाणां मेरुस्थितिनिन्दनेन च तदुपमेययोः परोपकारप्रवणतद्विमुखयोः श्लाघानिन्दे समस्योक्ते इति समासोक्तिः ॥ ३ ॥

अप्रस्तुतप्रशंसां प्रस्तोतुमाह ।

समासोक्तेरप्रस्तुतप्रशंसाया भेदं दर्शयितुमाह ।

किञ्चिदुक्तावप्रस्तुतप्रशंसा ॥ ४ ॥

उपमेयस्य किञ्चिल्लिङ्गमात्रेणोक्तौ समानवस्तुन्यासे अप्रस्तुतप्रशंसा । यथा—

लावण्यसिन्धुरपरैव हि काचनेयं
यत्रोत्पलानि शशिना सह संप्लवन्ते ।
उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलिकाण्डमृणालदण्डाः ॥

अप्रस्तुतस्यार्थस्य प्रशंसनमप्रस्तुतप्रशंसा ॥ ४ ॥

किञ्चिदिति ॥ लिङ्गमात्रेणोक्तावेकदेशेनोपादाने ॥ लावण्येति ॥ अत्र लावण्यपदार्थेनैकदेशेनोपमेयानां नयनादीनामुक्तावुत्पलादीनामप्रस्तुतानां प्रशंसनादप्रस्तुतप्रशंसानामालङ्कारः ॥ ४ ॥

अपन्हुतिमवगमयितुमाह ।

अपन्हुतिरपि ततो भिन्नेति दर्शयितुमाह ।

समेन वस्तुनाऽन्यापलापोऽपन्हुतिः ॥ ५ ॥

समेन तुल्येन वस्तुना वाक्यार्थेनाऽन्यस्य वाक्यार्थस्यापलापो निह्नवो यस्तत्त्वाध्यारोपणायासावपन्हुतिः । यथा—

न केतकीनां विलसन्ति सूचयः
प्रवासिनो हंत हसन्त्ययं विधिः ।

Digitized by Google

तडिल्लेखेयं न चकास्ति चञ्चला
पुरः स्मरज्योतिरिदं विवर्तते ॥
वाक्यार्थयोस्तात्पर्यात् तादूप्यमिति न रूपकम् ॥ ५ ॥

अपन्हुतिरिति ॥ ततः = प्रतिवस्तुनामाऽलङ्कारान्निर्देश इत्यर्थः ॥ समेनेति ॥ वाक्यार्थभूतेनोपमानेनान्यस्य वाक्यार्थभूतस्योपमेयस्यापलापः । अतस्मिँस्तत्त्वाध्यारोपणापन्हुतिरिति लक्षणार्थः ॥ न केतकीनामिति ॥ सूचयः कुड्मलाः । "केतकीमुकुले सूचिः सेविन्यां शिशुने तु ना" इति हलायुधः । केतकीसूचिविलासतडिल्लताविलासयोरुपमेययोरुपमानभूतविधिहासस्मरज्योतिर्विवर्तनाध्यारोपेण तयोरपलापादपन्हुतिः । आरोपरूपत्वाविशेषात् कथमपन्हुतेरूपकाद्भेद इत्याशङ्क्य भेदं दर्शयति ॥ वाक्यार्थयोरिति ॥ अपन्हुतौ वाक्यार्थयोरार्थिकं तादूप्यम् । रूपके तु पदार्थयोः शाब्दं तादूप्यमिति भेदः ॥ ५ ॥

रूपकं रूपयितुमाह ।

रूपकं तु कीदृशमित्याह—

उपमानेनोपमेयस्य गुणसाम्यात् तत्त्वारोपो
रूपकम् ॥ ६ ॥

उपमानेनोपमेयस्य गुणसाम्यात्तत्त्वस्याभेदस्यारोपणमारोपो रूपकम् । उपमानोपमेययोरुभयोरपि ग्रहणं लौकिक्याः कल्पितायाश्चोपमायाः प्रकृतित्वमत्र यथा विज्ञायेतेति । यथा—

इयं गेहे लक्ष्मीरियमऽमृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥

मुखचन्द्रादीनां तूपमा । समासाश्रयाच्चन्द्रादीनां रूपकत्वं युक्तमिति ॥ ६ ॥

Digitized by Google

रूपकमिति ॥ व्याचष्टे ॥ उपमानेनेति ॥ लौकिकप्रसिद्धोपमाप्रकृतिकत्वं रूपकस्य निरूपयितुमुपमानोपमेययोर्ग्रहणं कृतमित्याह ॥ उपमानेति ॥ उदाहरति ॥ इयं गेहे लक्ष्मीरिति ॥ अत्रेयमिति सर्वनाम्ना सीतां निर्दिश्य तत्र लक्ष्मीत्वममृतवर्तित्वमस्याः स्पर्शे चन्दनरसत्वं, बाहौ मौक्तिकसरत्वं चाध्यारोप्यत इति रूपकम् । इत्थमुपमानोपमेययोर्व्यासेन प्रयोगे रूपकमुदाहृत्य समासेन प्रयोगे तूपमैव न रूपकमित्याह ॥ मुखेति॥मुखचन्द्रादीनां पुरुषव्याघ्रादिसादृश्यादुपमात्वमेव, न रूपकत्वं सम्भवति । तत्त्वाध्यारोपासम्भवादिति । इदमत्रानुसन्धेयम् । येषां व्याघ्रादिषु पाठोऽस्ति तेषामुपमैव । ये त्विन्दुप्रभृतयस्तत्र न पठ्यन्ते ते च व्याघ्रादेराकृतिगणत्वात् तत्र द्रष्टव्याः । तथापि मतान्तरानुरोधेन मुखचन्द्रादिषु क्वचिदुपमा, क्वचिद्रूपकमिति द्वैरूप्यं सम्भवति । तथाच यत्र "ज्योत्स्नेव भाति धृतिराननेन्दोः" इत्यादावुपमायां साधकं प्रमाणमस्ति, तत्र व्याघ्रादिसमासः । यत्र "मोहमहाचलदलनं भक्तिः कुलिशाग्रकोटिरेव नृणाम्" इत्यादौ रूपके साधकं प्रमाणमस्ति, तत्र मयूरव्यंसकादिसमासः । "अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः" इति वचनात् ॥ ६ ॥

श्लेषं लक्षयितुमाह ।

रूपकाच्छ्लेषस्य भेदं दर्शयितुमाह ।

स धर्मेषु तन्त्रप्रयोगे श्लेषः ॥ ७ ॥

उपमानेनोपमेयस्य धर्मेषु गुणक्रियाशब्दरूपेषु स तत्त्वारोपः । तन्त्रप्रयोगे तन्त्रेणोच्चारणे सति श्लेषः । यथा—

आकृष्टाऽमलमण्डलाग्ररुचयः सन्नद्धवक्षःस्थलाः
सोष्माणो व्रणिता विपक्षहृदयप्रोन्माथिनः कर्कशाः ।
उद्वृत्ता गुरवश्च यस्य शमिनः श्यामायमानानना
योधा वारवधूस्तनाश्च न ददुः क्षोभं स वोऽव्याज्जिनः ॥ ॥७॥

स धर्मेष्विति ॥ सूत्रार्थं विवृणोति ॥ उपमानेनेति ॥ धर्माणां

Digitized by Google

धर्मिसापेक्षत्वाद्धर्मिणमनुषज्य दर्शयति ॥ उपमेयस्येति ॥ गुणसाम्यत इति शेषः । धर्मस्वरूपमाह ॥ गुणेति ॥ तच्छब्दपरामर्श्यं दर्शयति ॥ तस्यारोप इति ॥ अनेकोपकार—कारिसकृदुच्चारणं तन्त्रम् । उपमानोपमेययोर्गुणसाम्ये तद्धर्मेषु गुणादिषु तन्त्रेण प्रयोगे सति यत्ताद्रूप्यारोपणं स श्लेष इति लक्षणार्थः ॥ आकृष्टेति ॥ आकृष्टे कोशादुद्धृते मण्डलाग्रे खड्गे रुचिः प्रीतिर्येषाम् । आकृष्टा आहता स्वीकृतेति यावत्, मण्डलस्य बिम्बस्य अग्रे उपरिभागे रुचिः कान्तिर्यैः । सन्नद्धं कवचितं परिणद्धं च वक्षःस्थलं येषाम् । ऊष्मणा दर्पेण उष्णगणेन च सह वर्तन्त इति सोष्माणः । व्रणाः शस्त्रक्षतानि नखक्षतानि च येषां सन्तीति व्रणिनः । विपक्षाणां शत्रूणां सपत्नीनां च हृदयं वक्षश्चेतश्च प्रकर्षेण उन्मथ्नन्तीति तथोक्ताः । कर्कशाः क्रूराः कठिनाश्च । उद्वृत्ता उद्धता उन्नताश्च । गुरवो महान्तः स्थूलाश्च । श्यामायमानानि अङ्कुरितश्मश्रुतया कचासङ्गेन वा, स्वभावेन च श्यामलायमानानि आननानि मुखानि चूचुकानि च येषां ते तथोक्ताः । वशिनो यस्येति सम्बन्धः । अत्र यथासम्भवं गुणक्रिया द्रष्टव्याः । यद्यपि समुच्चयोऽत्र स्फुरति तथाऽपि साधारणविशेषमहिम्नाऽऽरोपः प्रतिपाद्यत इति श्लेषः ॥ ७ ॥

वक्रोक्तिं वक्तुं सङ्गतिमुल्लिङ्घयति ।

यथा च गौणस्याऽर्थस्यालंकारत्वं तथा लाक्षणिकस्यापीति दर्शयितुमाह ।

सादृश्याल्लक्षणा वक्रोक्तिः ॥ ८ ॥

बहूनि हि निबन्धनानि लक्षणायाम् । तत्र सादृश्याल्लक्षणा वक्रोक्तिरसाविति ॥ यथा "उन्मिमीलकमलं सरसीनां कैरवं च न मिमील मुहूर्तात्" । अत्र नेत्रधर्माद्विन्मीलननिमीलने सादृश्याद्विकाससङ्कोचौ लक्षयतः । "इह च निरन्तरनवमुकुलपुलकिता हरति माधवी हृदयम् । मदयति च केसराणां परिणतमधुगन्धिनिःश्वसितम्" । अत्र च निःश्वसितमिति परिमलनिर्गमं लक्षयति । "संस्थानेन स्फुरतु सुभगः स्वार्चिषा चुम्बतु द्याम् ॥ आलस्य-

Digitized by Google

मालिङ्गति गात्रमस्याः ॥ परिम्लानच्छायामनुवदति दृष्टिः कमलिनीम् ॥ प्रत्यूषेषु स्फुटितकमलाऽऽमोदमैत्रीकषायः ॥ ऊरुद्वन्द्वं तरुणकदलीकाण्डसब्रह्मचारी" इत्येवमादिषु लक्षणार्थो निरूप्यत इति लक्षणायां च भ्रटित्यर्थप्रतिपत्तिक्षमत्वं रहस्यमाचक्षत इति ।
असादृश्यनिबन्धना तु लक्षणा न वक्रोक्तिः । यथा "जरठकमलकन्दच्छेदगौरैर्मयूखैः" । अत्र च्छेदः सामीप्याद् द्रव्यं लक्षयति । तस्यैव गौरत्वोपपत्तेः ॥ ८ ॥

यथा चेति ॥ यथा मुखचन्द्रादौ गुणयोगादागतस्य गौणार्थस्य रूपकाद्यलङ्कारता । तथा लक्षणातः प्रतिपन्नस्य लाक्षणिकार्थः स्य वक्रोक्त्यलङ्कारता भवतीति लक्षणार्थः॥ बहूनीति॥ "अभिधेयेन सम्बन्धात् सादृश्यात् समवायतः । वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता" इति लक्षणाया निमित्तानि द्रष्टव्यानि । द्विरेफशब्दस्याभिधेयो भ्रमरशब्द इति ।तेन स्वाभिधेयसम्बन्धार्थो लक्ष्यते । सिंहो माणवकः, गङ्गायां घोषः, बृहस्पतिरयं मूर्खो, महति समरे शत्रुघ्नस्त्वम् इति यथाक्रममुदाहरणानि द्रष्टव्यानि ॥ उन्मिमीलेति ॥ कमलं विचकास कैरवं सङ्कुचकोचेति ऋजुवृत्त्या वक्तव्ये तत्सादृश्यादुन्मिमील निमिमीलेति नेत्रक्रियाध्यवसायवक्रिम्णोक्तिरिति वक्रोक्तिः । लक्ष्यलक्षणयोर्मैत्रीमासूत्रयति ॥ अत्र नेत्रेति ॥ अतस्मिंस्तत्त्वाध्यारोपो रूपकम् । विषयनिगरणेन साध्यवसानलक्षणाया वक्रोक्तिरिति विवेकः । उदाहरणान्तराण्युपदर्शयति ॥ इह चेति ॥ वक्रोक्तिं दर्शयति ॥ अत्र चेति ॥ मुकुलपुलकितेत्यत्र पुलकितत्वं माधव्या मुकुलैरावृतत्वं लक्षयतीति द्रष्टव्यम् ॥ चुम्बतु द्यामिति ॥ चुम्बनं द्युसम्बन्धम् ॥ गात्रमालिङ्गतीति ॥ आलिङ्गनमालस्यवैशिष्ट्यं गात्रस्य ॥ अनुवदतीत्यत्रानुवादः कमलिनीसादृश्यं, मैत्री चामोदसंक्रान्तिं, सब्रह्मचारीति कदलीकाण्डसमानतां च लक्षयतीत्येवमादिषु प्रयोगेषु लक्षणार्थो निरूप्यते । यत्र सादृश्यलक्षणा सहृदयहृदयेष्वविलम्बेन लक्ष्यार्थप्रतिपत्तिमुद्भावयितुं प्रगल्भते तत्र वक्रोक्तिरलङ्कार इति रहस्यमिति लक्षणाविद् आचक्षत इत्यर्थः । सादृश्यपदव्यावर्त्ये कीर्त-

Digitized by Google

यति ॥ असादृश्येति ॥ सम्बन्धान्तरनिबन्धना तु लक्षणा वक्रोक्तिर्व भवतीत्यर्थः । तदेव दर्शयति ॥ यथा जरठेति ॥ सामीप्यमत्र धर्म-धर्मिभावसम्बन्धः ॥ ८ ॥

स्वरूपान्यथाभावकल्पनास्वभावत्वाविशेषेण रूपकवक्रोक्ति-भ्यामुत्प्रेक्षाया अभेदशङ्कायां लक्षणतो भेदं दर्शयितुमनन्तरसूत्रम-वतारयति ।

रूपकवक्रोक्तिभ्यामुत्प्रेक्षाया भेदं दर्शयितुमाह ।

अतद्रूपस्यान्यथाध्यवसानमतिशयार्थमुत्प्रेक्षा ॥ ९ ॥

अतद्रूपस्यातत्स्वभावस्य ॥ अन्यथा अतत्स्वभावतया ॥ अ-ध्यवसानमध्यवसायः । न पुनरध्यारोपो लक्षणा वा ॥ अतिशया-र्थमिति भ्रान्तिज्ञाननिवृत्त्यर्थम् । सादृश्यादियमुत्प्रेक्षेति । एनां चेवादिशब्दा द्योतयन्ति । यथा—

स वः पायादिन्दुर्नवविसलता कोटिकुटिलः
स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाति निहितः ।
स्रवन्मन्दाकिन्याः प्रतिदिवससिक्तेन पयसा
कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इव ॥ ॥ ९ ॥

रूपकेति ॥ सूत्रार्थमाविष्करोति ॥ अतद्रूपस्येति ॥ अतद्रूप प्राकरणिकं वस्तु । तदात्मना प्राकरणिकवस्तुरूपत्वेनातिशयमाधा-तुमध्यवसीयते प्रतिभामात्रेण कविना सम्भाव्यते, न पुनरिन्द्रियदो-षेण । तथाविधं सम्भावनापरपर्यायमध्यवसानमुत्प्रेक्षेति लक्षणार्थः ॥ न पुनरिति ॥ अतत्स्वभावस्य वस्तुनस्तत्तद्गुणयोगात्तत्तद्भावकल्प-नमध्यारोपः । यत्र रूपकादिस्वरूपलाभः । यत्तु सादृश्ये सत्येकेन वस्तुना वस्त्वन्तरस्य प्रतिपादनमध्यवसायरूपं सा सादृश्यमूला लक्षणा । यत्र वक्रोक्तिव्यपदेशः । यत्पुनरतद्रूपे वस्तुन्यतिशयमाधातुं तद्रूपतयाध्यवसानं सोऽयमध्यवसायः सम्भावनालक्षण उत्प्रेक्षेति विवेकः । अतो न रूपकं, नापि वक्रोक्तिरिति ततो भेदो दर्शितः ॥ अतिशयार्थमिति ॥ भ्रान्तिः=विपर्ययज्ञानम् । अन्यथाऽध्यवसाय-

Digitized by Google

त्वाविशेषेऽपि बुद्धिपूर्वकत्वादुत्प्रेक्षायास्तद्विलक्षणाया भ्रान्तेर्व्यावृत्तिरित्यतिशयः । उत्प्रेक्षोदाहरणेषु केषुचिदिवशब्दश्रवणात् कस्यचिदुपमाशङ्का जायते । तामाशङ्क्य परिहरति ॥ साहश्यादियमुत्प्रेक्षेति ॥ प्रयुक्तोऽपि क्वचिदिवशब्दः साहश्यनिम्बन्धनत्वसूचनद्वारेणोत्प्रेक्षामपि द्योतयतीत्यर्थः । तदुक्तं दण्डिना— "मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः" इति ॥ स वः पायादिति ॥ अत्र नवबिसलताकोटिकुटिल इति विशेषणसामार्थ्यादिन्दुपदेनेन्दुकलावगम्यते । इन्दुर्मन्दाकिनीसलिलसेकेन कपालादुद्भिन्नोऽङ्कुर इवेत्युत्प्रेक्षित इत्युत्प्रेक्षालङ्कारः ॥ ९ ॥

सम्भावनारूपकत्वाविशेषादुत्प्रेक्षातिशयोक्त्योरभेदं केचिन्मन्यन्ते । तन्मतं निरसितुं लक्षणभेदं दर्शयतीत्याह ।

उत्प्रेक्षैवातिशयोक्तिरिति केचित् । तन्निरासार्थमाह ।

सम्भाव्यधर्मतदुत्कर्षकल्पनाऽतिशयोक्तिः ॥ १० ॥

संभाव्यस्य धर्मस्य तदुत्कर्षस्य च कल्पनाऽतिशयोक्तिः । यथा

उभौ यदि व्योम्नि पृथक् पतेतामाकाशगङ्गापयसः प्रवाहौ ।
तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥

यथा वा—

मलयजरसविलिप्ततरतनुनवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिराऽमलांऽशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसति प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ॥ ॥१०॥

उत्प्रेक्षैवेति ॥ सम्भाव्यस्येति ॥ सम्भाव्यस्योत्प्रेक्ष्यस्य धर्मस्य यद्यर्थानुबन्धेन कल्पना तदुत्कर्षस्य तस्य सम्भाव्यधर्मस्य य उत्कर्षस्तस्य कल्पना चातिशयोक्तिः । उदाहरति ॥ उभाविति ॥ यदि तथाविधं व्योम सम्भाव्येत तदेवामुक्तमुक्ताफलस्य वक्षस उपमानं भवेत् न पुरन्यत् किञ्चिदित्यतिशयस्योक्तेरतिशयोक्तिः । एवं सम्भाव्यधर्मकल्पनामुदाहृत्य तदुत्कर्षकल्पनामुदाहरति ॥मलयजेति॥ मलयज-

Digitized by Google

रसनवहारलतादीनां धावल्यस्योत्कर्षोऽतिशयः कल्प्यते। यावता चन्द्रिकायां तद्विवेचनाक्षमत्वं चक्षुषोरिति ॥ १० ॥

यथा लौकिकभ्रमसजातीयामुत्प्रेक्षामतिशयार्थकल्पनात्मवैधर्म्येण लौकिकभ्रान्तितः पृथक्कृत्य प्रदर्शितवाँस्तथा संशयमपि लौकिकसजातीयं तथाविधेन वैधर्म्येण ततः पृथक्कृत्य दर्शयतीत्याह।

यथा भ्रान्तिज्ञानस्वरूपोत्प्रेक्षा तथा संशयज्ञानस्वरूपः संदेहोऽपीति दर्शयितुमाह।

उपमानोपमेयसंशयः संदेहः ॥ ११ ॥

उपमानोपमेययोरतिशयार्थं यः क्रियते संशयः स संदेहः। यथा-

इदं कर्णोत्पलं चक्षुरिदं वेति विलासिनि।
न निश्चिनोति हृदयं किन्तु दोलायते मनः ॥ ॥ ११ ॥

यथेति ॥ सन्देहस्य कोटिद्वयावलम्बितत्वादिहापि तदाह ॥ उपमानोपमेययोरिति ॥ अतिशयार्थमिति ॥ उपमेयेऽतिशयमाधातुं सन्देहः सम्पाद्यते। न तु विशेषादर्शनादित्यर्थः। व्यक्तमुदाहरणम् ॥ ११ ॥

कल्पनारूपत्वाविशेषादतिशयोक्तेरनन्तरं यथा सन्देहालङ्कारः प्राप्तावसरस्तथा विरुद्धकोटिद्वयावलम्बिनस्सन्देहस्याऽनन्तरं विरोधालङ्कारः प्राप्तावसर इति तल्लक्षणं दर्शयतीत्याह।

संदेहवद्विरोधोऽपि प्राप्तावसर इत्याह।

विरुद्धाभासत्वं विरोधः ॥ १२ ॥

अर्थस्य विरुद्धस्येवाभासत्वं विरुद्धाभासत्वं विरोधः। यथा-

पीतं पानमिदं त्वयाद्य दयिते मत्तं ममेदं मनः
पत्राली तव कुङ्कुमेन रचिता रक्ता वयं मानिनि !।
त्वं तुङ्गस्तनभारमन्थरगतिर्गात्रेषु मे वेपथु-
स्त्वन्मध्ये तनुता ममाधृतिरहो मारस्य चित्रा गतिः ॥

Digitized by Google

यथा वा—

सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
साऽऽक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम् ॥ ॥ १२ ॥

सन्देहवदिति ॥ व्याचष्टे ॥ अर्थस्येति ॥ विरुद्धवदवभासत इति विरुद्धाभासत्वस्य भावस्तत्त्वम् । प्रकारान्तरेण परिहारे सत्येव विरुद्धत्वार्थस्यावभासनं विरोधालङ्कारः । उदाहरति ॥ यथेति ॥ पानशब्दोऽत्र कर्मसाधनः पेयद्रव्यमाह । पानादीनां मदादीनां च पेयविकरत्वाद्विरोधः । मदादीनामर्थान्तरत्वस्वीकारेण विरोधपरिहारः। सा बालेत्यादावपि विरुद्धाभासत्वं द्रष्टव्यम् ॥ १२ ॥

विभावनां विवरीतुमवतारिकामारचयति ।

विरोधाद्विभावनाया भेदं दर्शयितुमाह ।

क्रियाप्रतिषेधे प्रसिद्धतत्फलव्यक्तिर्विभावना ॥ १३ ॥

क्रियायाः प्रतिषेधे तस्या एव क्रियायाः फलस्य प्रसिद्धस्य व्यक्तिर्विभावना । यथा—

अभ्यसज्जनसङ्गसे न वसत्येव वैकृतम् ॥
अक्षालितविशुद्धेषु हृदयेषु मनीषिणाम् ॥ ॥ १३ ॥

विरोधादिति ॥ लक्षणवाक्यार्थं विवृणोति ॥ क्रियाया इति ॥ क्रियायाः कारणरूपायाः प्रतिषेधे प्रसिद्धस्य तस्याः क्रियायाः फलस्य कार्यभूतस्य व्यक्तिः प्रकाशनं यत् सा विभावनेति वाक्यार्थः । विरोधविशेषो विभावनेति भेदः ॥ अभ्यसज्जनेति ॥ वैकृतमेव वैकृतम् । प्रज्ञादित्वात् स्वार्थेऽण् । अक्षालितविशुद्धेष्वित्यत्र कारणरूपक्षालनक्रियाप्रतिषेधेऽपि तत्फलभूताया विशुद्धेः प्रकाशनाद् विभावना ॥ १३ ॥

अनन्वयं वक्तुमाह ।

Digitized by Google

विरुद्धप्रसङ्गेनानन्वयं दर्शयितुमाह ।

एकस्योपमेयोपमानत्वेऽनन्वयः ॥ १४ ॥

एकस्यैवार्थस्योपमेयत्वमुपमानत्वं चानन्वयः । यथा—

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥

अन्योन्यसादृश्यमेतेन प्रतिपादितम् ॥ १४ ॥

विरोधीति ॥ एकस्यैवार्थस्यैकस्मिन्नेव वाक्ये उपमानान्तरमुपादानेनातिशयमधिगन्तुमुपमानत्वं चोपमेयत्वं चोपकल्प्यते । अत्र व्यतिरेकविषयोपमेयोपमानत्वोपगमेऽपि वैधर्म्यैकत्वान्वयसम्भवादनन्वयालङ्कारः ॥ रामरावणयोरिति ॥ स्पष्टम् । एकस्यैवोपमानोपमेयत्वकल्पनायां फलितमाह ॥ अन्येति ॥ उपमानान्तरेणासादृश्यं सादृश्याभावः ॥ १४ ॥

उपमेयोपमामुपपादयितुमुपक्रमते सूत्रमुपादत्ते ।

क्रमेणोपमेयोपमा ॥ १५ ॥

एकस्यैवार्थस्योपमेयत्वमुपमानत्वं च क्रमेणोपमेयोपमा । यथा-

स्वामिव जलं जलमिव स्वं हंस इव शशी शशीव हंसोऽयम् ।
कुमुदाकारास्तारास्तारकाकाराणि कुमुदानि ॥ ॥ १५ ॥

क्रमेणेति ॥ एकस्यैवेत्यनुवर्तते । यत्र क्रमेण वाक्यद्वय एकस्यैव वस्तुन उपमानत्वमुपमेयत्वं च निबध्यते तत्रोपमेयोपमा ॥ स्वामिवेति ॥ उदाहरणं स्पष्टम् ॥ १५ ॥

सम्प्रति व्यत्ययमुपमेयोपमातः परिवृत्तिं व्यावर्तयितुं लक्षणं दर्शयितुमाह ।

इयमेव परिवृत्तिरिति केचित्तन्निरासार्थमाह ।

समेन विसदृशेन वार्थेन अर्थस्य परिवर्तनं परिवृत्तिः ॥ १६ ॥

समेन विसदृशेन वार्थेन अर्थस्य परिवर्तनं परिवृत्तिः । यथा—

Digitized by Google

आदाय कर्णकिसलयमियमग्रये चरणमरुणमर्पयति ।
उभयोस्सदृशविनिमयादन्योन्यमवञ्चितं मन्ये ॥

यथा वा—

विहाय साहारमहार्यनिश्चया
विलोलदृष्टिः प्रविलुप्तचान्दना ।
वधन्ध बालारुणबन्धु वल्कलं
पयोधरोत्सेधविशीर्णसंहति ॥ ॥ १६ ॥

इयमेवेति ॥ व्याचष्टे ॥ समेनेति ॥ समेन समानेन विसदृशेनाऽसदृशेन वाऽर्थेन अर्थस्य यत्परिवर्तने विनिमयः सा परिवृत्तिः उदाहरति ॥ यथेति ॥ अत्र प्रसारितकस्य हृदयं सूत्रकारोऽपि केचिद्व्याचक्षते।"नायकस्यांस एको द्वितीयः प्रसारित इति प्रसारितकम्" इति वात्स्यायनसूत्रम् । तद्विवृतंरातरहस्ये"प्रियस्यवक्षोंऽसतलं शिरोधरा नयेत सव्यं चरणं निनाम्बनी । प्रसारयेद्वाप्रमायतं पुनर्विपर्ययःस्यादिति हि प्रसारितम्" इति। अत्र चरणकिसलययोः [illegible] समपरिवृत्तिः । विहायेत्यादौ हारवल्कलयोर्विसदृशयोर्विसदृशपरिवृत्तिः ॥ १६ ॥

क्रमालङ्कारं कथयितुमाह ।

उपमेयोपमायाः क्रमो भिन्न इति दर्शयितुमाह ।

उपमेयोपमानानां क्रमसम्बन्धः क्रमः ॥ १७ ॥

उपमेयानामुपमानानां चोद्देशनामनुद्देशिनां च क्रमसम्बन्धः क्रमः । यथा—

तस्याः प्रबन्धलीलाभिरालापस्मितदृष्टिभिः ।
जीयन्ते वल्लकीकुन्दकुसुमेन्दीवरस्रजः ॥ ॥ १७ ॥

उपमेयेति ॥ वृत्तिः स्पष्टार्था । प्रबन्धेनाविच्छेदेन लीला यासां ताभिः प्रबन्धलीलाभिः ॥ १७ ॥

कथमेतयोः कथयोः सौहार्दमुन्मुद्रयन् सूत्रमवतारयति ।

Digitized by Google

क्रमसम्बन्धप्रसङ्गेन दीपकं दर्शयितुमाह ।

उपमानोपमेयवाक्येष्वेका क्रिया दीपकम् ॥१८॥

उपमानवाक्येषूपमेयवाक्येषु चैका क्रिया अनुषक्तः सम्बध्यमाना दीपकम् ॥ १८ ॥

क्रमेति ॥ व्याचष्टे ॥ उपमानेति ॥ एकस्यैव प्रधानसम्बन्धितया सकृदुपात्तस्य पदस्य वाक्यान्तरेषु प्रसङ्गात् सम्बन्धोऽनुषङ्गः ॥१८॥

तन्भेदमाह ।

तत्त्रैविध्यम्, आदिमध्यान्तवाक्यवृत्तिभेदात् ॥ १९ ॥

तत्त्रिविधं भवति । आदिमध्यान्तेषु वाक्येषु वृत्तेर्भेदात् । यथा—

भुज्यन्ते प्रमदवनानि बालपुष्पैः
कामिन्यो मधुमदमांसलैर्विलासैः ।
ब्रह्माणः श्रुतिगदितैः क्रियाकलापैः
राजानो विरलितवैरिभिः प्रतापैः ॥
बाष्पः पथिककान्तानां जलं जलमुचां मुहुः ।
विगलत्यधुना दण्डयात्रोद्योगो महीभुजाम् ॥
गुरुशुश्रूषया विद्या मुधुगोष्ठ्या मनोभवः ।
उदयेन शशाङ्कस्य पयोधिरभिवर्धते ॥ ॥ १९ ॥

तत्त्रैविध्यमिति ॥ भुज्यन्त इत्यत्रादिदीपकम् ॥ ब्रह्माण इति ॥ ब्राह्मणाः ॥ बाष्प इत्यत्र मध्यदीपकम् । गलनं बाष्पजलयोः स्यन्दः, दण्डयात्रोद्योगे नाशः ॥ गुरुशुश्रूषयेत्यन्तदीपकम् । एवमेव कारकदीपकमप्यूहनीयम् ॥ १९ ॥

निदर्शनं दर्शयितुमाह ।

दीपकवक्ष्यिदर्शनमपि संक्षिप्तमित्याह ।

क्रियायैव स्वतदर्थान्वयख्यापनं निदर्शनम् ॥ २० ॥

Digitized by Google

क्रियया॑व शुद्धया स्वस्यात्मनस्तदर्थस्य चान्वयस्य सम्बन्धस्य ख्यापनं संलुलितहेतुदृष्टान्तविभागदर्शनाभिदर्शनम् । यथा—

अत्युच्चपदाध्यासः पतनायेत्यर्थशालिनां शंसत् ।
आपाण्डु पतति पत्रं तयोरिदं बन्धनग्रन्थेः ॥

पततीति क्रिया । तस्याः स्वं पतनम् तदर्थोत्युच्चपदाध्यासः पतनायेति शंसनम् । तस्य ख्यापनमर्थशालिनां शंसादिति ॥ २० ॥

दीपकवदिति ॥ शुद्धयानन्यसहायया क्रिययैवावृत्तिरहितयेत्यर्थः । स्वस्य तदर्थस्य सा क्रिया अर्थः प्रयोजनं यस्य तत्तदर्थं स्वप्रयोजनकमर्थान्तरमित्यर्थः । तयोः स्वतदर्थयोरन्वयस्य सम्बन्धस्य ख्यापनं निदर्शनम् । निदर्शनपदार्थं निर्वक्ति ॥ संलुलितेति ॥ संलुलितः = अविवेचितो, हेतुदृष्टान्तयोर्विभागस्तस्य दर्शनाद्विवेचनाभिगूढहेतुदृष्टान्तदर्शनरूपत्वाभिदर्शनमित्यर्थः । उदाहरति ॥ अत्युच्चेति ॥ अर्थशालिनामर्थोल्लेखशालिनां धनशालिनां वा । लक्ष्यलक्षणयोरानुकूल्यमुन्मीलयति ॥ पततीति क्रियेति ॥ २० ॥

अर्थान्तरन्यासं समर्थयितुं सूत्रसङ्गतिं सूचयति ।

इदं च नार्थान्तरन्यासः । स ह्यन्यथाभूतस्तमाह ।

उक्तसिद्ध्यै वस्तुनोऽर्थान्तरस्यैव न्यसनम्
अर्थान्तरन्यासः ॥ २१ ॥

उक्तसिद्ध्यै उक्तस्यार्थस्य सिद्ध्यर्थं वस्तुनो वाक्यार्थान्तरस्यैव न्यसनमर्थान्तरन्यासः । वस्तुग्रहणादर्थस्य हेतोर्न्यसनन्नार्थान्तरन्यासः । यथा "इह नातिदूरगोचरमस्तिसरः कमलसौगन्ध्यात्" इति । अर्थान्तरस्यैवेति वचनम्, यत्र हेतुर्व्याप्तिगूढत्वात् कथञ्चित् प्रतीयते तत्र यथा स्यात् । यद्यत् कृतकं तत्तदनित्यमिवेवम्प्रायेषु मा भूदिति । उदाहरणम् ।

प्रियेण संग्रथ्य विपक्षसन्निधा-

Digitized by Google

वृषाहितां वक्षसि पीवरस्तनी ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ ॥ २१ ॥

इदं चेति ॥ उक्तस्य वाक्यार्थस्य सिद्ध्यै, वाक्यार्थान्तरस्यान्यस्य वाक्यार्थस्यैव । वस्तुग्रहणप्रयोजनं प्रस्तौति ॥ व्यस्त्विति ॥ प्रस्युदाहरणं प्रदर्शयति ॥ यथेति ॥ अत्र कमलसौगन्ध्यादिति हेतोः पदार्थरूपत्वात् तस्य न्यसनं नार्थान्तरन्यासः । अवधारणप्रयोजनमभिधत्ते ॥ अर्थान्तरस्यैवेति ॥ वचनमिति ॥ यत्र वस्तुनो हेतुरूपमेवार्थान्तरं तद्व्याप्तिस्तु यत्र गौरवेण प्रतीयते तत्रालङ्कारता यथा स्यात्, प्रसिद्धव्याप्तिस्थले तु माभूदित्येवमर्थमेवकारकरणमित्यर्थः । उदाहर्तुमाह ॥ उदाहरणमिति ॥ प्रियेणेति ॥ अत्र विशेषरूपमुपमेयं सामान्येनोपमानेन समर्थ्यते ॥ २१ ॥

अर्थान्तरन्यासव्यतिरेकयोर्भेदं दर्शयितुमभेदशङ्कामुन्मीलयति ।

अर्थान्तरन्यासस्य हेतुरूपत्वाद्, हेतोश्चान्वयव्यतिरेकात्मकत्वान्न पृथग्व्यतिरेक इति केचित् । तन्निरासार्थमाह ।

उपमेयस्य गुणातिरेकित्वं व्यतिरेकः ॥ २२ ॥

उपमेयस्य गुणातिरेकित्वं गुणाधिक्यं यद् अर्थादुपमानात् स व्यतिरेकः । यथा—

सत्यं हरिणशावाक्ष्याः प्रसन्नसुभगं मुखम् ।
समानं शशिनः किन्तु स कलङ्कविडम्बितः ॥

कश्चित्तु गम्यमानगुणो व्यतिरेकः । यथा—

कुवलयवनं प्रख्यातं नवं मधु निन्दितं
हसितममृतं भग्नं स्वादोः पदं रससंपदः ।
विषमुपहितं चिन्ताव्याजान्मनस्यपि कामिनां
चतुरललितैर्लीलातन्त्रैस्तवार्धविलोकितैः ॥ ॥ २२ ॥

अर्थान्तरेति ॥ व्याचष्टे ॥ उपमेयस्येति ॥ गुणशब्दोऽत्र धर्ममात्र-

Digitized by Google

वचनः । स च वाच्यो, गम्यश्चेति द्विविधः । उभयोऽप्युपमानगतस्तदपकर्षहेतुरुपमेयगतस्तदुत्कर्षहेतुश्चेति द्विविधो भवति । यदोपमानगतस्तेन तदपकर्षहेतुना गुणेनोपमेयस्य गुणातिरेकित्वमर्थाद्भवति । तदाद्यगुणातिरेकित्वमार्थम् । यदा पुनरुपमेयगतस्तदा तेन तदुत्कर्षहेतुनाऽर्थादुपमानादुपमेयस्य गुणातिरेकित्वं भवति । तदा शाब्दमतिरेकित्वम् । तत्रोपमानगतवाच्यगुणप्रयुक्तं व्यतिरेकमुदाहरति ॥ खल्वमिति ॥ अत्र कलङ्कनिर्दम्बितपदवाच्येनोपमानस्यापकर्षहेतुना कलङ्कित्वगुणेनोपमेयस्यार्थात्कलङ्कित्वलक्षणं गुणातिरेकित्वमिति व्यतिरेकः । उपमानगतगम्यमानगुणप्रयुक्तं व्यतिरेकमुदाहरति ॥ कुवलयवनमिति ॥ कुवलयवनमध्यादिषु प्रत्याख्याननिन्दनादिभिरवगम्यमानेन निकर्षहेतुना चतुरललितलीलातन्त्रत्वराहित्यलक्षणेन गुणेनार्धावलोकितेषु चतुरललितलीलातन्त्रत्वरूपं गुणातिरेकित्वं शाब्दैमपि प्रकृष्टतया प्रतिष्ठापितं भवतीति गम्यमानगुणप्रयुक्तो व्यतिरेकः । अर्थान्तरन्यासे व्यतिरेको विपक्षव्यावृत्तिः । अत्र तु गुणाधिक्यमिति भेदः ॥ २२ ॥

विशेषोक्तिं विवेक्तुमाह ।

व्यतिरेकाद्विशेषोक्तेर्भेदं दर्शयितुमाह ।

एकगुणहानिकल्पनाया साम्यदार्ढ्यं विशेषोक्तिः ॥ २३ ॥

एकस्य गुणस्य हानेः कल्पनायां शेषैर्गुणैस्साम्यं यत्तस्य दार्ढ्यं विशेषोक्तिः । रूपकं चेदं प्रायेणेति । यथा । भवन्ति नौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥ द्यूतं हि नाम पुरुषस्याऽसिंहासनं राज्यम् ॥ निद्रेयमकमला लक्ष्मीः ॥ हस्ती हि जङ्गमं दुर्गम् इति ॥ अत्रापि जङ्गमशब्दस्य स्थावरत्वनिवृत्तिप्रतिपादनत्वादेकगुणहानिकल्पनैव । एतेन, वेश्या हि नाम मूर्तिमत्येव निकृतिः ॥ व्यसनं हि नाम सोच्छ्वासं मरणम् ॥ द्विजो भूमि-

Digitized by Google

बृहस्पतिरित्येवमादिष्वेकगुणहानिकल्पना व्याख्याता ॥ २३ ॥

व्यतिरेकादिति ॥ एकस्येति ॥ अर्थादुपमेयगतस्य हानिर्लोपः । वर्जनीयतया रूपकमपि सम्भवतीत्याह ॥ रूपकमिति ॥ अतैलपूरा इति ॥ असिंहासनमिति ॥ अकमलेति ॥ अत्रैकगुणहानिकल्पना सिद्ध्यति । समर्थितामेकगुणहानिकल्पनामन्यत्रातिदिशति ॥ एतेनेति ॥ "कुत्सितिर्निकृतिदशाऽथम" इत्यमरः । मूर्तिमत्त्वेत्यत्रामूर्तत्वनिवृत्तिः । साच्छ्वासप्रियत्वानुच्छ्वासतानिवृत्तिः । भूमिबृहस्पतिरित्यत्राभौमत्वनिवृत्तिः प्रतिपाद्यत इत्येकगुणहानिकल्पनाऽवगन्तव्या ॥ २३ ॥

व्याजस्तुतिं व्याख्यातुं प्रसङ्गं परिकल्पयति ।

व्यतिरेकविशेषोक्तिभ्यां व्याजस्तुतिं भिन्नां दर्शयितुमाह ।

सम्भाव्यविशिष्टकर्माकरणान्निन्दास्तोत्रार्था व्याजस्तुतिः ॥ २४ ॥

असन्तगुणाधिको विशिष्टस्तस्य च कर्म विशिष्टकर्म, तस्य सम्भाव्यस्य कर्तुं शक्यस्याकरणान्निन्दाविशिष्टसाम्यसम्पादनेन स्तोत्रार्था व्याजस्तुतिः । यथा—

बबन्ध सेतुं गिरिचक्रवालै-
र्बिभेद सप्तैकशरेण तालान् ।
एवंविधं कर्म तनोति राम-
स्त्वया कृतं तन्न मुधैव गर्वः ॥ ॥ २४ ॥

व्यतिरेकेति ॥ व्याचष्टे ॥ अत्यन्तेति ॥ विशिष्टो रामादिरुपमानभूतस्तस्य कर्म सेतुबन्धनादि । तस्य कर्तुं शक्यस्य कर्मणोऽकरणाद्वर्णनीयस्य निन्दा रामादिसाम्यापादनात् स्तुतिपर्यवसायिनी व्याजस्तुतिः ॥ बबन्धेति ॥ त्वं राम एवासीति तात्पर्यम् । निन्दाव्याजेन स्तुतिरूपत्वाद् व्यतिरेकविशेषोक्तिभ्यां भेदः ॥ २४ ॥

व्याजोक्तिं व्याकर्तुमाह ।

Digitized by Google

व्याजस्तुतेर्व्याजोक्तिं भिन्नां दर्शयितुमाह ।

व्याजस्य सत्यसारूप्यं व्याजोक्तिः ॥ २५ ॥

व्याजस्य ज्ञापनः सत्येन सारूप्यं व्याजोक्तिः । यां मायोक्तिरिमाहुः । यथा—

शरच्चन्द्रांऽशुगौरेण वाताविद्धेन भामिनि ।
काशपुष्पलवेनेदं साश्रुपातं मुखं कृतम् ॥ ॥ २५ ॥

व्याजस्तुतेरिति ॥ व्याचष्टे ॥ व्याजस्येति ॥ असत्यस्येत्यर्थः । सत्येन यथार्थेन । सारूप्यं सत्यत्वकल्पनया समुन्मिषितं सादृश्यम् । असत्यस्य सत्यत्ववचनं व्याजोक्तिरिति लक्षणार्थः । व्याजोक्तिमिमां मतान्तरे संज्ञान्तरेण व्यवहरन्ति, न तु स्वरूपभेद इत्याह ॥ यामिति ॥ उदाहरति ॥ यथेति ॥ चन्द्रांऽशुगौरेणेत्यनेन चन्द्रिकायां काशपुष्पलवस्याविवेचनीयता सूचिता । वाताविद्धेनेत्यनेनाऽप्रसक्तिशङ्का निराकृता । अत्र सत्येन सात्त्विकभावेन कृतोऽश्रुपातः पुष्पलवेन कृत इत्यसत्यस्य सत्यत्वोक्तिः । अत एव व्याजस्तुतितो भेदः ॥ २५ ॥

तुल्ययोगितां वक्तुमाह ।

व्याजस्तुतेः पृथक् तुल्ययोगितेत्याह ।

विशिष्टेन साम्यार्थमेककालक्रियायोग-
स्तुल्ययोगिता ॥ २६ ॥

विशिष्टेन न्यूनस्य साम्यार्थमेककालायां क्रियायां योगस्तुल्ययोगिता। यथा, जलनिधिरशनामिमां धरित्रीं वहति भुजङ्गविभुर्भवद्भुजश्च ॥ २६ ॥

व्याजोक्तेः पृथगिति ॥ विशिष्टेन गुणाधिक्येनोपमानेनेति यावत् । अर्थादत्र न्यूनस्येत्यनेनोपमेयस्येत्यवगम्यते । एकः कालो यस्याः सा एककाला तस्यां क्रियायां, साम्यार्थे यो योगः सा तुल्ययोगिता ।

Digitized by Google

उदाहरति ॥ जलनिधीति ॥ २६ ॥

आक्षेपं लक्षयितुं सूत्रमुपक्षिपति ॥

उपमानाक्षेपश्चाक्षेपः ॥ २७ ॥

उपमानस्य क्षेपः प्रतिषेध उपमानाक्षेपः । तुल्यकार्यार्थस्य नैरर्थक्यविवक्षायाम् । यथा—

तस्याश्चेन्मुखमस्ति सौम्यसुभगं किं पार्वणेनेन्दुना
सौन्दर्यस्य पदं दृशौ च यदि चेत् किं नाम नीलोत्पलैः ।
किं वा कोमलकान्तिभिः किसलयैः सत्येव तत्राधरे
हा धातुः पुनरुक्तवस्तुरचनारम्भेष्वपूर्वो ग्रहः ॥

उपमानस्याक्षेपतः प्रतिपत्तिरित्यपि सूत्रार्थः । यथा—

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्घनार्द्रनखक्षताभम् ।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार ।

अत्र शरद्वनेव, इन्दुं नाथकमिव, रवेः प्रतिनायकस्येवेत्युपमानानि गम्यन्त इति ॥ २७ ॥

उपमानेति ॥ उपमानस्य तादृगुपमेये सति नैरर्थक्यविवक्षायां प्रतिषेध आक्षेप इति वाक्यार्थः ॥ तस्याश्चेन्मुखमित्युदाहरणम् । चकारेण समुच्चितार्थमाह ॥ उपमानस्याक्षेपत इति ॥ आक्षेपोऽत्राकर्षणम् ॥ ऐन्द्रं धनुरित्युदाहरणम् । अत्राक्षेपलभ्यं प्रकटयति ॥ अत्र शरदिति ॥ ॥ २७ ॥

सहोक्तिं वक्तुमाह ॥

तुल्ययोगितायाः सहोक्तेर्भेदमाह ।

वस्तुद्वयक्रिययोस्तुल्यकालयोरेकपदाभिधानं
सहोक्तिः ॥ २८ ॥

वस्तुद्वयस्य क्रिययोस्तुल्यकालयोरेकेन पदेनाभिधानं सहो-

Digitized by Google

ऽर्थशब्दसामर्थ्यात् सहोक्तिः । यथा—अस्तं भास्वान् ययातः सह रिपुभिरयं संह्रियन्तां बलानि । अत्रार्थयोर्न्यूनत्वविशिष्टत्वे न स्त इति नेयं तुल्ययोगितेति ॥ २८ ॥

तुल्ययोगिताया इति ॥ वस्तुद्वयसम्बन्धिन्योः क्रिययोः सहार्थानां सह-शब्दपर्यायाणां ग्रहणसामर्थ्यादेकेन पदेनाभिधानं सहोक्तिः। स्पष्टमुदाहरणम्। उभयोरलङ्कारयोर्भेदं दर्शयति ॥ अत्रेति ॥ २८ ॥

समाहितं समीरयितुमाह ।

समाहितमेकमवशिष्यते । तल्लक्षणार्थमाह ।

यत्सादृश्यं तत्सम्पत्तिः समाहितम् ॥ २९ ॥

यस्य वस्तुनः सादृश्यं गृह्यते तस्य वस्तुनः सम्पत्तिः समाहितम् । यथा—

तन्वी मेघजलार्द्रवल्कलतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।
चिन्तामोहमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥

अत्र पुरूरवसो लतायामुर्वश्याः सादृश्यं गृह्णतः सैव लतोर्वशी संपन्नेति ॥ २९ ॥

समाहितमिति ॥ गुणेष्वलङ्कारभेदेषु समाहितमेकं लक्षयितुमवशिष्यत इत्यर्थः ॥ यस्येति ॥ तस्य सम्पत्तिस्तदाकारतापरिणतिः। तद्रूप्यसंपत्तिरिति यावत्। अत्रोदाहरणं विक्रमोर्वशीये दर्शयितुमाह ॥ तन्वीति ॥ लतायामुर्वशीसादृश्यं पश्यतः पुरूरवस इयमुक्तिः ॥ अत्रेति॥ लतामवलोक्य तत्राश्रुधौताधरत्वभ्रूणशून्यत्वचिन्तामौनाऽऽश्रितत्वाद्यध्यवसायेन सा तादृश्युर्वशीवेत्युत्प्रेक्षमाणस्य पुरूरवसः सैव लतोर्वशी सपन्नेति लतायां उर्वशीत्वसम्पत्तेः सम्भवात् समाहितम्। समनन्तरक्षणभावित्वेऽपि तस्सम्पत्तेस्तस्य तादात्विकत्वाभिमानं सूचयितुं भूतप्रत्ययः ॥ २९ ॥

Digitized by Google

शुद्धालङ्कारविभागोपसंहारव्याजेन मिश्रालङ्कारनिरूपणाय सङ्गतिं प्रस्फोरयति ।

एते चालङ्काराः शुद्धा मिश्राश्च प्रयोक्तव्या इति विशिष्टानामलङ्काराणां मिश्रत्वं संसृष्टिरित्याह ।

अलङ्कारस्यालङ्कारयोनित्वं संसृष्टिः ॥ ३० ॥

अलङ्कारस्यालङ्कारयोनित्वं यदसौ संसृष्टिरिति । संसृष्टिः संसर्गः सम्बन्ध इति ॥ ३० ॥

एते चेति ॥ शुद्धाः पूर्वं लक्षिताः, मिश्राः संसृष्टिभेदाः शुद्धा एव मिश्रा अप्यलङ्काराः प्रयोगयोग्याः । शोभातिशयहेतुत्वादिति भावः । इतिशब्दो हेतौ । विशिष्टानामलङ्कारविशेषाणाम् । संसृष्टेर्लक्षणमाह ॥ अलङ्कारस्येति ॥ कार्यकारणभावापन्नयोरलङ्कारयोः सम्बन्धः संसृष्टिरित्यर्थः ॥ ३० ॥

संसृष्टिविभागं दर्शयितुं सूत्रमवतारयति ।

तन्भेदावुपमारूपकोत्प्रेक्षावयवौ ॥ ३१ ॥

तस्याः संसृष्टेर्भेदावुपमारूपकं चोत्प्रेक्षावयवश्चेति ॥ ३१ ॥

तन्भेदाविति ॥ अलङ्कारयोनित्वमित्यत्र यथाक्रमं बहुव्रीहितत्पुरुषाश्रयणेन द्वौ भेदौ भवतः । उपमारूपकमुत्प्रेक्षावयवश्चेति ॥ ३१ ॥

तत्राद्यमुपक्षेप्तुं सूत्रमुपक्षिपति ।

उपमाजन्यं रूपकमुपमारूपकम् ॥ ३२ ॥

स्पष्टम् । यथा—

निरवधि च निराश्रयं च यस्य
स्थितमनिवर्तितकौतुकप्रपञ्चम् ।
प्रथम इह भवान् स कूर्ममूर्ति-
र्जयति चतुर्दशलोकवल्लिकन्दः ॥

Digitized by Google

एवं, रजनिपुरन्ध्रिलोध्रतिलक, इत्येवमादयस्तत्प्रभेदा द्रष्टव्याः॥३२॥

उपमाजन्यमिति ॥ सूत्रमिदं निगदव्याख्यानमित्यभिप्रायेण उदाहरणं दर्शयति ॥ यथेति ॥ अन्यत्र कूर्ममूर्तेः कन्दत्वारोपाल्लोकानां बह्नित्वारोपणं वक्तुं युक्तम् । तथाच रूपकजन्यं रूपकमिति वक्तव्यम् । यन्मतान्तरे परम्परितरूपकमित्युच्यते । तत् कथञ्चिदुपमाजन्यं रूपकमितिचेत् सत्यम् । लोको वह्निरिव लोकवह्निः । व्याघ्रादेराकृतिगणत्वादुपमितसमासः । लोकवह्न्याः कन्द इति कूर्ममूर्तौ कन्दत्वारोपणमिह ग्रन्थकृतो विवक्षितमिति न दोषः । इत्थमेव, रजनिपुरन्ध्रीत्यादावपि द्रष्टव्यम् ॥ ३२ ॥

उत्प्रेक्षावयवं लक्षयितुमाह ।

उत्प्रेक्षाहेतुरुत्प्रेक्षावयवः ॥ ३३ ॥

उत्प्रेक्षाया हेतुरुत्प्रेक्षावयवः । अवयवशब्दो द्वारम्भकं लक्षयति । यथा—

अङ्गुलीभिरिव केशसञ्चयं
सन्निगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं
चुम्बतीव रजनीमुखं शशी ॥

एभिर्निदर्शनैः स्वीयैः परकीयैश्च पुष्कलैः ।
शब्दवैचित्र्यगर्भेयमुपमैव प्रपञ्चिता ॥
अलङ्कारैकदेशा ये मताः सौभाग्यभागिनः ।
तेऽप्यलङ्कारदेशीया योजनीयाः कवीश्वरैः ॥ ॥ ३३ ॥

इति श्रीकाव्यालङ्कारसूत्रवृत्तावालङ्कारिके चतुर्थेऽधिकरणे
तृतीयोऽध्यायः ॥ समाप्तं चेदमालङ्कारिकं
चतुर्थमधिकरणम् ॥

उत्प्रेक्षाहेतुरिति ॥ अवयवशब्द इति ॥ अवयव आरम्भको हेतु-

Digitized by Google

रित्यर्थः ॥ अङ्गुलीभिरिति ॥ अत्रोपमारूपकानुप्राणितहेत्व क्षेपस्य उत्प्रेक्षोपपादकत्वादुत्प्रेक्षावयवत्वम् । अमीषामलंकाराणामुपमाप्रपञ्चरूपत्वमुपपादितमुपसंहरति ॥ एभिरिति ॥ निदर्शनैकदाहरणैः ॥ अलंकाराणामधिकलक्षणलक्षितानां शोभातिशयजनकत्वं कैमुतिकन्यायेन सिद्धमिति सूचयितुं तदेकदेशानामपि शोभातिशयहेतुरस्तीत्याह ॥ अलंकारेति ॥ ३३ ॥

इति कृतरचनायामिन्दुवंशोद्भवेन
त्रिपुरहरधरित्रीमण्डलाखण्डलेन ॥
ललितवचसि काव्यालंक्रियाकामधेना—
वऽधिकरणमयासीद् पूर्तिमेतच्चतुर्थम् ॥ १ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां काव्यालंकारसूत्रवृत्तिव्याख्यायां काव्यालंकारकामधेनावाचालङ्कारिके चतुर्थेऽधिकरणे तृतीयोऽध्यायः समाप्तः ॥ ४ ॥ ३ ॥ (१०) ॥

Digitized by Google

अथ पञ्चमेऽधिकरणे प्रथमोऽध्यायः ।

किरन्ती कौतुकस्मेरैः कटाक्षैः करुणामृतम् ।
समये संनिधत्तां मे सैन्ध्रपन्ती सरस्वती ॥ १ ॥
निर्हेतुके नियतिनिस्पृहमुज्जिहाने
काम्तानिमे कविवरप्रतिभाविवर्ते ॥
प्रत्यर्थिशून्यपरनिर्वृतिके प्रपञ्चे
सारस्वतेऽस्तु समयः सुधियाऽनुपाल्यः ॥ २ ॥

प्रायोगिकं पञ्चममधिकरणमारभ्यते । अधिकरणान्तरारम्भौचित्यमासूत्रयति ।

सम्प्रति काव्यसमयं शब्दशुद्धिं च दर्शयितुं प्रायोगिकाख्यमधिकरणमारभ्यते । तत्र काव्यसमयस्तावदुच्यते ।

नैकं पदं द्विः प्रयोज्यं प्रायेण ॥ १ ॥

एकं पदं न द्विः प्रयोज्यं प्रायेण बाहुल्येन । यथा "पयोदपयोद" इति । किञ्चिदिवादिपदं द्विरपि प्रयोक्तव्यमिति । यथा-"सन्तः सन्तः खला खलाः" ॥ १ ॥

संप्रतीति ॥ संप्रतिशब्देन काव्यस्य प्रयोजनाधिकार्यात्मकभेदद्वोषगुणालङ्कारेषु दर्शितेषु प्रयोगनियमशब्दशुद्धोः प्राप्तावसरत्वं प्रत्याय्यते । प्रयोगविषये नियामकत्वेन भवतीति प्रायोगिकम् । तयोः प्रथमं प्रयोगमर्यादा पर्यालोच्यते इत्याह ॥ तत्रेति ॥ समयः = सङ्केतः, प्रयोगवर्ज्यावर्ज्यनियम इति यावत् । न द्विः प्रयोज्यमिति ॥ प्रतीतिवैरस्यादशक्तिसूचकत्वाच्चेत्यभिप्रायः । प्रायग्रहणस्य प्रयोजनमाह ॥ किञ्चिदिति ॥ यथा—"ते च प्रापुरुदन्वन्तं बुबुधे चादिपुरुषः" इति । आदिग्रहणात् पदानुप्रासपदयमकेषु द्विःप्रयोगो न दोषायेति द्रष्टव्यम् ॥ १ ॥

नित्यं संहितैकपदवत् पादेष्वर्धान्तवर्जम् ॥ २ ॥

Digitized by Google

नित्यं संहिताप्रदेष्वेकपदवदेकस्मिन्नित्य पदे । तत्र हि नित्या संहितेत्याम्नायः । यथा— संहितैकपदे नित्या नित्या धात्वपसर्गयोरिति ॥ अर्धान्तवर्जमर्धान्तं वर्जयित्वा ॥ २ ॥

नित्यमिति ॥ एकस्मिन् पदे संहिता प्रकृतसन्निकर्षो यथा नित्या तथा पादेष्वपि संहिता नित्या भवति ॥ आम्नायः = प्रमाणम् । प्रमाणवचनं दर्शयति ॥ संहितेति ॥ अविशेषेण सर्वत्र प्राप्तौ संहितां क्वचित् पर्युदस्यति ॥ अर्धान्तवर्जमिति ॥ २ ॥

यद्यपि, वा पादान्त इति पादान्तवर्णस्य लघोर्गुरुत्वं विकल्पेन विहितं तदपि न सर्वत्र भवतीति प्रतिपादयितुमाह ।

न पादान्तलघोर्गुरुत्वं च सर्वत्र ॥ ३ ॥

पादान्तलघोर्गुरुत्वं प्रत्याख्येयम् । न सर्वत्र, न सर्वस्मिन् वृत्त इति । यथा—

यासां कलिर्मकति मदगृहदेहलीनां
हंसैश्च सारसगणैश्च विलुप्तपूर्वैः ।
तास्वेव पूर्वबलिरूढपयाङ्कुरासु
बीजाञ्जलिः पतति क्रीडमुखावलीढः ॥

एवमादिष्वेव वृत्तेष्विति । न पुनः—"वरुथिनीनां रजसि प्रसर्पति समस्तमासीद्विनिमीलितं जगत्" इत्यादिषु । चकारोऽर्धान्तवर्जमित्यस्याऽनुकर्षणार्थः ॥ ३ ॥

न पादान्तेति ॥ प्रथमं तावल्लघोर्गुरुत्वं दर्शयति ॥ यथेति ॥ एवमादिष्विति ॥

श्रीतिष्यभूपालक मध्यलोकदेवेन्द्र वज्राङ्कदक्षिन्दुकाभिः ।
त्वद्बाहुरामाति हसन्निवायं प्रौढो प्रदाने मणिपारिजातौ ॥

इत्यादिषु इन्द्रवज्रादिषु उपजातिभेदेष्वपि द्रष्टव्यम् । प्रतिषेधविषयं प्रदर्शयति ॥ न पुनरिति ॥ तेन, वा पादान्त इत्यस्य व्यवस्थितविभाषा वेदितव्या ॥ ३ ॥

Digitized by Google

न गद्ये समाप्तप्रायं वृत्तमन्यत्रोद्गतादिभ्यः संवादात् ॥ ४ ॥

गद्ये समाप्तप्रायं वृत्तं न विधेयम् । शोभाभ्रंशात् । अन्यत्रोद्गतादिभ्यो विषमवृत्तेभ्यः संवादाद् गद्येनेति ॥ ४ ॥

न गद्य इति ॥ गद्ये वृत्तगन्धिनि समाप्तप्रायं परिपूर्णकल्पं वृत्तं न विधेयम् । तत्र हेतुमाह ॥ शोभेति ॥ गद्यपरिपाटीविसंवादेन शोभाभ्रंशो जायत इत्यर्थः ॥ अन्यत्रेति ॥ उद्गतादिषु विषमवृत्तेषु गद्यसंवादिषु किञ्चिद् वृत्तं समाप्तप्रायमपि गद्ये प्रयोक्तव्यम् । तत्र हेतुहेतुः— संवादादिति ॥ विसंवादाभावादित्यर्थः ॥ ४ ॥

न पादादौ खल्वादयः ॥ ५ ॥

पादादौ खल्वादयः शब्दा न प्रयोज्याः । आदिशब्दः प्रकारार्थः । येषामादौ प्रयोगो न श्लिष्यति ते गृह्यन्ते । न पुनर्वतहंतप्रभृतयः ॥ ५ ॥

न पादादाविति ॥ पदादौ खल्वादिप्रयोगो न श्लिष्यति । श्रुतिविरसत्वादिति भावः । यथा—खलूक्ता खलु वाचिकम् ॥ इव सीतामृहच्छद्मच्छन्नो लङ्कापतिः पुरा ॥ किल सृजति कामिनीनां किलकिञ्चितमेव कामिजनमोहम् इत्यादि ॥ ५ ॥

नार्धे किञ्चिदसमाप्तप्रायं वाक्यम् ॥ ६ ॥

वृत्तस्यार्धे किञ्चिदसमाप्तप्रायं न प्रयोक्तव्यम् । यथा—

जयन्ति ताण्डवे शम्भोर्भङ्गुरा ऽङ्गुलिकोटयः ।
कराः कृष्णस्य च भुजाश्चक्रांशुकपिशत्विषः ॥ ॥ ६ ॥

नार्धे इति ॥ किञ्चित्समाप्तमेकपदावशेषं वाक्यमेकपदार्थावशेषवाक्यार्थप्रतिपादकमित्यर्थः । तादृशमर्थमुदाहरति ॥ जयन्तीति ॥६॥

न कर्मधारयो बहुव्रीहिप्रतिपत्तिकरः ॥ ७ ॥

बहुव्रीहिप्रतिपत्तिं करोति यः कर्मधारयः स न प्रयोक्त-

Digitized by Google

व्यः । यथा— अध्यासितश्चासौ तरुश्चाध्यसिततरुः ॥ ७ ॥

न कर्मधारय इति ॥ वृत्तिः स्पष्टार्था । तादृशमुदाहरणं दर्शयति ॥ अध्यासितेति ॥ निष्ठापूर्वपदत्वेन बहुव्रीहिप्रतिपत्तेरेव पुरःस्फूर्तिकत्वादिति भावः ॥ ७ ॥

तेन विपर्ययो व्याख्यातः ॥ ८ ॥

बहुव्रीहिरपि कर्मधारयप्रतिपत्तिकरो न प्रयोक्तव्यः । यथा— वीराः पुरुषा यस्य स वीरपुरुषः । कलो रवो यस्य स कलरवः इति ॥ ८ ॥

तेनेति ॥ समासान्तरप्रतिपत्तिकृतः समासस्य प्रयोगो न कार्य इति न्यायो यः फलतः पूर्वसूत्रे तेनेत्यर्थः । विपर्ययशब्दार्थं विवृणोति ॥ बहुव्रीहिरपीति ॥ वीराः पुरुषा यस्येति ॥ राजा पुरुषो यस्येति वा राजपुरुष इति कर्मधारयो बहुव्रीहिर्वा ईदृशो न कर्तव्य इति तात्पर्यम् ॥ ८ ॥

सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ ॥ ९ ॥

सम्भाव्यस्य निषेधस्य निवर्तने द्वौ प्रतिषेधौ प्रयोक्तव्यौ। यथा
समरमूर्धनि येन तरस्विना न न जितो त्रिजयी त्रिदशेश्वरः ।
स खलु तापसबाणपरम्पराकवलितक्षतजः क्षितिमाश्रितः ॥ ॥९॥

सम्भाव्यस्येति ॥ संप्रतिपत्तियोग्यस्य प्राप्तिपूर्वकत्वात् प्रतिषेधस्येति भावः ॥ समरेति ॥ न जित इति न, जित एवेत्यर्थः ॥ ९ ॥

विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ ॥ १० ॥

विशेष्यस्य प्रतिपत्तौ जातायां विशेषणमात्रस्यैव प्रयोगः । यथा—"निधानगर्भामिव सागराऽम्बराम्" । अत्र हि पृथिव्या विशेषणमात्रमेव प्रयुक्तम् । एतेन—क्रुद्धस्य तस्याऽथ पुरामरातेर्ललाटपट्टादुदगादुदर्चिः ॥ गिरेस्तडित्वानिव तावदुच्चकैर्जनेपनाठादुदतिष्ठदच्युतः, इत्यादयः प्रयोगा व्याख्याताः ॥ १० ॥

Digitized by Google

विशेषणेति ॥ यत्रानन्यसाधारणविशेषणमहिम्ना विशेष्यस्य प्रयोगमन्तरेण प्रतिपत्तिर्भवति तत्र विशेषणमात्रप्रयोगः क्रियते । तदुदाहृत्य दर्शयति ॥ निधानेति ॥ अत्र सागराऽम्बरत्वं भुव एव । ऊर्ध्वार्चियोगश्चाग्नेरेव । तडित्सम्बन्धश्च मेघस्यैवेत्यनन्यसाधारणत्वम् । यत्र तु विशेषणमहिम्ना प्रतिपन्नं विशेष्यं साधारणविशेषणविशिष्टमभिधित्सितं तत्र विशेष्यस्यापि गतार्थस्य प्रयोगे न दोष इत्यपि द्रष्टव्यम् ॥ १० ॥

सर्वनाम्नाऽनुसन्धिर्वृत्तिच्छन्नस्य ॥ ११ ॥

सर्वनाम्नानुसन्धिरनुसन्धानं प्रत्यवमर्शः । वृत्तिच्छन्नस्य वृत्तौ समासे छन्नस्य गुणीभूतस्य । यथा—तवापि नीलोत्पलपत्रचक्षुषो मुखस्य तद्रेणुसमानगन्धिनः इति ॥ ११ ॥

सर्वनाम्नेति ॥ अत्र भाष्यकारवचनं प्रमाणम् । "अथ शब्दानुशासनम् । केषां शब्दानाम्" इति ॥ तद्रेणिवति ॥ ११ ॥

संबन्धसंबन्धेऽपि षष्ठी क्वचित् ॥ १२ ॥

संबन्धेन संबन्धः सम्बन्धसम्बन्धस्तस्मिन् षष्ठी प्रयोज्या क्वचित्, न सर्वत्रेति । यथा " कमलस्य कन्दः" इति । कमलेन संबद्धा कमलिनी तस्याः कन्द इति सम्बन्धः । तेन कदलीकाण्डादयो व्याख्याताः ॥ १२ ॥

सम्बन्धेति ॥ सम्बन्धपारम्पर्येऽपि षष्ठी भवतीत्यर्थः । कदली हि समुदायस्तस्या गर्भस्तत्र काण्डमिति सम्बन्धसम्बन्ध इति ॥ १२ ॥

अतिप्रयुक्तं देशभाषापदम् ॥ १३ ॥

अतीव कविभिः प्रयुक्तं देशभाषापदं प्रयोज्यम् । यथा—योषिदित्यभिलाष न हालाम् इत्यत्र हालेति देशभाषापदम् । अनतिप्रयुक्तं तु प्रयोज्यम् । यथा— कङ्केलीकाननालीरविरलविसत्पल्लवा नर्तयन्तः, इत्यत्र कङ्केलीपदम् ॥ १३ ॥

Digitized by Google

अतिप्रयुक्तमिति ॥ अतीव प्रयुक्तं प्रायशः प्रयुक्तम् । देशान्यवस्थिता भाषा देशभाषा । तत्र सिद्धं पदं देशभाषापदम् । देश्यं पदमित्यर्थः । अतिना व्यावर्त्यं कीर्तयति॥अनतीति॥कर्कुलेकरयोकः॥१३॥

लिङ्गाऽध्याहारौ ॥ १४ ॥

लिङ्गं चाऽध्याहारश्च लिङ्गाध्याहारावतिप्रयुक्तौ प्रयोज्याविति । यथा— वत्से मा बहु निश्वसीः कुरु सुरागण्डूषमेकं शनैः, इत्यादिषु गण्डूषशब्दः पुंसि भूयसा प्रयुक्तो, न स्त्रियाम्, आम्नातोऽपि स्त्रीत्वे । अध्याहारो यथा—

मा भवन्तमनलः पवनो वा
वारणो मदकलः परशुर्वा ।
वाहिनीजलभरः कुलिशं वा
स्वस्ति तेऽस्तु लतया सह वृक्ष ॥

अत्र धक्षीदित्यादीनामध्याहारोऽन्वयप्रयुक्तः ॥ १४ ॥

लिङ्गाध्याहारावितीति ॥ अतिप्रयुक्तमित्यनुवर्तते ॥ न स्त्रियामिति॥ "शुण्डाग्रभागे गण्डूषा द्वयोस्तु मुखपूरणे" इति स्त्रीत्वेऽप्याम्नातः स्त्रियां न प्रयुज्यते ॥ मा भवन्तमिति ॥ अधाक्षीदित्यत्रादिपदेन "मा भूत्, लैत्सीत्, भैत्सीत्, इत्येषामध्याहारो न दुष्यति । अतिप्रयुक्तत्वेन बुद्ध्यारूढत्वादित्यर्थः ॥ १४ ॥

लक्षणाशब्दाश्च ॥ १५ ॥

लक्षणाशब्दाश्चातिप्रयुक्ताः प्रयोज्याः । यथा, द्विरेफरोदरशब्दौ भ्रमरचक्रवाकार्थौ लक्षणापरौ । अनतिप्रयुक्ताश्च न प्रयोज्याः । यथा, द्विकः काक इति ॥ १५ ॥

लक्षणाशब्दाश्चेति ॥ द्वौ रेफौ यस्येति द्विरेफः । र उदरे यस्येति रोदरः । द्विरेफरोदरशब्दौ मुख्यया वृत्त्या भृङ्गरथाङ्गनामवाचकयोर्भ्रमरचक्रवाकयोर्वर्तेते । तेन तदर्थयो रेफसम्बन्धाभावादतो वाच्यवाचकयोरभेदोपचारेण तदर्थयोर्वर्तेते इति लक्षणाशब्दौ ।

Digitized by Google

"चक्रवाको रोदरश्च कोकश्चक्राभिधाह्वय" इति वैजयन्ती । यथा द्विरेफशब्दो भ्रमरे रोदरशब्दश्चक्रवाके, न तथा द्विक इति काके ॥ अनतिप्रयुक्तत्वादिति ॥ यदाहुः—"निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् । क्रियन्ते साम्प्रतं काश्चित् काश्चिच्चैव स्वशक्तित" इति ॥ १५ ॥

न तद्बाहुल्यमेकत्र ॥ १६ ॥

तेषां लक्षणाशब्दानां बाहुल्यमेकस्मिन् वाक्ये न प्रयोज्यम् । शक्यते ह्येकस्यावाचकस्य वाचकवद्भावः कर्तुं, न बहूनामिति॥१६॥

न बहूनामिति॥लक्षणापदबाहुल्ये क्लिष्टतादोषप्रसङ्गादितिभावः ॥१६॥

स्तनादीनां द्वित्वाविष्टा जातिः प्रायेण ॥ १७ ॥

स्तनादीनां द्वित्वाविष्टा द्वित्वाध्यासिता जातिः प्रायेण बाहुल्येनेति । यथा— स्तनयोस्तरुणीजनस्य इति ॥ प्रायेणेति वचनात् क्वचिन्न भवति । यथा— स्त्रीणां चक्षुः, इति । अथ कथं द्वित्वाऽऽविष्टत्वं जातेः । तद्धि द्रव्ये, न जातौ । अतद्रूपत्वात् तस्याः । न दोषः । तदतद्रूपत्वाज्जातेः । कथं तदतद्रूपत्वं जातेः । तद्धि जैमिनीया जानन्ति । वयं तु लक्ष्यसिद्धौ सिद्धपरमतानुवादिनः । नचैवमतिप्रसङ्गः । लक्ष्यानुसारित्वान्न्यायस्येति । एवमन्यापि व्यवस्थोह्या ॥ १७ ॥

इति श्रीकाव्यालङ्कारसूत्रवृत्तौ प्रायोगिके पञ्चमेऽधिकरणे प्रथमोऽध्यायः । काव्यसमयः ॥ ५ ॥ १ ॥

तरुणीजनस्येति ॥ जनशब्दः समूहवचनः । ननु न जातेर्द्वित्वाऽऽविष्टत्वमुपपद्यते । संख्याया द्रव्यधर्मत्वेन जातिधर्मत्वाभावादिति शङ्कते ॥ अथ कथमिति ॥ जातेर्द्रव्याभिन्नत्वान्नायं दोष इति । परिहरति ॥ न दोष इति ॥ जातिव्यक्त्योरभेद एव कुत इति शङ्कते ॥ कथं तदतद्रूपत्वमिति ॥ जात्यपलापवादिनो जैमिनीयाः प्रष्टव्या इ-

Digitized by Google

त्याह ॥ जैमिनीया इति ॥ अपसिद्धान्तशङ्कनमवधीरयति ॥ वयं त्विति ॥ न वयं जातिमपलप्यान्यापोहवादं समर्थयामहे, किन्तु सिद्धं परमतमनूद्य प्रयोगं प्रतिष्ठापयामः । एवं तर्हि यस्य कस्यचिन्मतमवलम्ब्य यत्किञ्चिदपि समर्थयितुं शक्यत इत्यतिप्रसङ्गमाशङ्क्य परिहरति ॥ नचैवमिति ॥ यथा पाणिनीये क्वचिज्जातिः क्वचिद् व्यक्तिरिति पक्षद्वयमवलम्ब्य लक्ष्यनिर्वाहः क्रियते । प्रसिद्धे लक्ष्ये सति तदनुसारी न्यायोऽन्विष्यते । न तु न्यायोऽस्तीति लक्ष्यमन्वेषणीयम । लक्ष्यानुसारित्वान्न्यायस्येति । एवमन्या व्यवस्था प्रयोगमर्यादा स्वयं बुद्धिमद्भिरूहनीया ॥ १७ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां काव्यालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालङ्कारकामधेनौ प्रायोगिके पञ्चमेऽधिकरणे प्रथमोऽध्यायः समाप्तः ॥५॥१॥ (११) ॥

काव्यसमयः समाप्तः ॥

Digitized by Google

अथ पञ्चमेऽधिकरणे द्वितीयोऽध्यायः ।

छिन्ते मोहं चित्प्रकर्षं प्रयुङ्क्ते सूते सूक्तिं सूयते या पुमर्थान् ॥
प्रीतिं कीर्तिं प्राप्तुकामेन सैषा शाब्दी शुद्धिः शारदेवाऽस्तु सेव्या॥१॥

अथेदानीमध्यायान्तरं व्याचिख्यासुस्तत्प्रयोजनं प्रस्तौति ।

साम्प्रतं शब्दशुद्धिरुच्यते ।

रुद्राविन्येकशेषोऽन्वेष्यः ॥ १ ॥

रुद्राविन्यत्र प्रयोगे एकशेषोऽन्वेष्योऽन्वेषणीयः । रुद्रश्च रुद्राणी चेति, पुमान् स्त्रिया इत्येकशेषः । स च न प्राप्नोति । तत्र हि, तल्लक्षणश्चेदेव विशेष इत्यनुवर्तते इति तत्रैवकारकरणात् स्त्रीपुंसकृत एव विशेषो भवतीति व्यवस्थितम् । अत्र तु, पुंयोगादाख्यायाम् इति विशेषान्तरमप्यस्तीति । एतेनेन्द्रौ भवौ शर्वावित्यादयः प्रयोगाः प्रत्युक्ताः ॥ १ ॥

साम्प्रतमिति॥तत्र तावदेकशेषविषयं किञ्चिद् बोधयितुं सूत्रमनुभाषते॥ रुद्राविति ॥ पुमान् स्त्रियत्येकशेषोविधीयते । तत्र, वृद्धो यूना इतिसूत्रात्, तल्लक्षणश्चेदेव विशेष इत्यनुवर्तते। तदिति स्त्रीपुंसयोर्निर्देशः॥ लक्षणशब्दो निमित्तपर्यायः । चेच्छब्दो यद्यर्थे । एवकारोऽवधारणे । विशेषो वैरूप्यम् । स्त्रिया सह वचने पुमान् शिष्यते । स्त्रीपुंसलक्षण एव चेद्विशेषो भवति । स्त्रीपुंसकृतमेव यदि वैरूप्यं भवतीत्यर्थः । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणाविति । तद्वदेव रुद्रश्च रुद्राणी च रुद्राविन्येकशेषः प्राप्नोतीति यः कश्चिदभिमन्यते, तत्प्रतिषेधाय प्रयोगाऽदर्शनं प्रत्याययति ॥ अन्वेषणीय इति ॥ न्यायतः प्राप्तौ प्रयोगोऽप्युन्नीयतामिति तत्राह॥स च न प्राप्नोतीति॥अप्राप्तिमेव दर्शयितुमाह ॥ तत्र हीति ॥ अस्त्वेवं व्यवस्था, प्रकृते कोऽनुरोध इति तत्राह ॥ अत्र त्विति ॥ रुद्राणीत्यत्र, पुंयोगादाख्यायाम् इत्यनुवर्तमाने, इन्द्रवरुणेत्यादिना ङीष् विधीयते । पुंस आख्याभूतं यत्प्रातिपदिकं पुंयो-

Digitized by Google

गात् स्त्रियां वर्तते तस्माद् ङीष् प्रत्ययो भवतीति । अतस्तल्लक्षणविशेषव्यतिरेकेण विशेषान्तरस्यापि विद्यमानत्वात्राप्तैकशेषप्राप्तिरिति । एतत्समानयोगक्षेमाणि प्रयोगान्तराणि प्रत्याख्येयानीत्याह ॥ एतेनेति ॥ १ ॥

मिलिक्लबिक्षपिप्रभृतीनां धातुत्वं,धातुगणस्याऽसमाप्तेः ॥ २ ॥

मिलति विक्लवति क्षपयतीत्यादयः प्रयोगाः । तत्र, मिलिक्लबिक्षपिप्रभृतीनां कथं धातुत्वम् । गणपाठाद् गणपठितानामेव धातुसंज्ञाविधानात् । तत्राह ॥ धातुगणस्याऽसमाप्तेः । वर्धते धातुगण इति हि शब्दविद् आचक्षते । तेनैषां गणपाठोऽनुमतः । शिष्टप्रयोगादिति ॥ २ ॥

मिलिक्लबीति ॥ भ्वादयो धातवः इति गणपठितानामेव धातुसंज्ञाविधानाद्धातुगणे मिलिप्रभृतीनामपाठात् । कथं धातुत्वमित्याशङ्क्यापूर्वकं धातुत्वं समर्थयते ॥ मिलति विक्लबति क्षपयतीति ॥ धातुगणस्यापरिसमाप्तौ प्राचीनाचार्यवचनं प्रमाणयति ॥ वर्धते धातुगण इति ॥ प्रभृतिग्रहणाद्वाज्याऽऽन्दोलादयः ॥ २ ॥

वलेरात्मनेपदमनित्यं, ज्ञापकात् ॥ ३ ॥

वलेरनुदात्तेत्त्वादात्मनेपदं यत् तदनित्यं दृश्यते— लज्जालोलं वलन्ती इत्यादिप्रयोगेषु । तत् कथमित्याह ॥ ज्ञापकात् ॥ ३ ॥

वलेरात्मनेपदमिति ॥ अनुदात्तङित आत्मनेपदमिति वलेर्धातोरनुदात्तेत्त्वान्नित्यमात्मनेपदप्राप्तौ शिष्टप्रयोगेषु परस्मैपददर्शनात् तस्मिन्नर्थे क्वचिदनुदात्तेत्त्वनिबन्धनस्यात्मनेपदस्यानित्यत्वं ज्ञापकेन समर्थयितुमाह ॥ वलेरनुदात्तेत्त्वादिति ॥ ३ ॥

किं पुनस्तज्ज्ञापकमत आह ।

चक्षिङो ख्यनुबन्धकरणम् ॥ ४ ॥

Digitized by Google

चक्षिङ इकारेणैवानुदात्तेन सिद्धमात्मनेपदं, किमर्थं ङित्करणम् । यत् क्रियते, अनुदात्तनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनार्थम् । एतेन, वेदिभर्त्सितर्जिप्रभृतयो व्याख्याताः । आवेदयति, भर्त्सयति, तर्जयतीत्यादीनां प्रयोगाणां दर्शनात् । अन्यत्राप्यनुदात्तनिबन्धनस्यात्मनेपदस्यानित्यत्वं ज्ञापकेन द्रष्टव्यमिति ॥ ४ ॥

अनुदात्तेत्त्वनिबन्धनस्यात्मनेपदस्यानित्यत्वं चक्षिङो ङित्करणं ज्ञापकमित्याह ॥ चक्षिङो ङित्करणमिति ॥ इकारेणैवेति ॥ नन्वेवं यः पादान्त इत्यनोऽन्तग्रहणानुवृत्तेरन्तादित्त्वे सतीदित्त्वं नुम् धातोरिति नुट् स्यात् तर्हि, चक्षिङ् व्यक्तायां वाचि इत्यकारान्तः पठ्यतेति भावः उक्तमात्मनेपदस्यानित्यत्वं वेदिभर्त्सिप्रभृतिष्वपि द्रष्टव्यमित्याह ॥ एतेनेति ॥ आगर्वादात्मनेपदिन इत्यात्मनेपदित्वेनानुदात्तेत्त्वं वक्ष्यत इति भावः । अन्यथानुदात्तेत्त्वनिबन्धनस्यात्मनेपदस्यानित्यताज्ञापने किमायातमानचैवमतिप्रसङ्गः । शिष्टप्रयोगविषयत्वाज्ज्ञापकस्य ॥ ४ ॥

क्षीयत इति कर्मकर्तरि ॥ ५ ॥

क्षीयत इति प्रयोगो दृश्यते, स कर्मकर्तरि द्रष्टव्यः । क्षीयतेरनात्मनेपदित्वात् ॥ ५ ॥

क्षीयत इति ॥ क्षिणोतेः सौवादिकस्य क्तप्रत्ययान्तत्वेन प्रसिद्धावपि क्षीयत इति कर्तरि प्रयोगो दृश्यते, तस्योपपत्तिमाह ॥ स कर्मकर्तरि द्रष्टव्य इति ॥ क्षिणोतेः कर्मस्थभावकत्वात् कर्मवद्भाव इति ॥ ५ ॥

खिद्यत इति च ॥ ६ ॥

खिद्यत इति च प्रयोगो दृश्यते, सोऽपि कर्मकर्तर्येव द्रष्टव्यो, न कर्तरि । अदैवादिकत्वात् खिदेः ॥ ६ ॥

खिद्यत इति चेति ॥ चकारेण कर्मकर्तरीति समुच्चिनोति ॥ खिन्ने खिन्ने इति खिदोऽकर्मकत्वादन्तर्भावितण्यर्थत्वे प्रयोज्यकर्मस्थभावकत्वात् कर्मवद्भावः । खिदेरनुदात्तेत इयनि कृते खिद्यत

Digitized by Google

इति रूपं सिद्धचनीति शङ्कां परिहरति ॥ अदैवादिकत्वादिति ॥ ६ ॥

मार्गेरात्मनेपदमलक्ष्म ॥ ७ ॥

चुरादौ, मार्ग अन्वेषणे इति पठ्यते । आधृषाद्वा इति विकल्पनणिच्कस्तस्माद्यदात्मनेपदं दृश्यते— मार्गन्तां देहभारमिति, तद्लक्ष्म अलक्षणम् । परस्मैपदित्वान्मार्गेः । तथाच शिष्टप्रयोगः— करकिसलयं धूत्वा धूत्वा विमार्गति वासरी ॥ ७ ॥

मार्गेरिति ॥ चौरादिकस्य मार्गेः, आधृषाद्वा इति णिचो वैकल्पिकत्वेन तदभावे सति परस्मैपदित्वान्मार्गतीति शिष्टप्रयोगदर्शनाच्च परस्मैपदे प्रयोक्तव्ये, यत्तु प्रयोगे कुत्रचिदात्मनेपदं दृश्यते, मार्गन्तामिति । तल्लक्षणहीनमित्याह ॥ चुरादाविति ॥ द्वयोरपि प्रयोगयोर्दर्शनं कथमत्र व्यवस्थेति तत्राह ॥ शिष्टप्रयोग इति ॥ ७ ॥

लोलमानादयश्चानशि ॥ ८ ॥

लोलमानो वेल्लमान इत्यादयश्चानशि द्रष्टव्याः । शानचस्त्वभावः । परस्मैपदित्वाद्धातूनामिति ॥ ८ ॥

लोलमानादय इति ॥

लोलमाननवमौक्तिकहारं वेल्लुमानचिकुरस्रथमाल्यम् ।

स्विन्नवाक्त्रमविकस्वरनेत्रं कौशलं विजयते कलकण्ठ्याः ॥

इत्यादिषु लोलमानादयः प्रयोगा दृश्यन्ते । परस्मैपदित्वादेतेषां शानजन्तत्वं विरुद्धम् । आत्मनेपदत्वाच्छानच इत्याशङ्क्यायं प्रकारान्तरेण साधुत्वं समर्थयते ॥ लोलमानो वेल्लमान इति ॥ नाच्छील्यवयोवचनशक्तिषु चानशिति नाच्छील्यादिष्वर्थेषु धात्वधिकारे चानशो विधानादेते प्रयोगाश्चानशि द्रष्टव्याः । न तु शानचि । अतो न विरोध ॥ ८ ॥

लभेर्गत्यर्थत्वाण्णिचश्च कर्तुः कर्मत्वाकर्मत्वे ॥ ९ ॥

अस्खलं लभेर्यः प्राप्त्युपसर्जनां गतिमाह । अस्ति च गत्यु-

Digitized by Google

पसर्जनां प्राप्तिमाहेति ॥ अत्र पूर्वस्मिन् पक्षे गत्यर्थत्वाल्लभेर्णिच्यण्यौ यः कर्ता तस्य गत्यादिसूत्रेण कर्मसंज्ञा । यथा— दीर्घिकासु कुमुदानि विकासं लम्भयन्ति शिशिराः शशिभासः । द्वितीयपक्षे गत्यर्थत्वाभावाल्लभेर्णिच्यणौ कर्तुर्न कर्मसंज्ञा । यथा—

सितं सितिम्ना सुतरां सुनेत्रपु-
र्विसारिभिः सौधमथाथ लम्भयन् ।
द्विजावलिव्याजनिशाकरांशुभिः
शुचिस्मितां वाचमवोचदच्युतः ॥ ॥ ९ ॥

लभेरिति ॥ यद्यपि, दुलभष् प्राप्तौ इति प्राप्तिरेव लभेरर्थः । तथापि प्राप्तिर्गतिपूर्वकत्वात् प्राप्तिगत्योः कार्यकारणयोरभेदोपचारेण प्राप्त्युपसर्जनमप्यर्थत्वमपि लभेरङ्गीकृत्य प्रथमं तावत् पक्षद्वयं प्रस्तौति ॥ अस्त्ययमिति ॥ यः प्राप्त्युपसर्जनां गतिमाह सोऽयं लभिरस्ति । यश्च गत्युपसर्जनां प्राप्तिमाहाऽयमपि लभिरस्ति । बीजनाविवक्षावशाद् लभिरयं कदाचित् प्राधान्येन गतिमाह कदाचित्तु प्राप्तिमित्यर्थः । तत्र प्रथमे पक्षे निर्विवादमणिकर्तुर्णिचि कर्मत्वमित्याह ॥ अत्र पूर्वस्मिन्निति ॥ द्वितीये तु गत्यर्थत्वाभावान्नास्त्यणि कर्तुः कर्मसंज्ञेत्याह ॥ द्वितीयपक्ष इति ॥ ततश्च सितिम्नेत्यत्र कर्तृकरणयोस्तृतीया इति प्रयोज्ये कर्तरि तृतीया ॥ ९ ॥

ते मे शब्दौ निपातेषु ॥ १० ॥

त्वया मयेत्यस्मिन्नर्थे ते मे शब्दौ निपातेषु द्रष्टव्यौ । यथा— श्रुतं ते वचनं तस्य । वेदानधीत इति नाधिगतं पुरा मे ॥१०॥

ते मे इत्यादि ॥ अत्र, ते मयावेकवचनस्येति, युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोस्ते-मयावाऽऽदिष्टौ इति विभक्त्यन्तरस्थयोस्तयोरादेशाप्राप्तौ निपातेषु पाठात् तत्रापि प्रयोगसिद्धिरित्याह ॥ ते मे शब्दाविति ॥ १० ॥

तिरस्कृत इति परिभूनेऽन्तर्ध्युपचारात् ॥ ११ ॥

Digitized by Google

तिरस्कृत इति शब्दः परिभूते इष्यते । राज्ञा तिरस्कृतः— इति । स च न प्राप्नोति । तिरःशब्दस्य हि, तिरोऽन्तर्धौ इत्यन्तर्धौ गतिसंज्ञा । तस्यां च सत्यां, तिरसोऽन्यतरस्याम् इति सकारः । तत् कथं तिरस्कृत इति परिभूते, आह ॥ अन्तर्ध्युपचारादिति ॥ परिभूतो ह्यन्तर्हितवद्भवति । मुख्यस्तु प्रयोगो यथा, लावण्यप्रभर-तिरस्कृताङ्गलक्ष्म्या ॥ ११ ॥

तिरस्कृत इति ॥ तिरस्कृतशब्दस्य परिभूतार्थे प्रयोगं दर्शयँस्तस्यानुपपत्तिमुद्घाटयति ॥ तिरस्कृतशब्द इत्यादिना ॥ समाधत्ते ॥ अन्तर्ध्युपचारादिति ॥ मुख्यपूर्वकत्वाद्गौणस्य मुख्यं दर्शयति ॥ मुख्यस्त्विति ॥ ११ ॥

नैकशब्दः सुप्सुपेति समासात् ॥ १२ ॥

अरण्यानीस्थानं फलनमितनैकद्रुमिदम् इत्यादिषु नैकशब्दो दृश्यते । स च न सिद्ध्यति । नञ्समासे हि, नलोपो नञ इति नलोपे, तस्मान्नुडचि इति नुडागमे सत्यनेकमिति रूपं स्यात् । निरनुबन्धस्य नशब्दस्य समासे लक्षणं नास्ति । तत् कथं नैकशब्द इत्याह ॥ सुप्सुपेति समासात् ॥ १२ ॥

नञ्समासे हीति ॥ नलोपो नञ इति नकारलोपे सति, तस्मान्नुडचि इति नुडागमे च कृते, अनेकमिति रूपं स्यान्न तु नैकमिति । ननु न सिद्ध्यतिस्वेतरस्तु नञ्समासः, प्रकारान्तरेण किं न स्यादित्यत आह ॥ निरनुबन्धस्येति ॥ सुप्सुपेति ॥ सुबामन्त्रिते पराङ्गवत्स्वरे इत्यतः सुबित्यनुवृत्तौ, सह सुपा इति योगविभागात् सुबन्तं पदं सुबन्तेन सह समस्यत इति समासे नैकशब्दः सिद्धो भवतीत्यर्थः ॥ १२ ॥

मधुपिपासुप्रभृतीनां समासो गमिगाम्यादिषु पाठात् ॥ १३ ॥

Digitized by Google

मधुपिपासुमधुव्रतसेवितं मुकुलजालमजृम्भत वीरुधाम् इत्यादिषु मधुपिपासुप्रभृतीनां समासो गमिगाम्यादिषु पिपासुप्रभृतीनां पाठात्। श्रितादिषु गमिगाम्यादीनां द्वितीयासमासलक्षणं दर्शयति ॥ १३ ॥

मधुपिपासुप्रभृतीनामिति ॥ श्रितादिष्वग्रहणान्नात्र द्वितीयासमासः सम्भवति। नाऽपि छन्दस्तेन सह षष्ठीसमासः। न लोकेत्यादिसूत्रे उभ्रान्यचान्तेन योगे षष्ठीनिषेधात्। कथमत्र समास इति चिन्तायां समासस्य गतिमाह ॥ गमिगाम्यादिष्विति ॥ १३ ॥

त्रिवलीशब्दः सिद्धः संज्ञा चेत् ॥ १४ ॥

त्रिवलीशब्दः सिद्धो यदि संज्ञा। दिक्संख्ये संज्ञायामिति संज्ञायामेव समासविधानात् ॥ १४ ॥

त्रिवलीशब्द इति ॥

कोणस्त्रिवल्येव कुचावलावूस्तस्यास्तु दण्डस्तनुरोमराजिः।
हारोऽपि तन्त्रीरिति मन्मथस्य सङ्गीतविद्यासरलस्य वीणा ॥

किमयं संज्ञा ? असंज्ञा वा ?। असंज्ञापक्षे त्रिवलीशब्दस्य, तद्धितार्थोत्तरपदसमाहारे च इति समासो वक्तव्यः। तत्तु न संघटते। तथाहि। न तावत् पञ्चकपाल इत्यादिवत् तद्धितार्थो विषयोऽस्ति। नाऽपि, पञ्चगवधन इत्यादिवदुत्तरपदं परम्। नचापि पञ्चपात्रमित्यादिवत् समाहारः। समाहारे हि तस्यैकत्वादेकवद्भावे सति, स नपुंसकम् इति नपुंसकत्वं स्यात्। तदत्रासंज्ञापक्षो नेह इत्यभिसंधाय संज्ञापक्षमाश्रित्य समासमाह ॥ त्रिवलीशब्दः सिद्धो यदि संज्ञेति ॥ यदि त्रिवलीशब्दः संज्ञा भवति। तदा त्रयवयवावली त्रिवलीतिविग्रहे, दिक्संख्ये संज्ञायामिति समासः सिद्ध्यति ॥ १४ ॥

बिम्बाऽधर इति वृत्तौ मध्यमपदलोपिन्याम् ॥ १५ ॥

बिम्बाधरः पीयते इति प्रयोगो दृश्यते। स च न युक्तः। अधरबिम्ब इति भवितव्यम्। उपमितं व्याघ्रादिभिरिति समासे

Digitized by Google

सति तद् कर्थं बिम्बाधर इत्याह ॥ वृत्तौ मध्यमपदलोपिन्याम् ॥ ञ्जाकपार्थिवादित्वाद् समासे । मध्यमपदलोपिनि समासे सति बिम्बाकारोऽधरो बिम्बाधर इति । तेन बिम्बोष्ठशब्दोऽपि व्याख्यातः । अत्रापि पूर्ववद् वृत्तेः । शिष्टप्रयोगेषु चैष विधिः । तेन नाऽतिप्रसङ्गः ॥ १५ ॥

बिम्बाधर इति ॥ अत्र समासवृत्तिं संवेदयितुमभियुक्तप्रयोगं तावद् दर्शयति ॥ बिम्बाधरः पीयत इति ॥ प्रामाणिकप्रयोगदर्शनाद्व्यमसाधुरिति वक्तुमयुक्तमित्याशङ्क्याह ॥ स च न युक्त इति ॥ लक्षणानुगुणं प्रयोगं दर्शयन्नस्या अयुक्तत्वं दर्शयति ॥ अधरबिम्ब इति ॥ समाधत्ते ॥ वृत्तौमध्यमपदलोपिन्यामिति ॥ उक्तामुपपत्तिमन्यत्राप्यनुगमयति ॥ तेनेति ॥ ननु तर्हि व्याघ्राकारः पुरुषो व्याघ्रपुरुष इत्यपि स्यादित्यतिप्रसङ्गं परिहरति ॥ शिष्टप्रयोगेषु चैष विधिरिति ॥ १५ ॥

आमूललोलादिषु वृत्तिर्विस्पष्टपटुवत् ॥ १६ ॥

आमूललोलमामूलसरसमित्यादिषु वृत्तिर्विस्पष्टपटुवन्मयूरव्यंसकादित्वात् ॥ १६ ॥

आमूललोलादिष्विति ॥ आमूलं लोलमिति विग्रहः । अत्र तत्पुरुषाधिकारे लक्षणाऽदर्शनात् समासान्तरस्य चाप्रसक्तेः कथमामूललोलादिप्रयोगः सिद्ध्यतीति चिन्तायामविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्य इति वचनाद् विस्पष्टपटुशब्दवत् समाससिद्धिरित्याह ॥ आमूललोलमामूलसरसमिति ॥ १६ ॥

न धान्यषष्ठादिषु षष्ठीसमासप्रतिषेधः पूरणेनान्यतद्धितान्तत्वात् ॥ १७ ॥

धान्यषष्ठम्, तान्युञ्छषष्ठाङ्कितसैकतानि इत्यादिषु न षष्ठीसमासप्रतिषेधः । पूरणेन पूरणप्रत्ययान्तेनान्यतद्धितान्तत्वात् । षष्ठो भागः षष्ठ इति, पूरणाद्भागे तीयादन्, षष्ठाष्टमाभ्यां च इत्यन्-

Digitized by Google

विधानात् स प्राप्तः ॥ १७ ॥

न धान्यषष्ठादिष्विति ॥ धान्यानां षष्ठमुञ्छानां षष्ठमित्यत्र, पूरणगुणसुहितार्थेति सूत्रेण पूरणप्रत्ययान्तेन समासनिषेधः क्रियते । स च न भवतीत्याह ॥ धान्यषष्ठमिति ॥ तत्र हेतुमाह ॥ तद्धितेति ॥ षष्ठशब्दस्य तद्धितान्तत्वादित्यर्थः । कः पुनरत्र पूरणप्रत्ययव्यतिरेकेण तद्धित इत्याकाङ्क्षायां तद्धितं दर्शयति ॥ षष्ठो भाग इति ॥ पूरणाङ्गाणे तीयादन् इत्यनुवृत्तौ, षष्ठाष्टमाभ्यां अ च इत्यनुविधानादन्यतद्धितान्तत्वमित्यर्थः ॥ १७ ॥

पत्रपीतिमादिषु गुणवचनेन ॥ १८ ॥

पत्रपीतिमा, पक्ष्मालीपिङ्गलिमा इत्यादिषु षष्ठीसमासप्रतिषेधो गुणवचनेन प्राप्तो, वालिङ्यात्तु न कृतः ॥ १८ ॥

पत्रपीतिमादिष्विति ॥ अत्र पूरणगुणेत्यादिसूत्रेण गुणवाचिना षष्ठीसमासप्रतिषेधः प्राप्तः । स तु मीमांस्यात्र कृतः । अतः पत्रपीतिमादयो न युक्ता इत्याह ॥ पत्रपीतिमा, पक्ष्मालीपिङ्गलिमेति ॥ वर्त्तमानसामीप्ये इति ज्ञापकात् पत्रपीतिमादयः सिद्ध्यन्तीति केचित् । येषान्तु मतं गुणः सम्बन्धित्वाद् गुणिनमाक्षिपतीतेन गुणेन गुणिनः षष्ठीसमासानषेधः । नच वर्त्तमानः सामीप्ये गुणी । भूतभविष्यतोरेव तद्गुणित्वादिति । तेषां मते "उत्तरपदार्थप्राधान्ये" इति ज्ञापकादनित्यः षष्ठीसमासप्रतिषेध इति केचित् ॥ १८ ॥

अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः ॥ १९ ॥

अवर्ज्यो न वर्जनीयो व्यधिकरणो बहुव्रीहिः । जन्माद्युत्तरपदं यस्य स जन्माद्युत्तरपदः । यथा— सच्छास्त्रजन्मा हि विवेकलाभः, कान्तातृतीयः प्राणा इति ॥ १९ ॥

अवर्ज्य इति ॥ बहुव्रीहिः समानाधिकरणानामिति वक्तव्यमिति वचनाद् व्यधिकरणस्य बहुव्रीहेरसिद्धौ कचिद्विषये तत्प्रसिद्धिमाह ॥ अवर्ज्य इति ॥ सच्छास्त्रजन्म यस्य स सच्छास्त्रजन्मा,

Digitized by Google

काम्ये प्रिये वृत्तिर्येषां ते काम्यवृत्तय इति व्यधिकरणत्वम् । तत्र समर्थकत्वं तत्रेदं वक्तव्यम् ॥ १९ ॥

हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात् ॥ २० ॥

हस्ताग्रम् अग्रहस्तः, पुष्पाग्रमग्रपुष्पमित्यादयः प्रयोगाः कथम् । आहिताग्न्यादिष्वपठात् । पाठे वा तदनियमः स्यात् । आह ॥ गुणगुणिनोर्भेदाभेदात् । तत्र भेदाद्, हस्ताग्रादयः । अभेदादग्रहस्तादयः ॥ २० ॥

हस्ताग्रेति ॥ अत्र गुणशब्देन परार्थत्वसाहचर्यादवयवो लक्ष्यते । तथाच गुणगुणिनाविहावयवावयविनौ । तयोर्भेदविवक्षायां हस्ताऽग्राद्यः । तदा षष्ठीसमासः । अभेदविवक्षायां त्वग्रहस्तादयः । तदाऽभेदोपचारेऽपि प्रवृत्तिनिवृत्तिभेदाद्विशेषणसमासः ॥ २० ॥

पूर्वनिपातेऽपभ्रंशो लक्ष्यः ॥ २१ ॥

काष्ठतृणं तृणकाष्ठमिति यदृच्छया पूर्वनिपातं कुर्वन्ति । तत्रापभ्रंशो लक्ष्यः परिहरणीयः । अनित्यत्वज्ञापनं तु न सर्वविषयमिति ॥ २१ ॥

पूर्वनिपात इति ॥ लघ्वक्षरं पूर्वं निपततीति वार्तिककारवचनेन द्वन्द्वे पूर्वनिपातविधानात्तृणकाष्ठमिति वक्तव्ये काष्ठतृणमिति क्वचित् केनाचित् प्रयुक्तम् । तत्र पूर्वनिपातेऽपभ्रंशः शास्त्रमर्यादातिक्रमः । स लक्ष्यः परिहरणीयः । तथा न प्रयोक्तव्यमिति तात्पर्यम् । कुमारशीर्षवारीति ज्ञापकात् पूर्वनिपातव्यत्यासो भविष्यतीति तात्पर्यार्थः ॥ अनित्यत्वज्ञापनं त्विति ॥ न सर्वेति ॥ प्राप्तस्य चाबाधा इति वचनाच्छन्दःप्रयुक्तद्वन्द्वविषयमेवेति भावः ॥ २१ ॥

निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्राधिकत्वात् ॥ २२ ॥

अनभिहिते इत्यत्र सूत्रे विकृत्तद्धितसमासैरिति परिगणनं कृतम् । तस्य प्राधिकत्वान्निपातेनाप्यभिहिते कर्मणि न कर्मविभ-

Digitized by Google

क्तिर्भवति । यथा, विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्, पण्डितं मूर्ख इति मन्यते इति ॥ २२ ॥

निपातेनाऽपीति ॥ ब्राह्मणं देवदत्त इति मन्यते इत्यादावनभिहित इत्यधिकारात् तिङ्कृत्तद्धितसमासैरनभिहिते कारके कर्मणि द्वितीया भवितव्यमित्याशङ्क्याहाह ॥ निपातेनाऽपीति ॥ तत्र हेतुमाह ॥ परिगणनस्येति ॥ भगवता वार्तिककारेण प्रायिकाभिप्रायेण तिङ्कृत्तद्धितसमासैरिति परिगणनं कृतम् । ततश्चैवंविधाः प्रयोगाः सिद्धा इति दर्शयति ॥ विषवृक्ष इति ॥ अत्र संवर्धनच्छेदनक्रिययोः सकर्मकत्वेन कर्माकाङ्क्षायां न कर्मविभक्तिर्भवति विधेया । अयुक्तत्वाभिधायिना असांप्रतमितिनिपातेनाभिहितत्वात् । नन्वसाम्प्रतपदस्य तद्धितान्तत्वात् तेनैवाभिहिते न भवत्येव कर्मविभक्तिरतो नेदमुदाहरणमिति न चोदनीयम् । युक्ते काले च सांप्रतम् इत्यभिधानादतद्धितान्त एवायं निपातः । तद्धितान्तत्वे वा तस्यानन्यार्थत्वान्न तेनाभिधानमिति भावः । शब्दशक्तिस्वाभाव्यादस्याभिधायकत्वमिति द्रष्टव्यम् । मूर्ख इत्यसमुदायस्य कर्मत्वेऽपि, अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति वाक्यान्न विभक्त्युत्पत्तिः ॥ २२ ॥

शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात् ॥ २३ ॥

शकेः, शक्तिसहोश्च इति कर्मणि यति सति शक्यमिति रूपं भवति ॥ विलिङ्गवचनस्यापि विरुद्धलिङ्गवचनस्यापि, कर्माभिधायां कर्मवचने सामान्योपक्रमाद् विशेषानपेक्षायामिति । यथा—

शक्यमोषधिपतेर्नवोदयाः
कर्णपूररचनाकृते तव ।
अप्रगल्भयवसूचिकोमला-
श्छेत्तुमग्रनखसंपुटैः कराः ॥

अत्र भाष्यकृद्वचनं लिङ्गम् । यथा, शक्यं च श्वमांसादिभिरपि श्रुत प्रतिहन्तुम् इति । नचैकान्तिकः समान्योपक्रमः । तेन,

Digitized by Google

शक्या भक्तुं शक्तिति बिसिनीकन्दवत्सन्द्रपादा इत्यपि भवति॥२३

"शक्यमञ्जलिभिः पातुं वाताः कैतकगन्धिनः" इत्यादयः प्रयोगा इष्यन्ते । शक्तेः कृत्यप्रत्यये शक्यमिति रूपम् । "तयोरेव कृत्यक्तखलर्थाः" इति कर्मार्थे विहितस्य तस्य कर्माभिधायां विशेष्यवल्लिङ्गवचनाभ्यां भवितव्यमिति प्राप्ते प्राह ॥ शक्यमिति रूपं भवतीति॥ कर्माभिधायामपि शक्यमिति रूपं सिद्धम् । तत्र हेतुमाह ॥ लिङ्गवचनस्यापीति ॥ लिङ्गं च वचनं च लिङ्गवचनम् । तस्य सामान्यापेक्षमाल्लिङ्गसामान्यं नपुंसकं, वचनसामान्यमेकत्वम् । तयोरुपक्रमाद्विशेषनैरपेक्ष्येण लिङ्गवचनसामान्यस्य विवक्षणादित्यर्थः । उदाहृत्य दर्शयति ॥ यथेति ॥ एकान्तिको नियतः ॥ २३ ॥

हानिवदाधिक्यमप्यङ्गानां विकारः ॥ २४ ॥

येनाङ्गविकार इत्यत्र सूत्रे यथाऽङ्गानां हानिस्तथाधिक्यमपि विकारः । यथा, अक्ष्णा काण इति भवति तथा, मुखेन त्रिलोचन इत्यपि भवति॥ २४ ॥

हानिवदिति ॥ मुखेन त्रिलोचन इत्यत्र तृतीयाप्राप्तावनुशासनस्यादर्शनात् कथमत्र तृतीयेति चिन्तायामाह ॥ येनाङ्गविकार इति ॥ हानिर्न्यूनता । यथाङ्गानां न्यूनता विकारस्तथाधिक्यमपि विकार एव । अतो येनाङ्गविकार इति तृतीया ॥ २४ ॥

न कृमिकीटानामित्येकवद्भावप्रसङ्गात् ॥ २५ ॥

आयुषः कृमिकीटानामलङ्करणमल्पता इत्यत्र कृमिकीटानामिति प्रयोगो न युक्तः । क्षुद्रजन्तव इत्येकवद्भावप्रसङ्गात् । न च मध्यमपदलोपी समासो युक्तः । तस्याऽसर्वविषयत्वात् ॥२५॥

न कृमीति ॥ क्षुद्रजन्तुवाचिनां द्वन्द्वसमास एकवद्भावविधानाद् बहुवचनान्तप्रयोगो न साधुरित्याह ॥ आयुष इति ॥ ननु मुखसहितानासिकामुखनासिकेतिवन्मध्यमपदलोपिसमासः स्यादित्यपि न वक्तुं युक्तम् । तस्याऽसार्वत्रिकत्वादिति समर्थयते॥न चेति ॥ २५ ॥

Digitized by Google

न खरोष्ट्रावुष्ट्रखरमिति पाठात् ॥ २६ ॥

खरोष्ट्रौ वाहनं येषाम् इत्यत्र खरोष्ट्राविति प्रयोगो न युक्तः। गवाश्वप्रभृतिषूष्ट्रखरमिति पाठात् ॥ २६ ॥

न खरोष्ट्राविति ॥ गवाश्वादिगणे उष्ट्रखरमिति निपातितत्वात्, खरोष्ट्राविति व्यत्यासेन प्रयोगोऽनुपपन्न इत्याह ॥ खरोष्ट्रौ वाहनमिति ॥ २६ ॥

आसेत्यसतेः ॥ २७ ॥

लावण्यमुत्पाद्य इवास यत्नः, इत्यत्रासेरसतेर्धातोः, अम गतिदीप्त्यादानेषु इत्यस्य प्रयोगो, नाऽस्तेः । भूभावविधानात् ॥२७॥

आसेति ॥ अस्तेर्भूरित्यार्धधातुके भूभावविधानात् कथमासेति प्रयोग इति प्राप्ते, असतेर्धातोर्लिटि रूपमासेति, न पुनरस्तेरित्याह ॥ लावण्य इति ॥ २७ ॥

युद्धयेदिति युधः क्यचि ॥ २८ ॥

यो भर्तृपिण्डस्य कृते न युद्धयेद्, इति प्रयोगः । स चायुक्तः । युधेरात्मनेपदित्वात् । तत कथं युद्धयेदिसाह ॥ युधः क्यचि ॥ युधमात्मन इच्छेद् युद्धयेदिति ॥ २८ ॥

युद्धयेदिति ॥ युधेरात्मनेपदिनः परस्मैपदं दृश्यते । तस्य क्विप्रप्रयोगस्य साधुत्वं दर्शयितुमाह ॥ य इति । युधशब्दात्, सुप आत्मनः क्यच् इति क्यचप्रत्यये कृते सति लिङि युद्धयेदिति सिद्ध्यतीत्याह ॥ युधमिति ॥ २८ ॥

विरलायमानादिषु क्यङ् निरूप्यः ॥ २९ ॥

विरलायमाने मलयमारुते इत्यादिषु क्यङ् निरूप्यः । भृशादिष्वपाठात् । नापि क्यष् । लोहितादिष्वपाठात् ॥ २९ ॥

विरलायमानादिष्विति ॥ क्यङ्क्यषोरप्राप्तत्वात् प्रत्याचष्टे॥विरलायमान इति ॥ २९ ॥

Digitized by Google

अहेतौ हन्तेर्णिच्चुरादिपाठात् ॥ ३० ॥

घातयित्वा दशास्यम् इत्यत्राहेतौ णिजू दृश्यते । स कथमित्याह । चुरादिपाठात् ॥ चुरादिषु, चट स्फुट भेदे, घट संघाते, हन्त्यर्थाश्च इति पाठात् ॥ ३० ॥

अहेताविति ॥ घातयित्वेत्यत्राहेतुकर्तृभावेऽपि प्रयोगो दृश्यते । स च चुरादिपाठात् स्वार्थण्यन्तः साधुरित्याह ॥ घातयित्वेति ॥३०॥

अनुचरीति चरेष्टित्वात् ॥ ३१ ॥

अनुचरी प्रियतमा मदालसा इत्यत्रानुचरीति न युक्तः । ईकारलक्षणाभावात् । तत् कथम् । आह ॥ चरेष्टित्वात् ॥ पचादिषु, चरडिति पठ्यते ॥ ३१ ॥

अनुचरीति ॥ आक्षेपपूर्वकमनुचरीति पदस्य साधुत्वं समर्थयते॥ अनुचरी प्रियतमेति ॥ ईकारलक्षणाभावादिति ॥ पचाद्यजन्तत्वेन ङीप्प्राप्तेरभावादित्यर्थः ॥ ३१ ॥

केसरालमित्यलतेरणि ॥ ३२ ॥

केसरालं शिलीध्रम् इत्यत्र केसरालमिति कथम् । आह ॥ अलतेरणि ॥ अल भूषणपर्याप्तिवारणेषु इत्यस्माद्धातोः केसरशब्दे कर्मण्युपपदे, कर्मण्यण् इत्यनेनाऽणि सति केसरालमिति सिद्ध्यति ॥ ३२ ॥

केसरशब्दस्य प्राण्यङ्गवाचित्वाकारान्तत्वयोरभावात्, प्राणिस्थादातो लजन्यतरस्याम् इति लजभावात् कथं केसरालमिति प्राप्ते तदुपपत्तिं वक्तुमाह ॥ केसरालमिति ॥ वृत्तिः स्पष्टार्था ॥ ३२ ॥

पत्रलमिति लातेः के ॥ ३३ ॥

पत्रलं वनमिदं विराजते इत्यत्र पत्रलमिति कथम् । आह ॥ लातेः के ॥ ला आदाने इत्येतस्माद्धातोरादानार्थात् पत्रशब्दे क-

Digitized by Google

र्मण्युपपदे, आतोऽनुपसर्गे क इति कमत्यये सतीति ॥ ३३ ॥

पत्रशब्दः सिध्मादिषु न पठ्यते इति, सिध्मादिभ्यश्च इति नास्ति लच्प्रत्यय इति कथं पत्रलमिति चिन्तायां साधुत्वं समर्थयते ॥ पत्रलमिति ॥ पत्राणि लाति आदत्त इति विग्रहे, आतोऽनुपसर्गे कः इति कप्रत्यये सति उपपदसमासे कृते, पत्रलमिति सिद्धमित्याह ॥ पत्रलं वनमिति ॥ ३३ ॥

महीध्रादयो मूलविभुजादिदर्शनात् ॥ ३४ ॥

महीध्रभरणीध्रादयः शब्दा, मूलविभुजादिदर्शनात् कमत्यये सतीति । महीं धरतीति महीध्र इत्येवमादयोऽन्येऽपि द्रष्टव्याः ३४

महीध्रादय इति ॥ महीं धरतीति विग्रहे मूलविभुजादेराकृतिगणत्वात् कप्रत्यये कृते कित्त्वेन गुणाभावाद्यणादेशो स्यात महीध्रादयः सिद्धा इत्याह ॥ महीध्रधरणीध्रादय इति ॥ ३४ ॥

ब्रह्मादिषुहन्तेर्नियमादरिहाद्यासिद्धिः ॥ ३५ ॥

ब्रह्मादिषूपपदेषु हन्तेः किन्विधौ, ब्रह्मभ्रूणवृत्रेषु इत्यत्रारिहा रिपुहा इत्येवमादीनामसिद्धिः ॥ नियमात् ॥ ब्रह्मादिष्वेव, हन्तेरेव, किन्येव, भूतकाल एवेति चतुर्विधश्चात्र नियम इति नियमान्यतरविषयो निरूप्यः ॥ ३५ ॥

ब्रह्मादिष्विति ॥ ब्रह्मभ्रूणवृत्रेषु किप् इत्यत्र ब्रह्मादिष्वेवोपपदेषु सत एव काले हन्तेरेव धातोः किन्येव प्रत्ययो भवतीत्युपपदकालधातुप्रत्ययविषयस्य चतुर्धानियमस्यानुशिष्टत्वादरिहेत्यादीनामसिद्धिरित्याह ॥ ब्रह्मादिषूपपदेष्विति ॥ ३५ ॥

ब्रह्मविदादयः कृदन्तवृत्त्या ॥ ३६ ॥

ब्रह्मविद्, वृत्रभिदित्यादयः प्रयोगा न युक्ताः । ब्रह्मभ्रूण इत्यादिषु हन्तेरेव इति नियमात् । आह ॥ कृदन्तवृत्त्या ॥ वेत्तीति विद् । भिनत्तीति भित् । किप् चेति किप् । ततः कृदन्तैर्विदादिभिः सह ब्रह्मादीनां षष्ठीसमास इति ॥ ३६ ॥

Digitized by Google

ननु तर्हि चतुर्धानियमाश्रयणे ब्रह्मविदादीनां का गतिरितिप्राप्ते प्राह ॥ ब्रह्मविद् वृत्रभिदिति ॥ उपपदकालनैरपेक्ष्येण क्विपि सति समासान्ताश्रयणेन, ब्रह्मविदादयस्सिद्ध्यन्तीति व्याचष्टे ॥ वेत्तीति ॥ वेत्तीति वित्, भिनत्तीतिभिदितिव्युत्पत्तिसिद्धेन कृदन्तेन सह षष्ठीसमासे सति ब्रह्मविदादीनां साधुत्वमित्यर्थः ॥ ३६ ॥

तैर्महीधरादयो व्याख्याताः ॥ ३७ ॥

तैर्विदादिभिर्महीधरादयो व्याख्याताः । धरतीति धरः । महा धरो महीधरः । एवं गङ्गाधरादयो व्याख्याताः ॥ ३७ ॥

उक्तामेतां युक्तिमन्यत्रापि योजयति ॥ तैरिति ॥ अत्र, कर्मण्यण् इति सूत्रेण कर्मण्युपपदे धातोरण्विधानान्महीधरादीनामसाधुत्वशङ्कायामिहाप्युपपदनैरपेक्ष्यषष्ठीसमासाश्रयणाभ्यां साधुत्वमस्तीति व्याचष्टे ॥ धरतीति धर इति ॥ ३७ ॥

भिदुरादयः कर्मकर्तरि कर्तरि च ॥ ३८ ॥

भिदुरं काष्ठम् । भिदुरं तमः । तिमिरभिदुरं व्योम्नः शृङ्गम् इति, छिदुरातपो दिवसः, मत्सरच्छिदुरं प्रेम, भङ्गुरा प्रीतिः, मातङ्गं मानभङ्गुरम् इत्यादयोऽपि प्रयोगा दृश्यन्ते, कथमित्याह ॥ ते कर्मकर्तरि कर्तरि च भवन्ति। कर्मकर्तरि चायमिष्यते इत्यत्र, चकारः कर्तरि चेत्यस्य समुच्चयार्थः ॥ ३८ ॥

भिदुरादय इति ॥ कर्मकर्तरि चायमिष्यते इत्यत्र चकारं प्रयुक्तवता तत्र भवता भाष्यकृता कर्तर्यपि प्रयोगोऽभ्यनुज्ञात इति भिदुरादयः शब्दाः कर्मकर्तरि, कर्तरि च प्रयोक्तव्या इत्याह॥भिदुरं काष्ठमिति ॥ ३८ ॥

गुणविस्तरादयश्चिन्त्याः ॥ ३९ ॥

गुणविस्तरः, व्याक्षेपविस्तर इत्यादयः प्रयोगाश्चिन्त्याः । प्रथने वावशब्दे इति घञ्प्रसङ्गात् ॥ ३९ ॥

गुणविस्तरादय इति॥प्रथने वावशब्द इति विपूर्वात्स्तृणातेरशब्द-

Digitized by Google

विषये प्रथने घञ्विधानाद् गुणविस्तार इत्येव प्रयोक्तव्यं, न तु गुणविस्तर इतीत्याह ॥ प्रथन इति ॥ ३९ ॥

अवतरापचायशब्दयोर्दीर्घह्रस्वत्वव्यत्यासो बालानाम् ॥ ४० ॥

अवतरशब्दस्यापचायशब्दस्य च दीर्घत्वह्रस्वत्वव्यत्यासो बालानां बालिशानां प्रयोगेष्विति । ते ह्यवतरणमवतार इति प्रयुञ्जते । मारुतावतार इति । स त्वयुक्तः । भावे तरतेरघञ्विधानात् । अपचायमपचय इति प्रयुञ्जते । पुष्पापचय इति । अत्र हस्तादाने चेरस्तेये इति घञ् प्राप्त इति ॥ ४० ॥

दीर्घव्यत्यास इति ॥ दीर्घस्य स्थानात् प्रच्याव्यंस्थाने करणं व्यत्यासः । बालानां विमर्शविधुराणां भवतीति शेषः।तमेव व्यत्यास दर्शयति ॥ ते हीति ॥ अघञ्विधानादिति ॥ अवे तॄस्त्रोर्घञ् इति करणाधिकरणयोरेव घञ्विधानात् तरतेः, ऋदोरप् इति भावेऽप्प्रत्यय एव भवतीत्यर्थः ॥ अपचायमिति॥हस्तादाने चेरस्तेये इति हस्तेनादानेऽभिधेये चिनोतेर्घञ्विधानादप्प्रत्ययो न प्राप्नोतीत्यर्थः ॥ ४० ॥

शोभेति निपातनात् ॥ ४१ ॥

शोभेत्ययं शब्दः साधुः । निपातनात् । शुभ शुम्भ शोभार्थौ इति शुभेर्भिदादेराकृतिगणत्वादङ् सिद्ध एव । गुणप्रतिषेधाभावस्तु निपातनत इति। शोभार्थाविसत्रैकदेशे, किं शोभा, आहोस्विच्छोभ इति विशेषावगतिराचार्यपरम्परोपदेशादिति ॥ ४१ ॥

शोभेति । षिद्भिदादिभ्योऽङ् इति शुभेर्धातोर्भिदादिषु पाठादङ्प्रत्यये सति ङित्करणेन गुणप्रतिषेधे प्रसक्ते निपातनाद् गुणसिद्धिरित्याह ॥ शोभेत्ययं शब्द इति ॥ ४१ ॥

अविधौ गुरोः स्त्रियां बहुलं विवक्षा ॥ ४२ ॥

अविधावविधाने, गुरोश्च हल इति स्त्रियां बहुलं विवक्षा ।

Digitized by Google

क्वचिद्विवक्षा, क्वचिदविवक्षा, क्वचिदुभयमिति । विवक्षा यथा, ईहा लज्जेति । अविवक्षा यथा, आतङ्क इति । विवक्षाविवक्षे यथा, बाधा बाधः, ऊहा ऊहः, व्रीडा व्रीड इति ॥ ४२ ॥

अविधाविति बहुलग्रहणस्य विवक्षितमर्थमाह ॥ क्वचिद्विवक्षा क्वचिदविवक्षा, क्वचिदुभयमिति ॥ आतङ्क इत्यादिषु स्त्रीत्वस्याप्रविवक्षितत्वाद् घञेव भवति ॥ ४२ ॥

व्यवसितादिषु क्तः कर्तरि चकारात् ॥ ४३ ॥

व्यवसितः, प्रतिपन्न इत्यादिषु भावकर्मविहितोऽपि क्तः कर्तरि । गत्यादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् । भावकर्मानुकर्षणार्थत्वं चकारस्येतिचेद्, आवृत्तिः कर्तव्या ॥ ४३ ॥

व्यवसितादिष्विति ॥ व्यवसितः, प्रतिपन्न इत्यादिषु कर्तरि क्तप्रत्ययो न प्राप्नोति । सकर्मकेभ्यो धातुभ्यः कर्मणि क्तप्रत्ययविधानाद् गत्यर्थादिसूत्रेण चाप्राप्तेरिति प्राप्ते गत्यर्थादिसूत्रे चकारेणानुक्तसमुच्चयार्थेन व्यवस्यतिप्रभृतयः समुच्चीयन्त इत्याह व्यवसित इति । ननु भावकर्मणोरनुकर्षणार्थश्चकारः कथमन्यदप्यनुक्तं समुच्चिनुयादिति शङ्कते ॥ भावकर्मेति ॥ समाधत्ते ॥ आवृत्तिरिति ॥ चकारस्यावृत्तौ भावकर्मणोरनुकर्षणार्थ एकश्चकारः, अन्यः पुनरनुक्तसमुच्चयार्थ इति येनकेनाप्युपायेन शिष्टप्रयोगस्य गतिः कल्पनीयेत्यर्थः ॥ ४३ ॥

आहेति भूतेऽन्यणलन्तभ्रमाद् ब्रुवो लटि ॥ ४४ ॥

ब्रुवः पञ्चानाम् इत्यादिना, आहेति लट् व्युत्पादितः । स भूते प्रयुक्तः । इत्याह भगवान् प्रभुः, इति । अन्यस्य भूतकालाभिधायिनो णलन्तस्य लिटि भ्रमात् । निपुणाश्चैवं प्रयुञ्जते । आह स्म स्मितमधुमधुराक्षरां गिरम इति । अनुकरोति भगवतो नारायणस्य इत्यत्राऽपि, मन्ये— स्मशब्दः कविना प्रयुक्तो लेखकैस्तु प्रमादान्न लिखित इति ॥ ४४ ॥

Digitized by Google

आहेति ॥ किमिच्छसीति स्फुटमाह वासव इत्यादिष्वाहेति भूते प्रयुज्यते । स च प्रयोगोऽनुपपन्नः । ह्वयः पञ्चानामादित आहो ह्वयः ईति ह्वयो लटि णलाद्यादेशपञ्चकविधानादन्यत्रलन्तेति ॥ लिटि विहितो यो णल् तदन्तत्वभ्रान्तिमूलोऽयं प्रयोग इत्यर्थः । आहेत्यव्ययमिति केचित्तु समादधते । शिष्टप्रयोगशैली दर्शयति॥निपुणाश्चेति ॥ ऊट् स्मे इति लटो विधानात् । प्रसङ्गादन्यत्रापि भूतार्थे ऊट्प्रयोगस्योपपत्तिमाह ॥ अनुकरोतीति ॥ ४४ ॥

शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः ॥ ४५ ॥

उपस्रोतः स्वस्थस्थितमहिषशृङ्गाग्रशबलाः स्रवन्तीनां जाताः भ्रमुदितविहङ्गास्तटभुवः । भ्रमरोत्करकल्माषाः कुसुमानां सपद्मयः इत्यादिषु स्त्रियां टापोऽप्राप्तिः । अन्यतो ङीष् इति ङीष्विधानात् । तेन शबली करभोषीति भवति ॥ ४५ ॥

शबलादिभ्य इति । अन्यतो ङीष् इति ङीष्विधानाच्छबलकल्माषादिभ्यः स्त्रियां टाप्अवयस्याप्राप्तिरिति । तथा प्रयोगं प्रदर्श्य प्रतिषेधति ॥ उपस्रोत इति ॥ ४५ ॥

प्राणिनि नीलेति चिन्त्यम् ॥ ४६ ॥

कुवलयदलनीला कोकिला बालचूते इत्यादिषु नीलेति चिन्त्यम् । कोकिला नीलीति भवितव्यम् । नीलशब्दात्, जानपद इत्यादिसूत्रेण, प्राणिनि च इति ङीष्विधानात् ॥ ४६ ॥

प्राणिनीति ॥ जानपदादिसूत्रे वृत्तिकारेण, नीलादोषधौ प्राणिनि च इति विषयव्यवस्थापनात् प्राणिनि विषये नीलशब्दान्ङीष् प्रत्ययः प्राप्तो, न तु टाप् । अतः प्राणिनि नीलेति न प्रयोक्तव्यमित्याह ॥ कुवलयेति ॥ ४६ ॥

मनुष्यजातेर्विवक्षाविवक्षे ॥ ४७ ॥

इतो मनुष्यजातेः, ऊङुत इत्यत्र मनुष्यजातेर्विवक्षा,अविवक्षा च लक्ष्यानुसारतः ।

Digitized by Google

मन्दरस्य मदिराक्षि पार्श्वतो निम्ननाभि न भवन्ति निम्नगाः।
वा सुवासुकिविकर्षणाद्भवा भामिनीह पदवी विभाव्यते ॥

अत्र मनुष्यजातेर्विवक्षायाम्, इनो मनुष्यजातेरिति ङीषि सति, अम्बार्थनद्योर्ह्रस्व इति संबुद्धौ ह्रस्वत्वं सिद्ध्यति । नाभिशब्दात् पुनः, इनश्च प्राण्यङ्गात् इनीकारे कृते, निम्ननाभिकेति स्यात् ।

हृतोष्ठरागैर्नयनाद्बिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषाभिन्नगतेरसंशयं शुकोदरश्यामभिदं स्तनांशुकम् ॥

अत्र निमग्ननाभेरिति मनुष्यजातेरविवक्षेति ङीषू न कृतः । सुतनु जहीहि मानं पश्य पादानतं माम् इत्यत्र मनुष्यजातेर्विवक्षेति सुतनुशब्दात् ऊङ्[1] इत्यूङि सति ह्रस्वत्वे सुतन्विति सिद्ध्यति । वरतनुरथवाऽसौ नैव दृष्टा त्वया मे । अत्र मनुष्यजातेरविवक्षेत्यूङ् न कृतः ॥ ४७ ॥

मनुष्यजातेरिति ॥ निम्ननाभिसुतनुप्रभृतिषु यदि मनुष्यजातिस्वमभ्युपेयते तदा, इनो मनुष्यजातेः, ऊङ्[1] इति ङीषूङ्प्रत्यययोः प्राप्तौ, निम्ननाभेः, सुतनोरित्यादयः प्रयोगा न सिद्ध्येयुः । यदि नाभ्युपेयते तर्हि संबुद्धौ, निम्ननाभि, सुतन्वित्यादयः प्रयोगा न सिद्धाः स्युः । ततः कथं प्रयोगव्यवस्थेति विचारणायामुभयत्र साधुत्वं व्यवस्थापयति ॥ इनो मनुष्यजातेरिति ॥ वक्तुर्विवक्षितपूर्विका हि शब्दप्रवृत्तिरिति न्यायेन मनुष्यजातिर्विवक्ष्यमाणाया अपि क्वचिद्विवक्षा, क्वचिदविवक्षा चेति लक्ष्यानुसारेणात्रप्रश्रणीयेति प्रयोगदर्शनपूर्वकं विवक्षाविषये व्युत्पादयति ॥ मन्दरस्येति॥अत्र मनुष्यजातिविवक्षायां रूपमिद्धि दर्शयति॥इनो मनुष्यजातेरिति॥ननु, इनश्च प्राण्यङ्गवाचिनो वा ङीष् वक्तव्य इति नाभिशब्दादीकारे कृते, अम्बार्थनद्योर्ह्रस्व इति ह्रस्वत्वे च कृते निम्ननाभीति संबुद्धिः सिद्ध्यति, किमनेन यत्नेनेति चेत् तत्राह ॥ नाभिशब्दादिति ॥ निम्ननाभीत्यत्र बहुव्रीहिसमासे, नद्यृतश्च इति कपा समासान्तेन, न कपि इति ह्रस्वत्वप्रतिषेधेन च भावितव्यम् । ततश्च निम्ननाभीके इति स्याद्, न तु निम्ननाभ इति । इनो मनुष्यजातेः क्वचिद्विवक्षां द-

Digitized by Google

शयति ॥ इतोष्टरागैरिति ॥ उकन्वायेन सुनसुशब्दादौ विवक्षाविवक्षे दर्शयति ॥ सुनसु जहिहीति ॥ ४७ ॥

ऊकारान्तादप्यूङ् प्रवृत्तेः ॥ ४८ ॥

उत ऊङ् विहित ऊकारान्तादपि क्वचिद् भवति । आचार्यप्रवृत्तेः । क्वाऽसौ प्रवृत्तिः । अप्राणिजातेश्चारज्ज्वादीनाम् इति । अलाबूः, कर्कन्धूरित्युदाहरणम् । तेन, सुभ्रु किं संभ्रमेण । अत्र सुभ्रुशब्द ऊङि सिद्धो भवति । ऊङि त्वऽसति सुभ्रूरिति स्यात् ॥ ४८ ॥

ऊकान्तादपीति ॥ यद्यपि, ऊङुत इत्यत्र तपरकरणमुकान्तादूङ्विधानार्थं कृतं, तथाप्याचार्यवचनसामर्थ्यादूकारान्तादप्यूङ् प्रवर्तत इत्याह ॥ उत ऊङ् विहित इति ॥ प्रश्नपूर्वकं प्रवृत्तिं दर्शयति ॥ क्वाऽसौ प्रवृत्तिरितिं ॥ प्रवृत्तिरारम्भः । अलाबूः । कर्कन्धूरित्युदाहरणसिद्ध्यर्थम्, अप्राणिजातेश्चारज्ज्वादीनाम् इत्यूकारान्तादप्यूङ्प्रत्ययारम्भात्तपरकरणमविवक्षितमिति ज्ञायते । ननु यदेतदूकारान्तादूङ्विधानं तत् पिष्टपेषणप्रायमिति शङ्कां परिहरति ॥ तेनेति ॥ सुभ्रुशब्दादपि मनुष्यजातिविवक्षायामूङ्प्रत्यये नदीसंज्ञायां संबुद्धौ ह्रस्वो भवतीति दर्शयति ॥ अत्र सुभ्रुशब्द इति ॥ ४८ ॥

कार्तिकीय इति ठञ् दुर्धरः ॥ ४९ ॥

कार्तिकीयो नभस्वान् इत्यत्र कालाट्ठञ् इति ठञ् दुर्धरः । ठञ्भवनं दुःखेन ध्रियत इति ॥ ४९ ॥

कार्तिकीय इति ॥ अत्र, कार्तिके भव इति भवार्थत्वं वक्तुं युक्तम् । तथात्वे कालाट्ठञ् इति शैषिकेष्वर्थेषु विधीयमानष्ठञ् दुर्निवारतया प्राप्नोति । अतः, कार्तिकीय इति न सिद्ध्यतीत्याह ॥ अत्रेति ॥ दुर्धर इति पदार्थमाह ॥ दुःखेनेति ॥ दुर्निरास इत्यर्थः ॥ ४९ ॥

शार्वरमिति च ॥ ५० ॥

शार्वरं तम इत्यत्र च, कालाट्ठञ् इति ठञ् दुर्धरः ॥ ५० ॥

Digitized by Google

शार्वरमिति ॥ अत्रापि उण्यो दुर्घटत्वेन शार्वरमिति न सिद्ध्यतीत्याह ॥ शार्वरं तम इति ॥ ५० ॥

शाश्वतमिति प्रयुक्तेः ॥ ५१ ॥

शाश्वतं ज्योतिरित्यत्र शाश्वतमिति न सिद्ध्यति । कालाट्ठञ् इति ठञ्प्रसङ्गात् । येषां च विरोधः शाश्वतिक इति सूत्रकारस्यापि प्रयोगः । आह ॥ प्रयुक्तेः ॥ शाश्वते प्रतिषेध इति प्रयोगात्, शाश्वतमिति भवति ॥ ५१ ॥

शाश्वते प्रतिषेध इति वार्तिककारवचनाद्ब्राऽण्प्रत्यये सति शाश्वतमिति शब्दः साधुरित्याक्षेपपूर्वकं समर्थ्यते ॥ शाश्वतं ज्योतिरिति ॥ ५१ ॥

राजवंश्यादयः साध्वर्थे यति भवन्ति ॥ ५२ ॥

राजवंश्याः, सूर्यवंश्या इत्यादयः शब्दाः, तत्र साधुरित्यनेन साध्वर्थे यति प्रत्यये सति साधवो भवन्ति । भवार्थे पुनर्दिग्रादिपाठेऽपि वंशशब्दस्य वंशशब्दान्ताच्च यत् प्रत्ययः । तदन्तविधेः प्रतिषेधात् ॥ ५२ ॥

राजवंश्यादय इति ॥ वंशशब्दस्य दिगादिषु पाठाद्, दिग्रादिभ्यो यादिति भवार्थे यत् प्रत्ययो विधीयते । स च वंशशब्दात्ताच्च प्राप्नोति । प्रहणवता प्रातिपदिकेनेति तदन्तविधिप्रतिषेधात् । साध्वर्थविवक्षायां तु, तत्र साधुरिति यत् प्रत्यये सति राजवंश्यादयः सिद्धा इत्याह ॥ राजवंश्या इति ॥ ५२ ॥

दारवशब्दो दुष्प्रयुक्तः ॥ ५३ ॥

दारवं पात्रमिति दारवशब्दो दुष्प्रयुक्तः । निर्वृत्तं वृक्षशरादिभ्य इति मयटा भवितव्यम् । नन्वु विकारावयवयोरर्थयोर्मयड् विधीयते । अत्र तु, दारुण इदमिति विवक्षायां दारवमिति भविष्यति । नैतदेवमपि स्यात् । वृक्षाच्च इति छविधानात् ॥ ५३ ॥

Digitized by Google

दारवशब्द इति ॥ दारुणो विकार इत्यस्मिन्नर्थे, नित्यं वृद्धशरादिभ्य इति मयटो विधानाद् दारुमयमित्यत्र प्रयोक्तव्यं, न तु दारवमितीत्याह ॥ दारवं पात्रमिति ॥ नन्वत्र विकारार्थो न विवक्षितः, किन्तु सम्बन्धसामान्यम् । ततः, तस्येदमिति दारुशब्दादण्प्रत्ययं कृते दारवमित्येव भवतु, को विरोध इति शङ्कते ॥ नन्विति ॥ सम्बन्धसामान्यविवक्षायामप्यण् प्रत्ययो न सिद्ध्यति । वृद्धाच्छ इति छप्रत्ययप्रसङ्गादिति परिहरति ॥ नैतदेवमिति ॥ ५३ ॥

मुञ्जिमादिभ्विमनिज्मृग्यः ॥ ५४ ॥

मुञ्जिमन्, प्रौढिमा इत्यादिषु इमनिज् मृग्यः = अन्वेषणीय इति ॥ ५४ ॥

मुञ्जिमादिभ्विति ॥ पृथ्वादिभ्य इमनिज्वा इतीमनिच् प्रत्ययो विधीयते । स च मुञ्जप्रौढादिशब्देभ्यो न प्राप्नोति । तेषां पृथ्वादिपाठाभावादित्यभिप्रायेण व्याचष्टे ॥ मुञ्जिमा प्रौढिमेति ॥ ५४ ॥

औपम्यादयश्चातुर्वर्ण्यवत् ॥ ५५ ॥

औपम्यं सान्निध्यमित्यादयश्चातुर्वर्ण्यवत् । गुणवचन इत्यत्र, चातुर्वर्ण्यादीनामुपसंख्यानम् इति वार्तिकात् स्वार्थिकष्यञन्ताः ॥ ५५ ॥

औपम्यादय इति ॥ चातुर्वर्ण्यादयः स्वार्थे इति स्वार्थे के ष्यञि चातुर्वर्ण्यमिति यथा सिद्ध्यति तथा चातुर्वर्ण्यादिपाठादुपमैवौपम्यं, सन्निधिरेव सान्निध्यमित्यादयः स्वार्थिकष्यञन्ताः साधिता इत्याह ॥ औपम्यं, सान्निध्यमिति ॥ ५५ ॥

ष्यञः षित्करणादीकारो बहुलम् ॥ ५६ ॥

गुणवचनब्राह्मणादिभ्य इति यः ष्यञ् तस्य षित्करणादीकारो भवति । स बहुलम् । ब्राह्मण्यमित्यादिषु न भवति । सामग्र्यं सामग्री, वैदग्ध्यं वैदग्धीति ॥ ५६ ॥

ष्यञ इति ॥ गुणवचनब्राह्मणादिभ्यः कर्मणि च इति ष्यञ् वि-

Digitized by Google

धीयते । ततश्च स्वअन्तेभ्यः स्त्रियां, विप्रौरादिभ्यश्च इति यो ङीप्रत्ययो विधीयते, स ईकारो बहुलं भवति । क्वचिच्च प्रवर्तते, क्वचिद्विकल्पेन प्रवर्तत इत्याह ॥ ब्राह्मण्यमित्यादिष्विति ॥ ५६ ॥ (१)

धन्वीति व्रीह्यादिपाठात् ॥ ५७ ॥

व्रीह्यादिषु धन्वन्शब्दस्य पाठाद्धन्वीति इनौ सति सिद्धो भवति ॥ ५७ ॥

धन्वीति ॥ धन्वन्शब्दस्यादन्तत्वाभावात्, अत इनिठनौ इतीनिप्रत्ययस्याप्राप्तौ व्रीह्यादेराकृतिगणत्वेनेनिप्रत्यये सति धन्वीति सिद्ध्यतीत्याह ॥ व्रीह्यादिष्विति ॥ ५७ ॥

चतुरस्रशोभीति णिनौ ॥ ५८ ॥

बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेनेत्यत्र चतुरस्रशोभीति न युक्तम् । व्रीह्यादिषु शोभाशब्दस्य पाठेऽपि इनिरत्र न सिद्ध्यति । ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् । भवतु वा तदन्तविधिः । कर्मधारयान्मत्वर्थीयानुपपत्तिः। लघुत्वात् प्रक्रमस्येति बहुव्रीहिणैव भवितव्यम् । तत्कथमिति मत्वर्थीयस्याऽप्राप्तौ चतुरस्रशोभीति प्रयोगः । आह ॥ णिनौ ॥ चतुरस्रं शोभत इति ताच्छीलिके णिनावयं प्रयोगः । अथ, अनुमेयशोभीति कथम् । न ह्यत्र पूर्ववद् वृत्तिः शक्या कर्तुमिति । शुभेः साधुकारिण्यावश्यके वा णिनिं कृत्वा तदन्ताच्च भावप्रत्यये पश्चाद् बहुव्रीहिः कर्तव्यः । अनुमेयं शोभित्वं यस्येति । भावप्रत्ययस्तु गतार्थत्वान्न प्रयुक्तः । यथा, निराकुलं तिष्ठति, सधीरमुवाचेति ॥ ५८ ॥

चतुरस्रशोभीति ॥ अत्र साधुत्वं समर्थयिष्यमाणः प्रामाणिकप्र-

(१) ५६—५७ सूत्रयोर्मध्ये, सामग्र्यमित्यादिषु विकल्पेन इत्येवं मूलपुस्तकेषु सूत्रान्तरं दृश्यते । तच्च प्रक्षिप्तमिति त्रिपुरहरभूपालेन न व्याख्यातम् ॥

Digitized by Google

योगं तावत् प्रदर्शयति ॥ बभूवेति ॥ अत्र मत्वर्थीयप्रत्ययस्यानुपपत्तिमाह ॥ अत चतुरस्रशोभीति ॥ चतुरस्रा चासौ शोभा च चतुरस्रशोभा, साऽस्यास्तीति चतुरस्रशोभीति मत्वर्थीयेन सिद्ध्यति । व्रीह्यादिपाठाभावादिति शङ्कुतुरमभिप्रायः । अभ्युपगम्यमाने वा व्रीह्यादिपाठे, ग्रहणवता प्रातिपदिकेन न तदन्तविधिरिति वार्तिककारवचनाच्छोभाशब्दान्तादिनिप्रत्ययो न प्राप्नोतीत्याह ॥ व्रीह्यादिष्विति ॥ यथा कथञ्चिदभ्युपगमेऽपि वा तदन्तविधेः स दोषस्तदवस्थः । न कर्मधारयान्मत्वर्थीय इति निषेधादित्याह ॥ भवतीति ॥ कर्मधारयबहुव्रीहिक्रमपरीक्षायां बहुव्रीहिपरिपाटीश्रेयसी । लाघवात् । अतश्चित्रगुशब्दादिवद् बहुव्रीहेर्न मत्वर्थीयस्य प्राप्तिरित्याह ॥ लघुत्वादिति ॥ प्रयोगानुपपत्तिप्रतिपादनं निगमयति ॥ तत् कथमिति ॥ चतुरस्रं शोभितुं शीलमस्येति विग्रहे, सुप्यजातौ णिनिस्ताच्छील्ये इति ताच्छीलिके णिनिप्रत्यये सति चतुरस्रशोभीति सिद्ध्यतीति सिद्धान्तयति ॥ चतुरस्रं शोभत इतीति ॥ ननु चतुरस्रशोभीत्यत्र समर्थितेऽपि साधुत्वेऽनुमेयशोभीति न सिद्ध्यति, उक्तन्यायाऽप्रवृत्तेरिति शङ्कते ॥ अथेति ॥ तदप्रवृत्तिमेव दर्शयति ॥ न ह्यत्रेति ॥ चतुरस्रशोभीतिवदनुमेयं शोभितुं शीलमस्येति विग्रहे विवक्षितार्थाऽसाधुः ॥ कर्मविवक्षाया असंभवात् । अविवक्षिते कर्मण्युपपदे कृत्प्रत्ययः कर्तुं न शक्यत इति शङ्कार्थः । ताच्छीलिकणिनेरसम्भवेऽपि, साधुकारिणि चेति वक्तव्यबलात् । आवश्यकाधमर्ण्ययोर्णिनिरिति सूत्राद्वा साधुकारिण्यावश्यके वार्थे विवक्षिते णिनिः सिद्ध्यति । ततः शोभिनो भाव इति भावार्थे त्वप्रत्यये सति पश्चादनुमेयं शोभित्वं यस्येति बहुव्रीहौ सत्यनन्तरम्, उक्तार्थानामप्रयोग इति त्वप्रत्ययस्य निवृत्तौ च सत्यामनुमेयशोभीतिसिद्ध्यतीति परिहरति ॥ शुभेरिति ॥ ५८ ॥

कञ्चुकीया इति क्यचि ॥ ५९ ॥

जीवन्ति राजमहिषीमनु कञ्चुकीया इति कथम् । मत्वर्थीयस्य छप्रत्ययस्याभावात् । अत आह ॥ क्यचि ॥ क्यचि प्रत्यये सति कञ्चुकीया इति भवति । कञ्चुकमात्मन इच्छन्ति कञ्चुकीयाः ॥ ५९ ॥

Digitized by Google

कञ्चुकीया इति ॥ कञ्चुको वेषां सन्तीति कञ्चुकीया इति न शक्यते वक्तुम् । छप्रत्ययस्य मत्वर्थीयस्याभावात्, कथं कञ्चुकीया इति चोदयति ॥ जीवन्तीत्यादिना ॥ कञ्चुकमात्मन इच्छन्तीत्येतस्मिन्नर्थे, सुप आत्मनः क्यच् इति क्यचि कृते, क्वचि चेतीकारे च सति ततः पचाद्यचि कृते कञ्चुकीया इति सिद्ध्यतीति परिहरति ॥ क्वचि प्रत्यये सतीति ॥ ५९ ॥

बौद्धप्रतियोग्यपेक्षायामप्यातिशायनिकाः ॥ ६० ॥

बौद्धस्य प्रतियोगिनोऽपेक्षायामप्यातिशायनिकास्तरबादयो भवन्ति । घनतरं तमः, बहुलतरं प्रेमेति ॥ ६० ॥

बौद्धप्रतियोग्यपेक्षायामिति ॥ इदं घनमिदं च घनमिदमनयोरतिशयेन घनमिति विग्रहे शब्दोपात्तप्रतियोग्यपेक्षयाऽतिशयनार्थे तरबादिविधानादसति शब्दोपात्ते प्रतियोगिनि घनतरं तम इति प्रयोगः कथमिति चिन्तायां बुद्धिसन्निधापितेऽपि प्रतियोगिन्यातिशायनिकाः प्रत्यया भवन्तीति दर्शयति ॥ बौद्धस्येति ॥ ६० ॥

कौशिलादय इलचि वर्णलोपात् ॥ ६१ ॥

कौशिलो, वासिल इत्यादयः कथम्, आह । कौशिकवासिष्ठादिभ्यः शब्देभ्यो नीतावनुकम्पायां वा, घनिलचौ चेतीलचि कृते, ठाजादावूर्ध्वं द्वितीयादच इति वर्णलोपात् सिद्ध्यन्ति ॥ ६१ ॥

कौशिलादय इति ॥ अनुकम्पितः कौशिकः, अनुकम्पितो वासिष्ठ इत्यस्मिन्नर्थे कौशिलो वासिल इत्यादयः प्रयोगाः कथमिति विचारणायां, घनिलचौ चेति सूत्रेणाऽनुकम्पायामीतौ वा बह्वचो मनुष्यनाम्नः घनिलचौ प्रत्ययौ विधीयेते । अतः कौशिकवासिष्ठशब्दाभ्यामुक्तलक्षणाभ्यामिलचि कृते, ठाजादावूर्ध्वं द्वितीयादच इत्यजादौ प्रत्यये परतः प्रकृतेर्द्वितीयादचः परस्य शब्दरूपस्य लोपे सति, यस्येति चेतीकारलोपे च कौशिलो वासिल इत्यादयः प्रयोगाः सिद्ध्यन्तीति समर्थयते ॥ कौशिलो वासिल इति ॥ ६१ ॥

मौक्तिकमिति त्रिनयादिपाठात् ॥ ६२ ॥

Digitized by Google

मुक्तैव मौक्तिकमिति विनयादिपाठाद् द्रष्टव्यम् । स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते इति नपुंसकत्वम् ॥ ६२ ॥

मौक्तिकमिति ॥ विनयादिषु पाठेऽभ्युपगते, विनयादिभ्यष्ठक् इति स्वार्थिके ठकि कृते मौक्तिकमिति सिद्ध्यतीत्याह ॥ मुक्तैव मौक्तिकमिति ॥ अत्र प्रकृतिलिङ्गस्यातिक्रमणे भाष्यकारवचनं प्रमाणयति ॥ स्वार्थिका इति ॥ ६२ ॥

प्रातिभादयः प्रज्ञादिषु ॥ ६३ ॥

प्रातिभादयः शब्दाः प्रज्ञादिषु द्रष्टव्याः । प्रतिभाविकृतिद्वितादिभ्यः शब्देभ्यः प्रज्ञादिपाठादपि स्वार्थिके कृते, प्रातिभं, वैकृतं, द्वैतमित्यादयः प्रयोगाः सिद्ध्यन्तीति ॥ ६३ ॥

प्रातिभादय इति ॥ प्रज्ञादिभ्यश्चेति स्वार्थिकोऽण् विधीयते । प्रतिभादीनामप्यत्र पाठाभ्युपगमेन स्वार्थिकेऽण्प्रत्ययं कृते, प्रातिभं, वैकृतं, द्वैतं, चारित्रमित्यादयः सिद्ध्यन्तीति व्याचष्टे ॥ प्रातिभादयः शब्दा इति ॥ ६३ ॥

न सरजसमित्यनव्ययीभावे ॥ ६४ ॥

मधु सरजसं मध्येपयं पिबन्ति शिलीमुखा इत्यादिषु सरजसमिति न युक्तः प्रयोगोऽनव्ययीभावे । अव्ययीभाव एव सरजसशब्दस्येष्टत्वात् ॥ ६४ ॥

न सरजसमिति ॥ बहुव्रीहिप्रयोगो न साधुरिति दर्शयितुमाह ॥ मधु सरजसमित्यादिना ॥ अनव्ययीभावे प्रयोगो न युक्तः । रजसा सह वर्तत इति सरजसमिति बहुव्रीहिसमासो न सिद्ध्यति । तस्मिन् हि सति सरजस्कमिति स्यात् । अव्ययीभावे तु सिद्ध्यति । अव्ययं विभक्ति इत्यादिना साकल्यार्थेऽव्ययीभावे कृते, अचतुरादिसूत्रेणाकारान्तत्वनिपातनाद् सरजसमिति भवति । तथाचाह वृत्तिकारः । सत्र एकोऽव्ययीभावः साकल्ये । सरजसमभ्यवहरतीति । बहुव्रीहौ न भवति । रजसा सह वर्तते इति सरजस्कं पङ्कजमितीति ॥ ६४ ॥

Digitized by Google

न धृतधनुषीत्यसंज्ञायाम् ॥ ६५ ॥

धृतधनुषि शौर्यशालिनि इत्यत्र धृतधनुषीत्यसंज्ञायां न युक्तः प्रयोगः । धनुषश्चेत्यनङ्विधानात् । संज्ञायां त्वनङ् विकल्पितः । वा संज्ञायामिति ॥ ६५ ॥

न धृतधनुषीति ॥ निगदव्याख्यानमेतत् ॥ ६५ ॥

दुर्गन्धिपद इद् दुर्लभः ॥ ६६ ॥

दुर्गन्धिः काय इत्यादिषु दुर्गन्धिपद इत् समासान्तो दुर्लभः । गन्धपूत्यादिषु दुःशब्दस्याऽपाठात् ॥ ६६ ॥

दुर्गन्धिपद इति ॥ गन्धस्येदुत्पूतिसुसुरभिभ्य इत्युदादिभ्यश्चतुर्भ्यः परस्य गन्धशब्दस्य समासान्तविधानादुदादिषु दुरो ग्रहणाभावाद् दुर्गन्धिरिति प्रयोगो न साधुरिति दर्शयति ॥ दुर्गन्धिः काय इति ॥ ६६ ॥

सुदत्यादयः प्रतिविधेयाः ॥ ६७ ॥

सा दक्षरोपात् सुदती समर्जेति. शिखरदति पतति रशना इत्यादिषु सुदत्यादयः शब्दा प्रतिविधेयाः । दत्रादेशलक्षणाभावात् । तत्र प्रतिविधानम् । अग्रान्तादिसूत्रे चकारस्याऽनुक्तसमुच्चयार्थत्वात् सुदत्यादिषु दत्रादेश इत्येके । अन्ये तु वर्णयन्ति । सुदत्यादयः स्त्र्यभिधायिनो योगरूढशब्दाः । तेषु, स्त्रियां संज्ञायामिति दत्रादेशो विकल्पेन सिद्ध एवेति ॥ ६७ ॥

सुदत्यादय इति ॥ वयत्यावयक्षिते दत्रादेशप्राप्तेरभावेऽपि शिष्टप्रयुक्तत्वात् सुदत्यादयः प्रतिविधेयाः समाधेयाः । अत्र केचिदग्रान्तादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्दन्त्यादिष्विव दत्रादेशे कृते, डगितश्चेति ङीपि सति सुदत्यादयः सिद्ध्यन्तीति प्रतिविदधते । अपरं तु— स्त्रीमात्राभिधायिनो योगरूढाः । सुदत्यादय इति स्त्रियां, वा संज्ञायामिति दत्रादेशे सिद्ध्यन्तीति वदन्तीत्यभिप्रायेण व्याचष्टे ॥ सा दक्षरोपादित्यादिना ॥ ६७ ॥

Digitized by Google

क्षतदृढोरस इत्यस्य साधुत्वं समर्थयितुं प्रथमं तावत् प्रामाणिकप्रयोगं प्रदर्शयति ।

क्षतदृढोरस इति न कप् तदन्तविधिप्रतिषेधात् ॥ ६८ ॥

प्लवङ्गनखकोटिभिः क्षतदृढोरसो राक्षसा इत्यत्र दृढोरःशब्दाद्, उरः प्रभृतिभ्यः कप् इति कप् न कृतः।ग्रहणवता प्रातिपदिकेनेति तदन्तविधेः प्रतिषेधात् । समासवाक्यं त्वेवं कर्तव्यम्—क्षतं दृढोरो येषामिति ॥ ६८ ॥

प्लवङ्गेति ॥ ननु बहुव्रीहौ समासे, उरःप्रभृतिभ्यो स्त्रियां कप्विधानात्, क्षतदृढोरस्क इति कपा भवितव्यमिति प्राप्ते कपभावे कारणं कथयितुमाह ॥ उरःप्रभृतिभ्य इति ॥ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेष्यते इति वचनादुरःशब्दान्तात् कप्प्रत्ययो न भवति । तथाच विग्रहवाक्यमेवं कर्तव्यम् । दृढं च तदुरश्च दृढोरः । क्षतं दृढोरो येषामिति । अतः, क्षतदृढोरस इति सिद्ध्यतीत्यर्थः ॥ ६८ ॥

अवैहीति वृद्धिरवद्या ॥ ६९ ॥

अवैहीत्यत्र वृद्धिरवद्या । गुण एव युक्त इति ॥ ६९ ॥

अवैहीति ॥ अवैहीत्यत्र इणो लोण्मध्यमपुरुषे, सेर्ह्यपिच्चेति ह्यादेशे सति किद्वद्भावाद् गुणाभावे, इहीति रूपम् । ततश्चावशब्दस्य प्राक्प्रयोगे, आद् गुण इति गुणे सति, अवेहीति भवति । एत्येधत्यूठ्सित्यत्र, एतेरेचि इत्यनुवर्तनाद् वृद्धिर्न भवति । नन्ववाङ्गतिभवोरुपसर्गयोः प्राक्प्रयोगे वृद्धिः सिद्ध्यतीति न चोदनीयम् । ओमाङोश्चेति पररूपप्रसङ्गात् । तस्माद्वैहीत्यत्र वृद्धिरसाधीयसीत्यर्थः ॥ ६९

अपाङ्गनेत्रेति लुगलभ्यः ॥ ७० ॥

अपाङ्गे नेत्रं यस्याः सेयमपाङ्गनेत्रेत्यत्र लुगलभ्यः । अमूर्धमस्तकात् स्वाङ्गादकामे इति सप्तम्या अलुग्विधानात् ॥ ७० ॥

अपाङ्गनेत्रेति ॥ नेत्रशब्देन समुदायवाचिना तदेकदेशः कनीनिका लक्ष्यते । ततश्चापाङ्गे नेत्रं कनीनिका यस्याः सापाङ्गनेत्रेति प्रयो-

Digitized by Google

कर्म्म, न त्वपाङ्गनेत्रेति । अमूर्धमस्तकात् स्वाङ्गादकामे इति नित्यं सप्तम्या अलुग्विधानादित्यभिप्रायवानाह ॥ अपाङ्गे नेत्रमिति ॥७०॥

नेष्टाः श्लिष्टप्रियादयः पुंवद्भावप्रतिषेधात् ॥ ७१ ॥

श्लिष्टप्रियः, विश्लिष्टकान्त इत्यादयो नेष्टाः । स्त्रियाः पुंवदिति पुंवद्भावस्य प्रियादिषु निषेधात् ॥ ७१ ॥

नेष्टा इति ॥ श्लिष्टा प्रिया येन, विश्लिष्टा कान्ता यस्माद् स श्लिष्टप्रियो, विश्लिष्टकान्त इत्यादयः प्रयोगा इष्टा न भवन्ति । स्त्रियाः पुंवदित्यधिसूत्रे प्रियादिषु पुंवद्भावप्रतिषेधादिति वर्तयति ॥ श्लिष्टप्रिय इत्यादिना ॥ ७१ ॥

दृढभक्तिरसौ सर्वत्र ॥ ७२ ॥

दृढभक्तिरसौ ज्येष्ठे, अत्र पूर्वपदस्य, स्त्रियामित्यविवक्षितत्वात् ॥ ७२ ॥

दृढभक्तिरिति ॥ अत्र भक्तिशब्दस्य प्रियादिपाठात् पूर्वपदस्य पुंवद्भावो दुर्घट इति प्राप्ते पूर्वपदस्य दृढशब्दस्य विग्रहवाक्ये स्त्रीत्वस्याविवक्षितत्वाद् दृढभक्तिरिति सिद्धतीत्याह ॥ अत्रेति ॥ तथाचाह वृत्तिकारः— दृढभक्तिरित्येवमादिषु पूर्वपदस्य स्त्रीत्वस्याविवक्षितत्वात् सिद्धमिति समाधेयमिति । मणव्याख्यानकारोऽपि, दृढं भक्तिरस्येति नपुंसकपूर्वपदो बहुव्रीहिरिति । न्यासकारोऽपि— अदार्ढनिर्वृत्तिपरे दृढशब्दे लिङ्गविशेषस्यानुपकारकत्वात्स्त्रीत्वमविवक्षितमेव, तस्माद्स्त्रीलिङ्गस्यैव दृढशब्दस्यायं प्रयोग इत्यभिप्राय इति । भोजराजस्त्वन्यथा समाधत्ते । भक्तौ च कर्मसाधनायामित्यत्र सूत्रे कर्मसाधनस्यैव भक्तिशब्दस्य प्रियादिषु पाठाद् भवानीभक्तिरित्यादौ पुंवद्भावप्रतिषेधः । दृढभक्तिरित्यादौ भावसाधनत्वात् पुंवद्भावे सिद्धे स्त्रीपूर्वपदत्वमेवेति ॥ ७२ ॥

जम्बुलतादयो ह्रस्वविधेः ॥ ७३ ॥

जम्बुलतादयः प्रयोगाः कथम् । आह ॥ ह्रस्वविधेः ॥ इको ह्रस्वोऽङ्यो गालवस्येति ह्रस्वविधानात् ॥ ७३ ॥

Digitized by Google

जम्बुलतादय इति ॥ इको ह्रस्वोऽङ्यो गालवस्येति ङीयन्तव्यतिरिक्तस्येगन्तस्योत्तरपदे परतो विकल्पेन ह्रस्वविधानाज्जम्बुलतादयः सिद्धा इत्याह ॥ जम्बुलतादय इति ॥ ७३ ॥

तिलकादयोऽजिरादिषु ॥ ७४ ॥

तिलकादयः शब्दा, अजिरादिषु द्रष्टव्याः।अन्यथा, तिलकवती कनकवतीत्यादिषु मतुपि, मतौ बह्वचोऽनजिरादीनामिति दीर्घत्वं स्यात् । अन्ये तु वर्णयन्ति— नद्यां मतुबिति यो मतुप् तत्रायं विधिः । तेषां मतेनाऽमरावतीत्यादीनामसिद्धिः ॥ ७४ ॥

तिलकादय इति ॥ मतौ बह्वचोऽनजिरादीनामिति मतुप्प्रत्यये परतोऽजिरादिवर्जितस्य बह्वचो दीर्घविधानात्तिलकादीनामजिरादिपाठमभ्युपगमेन दीर्घनिषेधात्तिलकवतीत्यादयः सिद्धन्तीत्याह ॥ तिलकादयः शब्दा इति ॥ अजिरादिषु पाठानभ्युपगमे प्रयोगविरोधं प्रदर्शयति ॥ अन्यथेति ॥ परे तु— प्रकारान्तरेण प्रयोगं प्रतिष्ठापयन्ति । तेषां मतं दूषयितुमनुभाषते ॥ अन्ये त्विति ॥ यत्र, नद्यां मतुबिति नदीविषये मतुप्प्रत्ययो विधीयते तत्रायं दीर्घविधिः । तिलकादिषु, तदस्यास्त्यस्मिन्निति मतुब्विधानात्तिलकवतीत्यादिषु दीर्घाभाव इति । तदेतद् दूषयति ॥ तेषामिति ॥ ७४ ॥

निशाम्यनिशमय्यशब्दौ प्रकृतिभेदात् ॥ ७५ ॥

निशाम्य निशमय्येत्येतौ शब्दौ श्रुत्वेत्येतस्मिन्नर्थे । शमेः, ल्यपि लेकुपूर्वादिसयादेशे सति निशमय्येति भवितव्यम्, न निशाम्येति । अत्र ॥ प्रकृतिभेदात् ॥ शमेर्दैवादिकस्य निशाम्येति रूपम् । शमो दर्शने इति चुरादौ णिचि मित्संज्ञकस्य निशमय्येति रूपम् ॥ ७५ ॥

निशाम्येति ॥ दिवादिपाठादण्यन्तशमेरेका प्रकृतिः । चुरादिषु पाठात्, शमो दर्शने इति श्रवणार्थे मित्संज्ञको णिजन्तः शमिरपरा प्रकृतिः । अतः प्रकृतिभेदादूपद्वयसिद्धिरित्याह ॥ निशाम्येत्यादि ॥७५॥

Digitized by Google

संयम्यनियम्यशब्दावणिजन्तत्वात् ॥ ७६ ॥

कथं संयम्यनियम्यशब्दौ । ल्यपि लघुपूर्वादिति णेरयादेशेन भवितव्यम् । आह ॥ अणिजन्तत्वात् ॥ धातोर्णिच् तु न । गतार्थत्वात् । यथा, वाचं नियच्छति इति । णिजर्थानवगतौ णिच् प्रयुज्यते एव । यथा, संयमयितुमारब्ध इति ॥ ७६ ॥

संयम्येति ॥ प्रयोजकव्यापारप्रतीतेरत्र णिचा भवितव्यम् । तस्मिँस्तु सति, ल्यपि लघुपूर्वादिति णेरयादेशो संयम्य, निशाम्येति प्रयोक्तव्यम् । कथं, संयम्यनियम्यशब्दावितिप्रयोक्तुरभिप्रायः । शङ्कनमिमां शकलयितुं हेतुमाह ॥ अणिजन्तत्वादिति ॥ णिजभावाण्णेरयादेशो न प्रसज्यत इत्यर्थः । ननु प्रयोजकव्यापारप्रतीतौ णिच्प्रत्ययः किं न स्यादित्यत आह ॥ णिच् तु नेति ॥ गतार्थत्वात् प्रयोजकव्यापारशून्यस्य सकर्मकस्य प्रकृत्यर्थस्य धातुनैवाभिहितत्वादित्यर्थः । तत्र दृष्टान्तमाह ॥ यथा वाचमिति ॥ यत्र णिजर्थः स्वभावतो नावगम्यते तत्र णिच् प्रयुज्यत एवेति दर्शयति ॥ णिजर्थानवगताविति ॥ ७६ ॥

प्रपीयेति पीङः ॥ ७७ ॥

प्रपीयेत्ययं शब्दः, पीङ् पाने इत्येतस्य । पिबतेर्हि, न ल्यपि इतीत्वप्रतिषेधात् प्रपायेति भवति ॥ ७७ ॥

प्रपीयेति ॥ पीङ् पाने इति धातोर्ल्यबन्तमिदं, न तु पिबतेः । तस्य, न ल्यपीतीत्वप्रतिषेधादित्याह ॥ पिबतेरिति ॥ ७७ ॥

दूरयतीति बहुलग्रहणात् ॥ ७८ ॥

दूरयसवनते वित्रस्वति इत्यत्र दूरयतीति कथम् । णाविष्ठवत्प्रातिपदिकाद्भावे, स्थूलदूर इत्यादिना गुणलोपयोः कृतयोर्दवयतीति भवितव्यम् । आह ॥ बहुलग्रहणात् । प्रातिपदिकाद्धात्वर्थे बहुलमि-

Digitized by Google

ध्रुवचेत्र बहुलग्रहणात्, स्थूलदूरादिसूत्रेण यद् विहितं तन्न भविष्यतीति ॥ ७८ ॥

दूरयतीति प्रयोगस्य साधुत्वं समर्थयितुं शङ्कामिमामङ्कुरयति दूरयतीति ॥ शेषं सुगमम् ॥ ७८ ॥

गच्छतीप्रभृतिष्वनिषेध्यो नुम् ॥ ७९ ॥

हरति हि वनराजिर्गच्छती श्यामभावमित्यादिषु गच्छतीप्रभृतिषु शब्देषु, श्यपूश्यनोर्नित्यमिति नुम् अनिषेध्यो निषद्धुमशक्यः ॥ ७९ ॥

गच्छतीप्रभृतिष्विति । शप्श्यनोर्नित्यमिति नित्यं नुमागमस्य विधानाद् गच्छतीत्यादयो न साधव इत्यर्थः ॥ ७९ ॥

मित्रेण गोप्त्रेति पुंवद्भावात् ॥ ८० ॥

मित्रेण गोप्त्रेति कथम् । गोप्तृणा भवितव्यम् । इकोऽचि विभक्ताविति नुम् विधानात् । आह ॥ पुंवद्भावात् ॥ तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्येति पुंवद्भावेन गोप्त्रेति भवति ॥८०॥

मित्रेण गोप्त्रेति । स्पष्टमवशिष्टम् ॥ ८० ॥

वेत्स्यसीति पदभङ्गात् ॥ ८१ ॥

पतितं वेत्स्यसि क्षितौ इत्यत्र वेत्स्यसीति न सिद्ध्यति । इट्प्रसङ्गात् । आह ॥ पदभङ्गात् सिद्ध्यति । वेत्स्यसीति पदं भज्यते— वेत्सि, असि । असीत्ययं निपातस्त्वमित्यस्मिन्नर्थे । क्वचिद्वाक्यालंकारे प्रयुज्यते। यथा, पार्थिवस्त्वमसि सत्यमऽभ्यधा इति ॥ ८१ ॥

वेत्स्यसीति ॥ विदेर्ज्ञानार्थस्यानुदात्तोपदेशत्वाभावादिडागमेन भवितव्यम् । तथाच वेत्स्यसीति न सिद्ध्यतीति चिन्तायां पदं विभज्य प्रयोगसाधुत्वं समर्थयते ॥ पतितमित्यादिना ॥ ८१ ॥

Digitized by Google

कामयानशब्दस्सिद्धोऽनादिश्चेत् ॥ ८२ ॥

कामयानशब्दः सिद्धः । आगमानुशासनमनित्यमिति मुक्प्रऽकृते, यद्यनादिः स्यात् ॥ ८२ ॥

कामयान इति ॥ आगमानुशासनमनित्यमिति वचनाद्, आगे मुक् इत्यकृते मुगागमे कामयान इति । स च प्रामाणिकैः प्रयुक्तश्चेत् साधुरित्यभिप्रायः ॥ ८२ ॥

सौहददौर्हृदशब्दावपि हृन्नावात् ॥ ८३ ॥

सुहृदयदुर्हृदयशब्दाभ्यां युवादिपाठादणि कृते, हृदयस्य हृन्नावः । आदिवृद्धौ सौहददौर्हृदशब्दौ भवतः । सुहृदुर्हृच्छब्दाभ्यां युवादिपाठादेवाणि कृते, हृन्नगसिन्ध्वन्ते इति हृदन्तस्य तद्धितेऽपि कृते सत्युभयपदवृद्धौ सत्यां सौहार्द दौहार्दमिति भवति ॥ ८३ ॥

सौहददौर्हृदशब्दाविति ॥ शोभनं हृदयं यस्य, दुष्टं हृदयं यस्येति विग्रहसिद्धाभ्यां सुहृदयदुर्हृदयशब्दाभ्यां भावार्थे, हायनान्तयुवादिभ्योऽण् इत्यणि कृते सति, हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशे, तद्धितेष्वचामादेरित्यादिवृद्धौ च सत्यां सौहददौर्हृदशब्दौ सिद्धौ । अत्र हृच्छब्दस्य लाक्षणिकत्वाद्, हृन्नगसिन्ध्वन्ते इत्यत्र प्रातिपदोक्तस्य ग्रहणादुभयपदवृद्ध्यभावः । शोभनं हृद् यस्य, दुष्टं हृद् यस्येति विग्रहे, युवादिपाठणि कृते, हृन्नगसिन्ध्वन्ते पूर्वपदस्येत्युभयपदवृद्धौ, सौहार्द दौहार्दमिति च सिद्धमिति च व्याचष्टे ॥ सुहृदय इत्यादिना ॥ ८३ ॥

विरम इति निपातनात् ॥ ८४ ॥

रमेरनुदात्तोपदेशत्वाद्, नोदात्तोपदेशस्येत्यादिना वृद्धिप्रतिषेधस्याभावात् कथं विरम इति । आह ॥ निपातनात् ॥ एतच्च, यम उपरमे इत्यत्रोपरमे इति । अतन्त्रं चोपसर्ग इति ॥ ८४ ॥

Digitized by Google

विरम इति ॥ विरमेर्मान्तत्वेऽपि अनुदात्तोपदेशत्वाद्, नोदात्तोपदेशस्येत्यादिना वृद्धिप्रतिषेधाभावाद् वृद्धौ सत्यां विराम इति युक्तं वक्तुं, कथं विरम इति प्राप्ते, यम उपरमे इत्यत्र निपातनाद् सिद्धमेतदिति दर्शयति ॥ रमेरिति ॥ उपरम इति निपातेन विरम इत्यस्य किमायातमिति, तदाह ॥ एतच्चेति ॥ एतच्च निपातनं सोपसर्गस्य रमेरुपलक्षणमित्यवगन्तव्यम् ॥ ८४ ॥

उपर्यादिषु सामीप्ये द्विरुक्तेषु द्वितीया ॥ ८५ ॥

उपर्यादिषु शब्देषु सामीप्ये द्विरुक्तेषु, उपर्यध्यधसः सामीप्ये इत्यनेन, उपर्यादिषु त्रिषु—द्वितीयाऽऽम्रेडितान्तेषु इति द्वितीया। वीप्सायां तु द्विरुक्तेषु षष्ठ्येव भवति, उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः ॥ ८५ ॥

उपर्यादिषु, उपर्यध्यधसः सामीप्ये इत्युपर्यादीनां सामीप्यार्थे द्विर्वचनविधानाद् द्विरुक्तेष्वर्थेषु सति द्वितीया विभक्तिर्भवति। वीप्सायां तु षष्ठीविभक्तिर्भवतीति व्यवस्थामाह ॥ उपर्यादिष्विति ॥ व्याप्तुमिच्छायां युगपद् प्रयोक्तुमशक्यां व्याप्तुमिच्छा वीप्सा ॥ ८५ ॥

मन्दं मन्दमित्यप्रकारार्थत्वे ॥ ८६ ॥

मन्दं मन्दं नुदति पवन इत्यत्र मन्दं मन्दमित्यऽप्रकाराऽर्थे भवति। प्रकारार्थत्वे तु, प्रकारे गुणवचनस्येति द्विर्वचने कृते कर्मधारयबद्भावे च मन्दमन्दमिति प्रयोगः। मन्दं मन्दमित्यत्र तु नित्यवीप्सयोरिति द्विर्वचनम्। अनेकभावात्मकस्य नुदेर्यदा सर्वे भावा मन्दत्वेन व्याप्तुमिष्टा भवन्ति तदा वीप्सेति ॥ ८६ ॥

मन्दं मन्दमिति ॥ वीप्साप्रकारार्थयोः प्रयोगद्वयव्यवस्थां प्रतिपादयितुमाह ॥ मन्दं मन्दं नुदतीति ॥ कर्मधारयबद्भावे इति। कर्मधारयबदुत्तरेषु इत्यनेन कर्मधारयबद्भावे सुब्लोपादिर्भवति। अनेकभावविषया व्याप्तुमिच्छा येति वीप्सा। तां दर्शयति ॥ अनेकभावेति ॥ ८६ ॥

Digitized by Google

न निद्राद्रुगिति भष्भावप्राप्तेः ॥ ८७ ॥

निद्राद्रुक्षाद्वेषयञ्जविरुपरिलसद्घर्घरो वारिवाह इत्रत्र निद्राद्रुगिति न युक्तः । एकाचो बशो भषू इति भष्भावप्राप्तेः । अनुप्रासप्रियैस्त्वपभ्रंशः कृतः ॥ ८७ ॥

न निद्रेति ॥ निद्राध्रुगिति वक्तव्ये निद्राद्रुगित्यपभ्रंश इत्याह निद्राद्रुक्षाद्वेष इति ॥ ८७ ॥

निष्यन्द इति षत्वं चिन्त्यम् ॥ ८८ ॥

न त्रत्र षत्वलक्षणमस्ति । कस्कादिपाठोऽप्यस्य न निश्चितः॥८८॥

निष्यन्द इति ॥ अत्र षत्वप्रसावनुशासनादर्शनात् कस्कादिष्वपि पाठानिश्चयाच्च षत्वं चिन्त्यं, निश्चेतुमशक्यमित्याह ॥ न हीति ॥ ८८ ॥

नाङ्गुलिसङ्ग इति मूर्धन्यविधेः ॥ ८९ ॥

म्लायन्त्यङ्गुलिसङ्गेऽपि कोमलाः कुसुमस्रज इत्रत्राङ्गुलिसङ्ग इति न युक्तः। समासेऽङ्गुलः पङ्ग इति मूर्धन्यविधानात् ॥८९॥

नाङ्गुलिसङ्ग इति ॥ स्पष्टोऽर्थः ॥ ८९ ॥

तेनावन्तिसेनादयः प्रत्युक्ताः ॥ ९० ॥

तेनाङ्गुलिसङ्ग इत्रतेनावन्तिसेनः, इन्दुसेन एवमादयः शब्दाः प्रत्युक्ताः प्रत्याख्याताः । सुषामादिषु च, एति संज्ञायामगादिति मूर्धन्यविधानात् ॥ ९० ॥

तेनेति ॥ सुषामादिषु चेति सूत्रे, एति संज्ञायामगादिति गणसूत्रबलादेकारपरस्यागकारात् परस्य संज्ञायां विषये मूर्धन्यादेशविधानादवन्तिसेनादयः प्रत्याख्याता इत्याह ॥ तेनाङ्गुलिसङ्ग इत्यतेनेति ॥ ९० ॥

नेन्द्रवाहने णत्वमाहितत्वस्याविवक्षितत्वात् ॥९१॥

Digitized by Google

कुथेन नागेन्द्रमिवेन्द्रवाहनमिति चेन्द्रवाहनशब्दे, वाहनमाहितादिति णत्वं न भवति । आहितत्वस्याऽविवक्षितत्वात् । स्वस्वामिभावमात्रं त्वत्र विवक्षितम् । तेन सिद्धमिन्द्रवाहनमिति ॥ ९१ ॥

सदसन्तो मया शब्दा विविच्यैवं निदर्शिताः ॥
अनयैव दिशा कार्यं शेषाणामप्यवेक्षणम् ॥ १ ॥

इति काव्याऽलङ्कारसूत्रवृत्तौ प्रायोगिके पञ्चमेऽधिकरणे
द्वितीयोऽध्यायः समाप्तः ॥ शब्दशुद्धिः ॥ समाप्तं
चेदं प्रायोगिकं पञ्चममधिकरणम् ॥

नेन्द्रवाहने णत्वमिति ॥ चकासतं चारुचमूरुचर्मणा कुथेन नागेन्द्रमिवेन्द्रवाहनमित्यादिप्रयोगो दृश्यते । अत्र, वाहनमाहिताद् इति सूत्रे आहितवाचि यत् पूर्वपदं तस्माद्विमिश्रावुत्तरस्य वाहनशकारस्य णकारादेशो विधीयते । वाहने यदारोपितं तदाहितमित्युच्यते । तस्मादिक्षुवाहणमितिवदिन्द्रवाहणमिति प्रयोक्तव्यं, न पुनरिन्द्रवाहनमिति प्राप्ते तद्विवेदयिषुराह ॥ इन्द्रवाहनशब्द इति ॥ अयमर्थः । पूर्वपदार्थस्येक्षुशरादेरिव नेन्द्रस्याहितत्वं विवक्ष्यते, किन्तु इन्द्रस्वामिकं वाहनमिन्द्रवाहनमिति स्वस्वामिसम्बन्धो विवक्ष्यते । ततश्च दाक्षिवाहनमितिवदिन्द्रवाहनमिति सिद्धमिति ॥ ९१ ॥

सदसन्त इति ॥ एवमुक्तप्रकारेण साधवश्चासाधवश्च शब्दा विविच्य पृथक्कृत्य निदर्शिता उदाहृताः । अनयैव दिशाऽस्मदुक्तेनैव सदसद्विवेकमार्गेण शेषाणामनुक्तानां सतामसतां च शब्दानामवेक्षणं पर्यालोचनं कार्यं कर्तव्यमिति भद्रम् ॥ १ ॥

इत्थं समिद्धगुणसंपदि वामनस्य
प्रज्ञानसीमनि चिरादलसोज्झितायाम् ॥
व्याख्यानपद्धतिरियं व्यवहारहेतो-
र्निष्कण्टका निपुणमारचिता कवीनाम् ॥ १ ॥
न्यायोक्तिधीचिनिचयेन कुतर्कजाल-
कूलङ्कषेण महते गुणरत्नगर्भे ॥

Digitized by Google

सारस्वतामृतसरस्वतिं नावमेना-
मालम्ब्य रन्तुमनसो विचरन्तु धीराः ॥ २ ॥
पदे केचिद्वाक्यं कतिचन परे मान इतरे
कवित्वेऽलङ्कारं कतिचन परे नाट्यनिगमे ॥
भजन्ति प्रागल्भ्यं न खलु वयमेतेषु गणिता
बहुकुर्वन्त्येते बुधसदसि नः किन्तु सुधियः ॥ ३ ॥
शब्दार्थौ चरणौ प्रतीकविसरो वाक्यानि गुम्फो लस-
न्मूर्तिर्वक्त्रं शिरः परिष्कृतिरलङ्कारोऽस्खो रीतयः ॥
यस्याः स्त्रीवगुणा गुणाः सुरुचिराः शृङ्गारचेष्टादयो
रम्याऽष्टादशवर्णना कृतिवधूः सेयं जगन्मोहिनी ॥ ४ ॥
इति कृतरचनायामिन्दुवंशोद्भवेन
त्रिपुरहरधरित्रीमण्डलाखण्डलेन ॥
ललितवचसि काव्यालंक्रियाकामधेना-
वधिकरणमयासीत् पञ्चमं पूर्तिमेतत् ॥ ५ ॥

इति श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितायां काव्यालङ्कारसूत्र-
वृत्तिव्याख्यायां काव्यालङ्कारकामधेनौ पञ्चमेऽधिकरणे
द्वितीयोऽध्यायः समाप्तः ॥ ५ ॥ २ ॥ (१२) ॥

समाप्तं चेदं प्रायोगिकं पञ्चममधिकरणम् ॥
समाप्तश्चायं ग्रन्थः ॥ श्रीरस्तु ।

Digitized by Google

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, PH. D.
No. 145.

सांख्यायनगृह्यसङ्ग्रहः ।

कौसुंवरवास्तव्यपाण्डितवरवासुदेवविरचितः ।

काव्यतीर्थ-न्यायोपाध्यायपदवीमता

श्रीसोमनाथोपाध्यायेन संशोधितः ।

कौषीतकिगृह्यसूत्राणि च ।

रत्नगोपालभट्टेन संशोधितानि ।

SÂNKHYÂYANAGRIHYA SANGRAHA,
BY PANDIT VASUDEVA;
EDITED BY
SOMANÂTHOPÂDHYÂYA-NYÂYOPÂDHYÂYA AND KÂVYATÎRTHA;
And KAUSHÎTAKI GRIHYASÛTRAS,
EDITED BY RATNA GOPÂLA BHATTA.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press
By Harikrishna Dasa.
BENARES.
1908.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

Digitized by Google

Digitized by Google

ॐनमः श्रीवेदपुरुषाय

श्रीवासुदेवविद्वद्वरविरचितः

साङ्ग्यायनगृह्यसङ्ग्रहः

ॐसाङ्ग्यायनगृह्यस्य दीक्षितश्रेष्ठसूनुना ॥
कृतैषा पद्धतिर्व्याख्या शिष्याणां हितकाम्यया ॥

प्रारम्भः कर्मसङ्ग्रहः । किमनेन प्रयोजनम् ? उच्यते । अनेन गृह्योक्तानि कर्माणि प्रयुज्यन्ते । ननु सूत्रैरेव प्रयोगः कथित एव ? उच्यते । सूत्राणि व्याख्यागम्यानि भवन्ति । यद्येवमाचार्याग्निस्वामिब्रह्मदत्तादिभिर्व्याख्यात एव सूत्रार्थः । किं तु अस्मिन्नर्थे इतस्ततः परिभाषासूत्राणि विद्यन्ते यस्तेष्वर्थ उक्तः स मन्दधियां कर्मकाले कदाचित्तु स्मृतिविषयं नागछेत्ततश्च कर्महानिर्जायते च, हीने च क्रियमाणे अफलता विपरीतफलता वा स्यात् । यथाह शिक्षाकार एव—"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्"। इति प्रयोजनम् । अन्यच्च—सूत्रक्रमः प्रयोगेऽन्यः कर्मक्रमश्चाऽन्यः ततः प्रगुणीक्रियत इति द्वितीयप्रयोजनम् । न च व्याकरणादृते प्रयोगकाले देवता ऊहयितुं शक्यन्ते । तदेतत्प्रयोजनत्रयमपेक्ष्याऽयमारभ्यते ।

अत्र च तावत्प्रथममावसथ्याधानं पठितम् । तद्व्याख्यामः । अस्य च बहवः पक्षा आचार्येणोक्ताः । ते च ग्रन्थान्तरादेव ज्ञातव्याः । साग्यमाहुतिसंस्कारोर्ध्वर्योः प्रत्यय इत्युक्तम् । तस्य विधिः कात्यायनसूत्रे पठितस्तदत्रैव व्याख्यास्यामः । वैशाख्यामाषास्यायामन्यस्यां वा संपन्ने नक्षत्रे वा कृत्तिकादौ शोभन-

Digitized by Google

दिवसे वृद्धिश्राद्धं कृत्वा ततोऽध्वर्युर्यजमानपश्चात्रि दक्षिणपूर्वद्वारमन्यगारं कृत्वा पाक्षिकं च चरुं कारयित्वा ततो दम्पती स्नात्वा क्षौमे वाससी परिधत्तः ततोऽध्वर्युरग्निमानयित्वाऽन्यगारे स्थापयति । वैश्यकुलाद्वा अम्बरीषाद्वा यस्य वा गृहे प्रमृतमग्नं पच्यते एतेषामन्यतमस्मात्प्रदेशाल्लौकिकमग्निमाहृत्य स्थापयेत् । ततो दम्पती अपि हविष्यमन्नमश्नीयाताम् । ततो यजमानः उपास्तमनवेलायां "देवाः पितरः पितरो देवा योहमस्मिन्समन्यजे वस्याहमस्मि नतमन्तस्थामिस्तम इष्टं स्वधातं संहुतमस्तु" इति जपित्वा अगारं प्रविश्य पश्चादग्नेरुपविशति । यजमानस्य दक्षिणतः पत्नी उपविशेत् । ततोऽध्वर्युः पत्न्यै अधरारणिं प्रयच्छति यजमानायोत्तरारणिम् । ततोऽस्तमित आदित्ये लोहिते वत्सीवर्दचर्मणि तण्डुलानां त्रिःप्रसृतिपरिमाणानि चत्वारि पात्राणि मापयित्वैदं पक्त्वास्य मध्ये बिलं कृत्वा घृतेन पूरयेत् । ततस्तस्मिन् बिले आश्वत्थीस्तिस्रः समिधोऽभ्यज्य "समिधाग्निं दुवस्यत, मुसलमिद्धाय शोचिषे, तन्त्वा समिद्भिरङ्गिरः, उपत्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत जुषस्व समिधो मम" इत्येतासां चतसृणामृचां प्रथमया समिधमाधाय द्वितीयां जपति । ततस्तृतीयाचतुर्थीभ्यां यथासङ्ख्यं समिधावाधायानन्तरं तण्डुलमध्वर्युः प्राश्य "चरुरास्त ब्रह्मौदन" इति प्रैष्यति । ततो यजमानोऽध्वर्यवे वरं ददाति । ततः पत्नीयजमानयोः पाक्षिकमशनं तथा जागरणमपि पाक्षिकमेव पत्नीयजमानयोः । अग्निश्च सकलामेव रात्रीं दीपयितव्यः । ततः प्रभातसमये तमग्निमुपशमयन्ति । स्थानं परिसमूह्योल्लिप्योल्लिख्योद्धरति । ततो यजमानोऽध्वर्युमन्वारभते । ततोऽध्वर्युरुल्लिखितप्रदेशमभ्युक्ष्य हिरण्यं दत्त्वा तुषं दधाति । ततो मृत्पिण्डकरणम् । ततस्त्रिसप्ततिशमीपर्णभृतिभिर्वेष्टयति । ततो हिरण्यं मण्डि-

Digitized by Google

कम् । ततो "वाचं यच्छ पूर्णाहुतेः" इति प्रैषं ददाति । यजमानो वाग्यतो भवेत् । तत उदित आदित्ये "अश्वमानय" इति प्रेष्यति । स्थिते ऽग्नेः पुरस्तान्मन्थनम् । ततो यजमानः जाते वरदाने "प्राणमृते दध" इत्येतं मन्त्रमकारान्तं मनसा जपन्नग्नेरुपरि बहिर्दृष्टिं निःश्वासं कृत्वा "अमृतं प्राण आदध" इत्येतमपि मन्त्रमकारान्तमेव मनसा ध्यायन्नग्निमवघ्राय ततः उद्धरणम् । ततोऽश्वपुरस्ताद्गच्छति । ततः पृष्ठतोऽग्निमानयते । ततो यजमानो धूमेन स्पृश्यमानो गच्छति । ततोऽश्वस्य दक्षिणपूर्वपादेन संधारमाक्रमय्य प्राञ्चन्नीत्वा पश्चिमाभिमुखं कृत्वा अग्निना पादेन द्विः स्पृष्ट्वा सकृद्वा त्वा इत्येतस्य स्थाने यजमाननामाध्वर्योरुच्चारयितव्यम् तद्यथा—"भार्गवस्य त्वा व्रतपते व्रतेनाद्धे वासिष्ठस्य त्वा आत्रेयस्य त्वा कश्यपस्य त्वा" एवमादि । ततो यजमानः पुरस्तात्परिक्रम्याऽग्नेर्दक्षिणत उदङ्मुखो भूत्वा इध्मस्य पूर्वार्द्धमन्वारभ्य "द्यौरिव भूम्ना पृथिवी वरिम्णा तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यादधे" इत्येतं मन्त्रमेकारान्तं जपित्वा ततः "आयङ्गौः पृश्निरक्रमीदि" त्येताभिस्तिसृभिरुपस्थानं करोति । अपरे तु सार्परार्ज्युपस्थानमिच्छन्ति । ततोऽध्वर्युः अश्वमग्नेः प्रदक्षिणमानीय उत्तरत उत्सृजति । अक्षतहोममेकतन्त्रेण एतदन्तमध्वर्युर्वेदविहितं कर्म कृत्वा ततो वक्ष्यमाणेन विधिना आज्यसंस्कारं कृत्वा सव्येन कुशान् गृहीत्वा त्रिर्गृहीत्वा चतुर्थे ग्रहणे तावदाज्यं दद्यात् यावज्जुहूः संपूर्णा । ततोऽन्वारब्धे समिधमाधाय "इदं विष्णुर्विचक्रम" इत्यनेन मन्त्रेण स्वाहाकारान्तेन जुहुयात् । अथ वा प्रजापतिं ध्यात्वा तूष्णीं जुहुयात् । ततोऽध्वर्यवे वरं दत्वा वक्ष्यमाणेन विधिनाग्नये पवमानायाऽग्नये पावकायाग्नये मन्त्रयाग्नये अक्षतहोमे एकतन्त्रेण

Digitized by Google

अग्नये पवमानाग्नये पावकायाग्नये शुचये अदितये एतेषां चतुर्णां वक्ष्यमाणेन स्थालीपाकविधिना चतस्र आज्याहुतीर्हुत्वा ततः स्विष्टकृत्ततो यथोत्साहं दत्वा तन्त्रशेषं समाप्य ब्राह्मणभोजनम् ॥ अथारणीपक्षानङ्गीकुरुते । तत्र सूत्रोक्तयोनेः सद्य एवाग्निमाहृत्य पूर्वोक्तेषु संभारेषु स्थापयित्वा पूर्ववत् पूर्णाहुतिं हुत्वा ततः समूहनादि शेषं कर्तव्यम् । के चिद्गार्हपत्यवत्संभारादिकमिच्छन्ति । गृह्यो गार्हपत्यवदिति वचनात् । यत्रान्त्यां समिधमभ्यादध्यादिति वैनाग्नमेवेति च । तावन्मात्रमेव भवति न तु पूर्णाहुत्यादिकं किञ्चित् । तमग्निमिन्धीतेति वचनात् ।

एवमन्यतमेन पक्षेणाधाने निर्वृत्ते यावज्जीवं सायं प्रातश्च होमः कर्तव्यः । तं वक्ष्यामः । अस्तमित आदित्ये वक्ष्यमाणेन विधिना त्रिः परिसमूह्य " ऋतं त्वा सत्येन परिषिञ्चामी" त्यनेन मन्त्रेण त्रिः पर्युक्ष्य समिधमाधाय "अग्नये स्वाहे"ति हुत्वा "प्रजापतये स्वाहे"ति मनसा ध्यात्वा द्वितीयाहुतिमेवम् । एते द्वे आहुती व्रीहियवतण्डुलानामन्यतमेन द्रव्येण पाणिना जुहुयात् । तण्डुलानां प्रक्षालनं पाक्षिकम् । ततः समिधमाधाय पूर्ववत्पर्युक्षणं ततः प्रभाते अनुदिते आदित्ये "सत्यं त्वर्तेनपरिषिञ्चामि" इति पर्युक्षणं "सूर्याय स्वाहे"ति व्रताहुतिः । शेषं पूर्ववत् ।

आधाने निर्वृत्ते अन्तरा या पौर्णमासी तस्यामन्वारंभणीयायाः कर्म भवति । तद्वक्ष्यामः । वक्ष्यमाणेन विधिना चरुं श्रपयित्वा " अग्नाविष्णुभ्यां स्वाहा सरस्वत्यै स्वाहा सरस्वते स्वाहे"ति हुत्वा ततोऽग्नये स्विष्टकृते हुत्वा यथोसाहं दत्वा तन्त्रशेषं समाप्य ब्राह्मणभोजनम् । केषांचिदन्वारभणीयायां पञ्चहविःक्रिया । तेषा" मग्नये भगिने स्वाहा अग्नये व्रतपतये स्वाहे"ति द्वे

Digitized by Google

आहुती अधिके शेषं समानमिति।

अन्वारम्भणीये कर्मणि निर्वृत्ते यावज्जीवं दर्शपौर्णमासावभियष्टव्यौ तयोः कर्मणी वक्ष्यामः। पौर्णमासं लवणं माषा येन च द्रव्येण प्रातश्चरुः कर्त्तव्यः एतानि नाश्नीयात्। अल्पाशनं कर्त्तव्यं मैथुनं च न सेवेत। प्रतिपद्युदितमात्र एवादित्ये शुचिः सुचित्तः शुचौ रमणीये प्रदेशे वक्ष्यमाणेनैव विधिना ग्रहणासादनादिवर्ज्जं चरुं श्रपयित्वा "अग्नयेस्वाहे"ति हुत्वा तत आज्यस्य चतुर्गृहीतं गृहीत्वा "अग्नीषोमाभ्यां स्वाहा" ततः पुनश्चरोर्गृहीत्वा "अग्नीषोमाभ्यां स्वाहे"ति हुत्वा ततः स्विष्टकृतं तन्त्रशेषं समापयेत्। अमावास्यायां पौर्णमास्यामिति व्रतस्थौ भूत्वा प्रतिपदि पूर्वोक्त एव काले चरुं श्रपयित्वा "अग्नये स्वाहा" इति स्थालीपाकस्य हुत्वा तत आज्यं पूर्ववद्गृहीत्वा "विष्णवे स्वाहे"ति ततश्चरोर्गृहीत्वा "इन्द्राग्निभ्यां स्वाहे"ति हुत्वा ततः स्विष्टकृतं तन्त्रशेषं समापयेत्।

सांनाय्ययाजिनो विशेषं वक्ष्यामः। या विष्णवे सा "अग्नीषोमाभ्यां स्वाहे"ति होतव्या। या इन्द्राग्निभ्यां सा "इन्द्राय स्वाहे"ति। शेषं समानम्। ततो ब्राह्मणभोजनम्।

प्रायश्चित्तानि वक्ष्यामः। उपशान्तेऽग्नौ ततः स्वयोनेराहरणं कृत्वोल्लिख्याभ्युक्ष्य स्थापयेत्। यदि कस्य चित्क्रियमाणस्य कर्मणः कालातिक्रमो भवेत् ततो वक्ष्यमाणेन विधिना चरुं श्रपयित्वा आवापस्थाने "अग्नये पथिकृते स्वाहे"ति हुत्वा ततः स्विष्टकृत्तन्त्रशेषं समाप्य अतीतकर्म कर्त्तव्यम्। एवं सर्वेष्वपि द्रष्टव्यम्। ग्रामाग्निसंसर्गे "अग्नये विविचये स्वाहा" दवाग्निसंसर्गे "अग्नये संवर्ग्राय स्वाहा" श्मशानाग्निसंसर्गे "अग्नये शुचये स्वाहे"ति विद्युदग्निसंसर्गे "अग्नये वसुमते स्वाहा"। अथ यजमानस्य कु-

Digitized by Google

टुम्बस्य व्याधिर्भवति ततो गावेधुकतण्डुलैश्चरुं श्रपयित्वा "रुद्राय स्वाहा" । अथ दीर्घमध्वानं गन्तुमिच्छेत् ततः "पूष्णे पथिकृते स्वाहा" । अथ होमकाले प्रतिपदि वा समाप्ते पर्वणि व्रते सति अव्रत्येन वा मैथुनमाषादिना संव्यवहरते ततः "अग्नये व्रतपतये स्वाहे"ति । अथ व्रतकाले रोदनक्रियां करोति ततः "अग्नये व्रतभृते स्वाहे"ति । अथ यदि गृहदाहो भवेत्ततः "अग्नये व्रतपतये स्वाहे"ति । अथ व्रतकाले "क्षामवते स्वाहा" अनादिष्टे प्रायश्चित्ते उत्पन्ने सर्वमायश्चित्तमिति ॥

अहरहः स्वाध्यायमधीते इत्युक्तं तद्वक्ष्यामः । "अघानो देवन्सवितरि"ति द्वे "अपोहि मनसस्पत" इति पञ्च "ऋतं च सत्यं चाभीद्धादि"ति तिस्र "आदित्या अवहिक्षते"त्यष्टौ "इन्द्रश्रेष्ठानि द्रविणानि धेही"त्येका "हंसः शुचिषद्वसुरन्तरिक्षसदि"त्येका "नमो महद्भ्यो नमो अर्भकेभ्य" इत्येका "इन्द्रभयामह" इत्येका "अधस्वप्नस्ये"त्येका "योमे राजन्नि"त्येका " ममाग्नेवर्च " इति नव "स्वस्तिनोमिमीतामि"ति पञ्च ॥

कन्यावरणं वक्ष्यामः । कन्यामस्पृश्यमैथुनामसमानार्षेयां लक्षणोपेतां परिणयीत "अनृक्षरा ऋजवः संतुपन्था" इत्येन मन्त्रेण वरकामानागन्तुकामान्परिणेता अनुमन्त्रयते । एवं गमने गमने तावदनुमन्त्रणं कर्त्तव्यं यावदङ्गीक्रियते । ततः पुष्पफलयवानुदकुम्भं गृहीत्वा "देवदत्तोऽहं भो" इत्येवं स्वं नाम त्रिरुच्चार्य आर्यः सर्वे वा ततः प्राङ्मुखा गृह्याः प्रत्यङ्मुखा वरवित्तका भवन्ति । मध्ये चोदकुम्भः । ततो वरवित्तकाः अमुकगोत्रो वरवित्तकः अमुकनामानोऽस्य पूर्वजा इति पितृतो मातृतश्च त्रिपुरुषं कथयित्वा कन्यां प्रार्थयन्ते । ततः कन्यावित्तकेन प्रतिपन्ने "यथार्हलम्भोपस्थायिने अविकलेन्द्रियाय दास्यामी"ति, ततो द्वावपि "अना-

Digitized by Google

धृष्टमस्यनाधृष्यं देवानामोजोनभिशस्त्यनभिशस्तेन्यमज्ञसा सत्यमुपगेषं सुवितेमाधा" इत्यनेन मन्त्रेणोदकुम्भस्थां पूर्णपात्रीं पुष्पाक्षतफलयवहिरण्यमिश्रामभिस्पृशतः। ततो वरवित्तसक्त आचार्यः "आनः प्रजाञ्जनयतु प्रजापतिः" इत्यनेन मंत्रेण तां पात्रीं कन्याया मूर्द्धनि करोति। ततः "प्रजां त्वयि दधामि पशूंस्त्वयि दधामि तेजो ब्राह्मवर्चसं त्वयि दधामि" इत्यनेन मंत्रेण कन्यामनुमंत्रयेत्। अपरे त्वेवं व्याचक्षते। आनः प्रजामिति ऋक् प्रजांस्त्वयिदधामीति त्रीणि यजूंषि एक एवायं मंत्रः। अनेन पात्रीमेव मूर्द्धनि करोति। अनुमन्त्रणं न कर्त्तव्यम्। एवं प्रतिपन्ने वरवित्तके गृहमागत्य कथिते प्रतिश्रुतकर्म भवति तद्व्याख्यास्यामः। चतुरस्रं गोमयेन स्थंडिलस्योपलेपनमुदक्संस्थां मध्ये रेखां कृत्वा तस्या उपरि प्राङ्मुखं रेखात्रयमुदक्संस्थं कृत्वोद्धृत्याग्निरभ्युक्ष्य ततः "अग्निप्रणयामि मनसा शिविना यमस्तुसङ्कवनोवसूनाम्। मात्रो हिंसीस्थविरं माकुमारं शक्रो भव द्विपदेशंचतुष्पदे" इत्यनेन मन्त्रेण एकारान्तेन अग्निं प्राञ्चं प्रणयति। तूष्णीं वा। ततः पाणिना सोदकेन प्रदक्षिणं त्रिः परिसमूह्य ततः कुशैः पुरस्तादारभ्य प्रदक्षिणमभ्युक्षणं कृत्वा दक्षिणतोग्नेर्ब्रह्मासनमुत्तरतः प्रणीतासनं कुर्यात्। ततो ब्रह्मा उदककमण्डलुं विष्टरं वा पुरस्ताद्ग्नेर्नीत्वा "भूर्भुवः स्वरि"त्यनेन मन्त्रेण ब्रह्मासने स्थापयित्वा पुष्पैरर्चयति। ततः "को वः प्रणयती"त्यनेन मन्त्रेणाऽऽपः प्रणीय "भूर्भुवःस्वरि"त्यनेन मन्त्रेण प्रतिष्ठाप्य ततः परिस्तरणम्। स्रुग्घ्येन कुशान्मूलादारभ्य दक्षिणं जान्वाच्य दक्षिणेन हस्तेन पुरस्ताद्ग्नेस्त्रिस्तृणाति। अथ पञ्चात्तिभिस्त्रिरेवं त्रिभिस्तरणैर्नव भवन्ति। अथ वा पञ्चकृत्वस्तरणं कुर्यात् ततः पञ्चदश भवन्ति। अपरे त्वेवं व्याचक्षते। सकृत् सकृत् स्तरणं कुर्यात्तत्रीणि पञ्च वा भवन्ति। मूलम-

Digitized by Google

न्यग्रैः प्रच्छादयति । स्तरणादनन्तरं कुशतरुणे समेऽप्रशीर्णाग्रे अनन्तर्गर्भे प्रादेशेन मापयित्वा कुशमन्तर्धाय "पवित्रेस्थ" इत्यनेन मन्त्रेण छित्वा प्रागग्रे कृत्वा "वैष्णव्यापि"त्यनेन मन्त्रेणाद्भिरभ्युक्षेत्। त्रीणि वा पवित्राणि कुर्यान्मन्त्रस्तु स एव । ततः पवित्राभ्यां प्रदक्षिणमग्निं त्रिः पर्युक्ष्य "महीनां पयोसी" त्यनेन मन्त्रेणाऽऽज्यस्थाल्यादान "मिषेत्वे"त्यनेन मन्त्रेणाधिश्रयणम्। स्रुवमधोविलं प्रतप्य संमार्जनकुशैः संमृज्य पुनः प्रतप्य निदधाति। "ऊर्ज्जेत्वे"त्यनेन मन्त्रेण उदगुदवासनं कृत्वा दक्षिणहस्तेनोपकनिष्ठिकांगुष्ठाभ्यां पवित्रे अग्रे गृहीत्वा एवं वामहस्तेन मूले गृहीत्वोदङ्मुखे ततो मध्ये कृत्वा "सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेणवा पवित्रेण वसोः सूर्यस्य रश्मिभि"रित्यनेन मन्त्रेणाज्यमुत्पुनाति। ततः "सवितुर्वः प्रसव" इति कृतेनानेनैव मन्त्रेण स्रुवस्था अप उत्पुनाति । तत्तस्ताः प्रणीताः प्रापयेत् । ततस्तरणसमित्पत्रद्रव्याणां प्रोक्षणम् । अपरे त्वेवं व्याचक्षते। स्रुवस्था अप उत्पूप स्तोकं प्रणीताः प्रापयेत् शेषं प्रोक्षणं कुर्यात् । ततश्चरुपात्रमादाय पवित्रेऽन्तर्हिते कृत्वा दक्षिणहस्ते तण्डुलमुष्टिं चरुपात्रेण निर्वपति । यदैवक्ष्यश्चरुर्भवति तमुच्चार्य "अग्नये जुष्टम्निर्वपामि"इति मुष्टित्रयं तूष्णीं चतुर्थमेवं सर्वचरुनिर्वपणे द्रष्टव्यम् । आसादनं प्रोक्षणं त्रिः प्रक्षालनं त्रिः श्रपणम् । ततः सप्तदश समिधोऽभ्याधाय "विष्णोर्हस्तोसी" त्यनेन मन्त्रेण सव्येन कुशान् दक्षिणेन मूले स्रुवं युगपद्गृहीत्वा दक्षिणं जान्वाच्य जानुभ्यामन्तरा दक्षिणं बाहु कृत्वाघारसंज्ञके द्वे आहुती जुहोति। "त्वमग्ने प्रमतिस्त्वपितासिन" इत्यनेनमन्त्रेणोत्तरतः पश्चार्द्धादग्नेरारभ्याविच्छिन्नं दक्षिणतो हुत्वा "यस्ये मे हिमवंतोमहित्वे" त्यादिना मन्त्रेण दक्षेण पश्चार्द्धादग्नेरारभ्याविच्छिन्नमुत्तरतो हुत्वा ततः "अग्नये स्वाहे"त्युत्तरमाज्यभागं "सोमायस्वाहे"तिदक्षिणं ततः

Digitized by Google

"अग्निर्जनिता स मे कल्याणश्रियं जायां ददातु स्वाहा सोमोजनितासमां कल्याणश्रियाजनिमन्तं करोतु स्वाहा पूषाजा विमानसमा कल्याणश्रियै पित्रामात्राभ्रातृभिर्ज्ञातिमन्तं करोतु स्वाहा"। अनेन प्रकारेण वधूकाया नामग्रहणं कर्तव्यमाएवमेतास्तिस्र आज्याहुतीर्हुत्वा "अग्नये स्विष्टकृते स्वाहे"ति स्विष्टकृते हुत्वा ततो"भूः स्वाहा, भुवः स्वाहा, स्वः स्वाहा, भूर्भुवः स्वः स्वाहे"ति महाव्याहृतयश्चतस्रः। ततो "भूर्भुवः स्वः स्वाहा"। "अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयासि अयासामनस्मत्ततोयासंहव्यमूहिषे अयानः कृणुहि भेषजं स्वाहे"ति सर्वप्रायश्चित्तसंज्ञके द्वे आहुती। ततः "प्रजापतयेस्वाहे"ति जुहुयात् । ततः सव्ये पाणौ ये कुशास्तान्दक्षिणेनाग्नेः संगृह्य मूले सव्येन तेषामग्रं स्रुवे समनक्ति। मूले सव्येन गृहीत्वा मध्यमाज्यस्थल्यां त्यक्त्वा मूलांश्च ता"नग्नेर्वासोसी"त्यनेन मन्त्रेणाग्नौ क्षिपेत् । ततस्तिस्रः समिधोऽभ्याधाय पूर्ववत्पर्युक्षणम् । ततः "इदमापः प्रवहते"ति तृचेन मार्जनं कृत्वा पवित्रे तेनाग्नौ क्षिपेत् । 'ततोग्नेरात्मनश्चोत्तरेण नीत्वा प्रणीता अग्नेः पुरस्ताद्धस्तमानीय दक्षिणतः पश्चाद्विमुच्य ब्रह्माणं चाग्नेः पुरस्तात् आनीय विमुंचति । स्रुवं च प्रतप्योन्नयत्यानीय विमुञ्चति ।

इन्द्राणीहोमकर्तव्यतां व्याख्यास्यामः। अत्र स्तरणाद्याघारान्ता भागाः पाक्षिकाः। उत्तरायणे शुक्लपक्षे विशिष्टव्यतीपातादिवर्जिते विवाहलग्नमन्वीक्ष्य तस्मिन्निरूपिते श्वो भाविनि विवाहे परश्वो भाविनि वार्द्धरात्रेतीते अर्द्धरात्रे वा। अपरे तु व्याचक्षते । प्रहरशेषायां निशायामस्मिन् काले वाऽन्तिकोपविष्टा बन्धुस्त्रियः पतिपुत्रवत्यः सुभगा लौकिकानि गीतानि गायन्त्यः कन्यायाः स्नापनं कुर्वन्ति । चत्वारः कलशा उदकपूर्णा सर्वौषधिपुष्प-

Digitized by Google

भिन्नाः सुमनस्यदूष्यविभिन्नाश्च कार्याः । मधुलाजं मङ्गल्यानि क्षिप्त्वा तैः सशिरस्कां कन्यां स्नापयित्वा कुसुम्भरक्तं नवं वा वासः परिधापयेत् । ततः उल्लेपनोल्लेखनाज्याधाराज्यभागान्तं पूर्ववत् कृत्वा पश्चादग्नेः कन्यामुपवेश्यान्वारब्धायां महाव्याहृतयश्चक्षस्तत अग्नये, सोमाय, प्रजापतये, मित्राय, वरुणाय, इन्द्राय, इन्द्राग्नये, गन्धर्वाय, भगाय, पूष्णे, त्वष्ट्रे, बृहस्पतये द्वादशाज्याहुतयः "राये प्रत्यनीकाये"त्येको मन्त्रः । एकमेतैर्महाव्याहृतिप्रभृतिभिः सह समुदशाभिर्मन्त्रैः स्वाहाकारान्तैराज्याहुतीर्हुत्वा ततश्चतस्रोष्टौ वा किंचवाः शूद्राः शाकेन सुरभ्या स्वादुना वाक्येन तर्पयित्वा चतुष्कारं नृत्यं कारयेत्ततः पाणिकस्विष्टकृत्ततो महाव्याहृतिसर्वमन्यच्चाद्यंतवशेषं पूर्ववत् समापनीयम् । वरस्य च "वैश्रवणाय स्वाहा, ईशानाय स्वाहा" इति द्वे आहुती अधिके । शेषं समानयम् । ततः प्रभाते ब्राह्मणभोजनम् ।

विवाहकर्म वक्ष्यामः । वरः स्नातः कृतलौकिकमङ्गलः सितचन्दनानुलिप्तः सितमाल्याम्बरश्चरो घृतगोरोचनः कृतपुण्याहवाचनो भूत्वा स्वगृहात् श्वशुरगृहमागत्योपलेपनोल्लिखनाज्याधाराज्यभागान्तं निर्विकल्पं करोति । तत अविधवाः सुभगाः सुरूपाः सुरूपाख्यो याः कन्यासख्यस्ता वरं गृहीत्वा कुमार्यै दर्शनाय कौतुकसंज्ञं गृहं प्रवेशयन्ति । ताश्चाभक्षपातकानि मुक्त्वा यत् प्रेरयन्ति तत्कर्तव्यं यद्भाषयन्ति उच्चरितव्यम् । ततस्ताभिरनुज्ञातः "रैभ्यासीदनुदेया" इत्यनेन मन्त्रेण कन्यायै वासः प्रयच्छति । "चित्तिरा उपबर्हण" मित्यनेन मन्त्रेणाञ्जनभाण्डं गृह्णाति । ततः "समञ्जन्विश्वेदेवा" इत्यनेन मन्त्रेणाक्षीणि अञ्जयति । प्रथमं दक्षिणं ततः सव्यम् । मन्त्रश्चावर्त्यते । ततः "यथेयं शचीपतेः प्रियावसुपुत्रा च यथा" इति "अविधवां चापापामेव त्वां मेह-

Digitized by Google

शतादिम"मित्यनेन मन्त्रेण दक्षिणे पाणौ त्रिःश्वेतां शलली द-
दाति। "रूपं रूपं प्रतिरूपो बभूवे"त्यनेन मन्त्रेण सव्ये पाणावादर्शं
ददाति। ततो "नीललोहितं भवती"त्यनेन मन्त्रेण ऊर्णामयम-
तसीमयं वा क चिद्रक्तं क चित्कृष्णं ग्रथितमणित्रयं ग्रीवासूत्रकं
कन्याया ज्ञातयो भ्रातृपितृव्यादयो ग्रीवायां बध्नन्ति। अपरे व्या-
चक्षते। आजासु लम्बीकर्त्तव्यः। ततो "मधुमतीरोषधीर्द्याव आ-
प"इत्यनेन मन्त्रेण मधुकुसुमानि ग्रीवायां स्वेवमेव बध्नाति। वासो-
दानादारभ्य ग्रीवासूत्रकं वर्जयित्वा शेषं जामाता करोति। अ-
स्मिन्नवसरे मधुपर्को भवति। तस्य च विधिः कल्पे पठितः
सोप्यत्रैव लिख्यते। कार्यासक्तः पिता भ्राता आचा-
र्यो वा "कूर्चः कूर्चः कूर्चः" इत्यनेन मन्त्रेण कुशमयं कूर्चं
जामात्रे ददाति। ततो जामात्रा कूर्चं गृहीत्वा "अहंवर्ष्मसदृशा-
नां विद्युतामिव सूर्यः इदंतमधितिष्ठामि यो अस्मन्नभिदासती" त्य-
नेन मन्त्रेण उदङ्मुखो वा कूर्चे उपविशत्यभितिष्ठतीति वा। ततः
कन्यावित्तः "पाद्यंपाद्यंपाद्यम्" इत्यनेन मन्त्रेण पादप्रक्षालनं ददा-
ति। ततो जामाता "विरोजोदोहोसि विराजोदोहमसीव मयिपाद्यायै
विराजोदोह" इत्यनेन मन्त्रेण पादोदकं गृह्णाति। ततः कन्या-
वित्तः "अर्घ्यमर्घ्यमर्घ्य"मित्यनेन मन्त्रेणोदकं ददाति। ततो जामाता
तूष्णीं प्रतिगृह्य पादयोरुपनिनयति। ततः कन्यावित्तः "आ-
चमनीयमाचमनीयमाचमनीय"मित्यनेन मन्त्रेण आचमनोदकं द-
दाति। ततो जामाता "आपोदिष्ठामयोभुव" इत्येताभिस्तिसृभिः
पत्युचं त्रिरुपस्पृशति। ततः कन्यावित्तः "मधुपर्को मधुपर्को मधु-
पर्कः"इत्यनेन मन्त्रेण कांस्यभाजनसंपुटसंस्थं दधि घृतमधुभ्यां
मिश्रं जामात्रे ददाति। ततो जामाता तस्यैव हस्तस्थितमुद्राक्ष
"मित्रस्यत्वा चक्षुषावीक्षे"इत्यनेन मन्त्रेण एकारान्तेन दृष्ट्वा "दे-

Digitized by Google

वस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां प्रतिगृह्णामि यशसे ब्रह्मवर्चसाय" इत्यनेन मन्त्रेण गृहीत्वा सव्ये पाणौ कृत्वा "वसवस्त्वाग्निराजानो भक्षयंत्वि"त्यनेन मन्त्रेणाऽनामिकांगुष्ठाभ्यां पूर्वार्द्धात् गृहीत्वा पूर्वार्द्धे कांस्यस्यैव निलिम्पति । पुनर्द्विस्तूष्णीमेवं सर्वासु दिक्षु । अपसव्यं कृत्वा "पितरस्त्वायमराजानोभक्षयन्तु" इत्यनेन मन्त्रेण दक्षिणार्द्धाद्गृहीत्वा दक्षिणार्द्धे निलिम्पति । ततो यज्ञोपवीती भूत्वा उदकं स्पृष्ट्वा "आदित्यास्त्वा वरुणराजानोभक्षयन्त्वि"त्यनेन मन्त्रेण पश्चिमार्द्धाद्गृहीत्वा पश्चिमार्द्धे कांस्यस्य निलिम्पति । "रुद्रास्त्वेन्द्रराजानोभक्षयन्त्वि"त्यनेन मन्त्रेण उत्तरार्द्धाद्गृहीत्वा उत्तरार्द्धे कांस्यस्य लिम्पति उदकं स्पृष्ट्वा "विश्वेत्वादेवाः प्रजापतिराजानोभक्षयन्त्वि"त्यनेन मन्त्रेण मध्याद्गृहीत्वार्द्धमुत्क्षिप्य ततो महाव्याहृतिभिस्तिसृभिरेकैकया प्राश्य ततः समस्ताभिर्महाव्याहृतिभिः स्तोकं पीत्वाऽब्राह्मणायोच्छिष्टं दद्यात् । सर्वं वा पिबेत् । उदके वा क्षिपेत् । तत आचम्य "शंनोदेवीरभिष्टय" इत्येताभिश्चतसृभिरुरोभिमृश्योदकं स्पृष्ट्वा "प्राणपा असिप्राणंमेपाहि" इत्यनेन मन्त्रेण नासिके मुखं च युगपत् स्पृशति । " चक्षुष्पाअसिचक्षुर्मेपाहि" इत्यनेन मन्त्रेण चक्षुषी स्पृशति । "श्रोत्रपाअसिश्रोत्रंमेपाहि"इत्यनेन मन्त्रेण श्रोत्रे स्पृष्ट्वा ततः "अनुनोमार्ष्टुतन्वोयद्विलिष्ट"मित्यनेन मन्त्रेण मुखं विमार्जयति । अथ वा "समिन्द्रणोमनसानेषिगोभि" रित्येका ऋक् "संवर्चसापयसासन्तनूभिरगन्महिमनसाशिवेन त्वष्टासुदत्रोविदधातुरय" इति च मन्त्राभ्यां घ्राणसंमर्शनं कुर्यात् । मुखविमार्जनं तु समानमेव । ततस्तावत्तिष्ठेद्यावत्कन्यावित्तकेन गौरिति त्रिरुक्तभूतो जामाता वधार्थमानीतायां गवि ॐकुरुतेतिवधार्थमनुज्ञां ददाति । ततः कन्यावित्तकेन मित्रदैवत्यः शास्त्रापशुः कर्त्त-

Digitized by Google

भ्यः । तस्य च विधिमुपरिष्टाद् वक्ष्यामः । अथ "मातारुद्राणां दुहितावसूना" मित्येतामृचं जपित्वा ततः "उत्सृजततृणान्यात्वे"-त्येवं ब्रूयात् ।ततः कन्यावित्तकेन मैत्रः पशुर्न कर्त्तव्यः।कूर्चदानादिगोरुत्सर्जनान्तं सूत्रे पठितं कर्म कृत्वा ततः कन्यामुदकपूर्वं पिता भ्राता वा ददाति । अपरे त्वागतमात्रस्यैव जामातुर्मधुपर्कं कृत्वा कन्यां दत्वा ततः कौतुकगृहं प्रवेशयन्ति । अन्यतरेण पक्षेण यथोक्तं कर्म कृत्वा ततस्तां गां जामात्रे ददाति । ततः पश्चादग्नेः कन्यामुपवेश्योत्तरतो वरमुपवेशयेत् । ततोन्वारब्धायां वधूकायां महाव्याहृतिभिश्चतस्र आज्याहुतीर्जुहोति । अपरे तु महाव्याहृतिभिस्तिस्रो जुहोति इति पठन्ति । ताश्च वराचार्याभ्यामन्यतरेण होतव्याः । ततो महाव्याहृतिहोमादनन्तरं "सम्राज्ञीश्वशुरेभवे" त्यनेन मन्त्रेण स्वाहाकारान्तेन पिता भ्राता वा तिष्ठन् प्रत्यङ्मुख आसीनायाः प्राङ्मुख्या खड्गाग्रेण स्रुवेण वा मूर्ध्नि घृतं जुहोति । ततो वरस्तिष्ठन्प्रत्यङ्मुख आसीनायाः प्राङ्मुख्याः " गृह्णामिते सौभगत्वाय हस्त"मित्यनेन मन्त्रेण दक्षिणहस्तेनोत्तानेन कन्याया दक्षिणं हस्तमुत्तानं सांगुष्ठं गृह्णाति । ततः सावः पूषाशिवतमा मैरयस्वे"त्यारभ्य पञ्च चोत्तरा जपित्वा "अमोहमस्मि सात्वं सात्वमस्यमोहं द्यौरहं पृथिवीत्वमृक्सामासिसामाहं सामानुव्रता भव तावेहि विवहावहै प्रजां प्रजनयावहै पुत्रान्विन्दावहैबहूंस्ते सन्तु जरदष्टय" इति च जपति । अस्मिन्नवसरे चत्वारो ब्राह्मणा युग्मानः सुरूपा दक्षिणत उदङ्मुखा उपविश्य "संसृष्टं धनवत्युत्रयं समाकृत" मित्यादि आरभ्य "विश्वस्मादित्युत्तर" इति यावच्छ्रावयेयुः शिष्टाचारात् । ततः आचार्यो " भूर्भुवस्वरि"त्यनेन मन्त्रेणोदकुम्भं नवं पूरयित्वा पुंनाम्नः क्षीरिणो वृक्षस्यार्द्राणि पत्राणि सकुशानि तस्मिन्नुदकुम्भे क्षिपति । हिरण्यं च पाक्षिकम् । तं ब्र-

Digitized by Google

ब्रह्मचारिणे वाग्यताय प्रयच्छति । स ब्रह्मचारी अग्नेः प्रागुदीच्यां स्थापयित्वा दक्षिणहस्तेनारभ्यास्ते । तत आचार्यः अश्मानमुत्तरतोग्नेः स्थापयति । उदकुम्भपूरणादि अश्मस्थापनान्तं यावदाचार्यः करोति तावद्वरो गृहीतहस्तस्तिष्ठति । तत "एहिस्तमे" त्यनेन मन्त्रेण वरो वधूकामुत्थापयति। तत उद्गृह्य "एह्यश्मानमातिष्ठाश्मेव त्वं स्थिरा भव अभितिष्ठ पृतन्यतः सहस्व पृतनायत" इत्यनेन मन्त्रेण अश्मानं दक्षिणपदाश्रयेण आरोहति । ततो ब्रह्मचार्युदकुम्भाभ्यामन्तरेण चोदकुम्भं प्रदक्षिणं कृत्वाग्निपर्याणीय " रैभ्यासीदनुदेयी"त्यनेनैव मन्त्रेण द्वितीयं वासोदत्वा प्रत्यङ्मुखीकरोति । ततः आचार्यो वधूकाया अञ्जलौ स्वेनाज्यमुपस्तृणाति । ततः पिता भ्राता वा लाजां शमीपत्रमिश्रां सूर्पादृहीत्वा द्विर्ददाति । त्रिः पञ्चार्षेयाणाम् । ततो हावक उपर्युपर्यभिघारयति गृहीतशेषं च प्रत्यभिघारयति । " इयं नार्युपब्रूते लाजानावपन्तिका शिवा ज्ञातिभ्यो भूयासं चिरजीवतु मेपतिः स्वाहेति" पतिर्मन्त्रं जपति । वधूश्च तिष्ठन्ती गृहीतमञ्जलिना जुहोति । अश्मक्रमणादि वासोदानवर्जितमेव द्वितीयं होममेवमेव तृतीयं कुर्यात् । कामं मनसा ध्यात्वा तूष्णीं चतुर्थम् । ततो जामाता वधूकाया हस्तं मुक्त्वा " इष एकपदाभव, ऊर्जे द्विपदाभव, रायस्पोषाय त्रिपदीभव, आयोभव्यायचतुष्पदीभव, पशुभ्यः पञ्चपदीभव, शन्नुभ्यः षट्पदीभव, सखा सप्तपदीभव" इत्येतैः सप्तभिर्मन्त्रैर्भव इत्यन्तैः आसनप्रदेशादारभ्य प्रागुदीच्यां दिशि सप्तपदानि क्रमयित्वा " विष्णुस्त्वानयत्विव" त्यनेन मन्त्रेण तानि अद्भिः प्रोक्षति । अपरे तु व्याचक्षते । सप्तपदाक्रमणं हावकः कारयति । ततो वरः " आपोहिष्ठामयोभुव" इत्येताभिस्तृभिरुदकुम्भस्याभिमार्जनं कृत्वा तत आत्मनो वधूकाया अ मूर्ध्न्युदकस्य स्तोकं स्तोकं

Digitized by Google

निधिच्य " गां ददानी"त्येवमुक्त्वा श्वशुराय गां ददाति । ततः स्विष्टकृत् । अन्येभ्योपि प्राप्तब्राह्मणेभ्यो यथाशक्त्या किञ्चित् ददाति । विवाहकर्मप्रवीणा ये ब्राह्मणास्तेभ्यश्चाश्वं ददाति । अन्येभ्योपि ब्राह्मणेभ्यः किञ्चिद्दद्यात् इत्यारभ्य याज्ञिकेभ्योऽश्वं दद्यात् इति यावत्के चित्पठन्ति इति पाक्षिकमेतत् ।

गृहागमनकर्म वक्ष्यामः । गृहं नीयमानायां वधूकायामाचार्यः "प्रत्वा मुञ्चामिवरुणस्य पाशादि"त्येतं तृचं जपेत् । ततो यदि वधू रोदति ततो "जीवं रुदन्तिविमयन्ते अध्वर" इति वरो जपति आचार्यो वा । यदि रथेन गच्छति ततो " अक्षन्नमीमदन्त" इत्यनेन मन्त्रेणाऽक्षं वधूर्धृतेनाभ्यञ्जयति । आचार्येण सर्वमन्त्रं भणयितव्या । " युञ्जीतेचक्रे पत्न्या" इत्यनेन मन्त्रेण रथस्य दक्षिणचक्रमभ्यंज्य " द्वेतेचक्रेसूर्य" इत्युत्तरं ततः "खेरथस्य खेनस" इत्यनेन मन्त्रेण फलदृक्षस्य सक्तां तम्यां शाखां युगच्छिद्रेषु निखनति । प्रथमं दक्षिणयोस्तत उत्तरयोः । अथ वा अनेनैव मन्त्रेण चिरन्तनी एकाऽभिमन्त्र्य ततो "युक्तस्तेअस्तु"इत्यनेन मन्त्रेण दक्षिणस्यां धुरि वलीवर्दं युनक्ति । "युनज्मिते ब्रह्मणे काशिनाहरी"इति द्वितीयमुत्तरस्यां युनक्ति । ततः "युक्ष्वहनहवाहावा-क्ता"मित्यनेनार्द्धर्चेन युक्तौ वलीवर्दावभिमन्त्र्य ततो वधूं वरविद्वा आरोप्य गच्छन्ति । गच्छमानायां यदि रथाक्षपीषाक्षादि भज्येत योक्त्रग्रहादि वा छिद्येत ततो वधूमाहिताग्नेः गृहं प्रवेश्य ततो "अभिन्द्यवस्व खदिरस्यसार" मित्यनेन मन्त्रेण दारुमयं यद्दथाङ्गं तत्सारवचितवत्तम् । "त्वंचिदङ्गं नवाजिन"मित्यनेन मन्त्रेण रज्जुमयीं ग्रन्थिं कृत्वा " स्वस्तिनेमिमीतामश्विना भग" इति पञ्चर्चं जपति । "शुकंशुकंशाल्मलिंविक्षवरूप"मिति रथमारोहन्त्यां वधूकायां जपेत् । " माविदन्परिपन्थिन" इति चतुष्पथे प्राप्ते ज-

Digitized by Google

पेत् । "येवध्वश्चन्द्रंवहतु" इति श्मशाने प्राप्ते जपेत् । " वनस्पते शतवल्शोविरोह" इत्यर्द्धर्चं वनस्पतौ प्राप्ते जपेत् । " सुत्रामाणं पृथिवीं द्यामनेहस" मित्येतामृचं नावमारोहन्त्यां जपेत् । "अश्मान्वत्तारीयतेसंरभध्व"मित्येतामृचं तरन्त्यां जपेत् । यदाल्पोदका नदी भवति युक्तेनैव रथेन गच्छति तथाप्येतामेव जपेत् । ततो नदीमध्यगतायां "मूर्ध्वऊर्मिः " शम्याहन्त्वि" त्येतामृचं जपेत् । वधूश्च वेष्टितमुखी गच्छेत् । अत्र रथयोजनादि गृहप्रापणं यावत् किञ्चित्पाठितं तत्तन्मन्त्रजातं तद्वरेण जप्तव्यं यत्कर्मजातं तदनेन कर्त्तव्यम् । ततो गृहान् प्राप्तायां वधूकायां "मिहमियं भजयाते समृध्यता"मिति चतस्र ऋचः "सुमङ्गलीरियं वधू"रिति तिस्रः हावको जपेत् । अपरे तु व्याचक्षते । पतिर्जपति । गृहप्राप्तस्य वरस्याचार्येण पूर्ववन्मधुपर्कः कर्त्तव्यः । अत्र मैत्रः पशुः कर्त्तव्यः । तस्य विधिमुपरिष्टादेव प्रवक्ष्यामः । अथ गां व्यापाद्यमानां नेच्छति ततस्तामपि तस्मै दद्यादिति केचिदिच्छन्ति ।

अनुडुहहोमकर्म वक्ष्यामः । अत्र स्तरणाद्याघाराज्यभागाः पाक्षिकाः । उपलेपनोल्लेखनाघाराज्यभागं कृत्वा ततो लोहिते बलीवर्दचर्मणि वधूमुपवेशयन्ति । ततो वधूः कुशैरन्वारभते पतिर्जुहोति । "अग्निना देवेन पृथिवी लोकेन लोकानामृग्वेदेन वेदानां तेन त्वा शमयामि कल्याणश्रीः स्वाहा, वायुना देवेनान्तरिक्षलोकेन लोकानां यजुर्वेदेन तेन त्वा शमयामि असुर्य्याः कल्याणं स्वाहा श्रीः स्वाहा, सूर्येण देवेन द्यौर्लोकानां सामवेदेन वेदानां तेन त्वा शमयामि कल्याणश्रीः स्वाहा, चन्द्रेण देवेन दिशा लोकेन लोकानां अथर्ववेदेन वेदानां तेन त्वा शमयामि कल्याणश्रीः स्वाहा" इत्येतैश्चतुर्भिर्मन्त्रैः स्वाहाकारान्तैश्चतस्र आज्याहुतीर्जुहुयात् । कल्याणश्रियः स्थाने वधूकाया नामग्रहणं कर्त्तव्यम् । अथ वा " भू-

Digitized by Google

र्यातं पतिघ्न्यलक्ष्मीदेवरघ्नी जारघ्नी तां करोमि कल्याणश्रीः स्वाहा, भूर्वा या ते पतिघ्न्यलक्ष्मी"रिति समानम् । "स्वर्यातेपतिघ्न्यलक्ष्मी"रितिसमानम् । "भूर्भुवः स्वर्यातं पतिघ्न्यलक्ष्मी"रितिसमानम् । एते चत्वारो मन्त्रा वधूनामोपलक्षिताः पूर्वेषां मन्त्राणां स्थाने वैकल्पिका भवंति । एतयोर्विकल्पयोरन्यतरेण मन्त्रचतुष्टयेन चतस्र आज्याहुतीर्हुत्वा ततः "अघोरचक्षुरपतिघ्न्येधी"त्यनेन मन्त्रेण चक्षुषी आज्यशेषेण विमार्ष्टि । ततः "कयानश्चित्र आभुव"दिति तिसृभि ऋग्भिराज्यशेषेणैव केशान्तानभिमृशेत् । "उतत्यादैव्याभिषजेति"चतस्र ऋचः पठित्वाऽन्तेस्वाहाकारमेकं कृत्वा वधूकाया मूर्द्धन्याज्यं स्रुवेण जुहोति । तत् एके नेच्छन्ति । "आतेयोनिङ्गर्भएत्वि"त्यनेन मन्त्रेण साभिजनकुमारं वधूकाया उत्सङ्गे स्थापयति । अथ वा तूष्णीम् । ततस्तस्य कुमारस्योत्सङ्गस्थस्याऽञ्जलौ मङ्गल्यानि फलानि दत्वा ततो ब्राह्मणेभ्यः किञ्चिद्दत्वा "पुण्याहंभवन्तोब्रुवन्त्वि"ति ब्रूयात् । ततो ब्राह्मणाः "पुण्याह"मिति त्रिर्वदन्ति । इदं च कुमारोत्सङ्गदानं कर्म एके इति वचनात्पाक्षिकम् । ततः पाक्षिकःस्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति । अपरे त्वेवं पठन्ति । आसदुइमित्युक्तं तस्मिन्नुपवेश्यान्वारब्धायां महाव्याहृतिभिर्हुत्वा पतिश्चतस्रो जुहोति । तेषां महाव्याहृतिभिश्चतस्र आज्याहुतीर्हुत्वा ततो"ग्निवमाज्यादेवे"त्यनेन चतस्र आज्याहुतयो होतव्या इति । तत "इहैवस्तमाम्रियौष्ट"मिति षड्ऋचं वरो जपेत् । सर्वे वा जपन्ति । इहैवस्तमित्यादिना वधूं वरं च जनीयात्रिका गृहं प्रवेशयन्ति । ततः प्रविश्य "दधिक्राव्णो अकारिष"मित्यनेन मन्त्रेण दम्पत्योपि दधि संपिबतः । वरो मन्त्रं जपेत् । ततो वाग्यतौ तावदासीयातां यावदस्तमित आदित्यः । ततोस्तमिते "ध्रुवैधी"-

Digitized by Google

स्यादिना मन्त्रेण वरो वधूकाया ध्रुवं दर्शयति । ततो वधूः यदि पश्यति यदि न पश्यति उभयथापि "ध्रुवं पश्यामि, प्रजांविन्द" ति भणयितव्या । ततः पाणिग्रहणादारभ्य त्रिरात्रं मैथुनमकुर्वन्तौ भूमौ शयीयाताम् । "पिवतश्चाभिप्लुतं चावगच्छत" मिति तृचेन दम्पत्यपि दधि शुक्तं भुञ्जीयाताम् । वरो मन्त्रं जपेत् ॥

सायं प्रातर्वैवाहमग्निं परिचरेतामित्युक्तं तद्वक्ष्यामः । अत्र स्तरणाघाराज्यभागाः पाक्षिकाः । उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा ततः "अग्नये स्वाहा, अग्नये स्विष्टकृते स्वाहे" त्याज्यस्य हुत्वा ततो महाव्याहृतिभिः सर्वप्रायश्चित्तादि तन्त्रशेषं समापनीयमिति । अथ वधूः क्षिप्रं गर्भकामा भवति ततः अग्नयेस्वाहेत्यस्य स्थाने "पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ पुमानिन्द्रश्चाग्निः पुमान्संवर्त्ततां मयि स्वाहे" ति हुत्वा द्वितीया सौविष्टकृती । ततः पाणिग्रहणादारभ्य वरेण दशरात्रं वियोगः न कर्त्तव्यः ॥

पाणिग्रहणे व्यतीते त्रिरात्रं यथोक्तेन व्रतेन स्थित्वा चतुर्थेह्नि चतुर्थीकर्मेति तद्वक्ष्यामः । अत्रस्तरणाघाराज्यभागा निर्विकल्पाः । उपलेपनादि स्तरणान्तं कृत्वा ततः पूर्ववत्पवित्रच्छेदनादि प्रोक्षणान्तं कृत्वा तत "अग्नये वायवे सूर्यायार्यम्णे वरुणाय पूष्णे प्रजापतये" इति सप्तदेवताभ्यस्तण्डुलान् गृहीत्वा ततश्चरोरधिश्रयणं श्रितस्याभिघारणं कृत्वा ततः समिदाधानादि आघाराज्यभागान्तं करोति । ततोस्मिन्कर्मणि महाव्याहृतिभिर्हुत्वा स्थालीपाकस्य जुहोति इति केचित्पठन्ति । पाक्षिकमहाव्याहृतिचतुष्टयमाज्यस्य हुत्वा ततः सकृदाज्यस्योपस्तीर्य ततो द्विर्हविषः त्रिः पंचार्षेयाणां ततः पुनराज्यस्य गृहीत्वा गृहीतशेषमभिघारयन्ति । एवं सर्वत्र । "अग्नेप्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि वा-

Digitized by Google

स्यापातेम्नी तनूस्तमस्या अपजहि स्वाहा, वायो प्रायश्चित्तिरसित्वं देवानां प्रायश्चित्तिरसि यास्या अपुत्रिया तनूस्तामस्या अपजहि स्वाहा, सूर्यप्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि यास्या अपश्नव्या तनूस्तामस्या अपजहिस्वाहा, अर्यमणं नु देवं कन्या अग्निमयक्षत समांदेवो अर्यमा प्रेतो मुंचतु मापतेः स्वाहा, वरुणंनुदेवं कन्या अग्निमयक्षत समां देवोवरुणः प्रेतो मुंचतु मापतेः स्वाहा, पूषणं नु देवं कन्या अग्निमयक्षत समां देवः पूषा प्रेतो मुंचतु मापतेः स्वाहा, प्रजापतेन त्वदेतान्यन्य" इति ऋग्भिः स्वाहाकारान्तैः सप्त आहुतीः स्थालीपाकस्य हुत्वा ततः सकृदाज्यं गृहीत्वा सकृद्धविः ततो द्विरभिघार्य "अग्नयेस्विष्टकृतेस्वाहे"ति यथोत्साहं ददाति। ततो महाव्याहृतिसर्वप्रायश्चित्तादि कर्मशेषं समापनीयमिति। एते मण्डपे लौकिकाग्नौ। यदि निर्मथ्यैके विवाह इत्ययं पक्षो नाश्रितः। यदि पुनररणिपक्ष आश्रितस्ततः अरणी निर्मथ्य तस्मिन्नेवाग्नौ होमाः कर्त्तव्याः। केषां चिज्जातारणिपक्षोप्यस्ति। ततो अरणिभ्यां निर्मथ्याग्निं तस्मिन्नेवाग्नौ सर्वाणि शरीरसंस्कारार्थानि कर्माणि कर्त्तव्यानि॥

गर्भाधानकर्म वक्ष्यामः। अत्र स्तरणाघाराज्यभागाः पाक्षिकाः। ऋतुस्नातायां वध्वां युग्मेहनि उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा ततो महाव्याहृतिचतुष्टयं हुत्वा फलिनीमूलं पेषयित्वा नस्ययोग्यं कृत्वा तत "उदीष्वातः, पतिवतीह्येषा" इत्याभ्यामृग्भ्यां स्वाहाकारान्ताभ्यां प्रत्यृचं दक्षिणे नासिकापुटे निषिंचति आ उदरमापपणात्। ततो महाव्याहृतिचतुष्टयं हुत्वा पाक्षिकी स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति। ततो रात्रौ यस्यां वेलायां मैथुनं कर्तुमिच्छेत् तदा "गंधर्वस्य विश्वावसोर्मुखमसी" त्यनेन मन्त्रेण वधूकायाः योनिदेशे लोमशं प्रदेशमभि-

Digitized by Google

स्पृश्य मैथुनमारभ्य ततः समाप्ते मैथुने कर्मणि रेतसेके तूष्णीं वधूः ववघ्राय ततः "प्राणेरेतोदधामि कल्याणश्रीः" इत्यनेन मन्त्रेण वधूनामोपलक्षितेन यन्त्रारूढ एव निश्वासं तथा मुञ्चति यथा कपूकास्पर्शनं भवति । एष प्रथमपक्षः । "यथाभूमिरग्निगर्भा यथा द्यौरिन्द्रेणगर्भिणी वायुर्यथा दिशां गर्भ एवं गर्भं दधामि ते कल्याणश्रि"इत्यनेन वा मन्त्रेण निश्वासं मुञ्चति । एष द्वितीयः पक्षः । अथ वा "आते योनिं गर्भ एतु पुमान् बाण इवेषुधिं आवीरो अत्र जायतां पुत्रस्ते दशमास्यः, पुमांसं पुत्रं जनयन्तु पुमाननुजायतां तेषां माता भविष्यसि जातानाजनयांसिच, पुंसि वै पुरुषोरेतस्ततस्त्रियामनुषिञ्चतु, तथा तदब्रवीद्धाता तत्प्रजापतिरब्रवीत् प्रजापतिर्व्यदधात्सविता व्यकल्पयत स्त्रीष्वयमन्यास्वादधात्पुमांसमादधादिह यानि भद्राणि बीजानि पुरुषा जनयन्ति नः तेभिष्ट्वं पुत्रं जनय सुप्रसूर्देवेनुका भव, अभिक्रदं वीलयस्व गर्भमाधेहि साधय वृषाणं वृषं नाधेहि प्रजायै त्वा हवामहे, यस्य योनिं पतिरेतो गृभाय पुमान् पुत्रो धीयतां गर्भे अन्तः तं पिपृहि दशमास्यान्तरुदरे सजायतां श्रैष्ठ्यतमस्वाने"मिति वा । आतेयोनिमित्येवमादिर्मन्त्रगणः । अनेन वा अनुप्राणनं कुर्यात् । एष तृतीयः पक्षः । एतद्वोपस्थाभिमर्शनानुप्राणनान्तं मैथुने कुर्यादागर्भसंस्थानात् । अपरे व्याचक्षते । मैथुनान्ते शोकं कृत्वा अन्यतममनुप्राणनं कुर्यात् । अन्ये त्वाहुः पूर्वाभ्यां पक्षाभ्यामन्यतरेण पक्षेणानुप्राणनं कृत्वा ततः "आते योनिं गर्भएत्वि"त्येवमादिमन्त्रगणं जपेत् ॥

एवं गर्भिणीभूतायां वधूकायां तृतीये मासि पुंसवनं भवति तद्वक्ष्यामः । एतच्च पुष्येण श्रवणेन वा कर्त्तव्यम् । अत्र स्तरणाघाराज्यभागाः पाक्षिकाः । उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा महाव्याहृतिचतुष्टयमाज्यस्य हुत्वा ततः सोमस्य सूक्ष्मखण्ड-

Digitized by Google

ऽथवा दर्भसूची न्यग्रोधस्य वा ऊर्द्धमुच्छ्रिता शाखा तस्य यः सर्वेषां
दृदोऽङ्कुरस्ते वा अथ वा श्रुरुहोमो यावन्न क्रियते तावदेव यूप-
स्था गृह्यन्ते या आहनवीयस्याभिमुखा तां वा अथ वा समाप्ते
यज्ञे जुह्वाः संस्रावं वा एतेषां सोमादीनामन्यतमस्य नस्ययोग्यं कृत्वा
ततः "अग्निनारयिमश्नवत्तन्नस्तुरीयमधयोषंपनुसमिद्धाग्निवन् वस्ती-
र्णबर्हिपिशङ्गरूपः स्तुसुभरोवयोधा" इत्येतैश्चतुर्भिर्मन्त्रैः स्वा-
हाकारान्तैर्दक्षिणे नासापुटे प्रतिमन्त्रं चतुरो निषेकान् कृत्वा
ततो महाव्याहृतिचतुष्टयं ततः पाक्षिकः स्विष्टकृत्ततो महाव्याहृति-
सर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति ॥

गर्भरक्षणं वक्ष्यामः । गर्भसंभवादारभ्य चतुर्थे मासि भव-
ति । अत्र स्तरणाघाराज्यभागा निर्विकल्पाः । "रक्षोहाग्नये-
जुष्टंगृभ्णामी"ति मनसा ग्रहणम् । उपलेपनोल्लेखनाद्याघाराज्य-
भागान्तं कृत्वा ततः"ब्रह्मणाग्निः संविदान" इति प्रत्यृचं षड्भिर्मन्त्रैः
स्वाहाकारान्तैः षडाहुतीः स्थालीपाकस्यावदानधर्मेण हुत्वा त-
तः स्विष्टकृतं हुत्वा महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापये-
त्।तत आज्यस्थाल्यां यदाज्यं परिशिष्टं तद्धस्तेन गृहीत्वा "अक्षा-
भ्यां तेनासिकाभ्या"मितिषडर्चेन प्रत्यृचं यथालिङ्गमङ्गान्यत्र वि-
मार्ष्टि ॥

सीमन्तोन्नयनं कर्म वक्ष्यामः । गर्भाधानमासाद् सप्त-
मे मासि प्रथमगर्भे सीमन्तोन्नयनं भवति । सर्वोपकरणानि
पुंल्लिङ्गानि भवति । पुंल्लिङ्गे च नक्षत्रे कर्त्तव्यम् । अत्र
स्तरणाघाराज्यभागा निर्विकल्पाः । उपलेपनोल्लेखनाद्याघा-
राज्यभागान्तं कृत्वा ततो माङ्गल्यं स्नानं कारयित्वा अहते वाससी
परिधाय पश्चादग्नेरुपवेश्याऽन्वारब्धायां महाव्याहृतिभिश्चतस्र
आहुतीर्हुत्वा ततः स्थालीपाकस्य मुद्गमिश्रस्य वा "धातादधातु

Digitized by Google

दायुषे प्राचीं जीवातुमक्षिति वयं देवस्य धीमहि सुमतिं सत्यधर्मणः, धाता प्रजयाऽउत्तराय ईशे धातेह विश्वं भुवनं जजान धाता पुत्रं यजमानाय दत्तां तस्माऽज्जुहव्यं घृतवज्जुहोते"तिसूत्रपठितं मन्त्रद्वयं " नेजमेषपरापते"ति तिस्र ऋचः "प्रजापतेनत्वदेतान्यन्य" इति षष्ठी एतैः षड्भिर्मन्त्रैः स्वाहाकारान्तैः षडाहुतीः अवदानधर्मेण स्थालीपाकस्य हुत्वा ततस्त्रिश्वेतया शलल्या दर्भमुष्ट्या वा एताभ्यामन्यतरमुदुम्बरफलैरभिनवैः सह गृहीत्वा ललाटमध्यादारभ्य लोकप्रसिद्धं सीमन्तमुन्नयतीति । अपरे त्वेवं व्याचक्षते । नाभेरन्तरमारभ्य सीमन्तमुन्नयन्ति । ततो "भूर्भुवः स्व" रित्यनेन मन्त्रेण तान्युदुम्बरफलानि गर्भिण्या उत्सङ्गे निदधाति । अपरे त्वेवं व्याचक्षते । "भूर्भुवः स्वः" इत्यनेन मन्त्रेण सीमन्तमुन्नयति । तूष्णीं तान्युत्सङ्गे निदधाति । ततस्तानि फलानि त्रिवृतिसूत्रेण बद्ध्वा "अयमूर्जावतोत्तक्षऊर्जीव फलिनीभवे"त्यनेन मन्त्रेण त्रिवृतिसूत्रग्रथितैरुदुम्बरफलैः कण्ठे बध्वा वीणागायिनः "राजानं सङ्गायते"ति ब्रूयात् । अथ वा अन्यं कञ्चित्पौरुषेण विख्यातं वीरं सङ्गायतेति ब्रूयात् । तत उदकपूर्णे पात्रे व्रीहीन् यवान् वा प्रक्षिप्य विष्णुर्योनिंकल्पयत्वि"त्येका ऋक् । "राकाहुवां सुष्टुतीहुव" इति षडृचः एताभिः सप्तभिर्मन्त्रैः अक्षतामिश्रस्योदकस्य प्रतिमन्त्रं सप्तप्रस्तावीर्गर्भिणीं पाययेत् । तत आचान्तायाः "सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरोगायत्रं चक्षुश्छन्दास्यङ्गानि यजूषिनासोमतेतनू"रित्यनेन मन्त्रेण गर्भिण्या उदरमभिमृशेत् । ततो नित्यं प्रहृष्टा या स्त्री तां मङ्गलगीतानि गापयेत् अथ वा बहुसुवर्णालङ्कृता तां वा गापयेत् । एतत्कृत्वा प्रवहनसमर्थौ बलीवर्दौ दक्षिणा । ततः स्विष्टकृत्ततो महाव्याहृतिभिः सर्वमायश्चित्तादिकं कर्मशेषमशेषं समापनीयमिति । काकातनिका बृहत्कलञ्जनिका

Digitized by Google

लोहितैः शोभनैर्मृद्भिः फलैर्विकचा अञ्जलौ मृद्यमाना पिच्छिला भवति । पाठकिकेति च प्रसिद्धा । कोशातकी घोषाटकीति प्रसिद्धा । बृहती प्रसिद्धा । कालङ्कीतकं कालाधकलिकेति प्रसिद्धा । एतेषां पञ्चानां मूलानि पेषयित्वा भविष्यत्सूतिकागृहमुपलेपयेत् । रक्षोपघातार्थं न तु शरीरसंस्कारार्थमदृष्टार्थं वाऽनित्यमेतत् ।

जातकर्म वक्ष्यामः । अत्र स्तरणाघाराज्यभागाः पाक्षिकाः । कुमारे जाते अच्छिन्नायां नाभ्यामुपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा महाव्याहृतिचतुष्टयै हुत्वा बालं तूष्णीं त्रिरवघ्राय ततः "ऋचाप्राणिहि, यजुषासमनिहि, साम्नोदनिहि" इत्येतैस्त्रिभिर्मन्त्रैः प्रतिमन्त्रं बहिर्दत्ति निश्वासं बालकस्योपरिष्टात्करोति । ततो घृतमधुनी एकीकृत्य दध्युदके च एकीकृत्य ततश्चत्वार्येकीकुर्यात् । अथ वा व्रीहियवौ वा संनिघृष्य अभ्यवहारयोग्यौ कृत्वा " प्रतेषञ्चामिमधुमन्मखायवेदं प्रसूतंसवितामघोना आयुष्णान्युपितोदेवताभिः शतंजीवशरदो लोकेस्मिन् देवदत्त" इत्यनेन मन्त्रेण त्रिः प्राशयेत् सुवर्णेन । प्रतिप्राशनं मन्त्रावृत्तिः । देवदत्त इत्येतस्य स्थाने कखचछटठतथ पफशषसः एतान्मुक्त्वा शेषाणां मध्ये एकमक्षरमादौ कुर्यात् । यरलव इत्येतेषां चतुर्णामक्षराणामेकं मध्ये कृत्वा ततः कृत्प्रत्ययान्तं कुर्यात् । मिश्रिततद्धितप्रत्ययान्तमपि न कुर्यात् । द्व्यक्षरं चतुरक्षरं वा अथ वा षडक्षरमेवंलक्षणेन नाम्ना आमन्त्रणं कुमारस्य कुर्यात् । तच्च नाम मातापितरावेव वर्जयेतामिति । अपरे तु व्याचक्षते । यत्पूर्वपुरुषाणां पितृपितामहप्रपितामहानां कृतं तदेव नाम कुर्यात् न स्वमनीषिकया । सांप्रतं माण्डूकेयवचनं वक्ष्यामः । गोः कृष्णप्रायस्य शुक्लकृष्णानि लोहितानि च रोमाण्यभ्यवहारयोग्यानि कृत्वा यथोक्ते चतुष्टये प्रक्षिप्य पूर्वोक्तेनैव मन्त्रेण चतुः प्राशयेत् । अथ वा "भूर्भुवस्त्वेदंत्वयि

Digitized by Google

दधामि देवदत्त स्वाहा, भूतोयजुर्वेदंत्वयि दधामि देवदत्त स्वाहा, स्वः सामवेदंत्वयि धदामि देवदत्त स्वाहा,भूर्भूवःस्वर्वाकोवाक्यमितिहासपुराणमोंसर्वान् त्वयि दधामिदेवदत्त स्वाहा " इत्येते चत्वारो मन्त्राः स्वाहाकारान्ताः पूर्वोक्तस्य मन्त्रस्य स्थाने त्रैकाल्पिका भवन्ति। एतैश्चतुर्भिमन्त्रैः श्रतुः प्राशयेत् । देवदत्तस्थाने पूर्वोक्तलक्षणाभ्यामन्यतरन्नाम दध्यात् । अपरे त्वेवं वर्णयन्ति । यदेतद्भूरुग्वेदामिति माण्डूकेयमतमेतस्मिन्निर्विकल्पमेव भवति । "प्रतेयछामि"इत्यनेन मन्त्रेण सह विकल्पो नास्ति । ततः अन्यतरेण पक्षेण कुमारस्य प्राशनं कृत्वा ततः "वाक्ववाक्" इत्येवं कुमारस्य दक्षिणे कर्णे पठित्त्वा "वाग्देवी मनसा संविदाना प्राणेन वश्येन सहेन्द्रप्रोक्ताः जुषतां त्वा सौमनसायदेवीमहीमन्द्रा क्राणी वाणीवीः सलिलाः स्वयंभू' रित्यनेन मंत्रेण कुमारमनुमन्त्र्य ततः शणसूत्रेण सुवर्णं ग्रथित्वा बालकस्य दक्षिणे हस्तेत्रभाति । तत एकादशेह्नि तत्सुवर्णं ब्राह्मणाय दद्यात् गृहे वा धारयेत् । ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति ॥

नामकरणं वक्ष्यामः । यस्मिन्नेवाग्नौ जातकर्महोमः कृतः तस्मिन्नेवेदमपि कर्तव्यम् । अत्र स्तरणाघाराज्यभागा निर्विकल्पाः । ग्रहणप्रोक्षणानि न कुर्यात् । मातापितरौ कुमारस्य शिरः स्नाप्य अहतवाससी भूत्वा उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा ततो यस्यां तिथौ कुमारो जातस्तां तिथिं " प्रतिपदे द्वितीयायै तृतीयायै चतुर्थ्यै पञ्चम्यै षष्ठ्यै सप्तम्यै अष्टम्यै नवम्यै दशम्यै एकादश्यै द्वादश्यै त्रयोदश्यै चतुर्दश्यै पौर्णमास्यै अमावास्यायै" अनेन प्रकारेण जन्मतिथिं स्वाहाकारान्तं हुत्वा ततो जन्मनक्षत्रस्य यत्पूर्वं नक्षत्रं तस्य दैवतं हुत्वा नक्षत्रं जुहोति ।

Digitized by Google

ततो जन्मनक्षत्रस्य दैवतं हुत्वा जन्मनक्षत्रं जुहोति। ततो जन्मनक्षत्रस्योपरिष्टात् यन्नक्षत्रं तस्य दैवतं हुत्वा तं नक्षत्रं जुहोति। कथं जुहोतीति वक्ष्यामः।"अश्विभ्यां स्वाहा, अश्विनीभ्यां स्वाहा, यमाय स्वाहा, भरणीभ्यः स्वाहा, अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा, प्रजापतये स्वाहा, रोहिण्यै स्वाहा, सोमाय स्वाहा, मृगशिरसे स्वाहा, रुद्राय स्वाहा, आर्द्राभ्यः स्वाहा, अदित्ये स्वाहा, पुनर्वसुभ्यां स्वाहा, बृहस्पतये स्वाहा, पुष्याय स्वाहा, सर्पेभ्यः स्वाहा, अश्लेषाभ्यः स्वाहा, पितृभ्यः स्वाहा, मघाभ्यः स्वाहा, भगाय स्वाहा, फल्गुनीभ्यां स्वाहा, अर्यम्णे स्वाहा, फल्गुनीभ्यां स्वाहा, सवित्रे स्वाहा, हस्ताय स्वाहा, त्वष्ट्रे स्वाहा, चित्रायै स्वाहा, वायवे स्वाहा, स्वात्यै स्वाहा, इन्द्राग्निभ्यां स्वाहा, विशाखाभ्यां स्वाहा, मित्राय स्वाहा, अनुराधाय स्वाहा, इन्द्राय स्वाहा, ज्येष्ठाय स्वाहा, निर्ऋत्यै स्वाहा, मूलाय स्वाहा, अद्भ्यः स्वाहा, आषाढाभ्यः स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, आषाढाभ्यः स्वाहा, विष्णवे स्वाहा, श्रवणाय स्वाहा, वसुभ्यः स्वाहा, धनिष्ठाभ्यः स्वाहा, वरुणाय स्वाहा, शतभिषजे स्वाहा, अजायैकपदे स्वाहा, प्रोष्ठपदाभ्यः स्वाहा, अहिर्बुध्न्याय स्वाहा, प्रोष्ठपदाभ्यः स्वाहा, पूष्णे स्वाहा, रेवत्यै स्वाहा" एवं जन्मतिथि नक्षत्रदेवतास्तिस्रः त्रीणि नक्षत्राणि एताः सप्त आहुतीर्हुत्वा, ततः "आयुष्टेऽग्नीर्भिरथमग्निर्वरेण्यः आयुर्नोदेहि जीवसे स्वाहा, आयुर्दाग्ने हविषा वृद्धा नो घृतप्रतीको घृतयोनिरेधि घृतं पीत्वा मधु चारु गव्यं पितेवपुत्रमभिरक्षतादिमं स्वाहा अत्वंसोममहेभग"मिति ऋक् स्वाहाकारान्ता एवमेता दश आहुतीः स्थालीपाकस्यावदानधर्मेण हुत्वा, ततः अघोषवदाद्येवमादिवर्जितमात्मने यद्रोचते तन्नामधेयं प्रकाशं कृत्वा ब्राह्मणान् स्वस्तिवाच्य स्विष्टकृतं हुत्वा यथोत्साहं दद्यात्। ततो म-

Digitized by Google

ह्याहुतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति ॥

एवमेव मासि मासि जन्मतिथि हुत्वोर्द्धं संवत्सराद्धुत्वाग्नौ जुहोतीति नामकरणस्यैव कर्मशेष उक्तस्तं वक्ष्यामः । अत्र स्तरणाघाराज्यभागाः पाक्षिकाः । उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा तत उक्तेन प्रकारेण कुमारस्य जन्मतिथिमाज्येन हुत्वा ततः पाक्षिकः स्विष्टकृत्ततो महाव्याहृत्यादितन्त्रशेषं समापनीयमिति । एतत्कर्म मासि जन्मतिथौ तस्मिन्नेवाग्नौ तावत्कर्त्तव्यं यावत्संवत्सरं पूर्णम् । तत ऊर्ध्वं संवत्सरे आवसथ्याग्नौ तावत् क्रियते यावत् कुमारस्यात्मीयमावसथ्याधानं जायते । तत आत्मीयावसथ्याग्नौ यावज्जीवं कर्त्तव्यमिति ॥

अन्नप्राशनं वक्ष्यामः । कुमारस्य जन्मत आरभ्य षष्ठे मास्यन्नप्राशनं भवति । लौकिकेग्नौ गृहाभ्यन्तरमेव कुर्यात् । अत्र स्तरणाघाराज्यभागाः पाक्षिकाः । उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा ततः " अन्नपतेन्नस्य नो धेह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे स्वाहा, यद्विद्धितेपुरुषत्राय" इत्यृक् " महश्चिदग्नएनसो अभीक" इत्यृक् " इममग्न आयुषे वर्चसे तिग्ममोजो वरुणसोमराजन् मा ते वास्मा अदितिः शर्मयं सद्विश्वेदेवजरदष्टिर्यथासत्स्वाहा " एतैश्चतुर्भिर्मन्त्रैः स्वाहाकारान्तैश्चतस्र आहुतीर्हुत्वा ततः " अग्नआयूंषिपवस"इत्यनेन मन्त्रेण कुमारकमभिमन्त्र्य "स्योनापृथिविनोभवे" त्यनेन मन्त्रेण ऊर्ध्वाग्रेषु कुशेषु प्राङ्मुखमुपवेश्य दधिमधुघृतमिश्रमन्नं महाव्याहृतिभिश्चतसृभिः प्रतिमन्त्रं चतुः प्राशयेत् । अपरे त्वेवं वर्णयन्ति । महाव्याहृतिभिस्त्रिः प्राशयेदिति । एतच्चावश्यित्यं शरीरसंस्कारकम् । अथ कुमारस्य पिता कुमारकार्य एव कामसंयुक्तो भवेत्ततोऽनेनैव प्रकारेण छागमांसमन्नाद्यकामः, तै-

Digitized by Google

त्रिरीयं ब्रह्मवर्चसकामः, मात्स्यं जवनकामः, घृतेनाक्तमोदनं तेजस्कामः, इत्येवमन्नप्राशने कृते पाक्षिकः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादिके कर्मशेषे कुमारस्य माता प्राश्नीयात् ॥

चूडाकरणं वक्ष्यामः। जन्मत आरभ्य कुमारस्य संवत्सरे पूर्णेऽब्द वा तृतीये वर्षे चूडाकरणं भवति। एतच्च बहिः लौकिकेऽग्नौ मण्डपे कर्त्तव्यम्। अत्र के चित्पठन्ति। पञ्चमे क्षत्रियस्य सप्तमे वैश्यस्येति। अत्र स्तरणाघाराज्यभागाः पाक्षिकाः। उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा ततो व्रीहियवतिलमाषाणां चतुर्णां द्रव्याणां चत्वारि पृथक्पात्राणि यथाशक्त्या पूरयित्वा वलीवर्दचर्म गोमयं यवतिले समूलकुशसहिते लोष्टं स्थापितमादर्शं लोहक्षुरं च एतानि सर्वाणि अग्नेरुत्तरतः स्थापयित्वा महाव्याहृतिचतुष्टयं हुत्वा तत आनडुहे चर्मणि कुमारकमुपवेश्य "संपृच्यध्वमृतावरीरूर्म्मिणामधुमत्तमाः पृञ्चतीर्मधुना पयोमन्द्रा धनस्यसातय" इत्यनेन मन्त्रेण एकारान्तेन उष्णास्वप्सु शीता आसिञ्चति। ततः "आपउन्दन्तुर्जीवसेदीर्घायुत्वायवर्चसे, आयुषं जमदग्नेः कश्यपस्य आयुषम् अगस्त्यस्य आयुषं यदेवानां आयुषं तत्ते करोमि आयुषं देवदत्त" इत्यनेन मन्त्रेण कुमारनामोपलक्षितेन त्रिरावृत्तेन कुमारस्य शिरसि दक्षिणे पार्श्वे केशान् स्तोकान् शीतोष्णव्यामिश्रताभिरद्भिस्त्रिः प्रक्षालयेत्। ततः स्त्रिः श्वेतया शलल्या विजटीकरणं पाक्षिकम्। ततस्तानेव केशांस्तूष्णीं नवनीतेनाभ्यज्य ततः "ओषधेत्रायस्वैन" मित्यनेन मन्त्रेण तेषामेव केशानां छेदनदेशे कुशतरुणमन्तर्धाय ततः केशान् कुशतरुणं चादर्शेन युगपत् स्पृष्ट्वा ततः "तेजोसि स्वधितिष्टेषिता मैनं हिंसी" रित्यनेन मन्त्रेण लोहक्षुरं गृह्णाति। अपरे त्वेवं व्याचक्षते। ताम्रमयं क्षुरं गृह्णाति। तच्च न युज्यते। ताम्रमयस्य

Digitized by Google

च्छेदनाऽसामर्थ्यात् अननुष्ठानत्वाच्च । ततः क्षुरं गृहीत्वा " येनावपत्सविता क्षमश्वग्रे क्षुरेण राज्ञो वरुणस्य विद्वान् येन धाता बृहस्पतिरिन्द्रस्य चावपच्छिरः तेन ब्रह्माणो वपतेदमद्यायुष्मान्दीर्घायुरयमस्तु वीरो देवदत्त " इत्यनेन मन्त्रेण सकुशतरुणान् केशांश्छित्वा सकुशलोष्टस्थे गोमये स्थापयेत् । एव " माप उन्दतुजीवसे " इत्यारभ्य गोमये केशस्थापनान्तमेवं द्वितीयच्छेदनमेवं तृतीयच्छेदनं कृत्वा गां ददात्यहतं वासश्च । ततोऽनेनैव प्रकारेण द्विरुत्तरतः स्थित्वा ततो नापितेन यथागोत्रास्थिति क्रियमाणं मुण्डनं कारयित्वा ततो महाव्याहृतिचतुष्टयं पाक्षिकस्विष्टकृत् ततो महाव्याहृतिसप्तकव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयम् । व्रीहियवतिलमाषपात्राणि नापिताय दद्यात् । बहोषधिसंपन्ने प्रदेशे उदकस्य वा समीपे कुमारकेशान् भूमौ निखनेत् । कन्यानां तूष्णीं कर्माणि कर्त्तव्यानि । षोडशवर्षेऽष्टादशे वा गोदानकर्म भवति । तत्र द्वौ च्छेदावधिकौ कर्त्तव्यौ । शेषं चूडाकरणकर्मसमानमिति ॥

इति अहिछत्राविषये कौसुंवरवास्तव्यवासुदेवकृते साङ्ख्यायनगृह्यसंग्रहे प्रथमोऽध्यायः समाप्तः ॥

उपनयनं वक्ष्यामः । गर्भाष्टमे वर्षे ब्राह्मणस्योपनायनं कुर्यात्, गर्भदशमे गर्भैकादशे क्षत्रियस्य, गर्भद्वादशे वैश्यस्य । सर्वेषामादिभूतानां कालानामतिक्रमकालो द्विगुणादूर्द्धं नात उपनेतव्याः । न च तैःसहाऽध्ययनयाजनविवाहादि कुर्यात् । अत्र स्तरणाघाराज्यभागाः पाक्षिकाः । उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा महाव्याहृतिचतुष्टयं हुत्वा ततो यथागोत्रास्थिति कृतमुण्डनक्रियं कृतस्नानं यथाविभवमलंकृतमहतवाससाऽऽच्छादितं कृष्णा-

Digitized by Google

जिनोत्तरीयं माणवकं कृत्वा पश्चादग्नेः प्रत्यङ्मुखं स्थितं कुर्यात्। ततः आचार्यः प्राङ्मुखः स्थितः "इयं दुरुक्तं परिबाधमाना वर्ण पवित्रं पुनती म आगात् प्राणापानाभ्यां बलमाविशन्तीस्वसादेवी सुभगा मेखलेय" मित्यनेन मन्त्रेण मौञ्जमेखलया कटिप्रदेशं प्रदक्षिणया त्रिः परिवेष्टयति। त्रिभिरावेष्टनैर्नव गुणा भवन्ति। ग्रन्थीन् यथागोत्रं प्रवरसङ्ख्यया कुर्यात्। मेखलामन्त्रयज्ञोपवीतमन्त्रे माणवकेनाप्युच्चारयितव्ये मन्त्रलिङ्गात्। "मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि द्रविणं समिद्धं अनाहनस्यं वसनं जरिष्णु परीदम्बाज्यजिनन्दधेहम्, यज्ञोपवीतमसि यज्ञस्यत्वोपवीतोनोपनह्यामी"त्यनेन मन्त्रेण त्रिवृतमूर्द्धीकृतं कार्पासमयं लोकप्रसिद्धं यज्ञोपवीतं गृहीत्वा माणवकस्य दक्षिणं बाहुं प्रवेशयित्वा शिरः प्रवेश्य वामे स्कन्धे स्थापयेत्। एवं यज्ञोपवीतीत्युच्यते विपरीते तु न। अप्राचीनावीतिनं कृत्वा ततो माणवकस्यात्मीयं चाञ्जलिमुदकेन पूरयित्वा "को नामासि" इत्याचार्यो माणवकं पृच्छति "स मानार्षेयोहं भो" इति माणवकः स्वं नाम कथयति। ततो "ब्रह्मचारी भवान्ब्रूही" त्याचार्यः पृच्छति। "ब्रह्मचार्यहंभो" इति माणवकः कथयति। एवं पृष्ट्वाख्यातवृत्त आचार्यो माणवकाञ्जलौ "भूर्भुवः स्व"रित्यनेन मन्त्रेणोदकाञ्जलींस्त्रीनासिच्य माणवकाञ्जलिं स्वहस्तसंपुटेन दक्षिणहस्तोत्तरेण गृहीत्वा "देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामुपनयामि देवदत्त" इति मन्त्रं माणवकनामोपलक्षितं जपेत्। अथ माणवकसमूहाधिपत्यमिच्छति ततो "गणानां त्वा गणपतिं हवामहे" इत्येतामृचं जपेत्। "आगन्तामारिषे"त्यनेन ऋचा क्षत्रियान् उपनयेत्। अथ माणवकस्त्रैवर्णिको व्याधितो भवति ततो महाव्याहृतीश्चतस्रो जपेत्। "ॐ भूः ॐ भुवः ॐ स्वः ॐ महर्भूर्भुवः स्वः, उपन-

Digitized by Google

वामिदेवदत्त" इत्यनेन मन्त्रेण । एवं त्रयाणामपि वर्णानां मन्त्रे माणवकनाम उच्चारयितव्यम् । अपरे त्वेवं व्याचक्षते "देवस्यत्वासवितु"रित्यनेन सह समुच्चय इति । ततस्तथा गृहीताभ्यामेव हस्ताभ्यां "भगस्ते हस्तमग्रभीत्सविता हस्तमग्रभीत्पूषा ते हस्तमग्रभीदर्यमाहस्तमग्रभीन्मित्रस्त्वमसि धर्मणाग्निराचार्यस्तव देवदत्तोहं चोभावग्न एतं ते ब्रह्मचारिणं परिददामीन्द्रैतं ते ब्रह्मचारिणं परिदद्दाम्यदित्यैतं ते ब्रह्मचारिणं परिददामि विश्वेदेवा एतं वो ब्रह्मचारिणं परिददामि दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय रायस्पोषाय सर्वेषां देवानामाधिपत्याय सुश्लोक्याय स्वस्तये" इतीमं मन्त्रं माणवकनामोपलक्षितं जपित्वा ततः "ऐन्द्रीमावृतमावर्त आदित्यस्यावृतमन्वावर्त्ते" इत्यनेन मन्त्रेण माणवकं प्रदक्षिणमावर्त्तयित्वा प्राङ्मुखं करोति । माणवकोऽपि मन्त्रमुच्चारयति । आचार्यो माणवकस्य दक्षिणकक्षान्तरे स्वं दक्षिणं हस्तं प्रवेशयित्वा " अरिष्यतस्ते हृदयस्य प्रियो भूयास" मित्यनेन मन्त्रेण दक्षिणप्रादेशेन हृदयदेशमभिमृश्योदकं स्पृष्ट्वा ततस्तूष्णीमप्रदक्षिणं पर्यावृत्यात्मनोभिमुखं कृत्वा माणवकस्य हृदये उर्द्धाङ्गुलिं पार्णिस्थापयित्वा " ममव्रते हृदयं ते दधामि ममचित्तमनुचित्तं ते अस्तु ममवाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमाक्षिकस्यसावित्रस्यब्रह्मचर्यस्य देवदत्त " इति मन्त्रं माणवकोपलक्षितं जपेत् । अथ वा अत्रेरात्रिकस्यसावित्रस्यब्रह्मचर्यस्य, अथ वा द्वादशरात्रिकस्य सावित्रस्य ब्रह्मचर्यस्य, अथ वा सांवत्सरिकस्येति । उदकं स्पृष्ट्वा तत "ऐन्द्रमावृतमावर्त्त " इत्यनेन मन्त्रेण पूर्वोक्तेन पुनः प्रदक्षिणमावर्त्तयित्वा प्राङ्मुखं कृत्वा दक्षिणेन प्रादेशेन माणवकस्य दक्षिणस्कन्धप्रदेशमन्वारभ्य "ब्रह्मचार्यसि, समिधमाधेहि, अपोशान,कर्मकुरु,मादिवासुषुप्थाः,वाचंयच्छाऽऽसमिदाधानादि"

Digitized by Google

ति मन्त्रं जपित्वा तथा कथयति यथा माणवकस्य प्रतिपत्तिर्भवति । ततः " एषाते अग्ने समित्तया वर्द्धस्व चाचप्यायस्व वर्द्धिषीमहि च वयमाचप्यासिषीमहि स्वाहा"इत्यनेन मन्त्रेण माणवकस्तस्मिन्नेवाऽग्नौ समिधमादध्यादमन्त्रकञ्च ॥

सावित्रनुवचनं वक्ष्यामः । अस्मिन् कर्मणि त्रयः पक्षाः । संवत्सरसावित्रमिन्वाह, त्रिरात्र, मन्वक्षं वेति । तत्र तावच्छिष्टैरन्वक्षपक्ष एवाङ्गीकृतः । स उच्यते । समिदाधानान्तमुपनयनकर्म कृत्वा तस्मिन्नेव तत्रोत्तरेणाग्निं प्राङ्मुख आचार्यः प्रत्यङ्मुखो माणवको द्वावप्युपविशतः । तत आचार्यः "माणवकमधीहि भो " इति चोदयति । तत आचार्य ॐङ्कारं कृत्वा "सावित्रींभो अनुब्रूही"ति माणवकं वाचयति । ततः आचार्य ॐङ्कारं कृत्वा "तत्सवितुर्वरेण्य " मित्येतामृचं पादं पादं पाठयित्वाऽर्द्धर्चमर्द्धर्चं पाठयेत् । ततः कृत्स्नामेव । मध्येऽवसानं न कर्त्तव्यम् । एतामेव वर्णत्रयस्यापि समनुब्रूयादिति स्मृत्यन्तरीयदर्शनम् । एतां पाठयित्वा "आपो नामहैस्थशिवा नाम स्थोर्जानामस्थाभया नाम स्थापूतानामस्थ तासां वोशीय सुमतौमाधत्त " इत्यनेन मन्त्रेण अकारांतेन स्मृत्यन्तरोक्तेन विधिना त्रिराचमयन्ति । मन्त्र आवर्त्तते । ततोऽग्नेः पश्चात्प्रत्यङ्मुखस्थितस्य माणवकस्य प्राङ्मुख आचार्यः स्थित एव " स्वस्तिनो मिमीतामश्विना भग " इति पञ्चर्चेन पालाशं वैल्वं वा दंडं नासाग्रसंमितमपर्यति । तत आचार्याय माणवको गां ददाति । तत आचार्यो माणवकं प्रदक्षिणमग्निं पर्यानीय ततो महाव्याहृतिचतुष्टयं जुहुयात् । ततः पाक्षिकः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति । मार्जनं गायत्र्यैव, प्राणायामत्रयं गायत्र्यैव, दशकृत्वो मार्जनमघमर्षणमपि त्रिः कृत्वो ऽञ्जलिप्रक्षेपः उपस्थानमष्टादश । अग्निका-

Digitized by Google

र्ये मन्त्रस्थाने गायत्र्येव । माणवकोपि भिक्षाटनं करोति । "भवतिभिक्षांदेहि" इत्यनेनाऽभिधानेन मातरमेव प्रथमं याचेत् । मातुरभावे या अवश्यं ददाति तां याचेत् । ततस्तावद्गृहाणि यावद्दशनपरिमाणं पूर्णं तत आगत्य "इदं भैक्ष" मित्याचार्यस्य कथयित्वाऽभ्यनुज्ञातो भुञ्जीत । अग्निकार्यं भिक्षाचरणं भूमौ शयनं गुरुशुश्रूषा एतानि ब्रह्मचारिणो नित्यं कर्त्तव्यानि । अन्यच्च क्षौमं हिरण्यं गामश्वं छत्रोपानहं ततो धान्यमक्षमथो शाकं गुरवे प्रीतिमान्माणवको ददाति । एतदपि शक्त्या कर्त्तव्यमिति । क्षत्रियस्य विशिष्टस्य माणवकस्यौपनयने विशेषानाह । माक्षिष्टं क्षौमं वासः अहतं वा रौरवं चर्म उत्तरीयं धनुर्गुणो मेखला नैयग्रोधो ललाटसंमितो दण्डः । " देवस्यत्वे " ति जपित्वा "आगन्तामारिषण्ये" ति जपेत् । सावित्र्यनुवचने त्रिष्टुभं क्षत्रियायेत्युक्तम् । ततः " आकृष्णेनरजसावर्त्तमान " इत्येतामृचमनुब्रूयात् । विद्यमाने ग्रामे ग्रामो दक्षिणा दातव्या । अविद्यमाने ग्रामे गौर्देया । "भिक्षां भवति देही" ति भक्षयाचनाभिधानम् । शेषं समानमिति । वैश्यस्य वर्णविशिष्टस्य विशेषान् वक्ष्यामः । पीत कौशेयं वासः अहतं वा गव्यं चर्मोत्तरीयं ऊर्णासूत्री मेखला औदुम्बरः केशसंमितो दण्डः । सावित्र्यनुवचने जगतीं वैश्यायेत्युक्तम् । तत्रा "घृतमि" त्यृचमनुब्रूयात् । " भिक्षांदेहि भवती " ति भिक्षाचरणाभिधानम् । अश्वो दक्षिणा अविद्यमाने गौः । शेषं समानम् । दण्डाश्च सर्वजातीयाः सर्वप्रमाणाश्च विकल्पेन सर्वेषां भवन्ति यदि त्रिरात्रपक्षं संवत्सरपक्षं सावित्र्यनुवचनेक्षीक्रियते । ततो लौकिकस्य संस्काररहितस्याग्नेरुत्तरतः कर्त्तव्यमिति ।

अनुवचनं वक्ष्यामः । अस्य च शुक्रीयव्रतादेशोत्तरकालः स्थानं मया तु सूत्रक्रमेणैव ग्रथितम् । संस्काररहितस्य लौकिकस्याग्नेरुत्त-

Digitized by Google

रतः आचार्यः प्राङ्मुख उपविशति प्रत्यङ्मुखो माणवकस्ततो माणवक आचार्यस्य पादोपसर्पणं कृत्वाभिवादयति । ततो हस्तौ प्रक्षाल्य दक्षिणोत्तराभ्यां कुशमुष्टिं मध्ये गृहीत्वा दक्षिणेन जानुना तान् कुशान् मूले आक्रमते । ततस्तानेव कुशान् सव्येनाचार्योग्रे संगृह्य ततो दक्षिणेन पाणिना आनडुहगोमयकुण्डात् गृहीताभिरद्भिः परिषिञ्चन् माणवकं वाचयति । " सावित्रीं भो अनुब्रूहि" एवं माणवकेनोक्ते "सावित्रीं ते अनुब्रवीमी"त्याचार्यो ब्रूते । सर्वेष्वेवं द्रष्टव्यम् । ततो "गायत्रीं भो अनुब्रूही"ति माणवकेनोक्ते "गायत्रीं ते अनुब्रवीमी" त्याचार्यो ब्रूते । "वैश्वामित्रीं भो अनुब्रूही" ति माणवकेनोक्ते " वैश्वामित्रीं तेनुब्रवीमी" त्याचार्यो ब्रूते । "ऋषीन् भो अनुब्रूही" ति माणवकेनोक्ते "ऋषींस्ते अनुब्रवीमी" त्याचार्यो ब्रूते। "देवता भो अनुब्रूही"ति माणवकेनोक्ते "देवतास्ते अनुबवीमी"त्याचार्यो ब्रूते । "छन्दांसि भो अनुब्रूही" ति माणवकेनोक्ते" छन्दांसिते अनुब्रवीमी"त्याचार्यो ब्रूते। "स्मृतिं भो अनुब्रूही" ति माणवकेनोक्ते "स्मृतिं ते अनुब्रवीमी" त्याचार्यो ब्रूते । " श्रद्धामेधे भो अनुब्रूही" ति माणवकेनोक्ते " श्रद्धामेधे अनुब्रवीमी"त्याचार्यो ब्रूते । पूर्वमुक्तं कृत्वा ततः आचार्यो "अग्निमीडेपुरोहितमित्येतस्य सूक्तस्य मधुच्छन्दा ऋषिरग्निर्देवता गायत्रं च्छन्द"एवं कथयित्वा ततो वाचयति । अनेन प्रकारेण सकलामेव संहितां पाठक्रमेण माणवकं वाचयेत् एष तावत्प्रथमः कल्पः । अथ वा यद्याचार्यः ऋषिदैवतच्छन्दांसि मन्त्रगतानि न जानाति तत- "तत्सवितुर्वरेण्यमि"त्येतामृचं पादं पादं वाचयित्वाऽर्द्धर्चमर्द्धर्चं ततः सकलामेव । अर्द्धर्चान्तेऽवसानं न कुर्यात् । एवं वाचयित्वा स्वरूपतः कथयति । विश्वामित्रस्यार्षमित्येषा वैश्वामित्री सविता देवता इति । एषा गायत्री त्रिपदा चतुर्विंशत्यक्षरा भवति ।

Digitized by Google

पक्षः प्रयोगेऽष्टाधिरष्टाभिरक्षरैरवसानं कुर्यात्। अर्द्धर्चप्रयोगे द्वाभ्यां प्रथमद्वितीयाभ्यामेतत्पक्षान्तरमनुवाचनस्य अथ वा एकैकस्मिन्ननुवाकमनुवाकं वाऽनुब्रूयात्। दशमे मण्डलेनुवाकमेकमनुब्रूयात्। तृतीयमेतत्पक्षान्तरम्। अथ वा प्रतिदिनं स्तोकं यावन्मात्रं शक्नोति गुरुस्तावन्मात्रं ब्रूयात्। प्रतिदिनं यावत्संहिता समाप्ता इति चतुर्थमेतत्पक्षान्तरम्। अस्य च पक्षस्यादरेणानुष्ठानमिच्छन्ति व्याख्यातारः। अथ वा एकैकस्य ऋषेः प्रथममुत्तमं च सूक्तं प्रतिदिनं ब्रूयादासमाप्तेरिति। पञ्चममेतत्पक्षान्तरम्। अथ वाऽनुवाकस्य प्रथममुत्तमं च सूक्तमनुब्रूयादासमाप्तेः। षष्ठमेतत्पक्षान्तरम्। अथ वा सूक्तसूक्तस्यादिभूतामेकैकामृचं जपितव्यामाचार्यो माणवकस्य कथयत्येतत्सूक्तस्य एषा क्रमादिभूता एवं प्रकारेतत्सूक्तम्। सप्तममेतत्पक्षान्तरम्। एतेषां सप्तानामपि पक्षाणामृषिदैवतच्छन्दांसीत्याचार्यब्रह्मदत्तेन गर्हितोयं पक्षः इति व्याख्यातम्। शेषाणां यदाचार्यस्य रोचते तदनुब्रूयात्। अन्यतरस्मिन्पक्षे समाप्ते "अस्मिन्वै लोक उभये देवमनुष्या आसुरि"त्यारभ्य यावदाचार्येच्छा तावद्वाचयित्वा "एषाशुचि"रिति कथयति। ततो "मनुमेकाग्रमासीनमभिगम्य महर्षय"इत्याद्याः शक्तितो वाचयित्वा पवमानाः स्मृतय इति कथयति। चोदितेष्वास्तिक्यं कर्त्तव्यमेषा श्रद्धा ततो ग्रहणे शक्तिर्मेधा। ततो दक्षिणेन जानुनाऽऽक्रम्य मूले कुशतरुणानित्येवमादिना यथोक्तेन कुशतरुणान्गृहीत्वा आनुडुहेन गोमयेन मूले कुण्डमुदकाधारं कृत्वोदकमासिच्य तस्मादुदकं गृहीत्वाऽगृहीतेषु कुशेष्वासिञ्चति। ततस्तदहश्चेर्धं ब्रह्मचारिणा सहोपविशेत्। न चाशनक्रियां कुर्यात्। अन्ये त्वेवं व्याचक्षते। यद्याचार्यस्यैष नियम इति। ततस्तस्मिन्नेवाह्नः परार्द्धे भवति। "अक्षतधाना भिक्षान्देही"त्यनेनाभिधानेन क-

Digitized by Google

ण्डितादिवर्जिता भाना भिक्षित्वा जुहोति । अत्र स्तरणाधारा-ज्यभागाः पार्षिकाः । उपलेपनोल्लेखनाद्याधारान्तभागान्तं कृत्वा ततो हस्तेन "सदसस्पतिमद्भुत"मिति प्रत्यृचं चतस्र आहुतीरक्षतधानानां जुहोति । ततो माणवकः खरविशदैरभ्यवहारैः सुगन्धिभिर्भिक्षैराचार्यं दर्शयित्वा "स्वस्तिभवन्तोब्रुवन्त्वि"ति ब्रूयात् । तत आचार्यः भिक्षां गृहीत्वा "ॐस्वस्ती"ति ब्रूयात् । ततः पार्षिकः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादि तन्त्रशेषं समापनीयमिति ॥

सन्ध्योपासनकर्म वक्ष्यामः । अथाहरहः सायं प्रातश्च कर्त्तव्यम् । ग्रामस्य बाह्यतः प्रागुदीच्यां दिशि अर्द्धास्तमित आदित्ये प्राणायामं कृत्वा मन्त्रेणाचम्य तत "आपोहिष्ठामयोभुव" इति तृचेन प्रत्यृचं लोकप्रसिद्धं मार्जनं कृत्वा तत उत्तराभिमुखः कृतहस्तसंपुटः वाग्यतः सावित्रीं जपंस्तावदास्ते यावत्तारकाणां दर्शनज्ञानम् । ततो निष्क्रान्तायां सन्ध्यायां समहाव्याहृतिकां सावित्रीं प्रसिद्धां जपित्वा ततः " आनोभद्राः क्रतवोयन्तु " इति सूक्तं "कयानश्चित्रआभुवदि" तिसूक्तं "एवतोयेदिषितन्तआप्य" मित्येवमादीनि लोकप्रसिद्धानि स्वस्त्ययनानि शक्तितो जपित्वा ग्रामामच्छेत् । एवं प्रातस्तावदुदीचीं दिशं गत्वा दृश्यमानेष्वेव तारकेषु पूर्ववन्मार्जनं कृत्वा प्राङ्मुखस्तावज्जपति यावदादित्योदयः । तत उदित आदित्ये सायन्तनमिव जपं कुर्यादिति ॥

अग्निकार्यं वक्ष्यामः । अहरहः सायं प्रातश्च कर्तव्यम् । अग्निं प्रज्वाल्य परिसमूह्य परिसमुह्य दक्षिणं जान्वाच्य " अग्नयेसमिधमहार्षं बृहते जातवेदसे स मे श्रद्धां च मेधां च जातवेदः प्रयच्छति स्वाहा, एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि स्वाहा, समिद्धो यां समर्द्धय प्रजया च धनेन च स्वा-

Digitized by Google

हा, एषा ते अग्ने समित्तया वर्द्धस्व चाचप्यावस्व वर्द्धिषीमहि च वयमाचप्यासिषीमहि स्वाहा " इत्येतैश्चतुर्भिर्मन्त्रैः स्वाहाकारान्तैश्चतस्रः समिध आधाय पर्युक्ष्य ततः " अग्निः श्रद्धामेधांचाविनिपातं स्मृतिं च मे ज्वलितो जातवेदा अयं युभं नः संप्रयच्छतु" इत्यनेन मन्त्रेणाग्नेरुपस्थानं कृत्वा ततः सौपर्णव्रतभाषितं दृष्टं वृद्धसंप्रदायानुप्रतिष्ठितं "त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषंयदेवानां त्र्यायुषन्तन्मे अस्तु त्र्यायुषम् " इत्येतैः पञ्चभिर्मन्त्रैः प्रतिमन्त्रं ललाटे हृदये दक्षिणस्कन्धे तत उत्तरे पृष्ठे एतेषु पञ्चदेशेषु भस्मना त्रिपुण्ड्राङ्कनं कृत्वा ततः " तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवीस्वस्तिरस्तुनः स्वस्ति मानुषेभ्यः, अर्द्धजिगातुभेषजं शंनो अस्तु द्विपदे शञ्चतुष्पदे " इति जपित्वा वक्ष्यमाणेन विधिना गुरुमभिवादयेत् ॥

शुक्रीयव्रतकर्म वक्ष्यामः । उदयने यस्मिन्नेव काले इच्छत्याचार्यस्तस्मिन् ब्रह्मचारी भूत्वा चतुर्दशीं पञ्चदशीं प्रतिपदमष्टमीमेतास्तिथीर्मुक्त्वा शोभनदिवसे द्वावपि शिष्याचार्यौ अपराह्णे प्रागुदीचीं दिशं गत्वा उपलेपनोल्लेखनाद्याधाराज्यभागान्तं पूर्ववत्पाक्षिकं कृत्वा महाव्याहृतिचतुष्टयं हुत्वा ततः पश्चादग्नेः पूर्ववच्छिष्याचार्यौ स्थित्वा ततः आचार्यः "अग्नाविन्द्रआदित्ये विश्वेषु च देवेषु चरितं ते ब्रह्मचर्यम् " इत्यनेन मन्त्रेण माणवकं पृच्छति । ततः माणवकः "चरितं भो"कथयति । तत आचार्यो माणवकं प्राङ्मुखं कृत्वा अहतेन वाससा प्रदक्षिणं मुखं त्रिर्वेष्टयति यथानयनति उपरिष्टादृदृशौ कृत्वा ततस्त्रिरात्रं समिदाधानं भिक्षाचरणमधः शय्यां गुरुशुश्रूषां चाऽकुर्वन्वाग्यतोऽप्रमत्तोरण्ये देवकुलेग्निहोत्रे वोपास्वेत्येवमनुशास्य तथा कथयति यथा माणवकस्य प्रतिपत्तिर्भवति । अथ वा एतान् नियमान-

Digitized by Google

होरात्रमुपदिश्य महाव्याहृतिचतुष्टयं हुत्वा ततः पाक्षिकः स्विष्टकृ-त्ततो महाव्याहृतिसर्वप्रायश्चित्तादि तन्त्रशेषं समापनीयमिति। अस्य च कर्मण उदीक्षणिका इति संज्ञा। ततस्त्रिरात्रेऽहोरात्रे वा निवृत्ते उपलेपनोल्लेखनादि कृत्वोर्ध्वाङ्गुलिं पाणिं हृदये निधा-य जपति। इत्येवमुपनयनकर्म कृत्वा ततो "मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं साम्वत्सरिकस्य शुक्रीयव्रतस्य ब्रह्म-चर्यस्य देवदत्त" इति माणवकं बोधयित्वा तत "ऐन्द्रीमावृत-मावर्त" इत्यादि समिदाधानान्तं कृत्वा तत "आपोनामस्य" इति त्रिराचमय्य पूर्ववद्दण्डमर्पयति। ततो माणवक आचार्याय वरं ददाति। तत आचार्यो माणवकं पूर्ववत्प्रदक्षिणमग्निं पर्याणीय तं त्रिरात्रं समिदाधानं भिक्षाचरणमित्यादि यद्विधिसिद्धं तस्यानुज्ञां दत्वा ततो महाव्याहृतिचतुष्टयं ततः पाक्षिकः स्विष्टकृत्ततो म-हाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति। ततः क-स्मिंश्चिच्छोभने दिवसे पूर्वोक्तमनुवाचनं कुर्यात्। वेदञ्च साङ्गं पाठयेत्। सावित्रशुक्रीययोर्द्वादशरात्रं संवत्सरम् आचार्येच्छे-त्यादि पक्षचतुष्टयं निर्दिष्टम्। शाकरव्रातिकायनिकानि तु साम्व-त्सरिकानीति॥

शाकरव्रतं वक्ष्यामः। उदीक्षणिकां कृत्वा तत त्रिरात्रेहोरात्रे वाऽतीते उपनयनकर्म पूर्ववत्कर्त्तव्यम्। "ममव्रतेहृदयन्ते" इत्यस्य मन्त्रस्यान्ते "बृहस्पतिष्ट्वानियुनक्तु मह्यं सांवत्सरिकस्य शाकरस्य ब्रह्मचर्यस्य देवदत्त" इति विशेषः। शेषं शुक्रीयवत्कर्त्तव्यम्। ततः संवत्सरे पूर्णे उदीक्षणिकां कृत्वाहोरात्रित्रिरात्रयोरन्यतरे निवृत्ते प्रभातवेलायां प्रागुदीचीं दिशं गच्छतः। आममांसं चण्डालं प्रसूति-कामृतुमतीं रुधिरच्छन्नहस्तकं श्मशानं सर्वाणि श्वापदानि सर्वाणि

Digitized by Google

च घृतकरूपाणि एतेषामन्यतमं दृष्ट्वा निवर्त्तते । ततो निष्क्रम्य ब्राह्मज्योतिषं पुण्यदेशमुपागम्यानुदित आदित्ये " आजनगन्धिसुरभि"मित्यनेन मन्त्रेणोदकधारया प्रदक्षिणं पूर्वद्वारं मण्डलं कृत्वा तेनैव मन्त्रेणोदकपात्रं मध्ये स्थापयित्वा ततस्तूष्णीं कुशान् दर्भांश्च क्षिपति । ततः " आजनगन्ध"मित्यनेन मन्त्रेण शिष्याचार्यौ प्रविशतः । ततः प्राङ्मुख आचार्यः प्रत्यङ्मुखः शिष्यो द्वावप्युपविश्य स्तस्मिन्नुदपात्रे द्वावपि दक्षिणहस्तौ निक्षिप्य ततो व्याहृतीश्चतस्रो गायत्रीं च पञ्चोऽर्द्चशो जपित्वा ततः " अभित्वाशूरनोनुमो दुग्धा इव धेनवः ईशानमस्य जगतश्च ईशमीशानमिन्द्रतस्थुषः, ईशानमिन्द्रतस्थुषोत्वा अन्यो दिव्यो न पार्थिवो न अविष्यते, नजातोनजनिष्यतेऽयन्तो मघवन्निद्रवाजिवः मन्वं तस्त्वा हवामहे,त्वामिद्धि हवामहे सातो वाजस्य कारवः त्वां वृत्रेष्विन्द्रसत्पतिं नरस्त्वां काष्ठास्वर्वतः, त्वां काष्ठास्वर्वतः सत्वं नृभिर्हव्रहस्तधृष्णुयामहस्तवानो अद्रिवः, महस्तवानो अद्रिवो गाश्वरथ्यमिन्द्रसंकिरसत्रावाजं नजिग्युषे" इत्यनेन प्रकारेण चतस्र ऋचः षट् कुर्यात् । "कयानश्चित्र, इति ऋचे जपित्वा ततो " दध्वमत्र" इत्याद्यारण्यकपठितेन मन्त्रेणादित्यमीक्षते । ततो "युवंसुरामम्श्विना" इति ऋक् " स्वस्तिनः पथ्यासुधन्व" इति तिस्रः "प्रत्यस्मैपिपीषतेति" तिस्रः "योरयिंवोरथितम" इति षट् "अस्मा अस्मा इदन्धस" इत्येका एता जपित्वा "एवाह्यसिवीरयुर्वे"ति जपेत् । ततो दक्षिणेन जानुनाक्रम्य मूले कुशतरुणानिस्येवमादिनानुवाचनधर्मेण "विदामघवन्नि" त्येवमाद्या आरण्यकपठिता एव पुरीषपदसंहिताः पाठयेत् । ततः "प्रत्यस्मैपिपीषत" इति पूर्वोक्ता ऋचः पाठयेत् । तत ॐङ्कारो महाव्याहृतयश्चतस्रः ततः सावित्री पूर्ववत् । ततो "अभित्वाशूरनोनुमः, त्वामिद्धिहवामहे, कयानश्चित्र

Digitized by Google

आभुव" इति पूर्ववत् ततो द्वावपि "उदितमुक्रियदध" इत्यारण्यकपठितेन मन्त्रेणादित्यादिमीक्षेयतः। "तमहमात्मन्नित्यदध" इत्यनेनात्मानमीक्षतः। तत आभ्यामेव मन्त्राभ्यामादित्यमात्मानं च पुनर्निरीक्षतः। तत "उपमाश्री" रित्येवमादिकमारण्यकपठितं मन्त्रं वपतः। "सैन्द्र" इत्येवमादिना आरण्यकपठितेन मन्त्रेणोत्तिष्ठतः। "इदमहमि" त्यादिना आरण्यकपठितेन उत्तरीये वस्त्रे धत्तः। ऋक्कं स्पृष्ट्वा प्राङ्मुखौ स्थितौ "अपप्राचइन्द्रविश्वं अमित्रानि" ति सप्त "इन्द्रश्चमृडयातिन" इति द्वे "यत्ते इन्द्रभयामह" इत्येका एता दशर्चो जपित्वा "शासइच्छामहे असी" ति पुरस्तादारभ्य तृचेन प्रतिदिशमुपस्थानं कृत्वा ततः "सविता पश्चात्तात्सविता पुरस्तात्" इति ऋक् "तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चर" दिति ऋक् ताभ्यां सूर्योपस्थानं कृत्वोपविशतः। ततः तस्मिन्नेवोदपात्रे "यथाऽऽपः शान्ता" इत्यनेन मन्त्रेणारण्यकपठितेन हस्तौ क्षिपतः। ततो "यथा पृथिव्री" त्यनेन मन्त्रेणारण्यकपठितेन भूमिं स्पृशतः। एव "मपश्चाग्ने" त्यनेन मन्त्रेणारण्यकपठितेनात्मानं स्पृशतः। एवमुदकभूम्यात्मनः पुनर्द्विः। तत उदपात्रस्थां दूर्वां गृहीत्वा "काण्डात्काण्डादित्यादिनारण्यकपठितेन मन्त्रेण स्वे स्वे शिरसि कुर्वतः। ततः "अग्निस्तृप्यतु, वायुस्तृप्यतु, विष्णुस्तृप्यतु, प्रजापतिस्तृप्यतु, विश्वेदेवास्तृप्यन्तु, सहस्राक्षस्तृप्यतु" इति षड्भ्यो देवताभ्यस्तस्मिन्नेवोदपात्रे तर्पणं कृत्वा ततः प्राचीनावीतिनौ भूत्वा "सुमन्तुजैमिनिवैशंपायनपैलवाचार्यास्तृप्यन्तिव" त्येकाञ्जलिम् एवं ततः पितृपितामहानां दत्वा ततः "पितृवंशस्तृप्यतु, मातृवंशस्तृप्यतु" इति द्वौद्वावञ्जली दत्वा ततः "समुद्रं वः प्रहिणोमी" त्यनेन मन्त्रेण समुदपात्रं प्राञ्चमुदञ्चं वा निनयतः "कयानश्चित्रआभुव" दिति तिस्रः "यथाकामे" त्यारण्यकपठित एको मन्त्र एतैश्चतुर्भिर्मन्त्रैरनुमन्त्र-

Digitized by Google

यते । तत उष्णीषं भोजनं दक्षिणां गां वाचार्याय माणवको ददाति । "तिस्वन्तं ब्रह्मणस्पत"इत्याभ्यां मन्त्राभ्यां प्रणवेन वा मर्वमाचार्यः प्रतिगृह्णाति । अत्र एके वैश्वदेवं चरुं कुर्वते । अपरे तु अग्नीन्द्रादित्यवैश्वदेवेभ्यश्चरुं कुर्वते ॥

व्रातिकव्रतस्य कर्म वक्ष्यामः । शाङ्करे समाप्ते गृहं गत्वा तत उपलेपनोल्लेखनाद्युपनयनकर्म करोति । अयं तु विशेषः । "ममव्रते हृदयन्ते दधामी"त्यस्य मन्त्रस्यान्ते "बृहस्पतिष्ठानियुनक्तुमह्यं सांवत्सरिकस्य व्रातिकस्य ब्रह्मचर्यस्य देवदत्त"इति । ततः शाङ्करवत्कर्त्तव्यम् । अयं तु विशेषः । अस्मिन्नवसरे माणवक आचार्येण महानाम्नः पाठितः तस्मिन् "प्रजापतिर्वैसंवत्सर"इति आरण्यकस्य द्वावध्यायौ श्रावयितव्याविति ॥

औपनिषदिकस्य कर्म वक्ष्यामः । व्रातिके समाप्ते गृहं गत्वा सर्वं शाङ्करवत्कर्त्तव्यम् । अयं तु विशेषः । "ममव्रतेहृदयन्ते दधामी"त्यस्य मन्त्रस्यान्ते"बृहस्पतिष्ठानियुनक्तुमह्यं सांवत्सरिकस्यौपनिषदस्य ब्रह्मचर्यस्य देवदत्त"इति । ततः शेषं शाङ्करवस्समापयति । ततः संवत्सरे पूर्णे उदीक्षणिकां कृत्वा शाङ्करवत्सर्वं करोति । अयं तु विशेषः । अस्मिन्नवसरे माणवकेन महानाम्न्ये पठिते तस्मिन्नवसरे "चित्रोहवैगार्ग्यायनि" रित्यारभ्यारण्यकं तावच्छ्रावयेद्यावत्समाप्तम् । ततः शाङ्करवत्कृत्वा गृहं प्रविश्य समावर्त्तनं कुर्यादिति ॥

दण्डनियमान्वक्ष्यामः । ब्रह्मचारिणा आत्मनो दण्डस्य चान्तरे गन्तुं कस्य चन न दातव्यम् । यदि दण्डो भज्येत ततोऽ"भिव्यस्वखादिरस्यसार"मित्यनेन मन्त्रेणान्यं गृहीत्वा "स्वस्तिनोमिमीता"मिति पञ्च जपेत् । अथ यदि मेखलायज्ञोपवीतयोरन्यतरच्छिद्येत"स्यांचिदश्वंनवाजिनमि"त्यनेन मन्त्रेण ग्रन्थिं कृत्वा "स्व-

Digitized by Google

स्तिनोमिमीता"मिति पूर्ववज्जपेत् । अथ यदि मेखला असन्धेया भवति ततोन्यां कृत्वा तूष्णीं परिधाय"मेध्यामेध्यवितायन्ने देविगोप्त्रे सरस्वति मेखले स्कन्नमच्छिन्नं संतनुष्व व्रतं मम,त्वमग्ने व्रतपाच्छुचिरग्नेदेव इहा उपयज्ञंहविश्वनः व्रतानिश्रद्धतया अदाभ्यो भवानोदूतो अजरः स्तुवीरः,दधद्रत्नास्रुग्घृडीको अस्मिगोपायनो जीवसे जातवेदः"इत्येतैस्त्रिभिर्मन्त्रैर्ब्रह्मचारी स्वयमेव मेखलामनुमन्त्रयते । ते च मेखलायज्ञोपवीते असन्धेये परित्यजनयोग्ये दण्डे बध्नाति यावच्छुक्रियादेरन्यतरस्य व्रतस्य समाप्तिः । ततो व्रतसमाप्तौ दण्डमेखलाजिनयज्ञोपवीतानि " नहितेक्षत्रं नसहोनमन्यु " मित्यनेन मन्त्रेणाप्सु जुहुयात् । अथ वा ॐङ्कारेण जुहुयात् ॥

वैश्वदेवं वक्ष्यामः । कृतावसथ्यस्यैतद्भवति । यत्किञ्चिद्गृहे पाकं सर्वप्रकारं सिद्धं तत्करटीकोद्रवमाषाद्यहविष्यवर्जितमेकस्मिन्नेव पात्रे गृहीत्वाग्निं प्रज्वाल्य परिसमुह्य पर्युक्ष्य दक्षिणं जान्वाच्य समिधमाधाय पाणिना जुहुयात् । " अग्नये स्वाहा, सोमाय स्वाहा,इन्द्राग्निभ्यां स्वाहा, विष्णवे स्वाहा, भरद्वाजधन्वन्तरये स्वाहा,विश्वेभ्योदेवेभ्यः स्वाहा, प्रजापतये स्वाहा, अदितये स्वाहा, अनुमतये स्वाहा,अग्नयेस्विष्टकृते स्वाहेति"दशाहुतीर्हुत्वा समिधमाधाय पर्युक्ष्य हुतशेषमुदकेन मिश्रयित्वा गृहमध्यभूमौ बलिं हरेत् । "अग्नयेनमः,सोमायनमः,इन्द्राग्निभ्यां नमः" इत्यादिभ्य दशभ्य आहुतिदेवताभ्यो नमस्कारान्ताभ्यो दत्वा ततः "नमोब्रह्मणे, ब्राह्मणेभ्योनमः,वास्तोष्पते प्रतिजानीह्यस्म" न्मित्यृचानमस्कारमन्त्रेण ।"अपरे "वास्तोष्पते"इति प्रत्यृचं जपति । तेषामृक्क्रमेण नमस्कारान्तेन त्रयो बलिदानाः । वास्तोष्पतयेनमः । ततो बलिहरणस्य पूर्वे पूर्वस्यां दिशि "नमइन्द्राय,ऐन्द्रेभ्योनमः" ततो दक्षिणस्यां दिशि "नमोयमाय, याम्येभ्योनमः" ततः प्रतीच्यां दिशि"नमोवरु-

Digitized by Google

णाय, वारुणेभ्योनमः"तत उदीच्यां दिशि "नमःसोमाय,सौम्येभ्योनमः"तत ऊर्ध्वायां दिशि "नमोबृहस्पतये, बार्हस्पत्येभ्योनमः"। ततो "विश्वेभ्योदेवेभ्योनमः"। तत आदित्याकारेण सोमयेन कृते मण्डले"नमआदित्याय,आदित्येभ्योनमः"। ततो "नमोनक्षत्रेभ्यः,ऋतुभ्योनमः,मासेभ्योनमः, अर्द्धमासेभ्योनमः, अहोरात्रेभ्योनमः, संवत्सरेभ्योनमः,धात्रेनमः, विधात्रेनमः,पूष्णे पथिकृतेनमः,मरुद्भ्योनमः"। धात्रेइत्यादयश्चत्वारो मन्त्राः। एतैर्द्वादशबलिहरणं कर्त्तव्यम्। प्रथमं दक्षिणस्यां तत उत्तरस्यां ततोपस्ताच्चत उपरिष्टं दिति। "विष्णवेनमः"इति पेषण्यां "वनस्पतयेनम" इत्युलिखते "ओषधीभ्योनमः" इति यस्मिन्प्रदेशे व्रीह्यादिधान्यानि। ततः"पर्जन्यायनमः, अद्भ्योनम"इति बलिहरणद्वयमुदकपूर्णे मणिक्के। "नमः श्रियै"इत्यनेन शय्यायां शिरसि "भद्रकाल्यैनमः"इति शय्यायामेव पादतो "नमः सर्वभूतपतये"इत्यनेन यस्मिन् देशे मूत्रपुरीषोत्सर्गः क्रियते। "नक्तंचरेभ्योनमः" इति अन्तरिक्षे। "अहश्चरेभ्योनमः" इति अन्तरिक्ष एव। "अविज्ञाताभ्योनम"इत्यादिमण्डलस्योत्तरतः। "धनपतयेनम"इत्युत्तरत एव। ततोपसव्यं कृत्वा "ये अग्निदग्धाये अनग्निदग्ध्या" इत्यृचं पठित्वान्ते"स्वधानम"इत्युक्तादित्यमण्डलतो दक्षिणस्यां बलिहरणस्थं शेषं क्षिपेत्। ततो वैश्वदेवान्ते ब्राह्मणमन्यतमस्य वेदस्याध्येतारं भोजयेत्। ततो"हन्त" इत्यनेन मन्त्रेण हन्तकारं कृत्वानन्तरं गर्भिण्यीः सुवासिनीर्बालाननतिवृद्धांश्च भोजयेत्। ततः "श्वभ्यःश्वपतिभ्य"इति तेभ्यः। पक्षिभ्यो भूमौ दद्यात्। ततः ससहायो भुञ्जीतेति॥

अत्रार्घ्याणामैन्द्रादयः शाखाप्रशाखाः कर्त्तव्याः तदुव्याख्यास्यामः। षडर्घ्या भवन्ति। उपनयनं कृत्वा कृत्स्नं सरहस्यं वेदमध्यापितो येन स आचार्यः प्रथमः, येन चाहोरात्रादिकं कर्म स ऋत्विक् द्वि-

Digitized by Google

तीयः,गुरुस्तृतीयः,राजा सार्वभौमिकश्चतुर्थः,ब्रह्मचारी समावर्त्तने कृते तस्मिन्नेवाहनि स स्नातकः पञ्चमः,जामाता दुहितरं परिणेतुमागतः प्रियः षष्ठः एतेषामन्यतमो यद्यागच्छेत्तस्मै गौः पशुर्वा कर्त्तव्यः। पशुकर्म चोपरिष्टाद्वक्ष्यामः। अभावे यत्किञ्चिदशनेन मुख्यादेन वा सत्कृत्य तदभिनिधिं कुर्यात्। यदि पशुं करोति तदाचार्यार्त्विग्भ्यामागताभ्यामागताय प्रेषयः कर्त्तव्यः। ऋत्विजे वाईस्पत्यः, श्वशुराय माहापत्यः,राज्ञेपेन्द्रः, जामात्रे मैत्रः, स्नातकायैद्राग्नः। एतेषामाचार्यादीनां संवत्सरस्योपरिष्टादन्यतमस्यागतस्य शाखापशुः कर्त्तव्यः। सोमविवाहयोरपूर्णेपि संवत्सरे यद्यागच्छेत्ततः शाखापशुः कर्त्तव्यः। आचार्यः पिता सखा च एते अहरहर्गृहे आगता अतिथिवन्न द्रष्टव्याः। अतिथेश्च य उपचारः स स्मृत्यन्तरे पठितस्तं वक्ष्यामः। ब्राह्मणायाभ्यागतायाप आनयति। वैश्वानरः प्रविशत्यतिथिर्गृहान्। तस्मादानयति। भोजयित्वा सीमान्तमनुव्रजेत्। अनुज्ञात्वेति तेषामाचार्यादीनामन्यतमस्यापि आगतस्य यत्किञ्चिद्गृहे सुखं दुःखं वा कथितव्यम्। कथितेपि यदुपदिशन्ति तत्कर्त्तव्यम्। नैकग्रामीणमतिथिमित्याचारः पठितस्तत्र यथैव पद्धतिरिति। ब्रह्मचारी स्वप्रयोजनेनाचार्योपदेशेन वा यदि प्रवसति ततः प्राणापानयोरेव उपांशूक्त्वा "अहं वक्ष्यामिभो"इत्युच्चैर्ब्रूयात्। एवं ब्रह्मचारिणा पृष्ट आचार्यः"प्राणापाना उरुव्यचास्त्वयाप्यपथ्ये देवायत्वागोप्त्रे परिददामि देवसवितरेषतेब्रह्मचारी तंते परिददामितं गोपाय स्वृतमामृधस्व"इतीमं मन्त्रमकारान्तमुक्त्वा तत्र "ॐस्वस्ती" त्युच्चैर्ब्रूयात्॥

इति अहिच्छत्राविषये कोसुंवरवास्तव्यवासुदेवकृते सांङ्ख्यायनगृह्यसंग्रहे द्वितीयोध्यायः॥

समावर्तनकर्म वक्ष्यामः। अत्र स्तरणाद्याः राज्यभागाः पा-

Digitized by Google

क्षिकाः। उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा महाव्याहृतिचतुष्टयं हुत्वा ततो लोहितचर्मण्यानडुहे ब्रह्मचारिणमुपवेश्य शिरो मुखं कक्षोपस्थाधारभ्य यावत्पादौ सर्वमेव मुण्डापयित्वा नखांश्छेदयित्वा व्रीहियवाद्यावेकीकृत्य पेषयित्वा ब्रह्मचारिणमुद्वर्षयेत्। ततोऽपामार्गबीजांस्ततः शंखपुष्पीं पेषयित्वोद्वर्तयेत्। लौकिकं स्नानं कारयित्वा तव "आपोहिष्ठामयोभुव" इति नवर्चेन सूक्तेन प्रत्यृचं नव उदकुभान् ब्रह्मचारिणो मूर्द्धनि निषिच्य यथाविभवमलङ्कृत्य "युवंवस्त्राणिपीवसावसाथ" इत्यनेन मन्त्रेण वस्त्रयुगं परिधापयेत्। वासोभेदान्मन्त्राद्वाप्तिः। तत उष्णीषेण शिरो वेष्टयित्वा मणिकुण्डले परिधाय वैष्णवं दण्डं गृहीत्वोपानहौ परिधाय च्छत्रं गृहीत्वा ततो महाव्याहृतिचतुष्टयं ततः पाक्षिकः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समाप्य ततो "वनस्पतेवीड्वंगोहिभूयाः, शासइच्छामहअसी" त्याभ्यां मन्त्राभ्यां रथमारोहेत्। प्रथमं दक्षिणेन पादेन ततो वामेनेति रथमारुह्य तस्य गृहं प्रथमं गच्छेद्योऽस्य गवा पशुना वा मधुपर्कं करोति। अथ वा गां फलं वनं वृक्षं दृष्ट्वा निवर्तते। "इन्द्र श्रेष्ठानिद्रविणानिधेहि, स्योनापृथिवीभवे"त्येताभ्यां रथादवतीर्य ततो वस्त्रयुगमुष्णीषं कुण्डले दण्डोपानहौ च्छत्रमेतत्सर्वमाचार्याय दद्यात्। तत्तस्तदहरव्यापारेण स्थातव्यं यद्रोचते तद्भोज्यमिति॥

गृहकर्म वक्ष्यामः। यस्मिन्प्रदेशे गृहं कर्तव्यं तां भूमिं "गृहां नाज्यायविशः परिगृह्णामी" त्यनेन मन्त्रेणोदुम्बरशाखया त्रिः परिलिख्य शोधयित्वा मध्ये जुहोति। अत्र स्तरणाघाराज्यभागाः पाक्षिकाः। उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा ततः "कोसिकस्यासिकायतेग्रामकामोतदेवानांकञ्चनांतरेणस्वाहे" ति द्वे आज्याहुती हुत्वा पाक्षिकः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादि

Digitized by Google

त्वशेषं समाप्य ततो गृहं सूत्रयित्वा पूर्वस्यां दिशि द्वारं कल्पयित्वा द्वौ गर्तौ खानयेत्ततो दक्षिणस्यां दिशि द्वारप्रदेशे एवमेव पश्चिमायामेवमुत्तरस्यां ततो मध्ये एवं नव गर्त्तान् खानयित्वा ततस्तेषु गर्त्तेषु उदकं सर्पिः प्रक्षिप्य तत "इमं बिभित्वा अमृतस्य शाखांमधोर्धारांप्रतरर्णांवसूनाम् एनांशिश्नुः क्रन्दत्याकुमार एनांधनुः क्रन्द" नित्यनेन मन्त्रेणोदुम्बरशाखां घृताक्तां पूर्वस्यां दिशि दक्षिणे गर्ते निखानयति । "इमामुच्छयामिभुवनस्यशाखांमधोर्धारां प्रतरर्णांवसूनाम् एनांशिश्नुः क्रन्दत्याकुमारएनान्धेनुः क्रन्दतुपावकस्ये" त्यनेन मन्त्रेणाकारान्तेन पूर्वस्यां दिशि उत्तरे गर्त्ते तृतीयामुदुम्बरशाखां घृताक्तां निखनति । एवमेताभ्यामेव मन्त्राभ्यां चतुर्ष्वपि दिक्षु उदुम्बरशाखा घृताक्ताः पूर्वकृतेष्वेव गर्तेष्वष्टौ निखाय तत "इमामहमस्यवृक्षस्यशाखांघृतमृछातिमृततेमिनोमि एनांशिश्नुः क्रन्दत्याकुमारआस्यन्दतान्धेनवोनित्यवत्सा" इत्यनेन मन्त्रेण स्थूणाराजसंज्ञकां महतीं स्थूणां भारक्षमां नवमे गर्त्ते निखाय तत "एवं कुमारस्तरुणेआवसोभुवनस्परि एवं परिस्रुतः कुम्भ्या आदभ्रः कलशेर्गमन् इहैवस्थूणेप्रतितिष्ठध्रुवाश्वावती युवतीशीलमावतीक्षेमेतिष्ठघृतमुक्षमाणेहैवतिष्ठनिमित्तानि, तिल्विलास्थाजिरावतीमध्येपोषस्यतृंपताम् मात्वाप्रापंनध्यायवः, उपहूताइहगाव उपहूता अजावयः अथो अन्नस्यकीलाल उपहूतोगृहेषु नः, रयन्तरेप्रतितिष्ठवामदेव्येश्रपयस्वबृहस्पतिस्तभाये"त्यनेन मन्त्रेण पूर्वद्वारे दक्षिणां द्वारशाखामभिमृशेत् । ततो "यज्ञश्चे"त्यनेन मन्त्रेण दक्षिणे द्वारे पश्चिमां द्वारशाखामभिमृशेत् । "दाक्षिचे" ति पूर्वाम् ततो " बलाचे"त्यनेन मन्त्रेण दक्षिणां स्थूणामभिमृशेत् । "ऊर्जश्चे" त्यपराम् । ततो "व्रजे"त्यनेन मन्त्रेणोत्तरद्वारे पश्चिमं स्थूणाराजमभिमृशेत् । "क्षत्रं चेति" ति पूर्वाम् । अपरे त्वेवं व्या-

Digitized by Google

चक्षते । "सत्यञ्च श्रद्धाञ्चे"त्येको मन्त्रः एतावता मन्त्रेण पुनरादृत्तेन पूर्वद्वारे यथोक्तेन क्रमेण स्थूणाद्वयमित्यभिमृशेत् । एवं सर्वासु दिक्षु मन्त्रद्वयं समभ्यस्य स्थूणानामभिमर्शनं कर्त्तव्यं मन्त्राश्चाकारान्ताः कर्त्तव्याः । एवमन्यतरेऽभिमर्शने निवृत्ते "श्रीस्तूष" इत्यनेन मन्त्रेण गृहमध्य एव स्थूणाकारं क्रियते तमभिमृशेत् । " अहोरात्रे " इत्यनेन मन्त्रेण पुनरादृत्तेन द्वारदेशे अभिमृशेत् । " संवत्सर " इत्यनेन मन्त्रेण द्वारि पिधानमभिमृशेत् । " उक्षा समुद्रोऽरुषः सुपर्ण " इत्यनेन मन्त्रेण घृताभ्यक्तं पाषाणं स्तूपस्याधस्ताल्लिखनति ॥

गृहप्रवेशकर्म वक्ष्यामः । अत्र स्तरणाघाराज्यभागाः पाक्षिकाः । आवसथ्याग्नौ उपलेनोल्लेखनाभ्युक्षणानि कृत्वा " अग्निमन्नयामि मनसा शिवेनायमस्तु सङ्कल्पनो वसूनां मार्हिंसीस्थविरं माकुमारं शंनोभवद्विपदेशञ्चतुष्पदे " इति मन्त्रेण एकारान्तेनाग्निं नवगृहे द्वारे बाह्यतः प्रणीय समूहनं कृत्वोत्तरतोग्नेः प्रागग्रेषु नवेषु कुशेषूदकुम्भं नवं प्रतिष्ठाप्य " आपोहिष्ठामयोभुव " इत्येताभिस्तिसृभिरद्भिः पूरयित्वा " अरिष्टास्माकंवीरा मापरासेचिनोधेन " मित्यनेन मन्त्रेण तमुदकुम्भमभिमन्त्र्य पाक्षिकमाघाराज्यभागान्तं कृत्वा ततः " अभित्वा शूरनोनुम " इति ऋचं पूर्ववत्तिस्रः कृत्वा स्वाहाकारान्तैस्तिस्र आहुतीः पूर्वाह्णे हुत्वा ततः पाक्षिकस्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादि तन्त्रशेषं समाप्य ततो मध्याह्ने तस्मिन्नेवाग्नौ समूहनाद्यारभ्य पाक्षिकमाघाराज्यभागान्तं कृत्वा ततः " कयानश्चित्रआभुव " दितितृचेन प्रत्यृचं स्वाहाकारान्तास्तिस्र आज्याहुतीर्हुत्वा ततः पाक्षिकस्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समाप्य ततोपराह्णे तस्मिन्नेवाग्नौ कर्म भवति । तद्वक्ष्यामः । अत्र

Digitized by Google

स्तरणाघाराज्यभागा निर्वपेत्कल्पाः। वास्तोष्पतये ग्रहणमोक्षणे। स्थालीपाकं श्रपयित्वा महाव्याहृतिभिश्चतस्रो "वास्तोष्पतेप्रतिजानीह्यस्मान्नि" ति तिस्र "अमीवहावास्तोष्पते" इति एका "वास्तोष्पतेध्रुवास्थूणा" मित्येका एवमेकशालाया नव आहुतीर्हुत्वा ततः स्विष्टकृत्ततो हावकाय किंचिद्दत्वा तत "इंद्रस्यगृहाः शिवा वसुमंतो वरूथिनस्तानहं प्रपद्ये सहजावया सहप्रजया सहपशुभिः सहरायस्पोषेण सहजं मे किंचास्येतेने"त्यनेन मन्त्रेण ज्येष्ठपुत्रेण भार्यया सह पूर्वोक्तमुदकुंभं गृहीत्वा नवं गृहं प्रविशेत्। ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति॥

यदि केन चित्प्रयोजनेन ग्रामान्निष्क्रमणं करोति ततः "अरण्यंग्रामायशिवशिवक्षेमाय वः शांत्यै प्रपद्ये भयंनो अस्तुग्रामोमारण्याय परिददातु विश्वमहाय मापरिदेही" तीमं मन्त्रं जपन्निष्क्रमेत्। ततः कृतप्रयोजनः पुष्पादिकं किञ्चिद्गृहीत्वा "अरण्यंग्रामायपरिददातुमहाविश्वमहायमापरिदेही" ती मन्त्रं जपन् ग्रामं प्रविशेत्। ततो "गृहान् भद्रान् सुमनसः प्रपद्ये वीरघ्नोवीरतत्सुवीरान् इरावन्तो घृतमुक्षमाणा अन्वेष्वहंसुमनाः संविशेय" मितीमं मन्त्रं गृहं प्रविश्य सदा जपेत्॥

प्रवसद्यजनं वक्ष्यामः। प्रवसने "इमांमेमित्रावरुणो गृहान्गोपायतं ध्रुवं अविनष्टानविहृतान्यापेनानभिरक्षत्वस्माकं पुनरागम"दित्यनेन मन्त्रेण कुटुम्बं समीक्षते। ततः "अपिपथ्रामगन्महीं" ति च जपित्वा प्रविरमेत्। ततस्तावदग्रतो गच्छेत् यावदावस्थान्निरुद्योतयति। प्रत्यागच्छन् स्वसीमादेवता वाग्यतो भूत्वा गृहस्थान् सर्वान् समीक्ष्य "गृहामाबिभीतमावेपध्वमूर्जं बिभ्रतएमसि ऊर्जीबिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः येषामयोति प्रवतन्येषुसौमनसोबहु गृहानुपह्वयामहेतेनोजानन्तुजानतः"

Digitized by Google

इति कुटुम्बं समीक्ष्य तत " अयं नो अग्निर्मगवानयं नोभगवत्तरः तस्योपमधे मारिषामायं श्रेष्ठे दधातुन" इत्यनेन मन्त्रेणावसथ्याग्नेरुपस्थानं करोति । ततस्तस्मिन्दिने वैरिणमप्यागतं प्रियमश्नेनाभाषेत्ततो "विराजोदोहोसिविराजोदोहमक्षीय मयिपाद्यायै विराजोदोह" इत्यनेन मन्त्रेण स्वयं सेचनोदकं गृह्णाति । यद्याहिताग्निस्ततो याजमानं कृत्वा उत्तरमावसथ्याग्नेरुपस्थानं करोति ॥

आग्रयणं वक्ष्यामः । अत्र स्तरणाघाराज्यभागा निर्विकल्पाः । इन्द्राग्निभ्यां विश्वेभ्यो देवभ्यो द्यावापृथिवीभ्यां ग्रहणमोक्षणे । उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा तत "इन्द्राग्निभ्यां स्वाहा, विश्वेभ्योदेवेभ्यः स्वाहा, द्यावापृथिवीभ्यां स्वाहा, अग्नये स्विष्टकृते स्वाहेति" स्थालीपाकस्य हुत्वा ततः "प्रजापतयेत्वाजुष्टं गृह्णामि मह्यंश्रिये मह्यं यशसे मह्यमन्नाद्याये" त्यनेन मन्त्रेण हुतशेषं स्तोकमभिमन्त्र्य तूष्णीमभ्युक्ष्याभ्युक्ष्य "भद्रान: प्रेयः समनैष्टदेवास्त्वयावशेन समशीमहित्वासनोमयोभूः पितर आविवेश शंनोभवद्विपदे शञ्चतुष्पदे" इत्यनेन मन्त्रेण त्रिः प्राश्नाति । प्रतिप्राश्नमाचमनं मन्त्रावृत्तिश्च । एवं प्राश्य ततः " अमोसि प्राणतद्दतं ब्रवीम्यमोसिसर्वाङसि प्रविष्टः समे जरां रोगमपनुद्याशरीरादमामणिधिमामृशाम इन्द्रे" त्यनेन मन्त्रेण स्वरान्तेन हृदयदेशमभिमृश्योदकं स्पृष्ट्वा ततो " नाभिरसिमाबिभीयाः प्राणानां ग्रन्थिरसि माविस्रस" इत्यनेन मन्त्रेण नाभिमभिमृश्य ततो "भद्रंकर्णेभिः शृणुयामदेवा" इत्यनेन मन्त्रेण लिङ्गोक्तानि शरीराणि स्पृष्ट्वा "तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्" इत्यनेन मन्त्रेणादित्योपस्थानं कृत्वा ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति।

गोसंज्ञकर्म वक्ष्यामः । परिवः सेन्याद्वघाद्याद्वजंतुघोषिण्यः समानस्तगोपेर्वावोअंशोनवोरिषत्, पूषायाअन्वक्लुप्तः" इतिमन्त्रद्वये-

Digitized by Google

त्रे परिक्रान्ता अनुमन्त्रयेत् । अपरे तु व्याचक्षते । पथः परिहृ-
त्य अनुमन्त्रयेत् । "वासामूधश्चतुर्विलं मध्येपूर्णं घृतस्य च तानः
सन्तु पयस्वतीर्बहीर्गोघृताच्य" इति "गावोऽग्मन्नुतभरमक्रन्नि"
ति च प्रत्यागतासु गोषु जपेत्ततः "उपेदमुपसर्पन" मित्यनेन म-
न्त्रेण गोष्ठं प्रवेशयेत् । "मयोभूर्वातोअभिवानूत्सा" इति चतसृभि-
र्गोदुग्धा अनुमन्त्रयते ॥

गवामङ्कनकर्म वक्ष्यामः । फल्गुनीपौर्णमासीमतीत्यामावास्या-
यदेशे रेवत्यामङ्कं विकर्त्य आत्मीयं कुर्यात् । "भुवनमसिसहस्र-
श्रेषमिन्द्रायत्वां श्रोत्रोददत् अक्षतमस्यरिष्टमिलांनंगोपायनं यावती-
नामिदं करिष्याभूयसीनमुत्तमां समांक्रियास" मिति स्वयं गोप-
तिः ऋत्विजो वा मन्त्रं जपति । अङ्कनकर्म त्वन्यः कुरुते । अ-
ङ्कहुत्वे मन्त्रावृत्तिः ।

पीयूषहोमकर्म वक्ष्यामः । अत्र स्तरणाद्याराज्यभागा निर्वि-
कल्पाः । अग्नये ग्रहणमोक्षणे । आवसथ्याग्नावुपलेपनोल्लेखनाद्या-
याराज्यभागान्तं कृत्वा ततः "संवत्सरीणंपयउस्रियाया" इतिद्वा-
भ्यामृग्भ्यां द्वे आहुती स्थालीपाककर्मणा हुत्वा ततः स्विष्टकृच्च-
रो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयम् । अपरे
व्याचक्षते । आहुतिद्वयमेव होतव्यं न प्रतिश्रुतकर्मेति ॥

गोषु यमजनने कर्म वक्ष्यामः । अत्र स्तरणाद्याराज्यभागा-
न्तं कृत्वा महाव्याहृतिचतुष्टयमाज्यस्य हुत्वा पाक्षिकः स्विष्टकृ-
त्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समाप्य यमसूं दद्यात् ॥

अथ वृषोत्सर्गकर्म वक्ष्यामः । यस्य गर्भग्रहणयोग्या वत्सत-
र्यो द्वादश वर्त्तन्ते स्वकीयेन च क्षीरेण त्रयाणां ब्राह्मणानां पायसेन
तृप्तिरुत्पद्यते स वृषोत्सर्गं कुर्यात् । कार्त्तिक्यां पौर्णमास्यां
रेवत्यां वाश्विने मासि । अत्र स्तरणाद्याराज्यभागा निर्विक-

Digitized by Google

ल्पाः। पूष्णे ग्रहणप्रोक्षणे। आवसथ्याग्नौ गवां मध्ये उपलेपनोद्धरणाभ्युक्षणाग्निप्रणयनप्रभृति आघाराज्यभागान्तं कृत्वा "इहरतिरिहरमध्वंस्वाहा, इहधृतिरिहस्वधृतिः स्वाहा, उपसृजंधरुणंमात्रेधरुणोमातरंधयन्, रायस्पोषमस्मासुदीधरत्स्वाहे" ति चतसृ आज्याहुतीर्जुहोति। अन्ये त्वाहुरिहरतिरितिषट् जुहोतीति। ततः "पूषा गाअन्वेतु" इत्यनेन मन्त्रेण पिष्टमयस्य स्थालीपाकस्य जुहोति। "कद्रुद्रायप्रचेतस" इति नव ऋचः "इमारुद्रायतवसेकपर्दिने" इतिएकादश "आतेपितर्मरुतां सुम्नेमेत्वि" तिपञ्चदश ऋचः "इमारुद्रायस्थिरधन्वन" इतिचतस्र ऋचः "त्र्यम्बकंयजामह" इत्येका एताश्चत्वारिंशदृचो जपेत्। अपरे रुद्रं जपित्वेत्यपि पठन्ति। तेषां "नमस्तेरुद्रमन्यव" इति यजुर्वेदप्रसिद्धो मन्त्रगणस्तं जपित्वेति। ततोऽन्यतरजपे निवृत्ते एकवर्णं द्विवर्णं त्रिवर्णं लोहितं वा स्मृत्यन्तरपठितं नीलं वा सर्वयूथस्य श्रेष्ठं सर्वाङ्गैरुपेतं यूथमध्यस्थं यं वा गच्छन्तं यूथश्छादयति यूथोनुगच्छति एतेषां यथालाभमन्यतमं सम्पूर्णाङ्गं बलवन्तं युवानमोजस्विनमपलक्षणवर्जितं कल्याणप्रजननं घण्टाचामरकादिभिर्यथाविभवमलङ्कृत्य "एतं युवानं पतिं वो ददामितेन क्रीडन्तीश्चरथ प्रियेण मावनः साम्नजनुषाऽसुभगा रायष्पोषेण समिषामदेमस्वाहे" त्यनेन मन्त्रेण वत्सतरीणां मध्ये वृषभमुत्सृजति। ततो वत्सतरीणां यूथस्य च मध्ये स्थितमनुमन्त्रयते "मयोभूर्वातोअभिवातूस्रा" इत्यनुवाकशेषेण "यथावः सुसहासती" त्येवमन्तेन। अपरे त्वेवं पठन्ति "मयोभूर्वात" इतिसूक्तेनैतेषां चतसृभिऋग्भिरनुमन्त्रणं भवति। अन्यतरेऽनुमन्त्रणे निवृत्ते स्विष्टकृतं हुत्वा ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समाप्य सर्वासां क्षीरेण पायसं श्रपयित्वा ब्राह्मणान् तर्पयेत्। कर्माङ्गभूतं पायसे-

Digitized by Google

न ब्राह्मणभोजनम्। यत्पशोः कर्मापवर्गे ब्राह्मणभोजनं तत्कर्त्तव्यमेवेति॥

अष्टकाकर्म वक्ष्यामः। ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः। अपरपक्षे तु तासां प्रथमायां शाकं जुहोति। अत्र स्तरणाघाराज्यभागा निर्विकल्पाः। उपसे ग्रहणप्रोक्षणे। उपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा तत "इयमेवसायाप्रथमाव्युचदन्तरस्याश्चरतिप्रविष्टा बधूर्जजान नवक्व जनित्री त्रय एनां महिमानः सचंतां स्वाहे"त्यनेन मन्त्रेण यथोक्तं स्रुचौ चतुर्गृहीतं कृत्वा " इयमेयेवे " ति एकाहुतिः ततः स्विष्टकृतं "यस्यां वैवस्वत" इति शाकं स्थालीपाकधर्मेण हुत्वा "यस्यां वैवस्वतोयमः सर्वेदेवाः समाहिताः अष्टका सर्वतोमुखी सामेकामानतीतृपत् आहुस्ते ग्रावाणोदन्तानूधः पवमानः मासाश्चार्द्धमासाश्च मनस्ते सुमनामुखि स्वाहे" त्यनेन मन्त्रेण स्विष्टकृतं हुत्वा ततो महाव्याहृतिसर्वप्रायश्चित्तादि तन्त्रशेषं समापनीयमिति। मध्यमायां माघ्यवर्षे च समानमेव कर्म तद्वक्ष्यामः। येषामाषाढीं पौर्णमासीमतीत्यानन्तरं वर्षाकालः प्रवर्तते तेषां श्रावणीं पौर्णमासीमतीत्याष्टका भवन्ति, येषां पुराषाढ्या अनन्तरामावास्यामतीत्य वर्षाकालः प्रवर्त्तते तेषां भौष्ठपद्यां पौर्णमासीमतीत्याष्टकाकर्म भवति। अपसव्यं कृत्वा प्राग्दक्षिणामुख उपलेपनोल्लेखनोद्धरणाभ्युक्षणाग्निप्रणयनं प्रदक्षिणं समूहनं ब्रह्मणः प्रतिष्ठापनं प्रणीताप्रणयनं ततः सान्वाच्यस्तरणं ततोग्नेः पुरस्तात्पलाशशाखायाः सपत्राया निखननन्ततस्तस्या उत्तरतः पशुमुपस्थाप्य ततः " पितृभ्यस्त्वा जुष्टमुपाकरोमी"त्यनेन मन्त्रेणोपाकरणं ततः पवित्रोत्पादनम्। उत्तरतः प्रणीताप्रणयनं ततः "पितृभ्यस्त्वाजुष्टं प्रोक्षामी"ति पशोः प्रोक्षणं ततः "पितृभ्यस्त्वाजुष्टंनियुनज्मी"नीत्यनेन मन्त्रेण पलाशशाखायां बन्धनं ततः पर्यग्नीकृत्वोदग्ग्रीवं प्राक्शरसमुदक्पादं

Digitized by Google

रन्ति परावतो निपुरो येभवन्त्यग्निष्वात्ताँल्लोकात्प्रणुदात्यस्मा" नि-
त्येन मन्त्रेणाभ्युक्षिते प्रदेशे साग्निकमुदपात्रं दक्षिणार्द्धे निधाय "
देवदत्तअवनेनिक्ष्व येचत्वामन्वानु " अनेन मन्त्रेण स्वपितुर्नामो-
च्चार्योत्तानतर्जन्यङ्गुष्ठावन्तरेण कुशेष्वपो निषिञ्चति । तत अनेनैव
प्रकारेण दक्षिणतः पितामहस्य प्रपितामहस्य च हुतशेषं त्रीणि
पिण्डानि कृत्वा ततो " देवदत्तएतत्तेयेचत्वामन्वानु " इत्यनेन
मन्त्रेण पुनरावृत्तेन पितृपितामहप्रपितामहानां नामान्युच्चार्य यथाव-
न्नित्कं पिण्डान् दद्यात् । तत " अत्रपितरोमादयध्वंयथाभागंपि-
तर आवृषायध्व " मिति जपित्वा ततस्तूष्णीं प्रदक्षिणं पर्यावृत्य
प्रत्यङ्मुखो भूत्वा त्रीन् प्राणायामान् धारयित्वा ततस्तूष्णीं प-
र्यावृत्य पिण्डाभिमुखो भूत्वा " अमीमदन्तपितरोयथाभागम-
वीवृषते " ति जपति । ततः पूर्ववदवनेनिज्य " नमोवः पितरो
जीवायनमोवः पितरः शोषायनमोवः पितरो घोरायनमोवः पित-
रोरसाय नमोवः पितरो बलायनमोवः पितरो मन्यवे नमोवः पि-
तरो मृत्यवेनमोवः पितरः स्वधायैनमोवः पितरः पितरोनमोवो ये
अत्र पितरः पितरस्थ यूयन्तेषां श्रेष्ठा भूयास्थ यइह पितरो मनु-
ष्यावयं तेषां श्रेष्ठाभूयास्म येअत्र पितरः स्वधा युष्माकं साय-
इहपितर एचतुरस्माकं सगृहां नः पितरो दत्त " इतीमं मन्त्रं ज-
पित्वा तत " एतद्वः पितरोवासोवध्वंपितर " इत्यनेन मन्त्रेण पु-
नरावृत्तेन त्रयाणामपि पिण्डानां यथा भवन्ति तावन्मात्राणि सू-
त्राणि दत्वा तत " ऊर्जंवहन्तीरमृतंघृतं पयः कीलालं परिस्रुतं
स्वधास्थतर्पयत नः पितॄन् " इत्यनेन मन्त्रेण पात्रप्रक्षालनं कुशे-
ष्वेव निक्षिप्य तत आघ्राय पिण्डान् पात्रे कृत्वा प्राश्नीयात् ।
अथ वा ब्राह्मणाय दद्यात् । उदके वा क्षिपेत् । यदि पत्नी पुत्र-
कामा स्यात्तत " आधत्तपितरोगर्भंकुमारं पुष्करस्रजं यथेहपुरुषो

Digitized by Google

सादि" त्यनेन मन्त्रेण मध्यमपिण्डं प्राश्नीयात्। ततस्तूष्णीमुदपात्रमग्नौ क्षिपेत्। सकृदाच्छिन्नांश्च कुशानग्नौ क्षिप्त्वा अप्रदक्षिणं पर्युक्षेत्। दत्तकादयो ये पुत्रास्ते एकैकस्मिन्प्रदेशे द्वौ पिण्डौ ददाति येन जातो यस्य च सङ्गत इति। जीवत्पितृकेण पिण्डपितृयज्ञो न कर्त्तव्यः। अथ करोति पितृणां होमान्तं वेति। इदं च कर्म तन्त्ररहितं यावदुक्तं भवति। आहुतीर्हुत्वा शेषमपसव्येनेति उत्तरायामपूपं जुहोति। अष्टकायै ग्रहणमुपलेपनोल्लेखनादिद्रव्यमोक्षणान्तं कृत्वा पिष्टमयान् कपालपक्वांस्त्रीनपूपान् कुर्यात्। अपरे व्याचक्षते घृतपूपाः कर्त्तव्याः। अन्यतरजातीयान पूपान्पक्वा करोति वा। आघाराज्यभागान्ते कृत्वा "ऊढश्चातिरात्रश्च सद्यश्चक्रीच्छन्दसा सहाअपूपकृदष्टके नमस्तेसुमनामुखिस्वाहे" त्यनेन मन्त्रेणापूपावदानं समवत्तधान्यां कृत्वा गृहीत्वा चरुधर्मेण जुहोति। "यस्यांवैवस्वतोयम" इति स्विष्टकृतं हुत्वा महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति॥ मध्यमायां माध्यवर्षे च गोपशुरजः स्थालीपाको वेत्युक्तम्। एतेषामसंभवे "एषामेष्टके" त्यनेन मन्त्रेण अकारान्तेन परगोरेकस्य तृप्तये यवसं दद्यात्। अथ वा अनेनैव मन्त्रेण तृणबहुलस्थाने तृणदहनं कर्त्तव्यम्॥

इति अहिच्छत्राविषये कौसुंबरवास्तव्यवासुदेवकृतसाङ्ख्यायनगृह्यसङ्ग्रहे तृतीयोध्यायः समाप्तः॥

श्राद्धं वक्ष्यामः। पूर्वेद्युर्ब्राह्मणान् वेदविदः पञ्च निमन्त्र्याऽभावे त्रीन् वा एकमेव वा ततोऽपराह्णे पिण्डीपतृयज्ञपथा ततो ब्राह्मणानाहूय परिष्टते प्रदेशे द्वौ प्राङ्मुखौ त्रय उदङ्मुखाः कार्याः। प्राङ्मुखानां सर्वं यज्ञोपवीती प्रदक्षिणोपचारश्च कुर्यात्। उदङ्मुखानां सर्वं प्राचीनावीती विपरीतोपचारं च कुर्यात्। सर्वं च दैवपूर्वं कर्त्तव्यम्। दर्भा आसनार्थाः प्राङ्मुखानामृजवः। उदङ्मु-

Digitized by Google

स्थानां द्विगुणीकृत्य दातव्याः। यदि त्रयो ब्राह्मणास्ततो द्वौ प्राङ्मुखौ एक उदङ्मुखः, यदि द्वौ तत एकः उदङ्मुखः एक प्राङ्मुखः, यद्येकस्तत उदङ्मुखः प्राङ्मुखब्राह्मणस्थाने अग्निः स्थापयितव्यः। दर्भासनादनन्तरं यजमानो ब्राह्मणाश्च वाग्यमनं कुर्युः। तत आवाहनम्। "विश्वेदेवानावाहयिष्य" इत्यनेन मन्त्रेण प्राङ्मुखं पृच्छत्येकम्। ततः "आवाहये"त्यनेन मन्त्रेणाभ्यनुज्ञातः "विश्वेदेवासः आगते"त्यनेन मन्त्रेणावाह्य ततो "विश्वेदेवाःशृणुतेमं हवेम" इति जपति। तत "आयधयः समवदन्त"इत्यनेन मन्त्रेणाक्षतैर्वेष्टयति। ततः "पितृनावाहयिष्य"इत्यनेनोदङ्मुखान् पृच्छति। "आवाहय" इत्यनुज्ञातः "उशंतस्त्वानिधीमही"त्यावाह्य तत "आमन्तुनः पितरः अपहता असुरारक्षांसि वेदिषद" इति तिलैर्वेष्टयित्वा ततः पलाशवैकङ्कतकार्ष्मर्यवैल्वखादिरोदुम्बराणामन्यतमकाम्रकृतानि समानि पर्णपुटानि वा मृण्मयानि वा मणीरजतसुवर्णताम्राणामन्यतमद्रव्यकृतानि पितृसमानसंख्याकानि पात्राणि कृत्वा द्वौ द्वौ कुशौ तिस्रस्तिस्रो वा उपर्यतर्द्धाय पात्रं "शंनोदेवीरभिष्टय" इत्यनेन मन्त्रेणाद्भिरापूरयित्वा "तिलोसिसोमदैवत्यो गोसवोदेवनिर्मितः प्रत्नमद्भिः पृक्तःस्वाहाकारेण देवान् प्रीणाहिनः स्वाहे" त्यनेन मन्त्रेण यवैरवकीर्य प्राङ्मुखाभ्यां ब्राह्मणाभ्यां दक्षिणहस्तावेकीकृत्य उदपात्रकुशौ प्राङ्मुखो दत्वा तिस्रो वा ततो "यादिव्याआपः पयसासंबभूवुर्या आन्तरिक्षा उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्तानआपः शिवा सं स्योनाः सुहवा भवन्तु" इति पठित्वा "विश्वेदेवा एतद्वोअर्घ्य" मित्यनेन मन्त्रेण निनयेत्। ततो दक्षिणामुखो भूत्वा दक्षिणाग्रकुशावेकस्य ब्राह्मणस्य हस्ते दत्वा ततो "यादिव्याआप"इत्येवमादिकं मन्त्रं पठित्वा "देवदत्तेअर्घ्य" मित्यनेन मन्त्रेण पितृतीर्थेन ब्राह्मणहस्ते निन-

Digitized by Google

देद्। एवं पितृपितामहप्रपितामहानां नामान्युच्चार्योच्चार्य एकैकस्य हस्तेऽर्घ्यं दद्यात्। यदि ब्राह्मणा बहवो निमन्त्र्यन्ते ततो हस्तानेकीकृत्यार्घ्यं दातव्यम्। ततः पुत्रकामः "शुन्धन्तांलोकाः पितृषदनाः" इत्यनेन मन्त्रेण मुखं विमार्ष्टि। ततोऽर्घ्यपात्राणि पात्रान्तरे निवेशयित्वा ततः "पितृभ्यः स्थानमसी" त्यनेन मन्त्रेण तत्पात्रमध्ये कुर्यात्। ततो गन्धपुष्पधूपादीनि यथाविभवं प्रदाय गृहादेव सिद्धं घृताक्तमन्नं गृहीत्वा "अग्नौकरिष्ये" इति ब्राह्मणान् पृच्छति। ततः "कुरुष्वे" ति ब्राह्मणैरनुज्ञातः परिसमूहनादिहोमान्तं गृह्यैः पिण्डपितृयज्ञवत् कृत्वा हुतशेषं ब्राह्मणहस्तेषु ददाति। ततस्तस्मिन्नेव प्रदेशे यत्किंचिदृग्गृहे सिद्धं तत्सर्वमानीय परिवेषयित्वा ततः "पृथिवीतेपात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमिस्वाहा" इत्यनेन मन्त्रेण पात्रमालभेत्। तत "इदं विष्णुर्विचक्रमे" इति अंगुष्ठप्रहणं कृत्वा अग्नेऽवगाह्य ततो "विश्वेदेवाएतद्वोन्न"मिति प्राङ्मुखाभ्यां ब्राह्मणाभ्यां कल्पयित्वा ततः "देवदत्तएतत्तेअन्नंयेचत्वामन्वानु" अनेन प्रकारेण पितृपितामहप्रपितामहानां नामान्युच्चार्योदङ्मुखब्राह्मणेभ्यः पात्राणि कल्पयित्वा ब्राह्मणानां भोजनानुज्ञां ददाति। ततो भुंजानेषु ब्राह्मणेषु महाव्याहृतयश्चतस्रः " तत्सवितुर्वृणीमह " इत्येका "मधुव्वाताऋतायते" इति तिस्रः " उदीरतामवरउत्परास " इति चतुर्दश " स्वादिष्ठयामदिष्ठये " ति च शक्तितो जपेत्। "सहस्रशीर्षेति" षोडश अन्यानि च पवित्राणि शक्तितो जपेत्। ततस्तृप्तेषु ब्राह्मणेषु " तृप्तास्थ " इति पृच्छति। ततो ब्राह्मणा " स्तृप्तास्म " इति ब्रूयुः। ततः " शेषमन्न " मितिपृष्टा ब्राह्मणा " इष्टेभ्यः " इति ब्रूयुः। ततोऽपोशानं दत्वा पिण्डान् दद्यात्। ततः सर्वमन्नमेकस्मिन्पात्रे कृत्वा " अपहता असुरारक्षांसिवेदिषद " इत्यारभ्य सकृदाच्छि-

Digitized by Google

उत्सर्गकर्म वक्ष्यामः । माघशुक्लप्रतिपदि ग्रामबाह्ततः प्रागुदीच्यां दिशि यवगोधूमादिसम्पन्नं प्रदेशं गत्वा आचार्यः कृतशौचः "उदुत्यंजातवेदस"मिति त्रयोदश "चित्रंदेवानामुदगा"दिति षट् "नामामित्रस्यवरुणस्यचक्षस" इति द्वादश "सूर्योनोदिवस्पात्वि" तिपञ्च एवा ऋचो जपित्वा ततः "शासइच्छमहेअसी"तिपञ्चर्चैः पुरस्ताद्द्वारस्य प्रदक्षिणं मूलोष्ठान् मत्यृचं क्षिपेत् । उपरि पञ्चमम् । तत आचार्यः सशिष्य ऋषीञ्छन्दांसि देवताः श्रद्धामेधे च तर्पयित्वा ततः पितृपितामहप्रपितामहान् स्वान् स्वान्तर्पयन्ति । ततः द्विसप्तमान्नासान्नाध्येयम् । तर्पणविधिं चोपरिष्टाद्वक्ष्यामः । अपरे तु व्याचक्षते । ब्राह्मणान् भोजयित्वा ऋष्यादींस्तर्पयेत् । यद्यवश्यं पठेत्ततो ऽहोरात्रं क्षपयित्वा पठेत् । अस्मिन्नवसरेऽनध्यायाः पठिताः । ते च सूत्रानुक्रान्ता एव कर्त्तव्याः आनुपूर्व्या प्रयोजनमेव नास्तीति पद्धतिर्न कृता ॥

अध्यापनविधिं वक्ष्यामः । अनसूयवो ब्रह्मचारिण ऋजवः सन्तः संयतेन्द्रियाः शुचयोऽध्ययनशीला मेधाप्रतिभान्वयोपगता एवंलक्षणाः शिष्या अध्यापयितव्याः । आचार्यः प्राङ्मुख उपविशति उदङ्मुखो वा, दक्षिणतः शिष्य उदङ्मुखः प्रत्यङ्मुखो वा । शेषा आचार्याभिमुखा यथावकाशमुपविशन्ति । ततः " अधीहिभो " इत्याचार्यः शिष्यं प्रचोदयति । ततः आचार्येण निगदिते ओङ्कारं कृत्वा शिष्याः पठन्ति । ततः सततं पठित्वा समाप्ते पाठके "विरतास्मभो" एवमुक्त्वा भोक्तुं गच्छामो मूत्रपुरीषे कर्तुं गच्छाम इति स्वं स्वं प्रयोजनं कथयन्ति "विरतास्म" इत्येतस्य स्थाने । विसृष्टविरामास्तावत्स्युः पठतामन्तरेण पाठको गच्छेत् । न चान्तरेण गन्तुं दातव्यम् । यत्किञ्चिन्मार्जारादिकमन्तरेण गच्छेत् त्रिरात्रमुपोष्याहोरात्रं वा पुनः सावित्रीं जपेत् । ब्राह्मणेभ्यः किं

Digitized by Google

विहृत्याहोरात्रमुपरम्य अध्ययनम् ॥

उदकतर्पणं वक्ष्यामः । तच्च समावृत्तस्य भवति । स्नात्वा मज्जनान्ते "अग्निस्तृप्यतु, वायुस्तृप्यतु, सूर्यस्तृप्यतु, विष्णुस्तृप्यतु, प्रजापतिस्तृप्यतु, विरूपाक्षस्तृप्यतु, सहस्राक्षस्तृप्यतु, सोमः, ब्रह्मा, वेदाः, ऋषयः, सर्वाणि छन्दांसि, ओङ्कारः, वषट्कारः, महाव्याहृतयः, सावित्री, यज्ञाः, द्यावापृथिवी, नक्षत्राणि, अन्तरिक्षम्, अहोरात्राणि, सङ्ख्याः, सन्ध्या, समुद्राः, नद्यः, गिरयः, क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसः, नागाः, वयांसि, सिद्धाः, साध्याः, विभाः, यक्षाः, रक्षांसि, भूतान्येवमन्तानि तृप्यन्तु, श्रुतिं तर्पयामि, स्मृतिं तर्पयामि, धृतिं तर्पयामि, रतिं तर्पयामि, गतिं तर्पयामि, श्रद्धामेधे, धारणां च, गाः, ब्राह्मणं, स्थावरं, जङ्गमानि, सर्वभूतानि तृप्यन्तु" इति यज्ञोपवीती । अथ प्राचीनावीती पित्र्यां दिशमीक्षमाणः "शतर्चिनः, माध्यमाः, गृत्समदनः, विश्वामित्रः, जमदग्निः, वामदेवः, अत्रिः, भरद्वाजः, वसिष्ठः, प्रगाथाः, पावमानाः, क्षुद्रसूक्ताः, महासूक्ताः, सुमन्तुः, जैमिनिः, वैशंपायनः, पैलः, सूत्रभाष्यकृतः, गार्ग्यबभ्रुबाभ्रव्यमण्डुमाण्डव्याः, गार्गी, वाचक्नवी, बडवा, प्रातिथेयी, सुलभा, मैत्रेयी, कहोलः, कौषीतकिः, महाकौषीतकिः, सुयज्ञः, शाङ्खायनः, आश्वलायनः, ऐतरयः, महैतरेयः, भारद्वाजः, जातूकर्ण्यः, पैङ्ग्याः, महापैङ्ग्याः, वाष्कलः, गार्ग्यः, शाकल्यः, माण्डूकेयः, महादमनः, उदवाहः, औदवाहिः, सौयामिः, शौनकिः, शाकपूणिः, ये चान्ये चाचार्यास्ते सर्वे तृप्यतु" एवं प्रत्येकमुदकाञ्जलिं दत्वा ततः पितृपितामहप्रपितामहनामान्युच्चार्योच्चार्य तर्पणं करोति । तद्यथा "देवदत्तस्तृप्यतु, मित्रसूनिस्तृप्यतु, यज्ञदत्तस्तृप्यतु" इति । ततः "पितृवंशस्तृप्यतु" इत्यञ्जलिं क्षिपेत् । अस्मिन्नवसरे न नग्नां

Digitized by Google

स्त्रियमीक्षेत इत्येवमाद्याचारः पठितः समस्त एव कर्त्तव्यः । आनुपूर्व्येण प्रयोजनमेव नास्तीति पद्धतिर्न कृता ॥

कृषिकरणकर्म वक्ष्यामः । रोहिण्यां हलयोक्त्रकर्षणगालवादीनां प्रारम्भे यत्कर्म तदन्येन ब्राह्मणेन कारयितव्यम् । गृहादेव सिद्धं हविष्यमन्नं गृहीत्वा क्षेत्रस्य पुरस्ताद् " महीद्यौः पृथिवीचनइमंय- ज्ञ " मिति मन्त्रेण नमस्कारान्तेन बलिं दत्त्वा ततो " नमोद्यावा- पृथिवीभ्यां होतृभ्यां पूर्वसूभ्यां विश्वकर्मणोनूपोमेष्ठमेपातमाहिंसि- ष्टं मामा सन्ताम् " मिति प्रतिदिशमुपस्थानं कृत्वा वापयति ॥

उदकतरणकर्म वक्ष्यामः । यस्यां दिश्युदकमागच्छति तस्यां दिश्यभिमुखो भूत्वा " सर्वासांपित्रेविश्वकर्मणोमनुहविर्जुषता " मिति जपित्वा ततः " समुद्रायवैष्णवेनमः स्वाहा, नमोवरुणायय- मेपतयेस्वाहा, सर्वाभ्योनदीभ्यः स्वाहा " इति उदकाञ्जलींस्ती- नप्सु जुहोति । अथ वा स्थावराय । तत एभिरेव मन्त्रैः सलिलमू- र्द्धमुत्क्षिप्य ततः तरेत् । तरन्भयं यदि शङ्केद्रासिष्ठं सूक्तं किञ्चि- ज्जपित्वा ततः "समुद्रज्येष्ठाः सलिलस्यमध्या" दिति जपेत् । अ- परे त्वेवं वर्णयन्ति । " समुद्रजेष्ठा " जपेदिदमेव वासिष्ठमिति ॥

श्रावणीकर्म वक्ष्यामः । तच्च श्रवणे पूर्णमास्यां कर्त्तव्यम् । अत्र स्तरणाधाराज्यभागा निर्विकल्पाः । उपलेपनोल्लेखनाद्याधा- राज्यभागान्तं कृत्वा ततोऽक्षतसक्तूनां स्थालीपाकस्य जुहुयात् । "विष्णवेस्वाहा, श्रावण्यैपौर्णमास्यैस्वाहा, वर्षाभ्यः स्वाहे " ति हुत्वा ततः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं स- मापनीयमिति ॥

सर्पबल्युपकर्म वक्ष्यामः । अत्र स्तरणाधाराज्यभागा नि- र्विकल्पाः । अस्यामेव पौर्णमास्यां गृहमेव बाह्यतः कृत्वा ततः अक्षतसक्तूंश्च घृतेन मिश्रयित्वा अवदानधर्मेण दिग्भ्यान्

Digitized by Google

सर्पाणां पूर्वार्धे जुहोति। "देवेभ्यः समधिपतये स्वाहा, अदृभ्यः स्वाहे"ति पश्चार्द्धेन जुहोति। तत एताभ्यामेव मन्त्राभ्यामधिपतये पुरस्तात्पुरस्तात् सर्पेभ्यः पश्चादेवं षडाहुतीर्हुत्वा ततोनेनैव प्रकारेणान्तरिक्षाणां दिव्यानां पार्थिवानां षट्षडाहुतयो हूयमानाश्चतुर्विंशतिर्भवन्ति। होमानन्तरमग्नेरुत्तरतः प्रागग्रेषु कुशेषूदकुम्भं नवं प्रतिष्ठाप्य ततश्चतुर्ष्वपि स्थानेषु कुशान् भूमौ निधाय ततो "दिव्यानां सर्पाणामधिपतिरवनेनिक्ता"मित्यनेन मन्त्रेणोदकुम्भस्योत्तरतो ये कुशा निहिताः तेषां पूर्वाग्रे हस्तेनोदकमासिञ्चति। "दिव्याः सर्पाअवनेनिजता" मित्यनेन मन्त्रेण यथोक्तेनाष्टप्रकारेण पश्चार्द्धे आसिञ्चति। अधिपतये पुरस्तात्पुरस्तात्त्रिः सर्पेभ्यः पश्चात्पश्चात्त्रिरेव एवं षट् भवन्ति। एवमुत्तरेष्वपि द्रष्टव्यम्। "दिव्यानां सर्पाणामधिपतिः प्रलिखतां दिव्याः सर्पाः प्रलिखन्ता" मिति फलकेनाप्सु प्रदेशेषूदकतोर्द्धेषु स्पृशति। ततो "दिव्यानां सर्पाणामधिपतिः प्रलिम्पतां सर्पाःदिव्याः प्रलिम्पन्ता"मिति सुगन्धिना विलेपनेन तथैव लिम्पति। "दिव्यानां सर्पाणामधिपतिरावभ्रीतां दिव्याः सर्पाआवभ्रीता"मिति सुगन्धिपुष्पाणि क्षिपति। "दिव्यानां सर्पाणामधिपतिराच्छादयतांदिव्याः सर्पाआच्छादयन्ता" मिति सूत्रतन्तुमुपहरति। "दिव्यानां सर्पाणामधिपतिराकूतां दिव्याः सर्पाआकूता"मिति कुशतरुणेन सौवीरमञ्जनं क्षिपति। "दिव्यानां सर्पाणामधिपतिरीक्षतांदिव्याः सर्पाइक्षन्ता"मिति आदर्शेनैवमवेक्षयति। "दिव्यानां सर्पाणामधिपतिरेष तेबलिर्दिव्याः सर्पाएषतोबलि"रिति हविष्यमन्नं ददाति। उदकदानकंकतवेष्टनवर्णकप्रलिम्पनपुष्पप्रकिरणसूत्रतन्तुप्रक्षेपणाञ्जनादर्शेक्षणबालेदानानि अष्टौ पदार्था दिव्यानां सर्पाणामधिपतीनां दिव्यानां च सर्पाणां षट्कृत्वोभ्यस्यमाना अष्टाचत्वारिंशद्भवन्ति। एकीकृतं द्वि-

Digitized by Google

नवतं शतं च भवति । एतत्कृत्वा ततः स्विष्टकृत्ततो महाव्याहृति-सर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति । अन्ये त्वेवं व्याचक्षते "दिव्यानांसर्पाणामधिपतयेस्वाहा, दिव्येभ्यः सर्पेभ्यः स्वाहेति" आहुतिद्वयमेव हुत्वा तत उदकुंभपूरणादिबलिदानान्तं कर्तव्यम् । चतुर्विंशत्याहुतयो न होतव्या इति । ततोऽनेनैव प्रकारेणाऽक्षतसक्तुभिर्लोकमासिद्धेन सर्पेभ्य उदकपूर्वं रात्रौ वाग्यतो बलिहरणं कुर्यात् । पत्नी च वाग्यता बलिमुपसादयेत् । मार्गशीर्षशुक्लचतुर्दशीं यावत् सर्पकर्म येन कृतं स "सुत्रामाणंपृथिवींयामनेहस"मित्यनेन मन्त्रेण शय्यामारोहते । ततश्चतुरो मासान् मंचकशायी स्यादिति ॥

आश्वयुजीकर्म वक्ष्यामः । अत्र स्तरणाघाराज्यभागा निर्विकल्पाः । आश्वयुज्यां पौर्णमास्यामुपलेपनोल्लेखनाद्याघाराज्यभागान्तं कृत्वा पायसस्य चरुः "इन्द्रायस्वाहा, अश्विभ्यांस्वाहा, अश्वयुग्भ्यांस्वाहा, आश्वयुज्यैपौर्णमास्यैस्वाहा, अश्वपतयेस्वाहा, पिंगलायस्वाहे" ति षडाहुतीराज्यस्य हुत्वा ततः क्षीरघृतावेकीकृत्य "आगावोअग्म" इत्यष्टर्चैः प्रत्यृचमेवमष्टावाहुतीः स्रुवेण हुत्वा ततः समवद्य स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समाप्य ब्राह्मणान् भोजयेत् । गाश्च सवत्सा एवैतांरात्रिं वासयेत् । अपरे तु व्याचक्षते । घृतमिश्रस्य दध्न "आगावोअग्म" इत्यष्टावाहुतयो होतव्याः ॥

आग्रहायणीकर्म वक्ष्यामः । मार्गशीर्षपौर्णमास्यां येनैव कर्मणा सर्प्पबल्युपकर्म कृतं तेनैवोत्सर्गं कृत्वा ततः "शंनोमित्रः शंवरुणः" इत्यनेन मन्त्रेण पलाशशाखया गृहमध्ये भूम्येकदेशं शोधयित्वा ततः "समुद्रादूर्मिर्मधुमंउदारदि"त्यनेन मन्त्रेणाऽद्भिरभ्युक्ष्य "स्योनापृथिविभवे" त्यनेन मन्त्रेण स्तरणमास्तृणाति । ततो

Digitized by Google

र्वः सर्वेषां ज्येष्ठः स दक्षिणतः प्रति "ब्रह्मन्प्रतितिष्ठामि अत्र" इ-त्यनेन मन्त्रेण वामपार्श्वैः परिवर्त्तते । तत "उदीर्ध्वजीवो आगा" दित्यनेन मन्त्रेणोत्तिष्ठति । ततस्तसूरेतां रात्रिं शेरते उपरिष्टा-त्तु स्वेच्छा इत्येतत्पूर्णमास्यां कृत्वा ततः प्रतिपादि प्रातरेव शमीपला-शमधूकेषीकापामार्गशिरीषोदुम्बरकुशतरुणवदरीणां मुष्टिमादायो-दपात्रे हलोल्खातलोष्ठं सहिरण्यं च क्षिप्त्वा ततः "अपनः शोशुचद-घ"मित्यष्टाभि ऋग्भिः तस्मिन्नुदपात्रे तां मुष्टिं निषज्य निमज्य प्रद-क्षिणगृहेभ्यः पाप्मानं धूमसरूपं पातयेत् । यद्यष्टानां गृहाणामभ्य-धिकं गृहं भवति । तत इदमेव सूक्तं पुनः प्रयोक्तव्यम् । एवं सर्वेभ्यो गृहेभ्यः प्रत्यृचं पातयित्वा तत उदपात्रमुत्तरतो गृहस्य निनयेत् । ततः कर्त्रा दधिमधुघृतान्येकीकृत्य दक्षिणा देयेति । एतत्कृत्वो-पलेपनोल्लेखनाद्याघाराज्यभागान्तं करोति । अस्मिन् कर्मणि स्त-रणाद्याघाराज्यभागाः पाक्षिकाः । "ग्रीष्मोहेमन्त उतवावसन्तः शरद्वर्षाः सुकृतं नो अस्तु तेषामृतूनां शरशारदानां निपात एषा-मुभयेस्यामस्वाहा, अपश्चेतपदाजहिपूर्वेण चसप्त च परेण च वारुणी-रिमाः सर्वाश्चराजबान्धवैः स्वाहा, श्वेतायवैदार्वाय स्वाहेति, वेदा-र्थाय स्वाहा, तक्षकायवैशालेयाय स्वाहे"ति आज्यस्य षडाहुतीर्हुत्वा ततः "सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतांसुवर्षा शन्तनो-वर्षाः शरदः शंभवन्तुनः" इत्यनेन मन्त्रेणोपस्थानं कृत्वा ततः पा-क्षिकः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समाप-नीयम् । अपरे तु व्याचक्षते । आग्रहायण्यां पौर्णमास्यां तदेव म-धूकादि कृत्वा ततो "ग्रीष्मोहेमन्त" इत्येवमादिकर्त्तव्यं सर्पबलि-कर्मणानन्तप्रत्यवारादिति एतत्सर्वं पौर्णमास्यां कर्त्तव्यमिति ॥

चित्रकर्म वक्ष्यामः । अत्र स्तरणाद्याघाराज्यभागा निर्विकल्पाः । चैत्र्यां पौर्णमास्यामुपलेपनोल्लेखनादिस्तरणान्तं कृत्वा किञ्चरमि-

Digitized by Google

थुनक्राञ्चीमथुनादीनि यावदुपलभ्यन्ते एतानि सर्वाणि बदरीपात्रादिमयानि कृत्वा ऐन्द्राग्नौ दीर्घदुग्धे लम्बोदरे पुरुषाकृती कर्षव्ये । रौद्रा गोलकास्तु दृषच्छ्रयः एतत्सर्वं पिष्टस्य कृत्वा ततः पूर्ववदाघाराज्यभागान्तं कृत्वाऽवदानधर्मेण ऐन्द्राग्नदेवश्चरुः "इन्द्राग्निभ्यां स्वाहे"ति हुत्वा ततश्चरुधर्मेणैव गोलकेभ्योऽवदानधर्मेण समवत्तधान्यां कृत्वा गृहीत्वा "रुद्राय स्वाहे"ति ततः सर्वेभ्योदद्यात्ततः स्विष्टकृत्ततो महाव्याहृतिसर्वप्रायश्चित्तादितन्त्रशेषं समापनीयमिति ॥

इति अहिच्छत्राविषये कौशुंवरवास्तव्यश्रीवासुदेवकृते साङ्ख्यायनगृह्यसंग्रहे चतुर्थोध्यायः समाप्तः ॥

समाप्तोऽयं ग्रन्थः ॥



Digitized by Google

श्रीगणेशाय नमः ।

अथ कौषीतकिगृह्यसूत्रम् ।

हरिः ॐ

अथातः पाकयज्ञान् व्याख्यास्यामोऽभिसमावर्त्स्यमानो य आत्मवां समिधमभ्यादध्यात् तमग्निमिन्धीत वैवाहं वादाधाद्य काल एके मेते वा गृहपतौ स्वयं ज्यायान् वैशाख्यामभावास्यायामन्यस्यां वाऽकामतो नक्षत्र एके पुरुषपशुविद्युक्लाम्बरीषबहुयाजिनामन्यतमस्मादग्निमिन्धीत सायं प्रातरेके सायमाहुतिसंस्कारोऽध्वर्युमत्यय इत्याचार्याः । प्रातः पूर्णाहुतिं जुहुयाद्वैष्णव्यर्चा तूष्णीं वा । तस्य प्रादुष्करणहवनकालावग्निहोत्रेण व्याख्यातौ । कृष्णोपवीतीत्यादि च सम्भवत्सर्वम् । कल्पैकत्वात् । तदप्याहुः—

पाकसंस्था हविःसंस्थाः सोमसंस्थास्तथापराः ।
एकविंशतिरित्येता यज्ञसंस्थाः प्रकीर्तिताः ॥ ॥ १ ॥

कर्मोपवर्गे ब्राह्मणभोजनम् । वाग्यूपवयःश्रुतशीलवृत्तानि गुणाः श्रुतं तु सर्वानित्येति । न श्रुतमतीयात् ॥

अधिदैवमथाध्यात्ममधियज्ञमिति त्रयम् ।
मन्त्रेषु ब्राह्मणे चैव श्रुतमित्यभिधीयते ॥
क्रियावन्तमधीयानं श्रुतवृद्धं तपस्विनम् ।
भोजयेत् तं सकृच्छ्राद्धे न तं भूयः क्षुदश्नुते ॥
यां तितर्पयिषेत् काञ्चिद्देवतां सर्वकर्मसु ।
तस्या उद्दिश्य मनसा दद्यादेवंविधाय वै ॥
नैवंविधे हविर्न्यस्तं न गच्छेद्देवतां क्वचित् ।
निधिरेष मनुष्याणां देवानां पात्रमुच्यते ॥ ॥ २ ॥

अथ दर्शपूर्णमासाः । उपोष्य प्रातर्यजैतन्महादक्षाऽग्नाणि

Digitized by Google

सूर्य आतपति स इमकालः स्वस्त्ययनतमः । सर्वासामाहुतामन्यत्र निर्देशात् सुमनाः शुचिः शुचौ वरुण्यदेशे पूर्णविधानं चरुं स्नपयित्वा दर्शपूर्णमासदेवताभ्यो यथाविधि स्थालीपाकस्य जुहोति । स्थालीपाकेषु च ग्रहणसादनमोक्षणानि, मन्त्रदेवताभ्योऽवदानधर्माश्च । पूर्वं तु दर्शपूर्णमासाभ्यामन्वारम्भणीयदेवताभ्यो जुहुयादाधौर्णमासादर्शस्थानतीतः कालः, आदर्शात् पौर्णमासस्य प्रातराहुतिं चैके सायमाहुतिकालेऽस्यायान्मन्यन्ते । नियतस्त्वेव कालोऽग्निहोत्रे प्रायश्चित्तदर्शनाद् भिन्नकालस्य नित्यहुत्योर्होतृ-व्रतस्तुल्यामान्यतमद्वयोः कुर्वीताभावेऽन्यदप्रतिषिद्धम् । तन्तुर्ओं-क्षेणः प्रक्षालयैक इतरेषामसंस्कारः । सायमग्नये प्रातस्सूर्याय प्रकल्पतं चानुमत्यै स्तूष्णीं प्राङ् प्रातराहुते समिधमेके यथेकं पर्युक्षणम् ॥ ३ ॥

उत्थाय प्रातराचम्याहरहः स्वाध्यायमधीयीताऽऽ नो देव सवितरिति द्वे, अपोहि मनसस्पत इति सूक्तम्, ऋतं च सत्यं चेति द्वयमान्विष्या अवहिरण्यतेति सूक्तशेषः, इन्द्रश्रेष्ठानीत्येकाऽहंसः शुचिषदित्येका, नमो महद्य इत्येका, यत इन्द्र भयामह इत्येका घस्रमस्यत्येका, यो मे राजन्नित्येका, ममाग्ने वर्च इति सूक्तं, स्वस्ति नो मिमीतामिति च पञ्च ॥ ४ ॥

चत्वारः पाकयज्ञा हुनोऽहुतः प्रहुतः प्राशित इति पञ्चसु बहिः शालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इत्यग्निमुद्धृत्यावेक्षितेऽग्नि प्रणीय निर्मथ्यैके विवाहोदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्यै पाणिं गृह्णीयाल्लक्षणसंपन्ना स्याद् । यस्या अभ्यात्ममङ्गानि स्युः । समाः केशनखाः आवर्ता-वपि यस्यै स्यातां प्रदक्षिणौ ग्रीवायां षड् धीराजनयिष्यतीति विद्यात् ॥ ५ ॥

Digitized by Google

आमन्त्रयमाणोऽनृक्षरा इति वरकान् गच्छेतामनुमन्त्रयमाणेऽभिगमने पुष्पफलयवानादायोदकुम्भं चायमहं भो ३ इति त्रिः प्रोच्योदिते प्राङ्मुखा गृह्या प्रत्यङ्मुखा आवहवाना गोत्रनामान्यनुकीर्तयन्तः कन्या वरयन्त्युभयतो रूचिते पूर्णपात्रीमभिमृशन्ति पुष्पाक्षतफलयवहिरण्यमिश्राम् । अनाधृष्टमस्यनाधृष्ट्यै देवानामोजोऽनाभिशस्त्यभिशस्तिपाः । अनाभिशस्तेऽन्यमजमा सम्यमुपगमं सुविते मा धा इत्यानः प्रजामित कन्याया आचार्य उत्थाय मूर्धानि करोति प्रजां त्वयि दधामि पशूँस्त्वयि दधामि तेजो ब्रह्मवर्चसं त्वयि दधामीति ॥ ६ ॥

प्रतिश्रुते जुहोति चतुरस्रं गोमयेन स्थण्डिलमुपलिप्य पूर्वयोर्विदेशादक्षिणां प्राचीं पिप्य उत्तरां देवे प्राचीमेवैके उदक्संस्थां मध्ये लेखां लिखित्वा तस्यै दक्षिणत उपरिष्टाद्दर्भमेकं मध्य एकामुत्तरत एकं ता अभ्युक्ष्याग्निं प्रणीयाभिमन्त्रसा शिवेनाऽयमस्तु सङ्गमनो वसूनां मा नो हिंसीः स्थविरं मा कुमारं शन्नो भव द्विपदे नो चतुष्पद इत्यग्निं प्रणीय तूष्णीं वा प्रदक्षिणमग्नेः स्वयनात् पाणिना सोदकेन त्रिः प्रमार्ष्टि तत्समूहनमित्याचक्षते सकृदपसव्यं पिप्ये ॥ ७ ॥

अथ परिस्तरणम् । दागग्रैः कुशैः परिस्तृणाति त्रिवृत् पञ्चवृद्वा पुरस्तात् प्रथममथ पश्चान्मूलाग्यैः प्रच्छादयति । सर्वाश्चातो दक्षिणतः प्रहृत्य उदक्संस्था भवन्ति दक्षिणतो ब्रह्माणं प्रतिष्ठाप्य भूर्भुवः स्वरिति सुमनोभिरलंकृत्योत्तरतः प्रणीताः प्रणीय, को वः प्रणयतीति सव्येन कुशानादाय दक्षिणेनापनौति । दक्षिणं जान्वाच्य सव्यं पिप्येनाज्याहुतिषु नित्यं परिस्तरणं नित्याहुतिषु चेति माण्डूकेयः कुशतरुणे अविषमे अविच्छिन्ने ग्रे अनन्तर्गर्भे प्रादेशेन त्रपवित्रा कुशेन छिनत्ति पवित्रे स्थ इति द्वे त्रीणि वा भ-

Digitized by Google

वन्ति प्रागग्रे धारयन् वैष्णव्यावित्यभ्युक्ष्य कुशतरणाभ्यां प्रदक्षिणमग्निं त्रिः पर्युक्ष्य,महीनां पयोऽसीत्याज्यस्थालीमादायेषे त्वेत्यधिश्रित्योर्जे त्वेत्युदगुद्वास्योदगग्रे पवित्रे धारयन्नङ्गुष्ठाभ्यां चोपकनिष्ठकाभ्यां चोभयतः प्रतिगृह्योर्ध्वाग्रे प्रहे कृत्वाऽज्ये प्रत्यस्यति । सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरित्याज्यसंस्कारः सर्वत्र । नासंस्कृतेन जुहुयात् स्रुवे चापः सवितुर्व इति ताः प्रणीताः प्रोक्षणीश्च ॥ ८ ॥

स्रुवः पात्रमर्थलक्षणग्रहणम् । सव्येन कुशानादाय दक्षिणेन मूले स्रुवं विष्णोर्अहंस्तोऽसीति स्रुवेणाज्याहुतीर्जुहोत्युत्तरपश्चार्द्धादग्नेरारभ्याविच्छिन्नं दक्षिणतो जुहोति, त्वमग्ने प्रमतिरिति दक्षिणपश्चार्द्धादग्नेरारभ्याविच्छिन्नमुत्तरतो जुहोति यस्येमे हिमवन्त इत्याग्नेयमुत्तरमाज्यभागं सौम्यं दक्षिणं मध्येऽन्याहुतयोऽग्निर्जनिता स मेऽमूं जायां ददातु स्वाहा, सोमो जनिमान्त्स माऽमुया जनिमन्तं करोतु स्वाहा, पूषा ज्ञातिमान्त्स माऽमुष्यै पित्रा मात्रा भ्रातृभिर्ज्ञातिमन्तं करोतु स्वाहेति । नाज्याहुतिषु नित्याद्याज्यभागौ स्विष्टकृच्च निवाहुतिषु चेति माण्डूकेया महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानमाज्ये हविषि सव्ये पाणौ ये कुशास्तान् दक्षिणेनाग्रे संगृह्य मूले सव्येन तेषामग्रं स्रुवे समनक्ति मध्यमाज्यस्थाल्यां मूलं चाथ चेत् स्थालीपाकेषु स्रुक्प्रग्रं मध्यं स्रुवे मूलमाज्यस्थाल्यां तानुपहृत्याग्नेर्वासोऽसीति तिस्रः समिधोऽभ्यादाय यथोक्तं पर्युक्षणमनाम्नातमन्त्रास्वादिष्टदेवतास्वमुष्यै स्वाहाऽमुष्यै स्वाहेति जुहुयात् स्वाहाकारेण शुद्धेन व्याख्यातः प्रतिश्रुते होमकल्पः ॥ ९ ॥

प्रकृतिभूतिकर्मणां सर्वासां चाज्याहुतीनां श्वाखापशूनां चरुपाकयज्ञानां च । त एते प्रयाजा अननुयाजा अनिका अनिगदा

Digitized by Google

असामिषेनीकाश्च सर्वे पाकयज्ञा भवन्ति । तदपि श्लोकाः—

हुतोऽग्निहोत्रहोमेणाहुतो बलिकर्म्मणा ।
प्रहुतः पितृकर्म्मणा प्राशितो ब्राह्मणे हुतः ॥
अनूर्ध्वजु र्व्यूढ़जानुर्जुहुयाद सर्वदा हविः ।
न हि ब्राह्महुतं देवाः प्रतिगृह्णति कर्हि चित् ॥
रौद्रं तु राक्षसं पिश्यमासुरं चाभिचारिकम् ।
उक्ता मन्त्रं स्पृशेदप आलभ्यात्मानमेव च ॥ ॥१०॥

अथैतां रात्रीं स्वस्तीयां वा कन्यां वक्ष्यन्तीति तस्यां रात्र्यामतीते निशाकाले सर्वौषधिफलोत्तमैः सुरभिभिर्भ्रैः सक्षिरस्कां कन्यामाप्लाव्य रक्तमहतं वा वासः परिधाय पश्चादग्नेः कन्यासुपवेश्यान्वारब्धायां महाव्याहृतिभिर्हुत्वाऽऽज्याहुतीर्जुहोत्यग्नये सोमाय प्रजापतये मित्राय वरुणायेन्द्रायेन्द्राण्यै गन्धर्वाय भगाय पूष्णे त्वष्ट्रे बृहस्पतये राज्ञे प्रत्यनीकायेति । चतस्रोऽष्टौ वाऽविधवाः शाकपिण्डीभिः सुरयाऽन्नेन च तर्पयित्वा चतुरा नर्तनं कुर्युरेता एव देवताः पुंसो वैश्रवणमीशानं चातो ब्राह्मणभोजनम् ॥ ११॥

स्नातं कृतमङ्गलं वरमविधवाः सुभगा युवतयः कुमार्य्यै वेश्म प्रपादयन्ति । तासामप्रतिकूलः स्यादन्यत्राभक्ष्यपातकेभ्यस्ताभिरनुज्ञातोऽथास्यै वासः प्रयच्छति । रैभ्यासीदिति चित्तिरा उपवर्णमित्याञ्जनकोशमादत्ते । समञ्जन्तु विश्वेदेवा इति समञ्जनीया । यथेयं शर्ची वा वातां सुपुत्रां च यथाऽदितिम् । अविधवां चापालामेवं त्वामिह रक्षतादिममिति दक्षिणे पाणौ शलली त्रिवृतं ददाति रूपं रूपामेदर्शं सव्येरक्तकृष्णमाविकं क्षौमं वा त्रिमणि प्रतिसरं ज्ञातयोऽस्या बध्नन्ति। नीललोहितमिति। मधुमतीरोषधीरिति मधूकानि बध्नाति । विवाहे मामहेत्वित्वा गृहेषु गां ते मधुपर्कि-

Digitized by Google

वयौ पश्चादग्नेः कन्यामुपवेशयेदाज्यावेक्षणयां वह्याज्याहुतिभिस्तिस्रो जुहोति समस्ताभिश्चतुर्थीं प्रति येनैतस्यां चोदनायामेवमनादेशे सर्वेषु भूतिकर्मसु पुरस्ताच्चोपरिष्टाच्चैताभिरेव जुहुयात् ॥१०॥

सम्राज्ञी श्वशुरे भवेति पिता भ्राता वास्याग्रेण मूर्द्धानं जुहोति स्रुवेण वा तिष्ठन्नासीनायाः प्राङ्मुख्याः प्रत्यङ्मुखो, गृभ्णामि ते सौभगत्वाय हस्तमिति दक्षिणेन पाणिना दक्षिणं पाणिं गृह्णाति साङ्गुष्ठमुत्तानेनोत्तानं तिष्ठन्नासीनायाः प्राङ्मुख्याः प्रत्यङ्मुखः पञ्च चोत्तरा जपित्वा, अमोहमस्मि सा त्वं सा त्वमस्यमोहं, द्यौरहं पृथिवी त्वमूयस्मिति सामाहं सा मानुव्रता भव तावेह विवहावहै सह प्रजनयावहै पुत्रान् विन्दावहै बहूंस्ते सन्तु जरदष्टय इत्युदकुम्भन्नमं भूर्भुवः स्वरिति पूरयित्वा पुष्पाम्नो वृक्षस्य सप्तशीरान्त्सपलाशान्त्सकुशानोप्य हिरण्यमिति चैके, तं ब्रह्मचारिणे वाग्यताय प्रदाय सागुदीच्यां दिशि ता स्थेयाः प्रदक्षिणं भवन्त्यश्मानं चोत्तरत उपस्थाप्ये हि मूनरीप्युत्थाप्या एहश्मानमातिष्ठाश्मेव त्वं स्थिरा भव अभितिष्ठ पृतन्यतः सहस्व पृतनायतः तद्दक्षिणेन पदेनाश्मानमाक्रमय्य प्रदक्षिणमग्निं पर्याणीय तेनैव मन्त्रेण द्वितीये वसनं प्रदाय लाजाःश्छमीपलाशमिश्रान् पित्र भ्राता वास्यादञ्जलावावपत्युपस्तरणाभिघारणं प्रसभिघारणं चाज्येन ताञ्जुहोति ॥ ११ ॥

इयन्नार्य्युपब्रूते लाजानावपन्तिका शिवा ज्ञातिभ्यो भूयासं चिरं जीवतु मे पतिः स्वाहेति तिष्ठन्ती जुहोति । पतिर्मन्त्रं जपत्यश्मक्रमणाद्येवं द्वितीयमेवं तृतीयं तूष्णीं कामन चतुर्थं प्रागुदीच्यां दिशि सप्तपदानि क्रमयतीष एकपद्यूर्जे द्विपदी रायस्पोषाय त्रिपद्यायोभव्याय चतुष्पदी पशुभ्यः पञ्चपद्यृतुभ्यः षट्पदी सखा सप्तपदी भवेति । तान्यद्भिः समवत्यापोहिष्ठीयाभिस्तिसृभिः स्थे-

Digitized by Google

पात्रेऽवस्रिञ्चति मार्ष्ट्यभिषिञ्च गां ददातीत्याह ब्राह्मणेभ्यः किञ्चिद्दद्यात् सर्वत्र स्थालीपाकादिषु कर्मसु मूर्धा विदुषेवाधूयं गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याऽश्वो वैश्यस्याऽधिरथं शतं हिरण्यमनेवाजिकेभ्योऽश्वं ददाति ॥ १४ ॥

प्र त्वा मुञ्चामीति तृचं गृहान् प्रतिष्ठमानायां जीवं रुदन्तीति प्ररुदन्त्यामथ रथाक्षस्थोऽञ्जनेन पत्नी कुरुतेऽक्षन्नमीमदन्त्येतेनर्यां सर्पिषा युक्तेन चक्रे इन चक्रे इति वैनाभ्यां चक्रयोः पूर्वया पूर्वमुत्तरयोत्तरमुत्तरौ च खे रथस्येत्येतया फलवतो वृक्षस्य शम्या गर्भेऽग्नीका वपाङ्किखाय तिस्रो वाभिमन्त्र्याक्षौ युनक्ति । युक्तस्ते अग्ने दक्षिण इति द्वाभ्यां शुक्रावनड्वाहावित्येतेनार्द्धर्चेन हुत्वाऽभिवल्क्याथ यदि रथं चिकीर्षेत् छिद्रेण वाहिताग्ने गृहान् इत्याभ्यां प्रपाद्याभिप्रयम्य खादिरस्येत्येतया परिदध्यात्संविदहमिति ग्रन्थिं स्वस्ति नो मिमीतामिति पञ्चर्चं जपति शुक्रं शुक्रमिति रथमारोहन्त्यामा विदन् परिपन्थिन इति चतुष्पथे, ये वध्व इति श्मशाने, वनस्पते शतवल्शो इति वनस्पतावर्द्धर्चं जपति, तुभ्या माणास्तिरामसीति नावमारोहन्त्यामप्यन्वतीति नदीं तरन्त्यामपि वा युक्तेनौर्वाऽऊर्मिरित्यगाधे प्रेक्षणं चेह गमयमिति सप्तगृहान् ग्रामान्याः कृताः परिहाप्य ॥ १५ ॥

अग्नेऽयुक्ष्वेत्युक्तं तस्मिन्नुपवेशनान्वारब्धायां पतिश्वशुरौ जुहोत्यग्निना देवेन पृथिवीलोकेन लोकानामाक्रमेण वेदानां त्वेन त्वा शमयाम्यसौ स्वाहा, वायुना देवेनान्तरिक्षलोकेन लोकानां यजुर्वेदेन वेदानां त्वेन त्वा शमयाम्यसौ स्वाहा, सूर्येण देवेन द्यौर्लोकेन लोकानां सामवेदेन वेदानां त्वेन त्वा शमयाम्यसौ स्वाहा, चन्द्रेण देवेन दिशां लोकेन लोकानां ब्रह्मवेदेन वेदानां त्वेन त्वा शमयाम्यसौ स्वाहा भूर्या ते पतिघ्न्यलक्ष्मी देवरघ्नी जारघ्नी तां

करोम्यसौ स्वाहेति वा प्रथमया महाव्याहृत्या प्रथमोपहिता द्वितीयया द्वितीया तृतीयया तृतीया समस्ताभिश्चतुर्थी घोरचक्षुरित्याज्यलेपेन चक्षुषी विमृजीत, कयानश्चित्र इति तिसृभिः केशान्तानभिमृश्योतत्यादेव्याभिषजेतिचतसृभोऽनुद्रुत्यान्ते स्वाहाकारेण मूर्द्धनि संस्रावमत्र हैके कुमारमुत्सङ्गमानयन्त्युभयतः सुजात मा ते योनिमिप्येतयाऽपि वा तूष्णीं तस्याऽञ्जलौ फलानि दत्वा पुण्याहं वाचयति पुंसवतीह भवतीहैवस्तमिति सूक्तशेषेण गृहान् प्रपादयन्ति ॥ १६ ॥

दधिक्राव्णोअकारिषमिति दधि संपिबेयातां वाग्यतावाशीयातामाध्रुवदर्शनादस्तमिते ध्रुवं दर्शयति ध्रुवैधि पोष्यामयीति, ध्रुवं पश्यामि प्रजां विदेयेति ब्रूयात् त्रिरात्रं ब्रह्मचर्यं चरेयातामधः शयीयातां दध्योदनं संभुञ्जीयातां पिबतं च तृप्णुतं चेति तृचेन सायं मातर्वैवाहमग्निं परिचरेयातामग्नये स्वाहाऽग्नये स्विष्टकृते स्वाहेति. पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ पुमानिन्द्रश्चाग्निश्च पुमांसं वर्ततां मयि स्वाहेति पूर्वा गर्भकामा दशरात्रमविप्रवासः॥१७॥

अथ चतुर्थीकर्म । त्रिरात्रे निर्वृत्ते स्थालीपाकस्य जुहोति, अग्ने प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि यास्या पतिघ्नी तनूस्तामस्या अपजहि। वायो प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि यास्या अपुत्रिया तनूस्तामस्या अपजहि । सूर्य प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि यास्या अपशव्या तनूस्तामस्या अपजहि । अर्यमणं नु देवं कन्या अग्निमयक्षत सेमां देवो अर्य्यमा प्रेतो मुञ्चातु मामुतः । वरुणं नु देवं कन्या अग्निमयक्षत सेमां देवो वरुणः प्रेतो मुञ्चातुमामुतः । पूषणं नु देवं कन्या अग्निमयक्षत सेमां देवो पूषा प्रेतो मुञ्चातु मामुतः। प्रजायत इति सप्तमी, सौविष्टकृत्यष्टमी ॥ १८ ॥

Digitized by Google

अध्याण्डामूलं पेषयित्वर्तुवेलायां, मुदीष्वातः पतिवतीति द्वाभ्यामन्ते स्वाहाकाराभ्यां नस्तो दक्षिणतो निषिञ्चेत् । गन्धर्वस्य विश्वावसोर्मुखमसीत्युपस्थम् अञ्जनयिष्यमाणोऽभिमृशेत् । समाप्ते अर्थे जपेत् । प्राणे तत्रे रेतो दधाम्यसाविति अनुप्राण्यात् । यथा मृत्पिरग्निगर्भा यथा द्यौरिन्द्रे गर्भिणी वायुर्यथा दिशां गर्भ एवं गर्भं दधामि तेऽसाविति वा । आ ते योनिं गर्भ एतु पुमान् बाण इवेषुधिम् आवीरो अत्र जायतां पुत्रस्ते दशमास्यः । पुमांसं पुत्रं जनयतं पुमाननुजायतां तेषां माता भविष्यसि जातानां जनयांसि च पुंसि वै पुरुषे रेतस्तत्स्त्रियामनूषि च तु तथा तदब्रवीद्धाता तत्प्रजापतिरब्रवीत् । प्रजापतिर्व्यदधात् सविता व्यकल्पयत् । स्त्रीपूपमन्यात् स्वादधत्पुमांसमादधादिह । यानि भद्राणि बीजानि पुरुषा जनयन्ति नः तेभिष्ट्वं पुत्रं जनय सुप्रसूर्देनुका भव । अभिक्रन्द वीलय स्वगर्भमाधेहि साधय दृषाणं दृषन्नाधेहि प्रजायै त्वा हुवामहे । यस्य योनिं पतिरेतोगृभाय पुमान् पुत्रो धीयतां गर्भे अन्तः तं पिपृहि दशमास्योन्तरुदरे स जायताम् । श्रैष्ठ्यतमस्वानामिति वा ॥ १९ ॥

तृतीये मासि पुंसवनं पुष्येण श्रवणेन वा सोमांशुं पेषयित्वा कुशकण्टकं वा न्यग्रोधस्य वा स्कन्धस्यान्त्यां शुङ्गां यूपस्य वाऽग्निष्ठां संस्थिते वा यज्ञे जुव्हः संस्रावमग्निना रयिं तमस्तुरीयं समिद्धाग्निर्वनवस्पिशङ्गरूप इति चतसृभिरन्ते स्वाहाकाराभिर्नस्तो दक्षिणतो निषिञ्चेत् ॥ २० ॥

चतुर्थे मासि गर्भरक्षणम् । ब्रह्मणाग्निः संविदान इति षट् स्थालीपाकस्य हुत्वाऽक्षीभ्यां ते नासिकाभ्यामिति प्रत्यृचमाज्यलेपेनाङ्गान्यनुविमृज्य ॥ २१ ॥

सप्तमे मासि प्रथमगर्भे सीमन्तोन्नयनम् । स्नातामहतवाससं

Digitized by Google

पश्चादग्नेरुपवेश्यानारब्धायां महाव्याहृतिभिर्हुत्वा स्थालीपाकं श्रपयित्वा मुद्गौदनमित्येके पुंवदुपकरणानि स्युर्नक्षत्रं च धाता ददातु दाशुषे प्राचीं जीवातुमक्षितिं वयं देवस्य धीमहि सुमतिं सत्यधर्मणः धाता प्रजाया उत्तराय ईशे धातेदं विश्वं भुवनं जजान धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवज्जुहोतेति नेजेमेष परापतेति तिस्रः प्रजापत इति षष्ठी त्रिः श्वेतया शलल्या दर्भस्तूष्णा वोदुम्बरशलाटुभिः सह मध्यादूर्ध्वं सीमन्तमुन्नयति भूर्भुवः स्वरित्युत्सङ्गे निधाय त्रिवृतिः प्रतिमुच्य कण्ठे बध्नात्ययमूर्जावरोहत ऊर्जीव फलिनी भवेत्याथाह वीणागाथिनो राजानं संगायतेति यो वाप्यम्यो वीरतर इत्युदपात्रेऽक्षतानवनिनीय विष्णुर्योनिं कल्पयतु एकामहमिति षड्ऋचेन पाययेदथास्या उदरमभिमृशेत् सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुः छन्दास्यङ्गानि यजूँषि नाम साम ते तनूर्वामदेव्यं गापयेन्महादेहमतीं वा ऋषभो दक्षिणा ॥ २२ ॥

काकानन्या मचकचानन्याः कोशातक्या बृहस्याः कालक्लीतकस्येति मूलानि पेषांयत्वोपलेपयेद्देशं यस्मिन् प्रजायेत रक्षसामपहत्यै ॥ २३ ॥

अथ जातकर्म । जातं कुमारं त्रिरभ्य वान्यानुप्राण्याद्दचा प्राणिहि यजुषा समस्मिंह साम्नोदनीहीति । सर्पिर्मधुनी दध्युदके च सन्निनीय व्रीहियवौ वा संनिघृष्य त्रिः प्राशयेज्जातरूपेण प्र ते यच्छामि मधुमन्मखाय वेदं प्रसूतं सवित्रा मघोना आयुष्मान् गुपितोम देवताभिः शतं जीव शरदो लोके अस्मिन्नित्यसाविति नामास्य दधाति घोषवदाद्यन्तरन्तःस्थं द्व्यक्षरं चतुरक्षरं वाऽपि वा षळक्षरं कृतं कुर्यान्न तद्धितम् । तदस्य पिता माता च विद्यातां दशम्यां व्यावहारिकं ब्राह्मणजुष्टं गोः कृष्णस्य शुक्लकृष्णानि

Digitized by Google

लोहितानि च रोमाणि मस्तं कारयित्वैतस्मिन्नेव चतुष्टये सन्निनीय चतुः प्राशयेदिति माण्डूकेयो भूर्भुवस्त्वरोमेदं त्वयि दधाम्यसौ स्वाहा भूर्भुवः स्वर्वाकोवाक्यमितिहासपुराणमों सर्वान् वेदाँस्त्वयि दधाम्यसौ स्वाहेति वा। मेधाजननम्। दक्षिणे कर्णे वागिति त्रिः । वाग् देवी मनसा संविदाना प्राणेन वत्सन, भुवो यजुर्वेदं त्वयि दधाम्यसौ स्वाहा स्वः सामवेदं त्वयि दधाम्यमौ स्वाहेति प्रोक्ता जुषतां त्वा सौमनसाय देवी मही मन्द्रावाणी वाणीचीः सलिला स्वयम्भूरिति चानुमन्त्रयेत शणसूत्रेण विग्रथ्य जातरूपं दक्षिणे पाणावपिनह्योत्थानादूर्ध्वं दशम्या ब्राह्मणेभ्यो दद्यादमा वा कुर्वीत ॥ २४ ॥

दशरात्रे चोत्थानादूर्ध्वं मातापितरौ शिरःस्नातावहतवाससौ कुमारश्चैतस्मिन्नेव सूतिकाग्नौ स्थालीपाकं श्रपयित्वा जन्मतिथिं हुत्वा त्रीणि च भानि सदैवतानि तन्मध्ये जुहुयाद्यस्मिन् जातः स्यात् पूर्वं तु दैवतं सर्वत्रा आयुष्टे अद्य गीर्भिरयमग्निर्वरेण्यः आयुर्नो देहि जीवसे आयुर्दा हविषा दधानो घृतमतीको घृतयोनिरेधि घृतं प्रीत्वा मधुचारु गव्यं पितेव पुत्रमिह रक्षतादिममिति । सोम मह भगमिति दशमीस्थालीपाकस्य नामधेयं प्रकाशं कृत्वा ब्राह्मणान् स्वस्ति वाच्यैवमेव मासि मासि जन्मतिथिं हुत्वोर्द्धं संवत्सराद् गृह्योऽग्नौ जुहोति ॥ २५ ॥

अग्नये कृत्तिकाभ्यः प्रजापतये रोहिण्यै सोमाय मृगशिरसे रुद्रायार्द्राभ्योदितये पुनर्वसुभ्यां बृहस्पतये पुष्याय सर्पेभ्यो श्लेषाभ्यः पितृभ्यो मघाभ्योगभगाय फाल्गुनीभ्यामर्यम्णे फल्गुनीभ्यां सवित्रे हस्ताय त्वष्ट्रे चित्रायै वायवे स्वातय इन्द्राग्निभ्यां विशाखाभ्यां मित्रायानुराधाया इन्द्राय ज्येष्ठायै निर्ऋत्यै मूलायाऽज्योऽषाढाभ्यो ब्राह्मणेऽभिजिते विष्णवे श्रवणाय वसुभ्यो धनिष्ठाभ्यो वरुणाय शतभिषजेऽजायैकपदे प्रोष्ठपदाभ्योऽहिर्बु-

Digitized by Google

भ्यो नाय प्रोष्ठपदाभ्यः पूष्णे रेवत्या अश्विभ्यामश्विनीभ्यां वयाय भरणीभ्यः ॥ २६ ॥

षष्ठे मांसवर्जमाशनम् । आजमाद्यकामस्तैतिरं ब्रह्मवर्चसकामो मात्स्यं जवनकामो घृतौदनं तेजस्कामो दधिमधुघृतमिश्रमन्नं प्राश्नीयात् । अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्ज्जस्वतो धेहि द्विपदे चतुष्पदे पशुभ्यो महभ्यो मह्यं । इममन्न आयुषे वर्चसे तिम्ममोजो वरुणसोमराजन् मातेवास्मा अदितिः शर्मयं सहिष्ठैर्देवा जरदष्टिर्यथा सदिति हुत्वाऽन्न आयूँषीत्यभिमन्त्र्योदगग्रेषु केशेषु, स्योना पृथिवि भवेत्युपवेश्य, महाव्याहृतिभिः प्राशनं शेषं माता प्राश्नीयात् ॥ २७ ॥

संवत्सरे चूडाकर्म तृतीये वा वर्षे, पञ्चमे क्षत्रियस्य, सप्तमे वैश्यस्याग्निमुपसमाधाय व्रीहियवानां तिलमाषाणामिति पात्राणि च पूरयित्वानडुहं च गोमयं कुशमित्तं च केशमतिग्रहणादक्षक्षनीतं लोहक्षुरं चोत्तरत उपस्थाप्य संपृच्यध्वम् ऋतावरीरयमिणा मधुमत्तमाः पृञ्चती मधुना पयो मन्द्रा धनस्य सातय इत्युष्णास्वप्सुशीता आसिञ्चति । आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे ऽयायुषं जमदग्नेः कश्यपस्य ऽयायुषमगस्त्यस्य ऽयायुषं यद्देवानाम् ऽयायुषं तत्ते करोमि ऽयायुषमित्यसाविति शीतोष्णाभिराद्भिर्दक्षिणं केशपक्षं त्रिरभ्यनक्ति शलल्यैके विजटाम् वा कृत्वा नवनीतेनाभ्यज्यौ ओषधे त्रायस्वैनमिति कुशतरुणमन्तर्धायति केशान् कुशतरुणं चादर्शेन संस्पृश्य, तेजोऽसि स्वधितिष्ठेत्यित्वा मैनं हिंसीरिति लोहक्षुरमादत्ते । येनावपत् सविता क्षुरेण शतश्वृचे क्षुरेण राज्ञो वरुणस्य विद्वान् येन धाता बृहस्पतिरिन्द्रस्य चावपच्छिरः तेन ब्रह्मणो वपतेदमस्यायुष्मान् दीर्घायुरयमस्तु वीरोऽयमिति केशाग्राणि छिनत्ति कुशतरुणं चैवं द्वितीयमेवं तृतीयमेवं

Digitized by Google

द्वितरतो निकषयोः षष्ठे सप्तमे गोदानकर्मण्येतदेव गोदानकर्म यच्चूडाकर्म षोडशे वर्षेऽष्टादशे वा तृतीये तु प्रवपने मां ददात्यहं च वाससत्वष्णीमावृतः कन्यानां प्रागुदीच्यां दिशि वहौपधिके देशेऽपां वा समीपे केशाश्मश्रूणि नापिताय धान्यपात्राणि नापिताय धान्यपात्राणि ॥ २८ ॥ इति प्रथमोऽध्यायः ॥

ॐ गर्भाष्टमेषु ब्राह्मणमुपनयतैणेयेनाजिनेन गर्भदशमेषु वा गर्भैकादशेषु क्षत्रियं रौरवेण गर्भद्वादशेषु वैश्यं गव्येनाषोडशाद् वर्षाद् ब्राह्मणस्यानतीतः काल आद्वाविंशात् क्षत्रियस्यात ऊर्द्धं पतितसावित्रीका भवन्ति । नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्नैभिर्व्यवहरेयुरहतेन वा सर्वान्त्रेखलिनो मौञ्जी मेखला ब्राह्मणस्य धनुर्ज्याक्षत्रियस्योर्णासूत्री वैश्यस्य, पालाशो बैल्वो वा दण्डो ब्राह्मणस्य नैयग्रोधः क्षत्रियस्यौदुम्बरो वैश्यस्य, प्राणसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य केशसंमितो वैश्यस्य । सर्वे वा सर्वेषाम् । येनाबद्धेनोपनयेताचार्याधीनं तत्परिवाप्योपनेयस्यादापुत्यालङ्कृत्य जघनेनाग्निं तिष्ठतः प्राङ्मुख आचार्यस्तिष्ठँस्तिष्ठन्तमुपनयम् ॥ १ ॥

इदं दुरुक्तात् परिवाधमाना वर्ण पवित्रं पुनती न आगात् प्राणापानाभ्यां बलमाविशन्ती सखा देवी सुभगा मेखलेयमिति त्रिर्मेखलां प्रदक्षिणं त्रिः परिवेष्टय ग्रन्थिरेकस्त्रयोऽपि वाऽपिवा पञ्च यज्ञोपवीतं कृत्वा यज्ञोपवीतमसि यज्ञस्य त्वेनोपनह्यामीत्यञ्जली पूरयित्वाथैनमाह को नामासीत्यसावहं भो इतीतरः समानाऽऽर्षेय इत्याचार्यः समानार्षेयोऽहं भो इतीतरो ब्रह्मचारी भवान् भूहीति ब्रह्मचार्यहं भो इतीतरो भूर्भुवःस्वरित्यस्याञ्जलावञ्जलीस्त्रीन् आसिच्य दक्षिणोत्तराभ्यां पाणिभ्यां पाणी संगृह्य जपति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामुपनह्याम्य-

Digitized by Google

Sसाविति गणानां त्वेति गणकामानागन्तामारिषण्यतेतियोधान्महाव्याहृतिभिर्व्याधितान् ॥ २ ॥

भगस्ते हस्तमग्रहीत् सविता हस्तमग्रहीत् पूषा ते हस्तमग्रभीदर्यमा हस्तमग्रभीन्मित्रस्त्वमसि धर्मणाग्निराचार्य्यस्तव असावहं चोभावग्न एतं ते ब्रह्मचारिणं परिददामीन्द्रैतस्ते ब्रह्मचारिणं परिददामि विश्वेदेवा एतं वो ब्रह्मचारिणं परिददामि दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय रायस्पोषाय सर्वेषां वेदानामाधिपत्याय सुश्लोक्याय स्वस्तये ऐन्द्रीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावृत्य दक्षिणेन प्रादेशेन दक्षिणमंसमन्ववहृत्यारिष्यतस्ते हृदयस्य प्रियो भूयासमिति हृदयदेशमभिमृशति तूष्णीं प्रसव्यं पर्यावृत्यथास्योर्द्धाङ्गुलिं पाणिं हृदये निधाय जपति ॥ ३ ॥

मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वानि युनक्तु मह्यमिति कामस्य ब्रह्मवर्चस्यासाविति तेनैव मन्त्रेण तथैव पर्यावृत्य दक्षिणेन प्रादेशेन दक्षिणमंसमन्वारभ्य जपति ब्रह्मचार्यसि समिधमाधेह्यपोशानकर्म कुरुमादिवा वाचं यच्छासमिदाधानादेषा ते अग्ने समिदित्यभ्यादधाति समिधं तूष्णीं वा ॥ ४ ॥

संवत्सरे सावित्रीमन्वाह विराजे अन्दक्षं वा गायत्रीं ब्राह्मणायानुब्रूयात् त्रिष्टुभं क्षत्रियाय जगतीं वैश्याय सावित्रीं त्वेवोत्तरेणाग्निमुपविशतः प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरः । अधीहि भोऽ३ इत्युक्त्वाचार्य ॐकारं प्रयुज्याथेतरं वाचयति सावित्रीं भो अनुब्रूहीत्यथास्मै मन्वाह तत्सवितुर्वरेण्यमिमेतां पञ्चोऽर्द्धर्चशोनवानम् ॥ ५ ॥

आपो नाम स्थ शिवा नाम स्थोर्जा नाम स्थाऽजरा नाम

Digitized by Google

स्योऽभवा नाम स्थाऽमृता नाम स्य तासां वोशीय सुमतौ माधत्तेत्येव त्रिरप आचमय्य स्वस्ति नो मिमीतामिति पञ्चभेन दण्डं प्रयच्छति वरो दक्षिणा प्रदक्षिणमग्निं पर्यास्थीत्य भिक्षते ग्रामं मातरं स्त्रेव मयमां या चैनं न प्रत्याचक्षीताचार्याय भैक्ष्यं निवेदयित्वाऽनुज्ञातो गुरुणा भुञ्जीताहरहः समिदाधानं भिक्षाचरणमधः शय्यां गुरुशुश्रूषेति ब्रह्मचारिणो नित्यानि ॥ ६ ॥

अथानुवाचनस्याग्नेरुत्तरत उपविशतः प्राङ्मुख आचार्य्यः प्रत्यङ्मुख इतरोऽभिवाद्य पादावाचार्य्यस्य दक्षिणेन जानुनाक्रम्य मूले कुशतरुणान् दक्षिणोत्तराभ्यां पाणिभ्यां मध्ये परिगृह्य तां सव्येनाचार्योऽग्रे संगृह्य दक्षिणेनाद्भिः परिषिञ्चन्नथेतरं वाचयति सावित्रीं भो ३ अनुब्रूहीतीतरः सावित्रीं ते अनुब्रवीमीत्याचार्यो गायत्रीं भो ३ अनुब्रूहीतीतरो गायत्रीं ते अनुब्रवीमीत्याचार्यो वैश्वामित्रीं भो३ अनुब्रूहीतीतरो वैश्वामित्रीं ते अनुब्रवीमीत्याचार्यो ऋषीं भो ३ अनुब्रूहीतीतर ऋषींस्ते अनुब्रवीमीत्याचार्यो देवता भो ३ अनुब्रूहीतीतरो देवतास्ते अनुब्रवीमीत्याचार्यः श्रुतिं भो३ अनुब्रूहीतीतरः श्रुतिं ते अनुब्रवीमीत्याचार्यः श्रद्धामेधे भो३ अनुब्रूहीतीतरः श्रद्धामेधे अनुब्रवीमीत्याचार्य एवमेवमृषेर्यस्य यस्य यो यो मन्त्रो यदेवत्यो यच्छन्दाश्च तथा तं तं मन्त्रमनुब्रूयादापि वा विदन्नृषिदैवतच्छन्दासि तत्सवितुर्वरेण्यमित्येतां पञ्चोर्द्धर्चशो नवानमित्येषेति समाप्त आहाचार्य्य एवमेकैकमृषिमनुवाकं वाऽनुब्रूयात् क्षुद्रसूक्तेष्वनुवाकं यावद्वा गुरुर्मन्येताद्योतमेकामं सूक्ते वाऽनुब्रूयादृषेरनुवाकस्य वैकैकां सूक्तां दाविहैषा प्रभृतिरिति कामं सूक्तादाचार्य इत्येतदृषिस्वाध्याये व्याख्यातं कुशतरुणानादायाऽऽनडुहेन मूले कुण्डं कृत्वा यथासूक्तं कुशेष्वपो निषिञ्चत्यहःशेषं स्थानमुपवासश्च ॥ ७ ॥

Digitized by Google

अपराह्णेऽक्षतधाना भिक्षित्वाऽऽज्याहुतिधर्म्मेणाग्नौ पाणिना जुहुयात् सदसस्पतिमद्भुतमिति प्रत्यृचः सूक्तशेषेण भक्षैराचार्यं स्वस्तिवाच्य ॥ ८ ॥

अरण्ये समित्पाणिः सन्ध्यामास्ते नित्यं वाग्यत उत्तरापराभिमुखोऽन्यतमदेशमा नक्षत्राणां दर्शनादतिक्रान्तायां महाव्याहृतीः सावित्रीं स्वस्त्ययनानि च जपित्वैवं प्रातः प्राङ्मुखस्तिष्ठन्नामण्डलदर्शनात् ॥ ९ ॥

उदिते प्राध्ययनमहरहः सायं प्रातरग्निमुपसमाधाय परिसमूह्य पर्युक्ष्य दक्षिणं जान्वाच्याग्नये समिधमाहार्षं बृहते जातवेदसे स मे श्रद्धां च मेधां च जातवेदाः प्रयच्छतु स्वाहा । एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि स्वाहा । समिद्धो मां समर्द्धय प्रजया च धनेन च स्वाहा । एषा ते अग्ने समित्तया वर्द्धस्व चाचप्यायस्व वर्द्धिषीमही च वयमाचप्यासिषीमहि स्वाहेत्यथ पर्युक्ष्याग्नि श्रद्धां च मेधां चाविनिपातं स्मृतिं च मे ईक्षितो जातवेदा अयं शुनश्चः संप्रयच्छत्वित्याग्निमुपतिष्ठते । सौपर्णव्रतमाषितं दृष्टदृष्टसम्प्रदायानुष्ठितं ज्यायुषं पञ्चभिर्मन्त्रैः प्रतिमन्त्रं ललाटे हृदये दक्षिणस्कन्धे वामे च ततः पृष्ठे च पञ्चसु भस्मना त्रिपुण्ड्रं करोति स एतेषां वेदानामेकं द्वौ त्रीन् सर्वान् वाऽधीते य एवं हुत्वाग्निमुपतिष्ठते ॥ १० ॥

अथ व्रतादेशनम् । तस्योपनयनेन कल्पो व्याख्यातो न सावित्रीमन्वाह । दण्डप्रदानान्तमित्येके । उदगयने शुक्लपक्षेऽहोरात्रं ब्रह्मचर्य्यमुपेत्याचार्योऽमांसाशी ब्रह्मचारी चतुर्दशीं परिहाय्याष्टमीं चाग्नोत्तमे चैके यां वान्यां भक्षशस्तां मन्येत तस्यां शुक्लिये ब्रह्मचर्य्यमादिशेत् त्रिरात्रं ब्रह्मचर्यं चरेद् द्वादशरात्रं सवत्सरं वा यावद्वा गुरुर्मन्येत शाकरं तु संवत्सरं व्रातिकमौपनिषदं च पूर्णे काले

Digitized by Google

परीते ब्रह्मचर्ये संयोर्वाहस्त्यात्मन्ते वेदेऽनूक्ते रहस्यं श्रावयिष्यन् कालनियमं चादेशेन प्रतीयेत ॥ ११ ॥

कृतमातराश्यापराह्णेऽपराजितायां दिशि दुस्तचार्यो ऽथैनं यास्वेव देवतासु परीतो भवति तास्वेवैनं पृच्छत्यग्नाविन्द्र आदित्ये विश्वेषु च देवेषु चरितं ते ब्रह्मचर्य्यमिति चरितं भो३ इति प्रत्युक्ते पश्चादग्ने पुरस्तादाचार्य्यस्य प्राङ्मुखे स्थितेऽहतेन वाससाचार्य्यः प्रदक्षिणं मुखं त्रिः परिवेष्ट्योपरिक्षुदशाः कृत्वा यथा न संभ्रश्येत त्रिरात्रं समिदाधानं भिक्षाचरणमधः शय्यां गुरुशुश्रूषां चाकुर्व्वाण्यतोऽप्रमत्तोऽरण्ये देवकुलेऽग्निहोत्रे वोपवसत्येत्यत्र हैके तानेव नियमाँस्तिष्ठतो राज्यामेवोपदिशन्त्याचार्य्योऽमांसाशी ब्रह्मचारी त्रिरात्रे निवृत्ते राज्यां वा ग्रामान्निष्क्रामन्नैतानीक्षेतानध्यायन् पिशितापं चण्डालं सूतिकां रजस्वलां तेदनिमपहस्तकाँछवशानं सर्वाणि च शवरूपाणि यान्यास्येन प्रविशेयुः स्वस्यवासां निरसनुदित आदित्येऽनुवाचनधर्म्मेण वाग्यतायोष्णीषिणेऽन्वाह स्नानाग्नीध्येवैष नियमोऽथोत्तरेषु प्रकरणेषु स्वाध्यायमेव कुर्वत आचार्यस्येतरः शृणोत्युष्णीषभाजं दक्षिणा गां ददाति स्वतमित्युवादिवीति च प्रणवेन वा सर्वमन्त्रहैके वैश्वदेवं चरुं कुर्वते सर्वेषु प्रकरणेषु यथापरीतमिति माण्डूकेयः ॥ १२ ॥

अथातो दण्डनियमानान्तरा गमनं कुर्यादात्मनो दण्डस्य चाथ चेदण्डमेखलोपवीतानामन्यतमद्विशीर्य्येत छिद्येत वा तस्य तथायश्चित्तं यदुद्वाहे रथस्य मेखलाचेदसन्धेया भवत्यन्यां कृत्वानुमन्त्रयेते ।

मेध्यामेध्यविभागज्ञे मेधि देविसरस्वति ।

मेखले स्कम्भमाच्छिन्द सन्तनुष्व व्रतं मम ॥ त्वमग्ने व्रतभृच्छुचिरग्ने देवाँ इहावह । उपयज्ञं हविश्च नः व्रतानि बिभ्रद् व्रतभृ

Digitized by Google

अदाभ्यो भवानो दृतो अजरः सुवीरः दधद्रत्नानि सुमृडीको अस्मे सोमाय नो जातवेदस उपवीतं च दण्डे बध्नाति । तदप्येतत् ।

यज्ञोपवीतदण्डं च मेखलामजिनं तथा ।

जुहुयादप्सु प्रते पूर्णे वारुण्यर्चा रसेन वा ॥ ॥ १३ ॥

अथ वैश्वदेवो व्याख्यातो होमकल्पो वैश्वदेवस्य सिद्धस्य सायं प्रातर्गृह्येऽग्नौ जुहुयादग्नये स्वाहा सोमाय स्वाहेन्द्राग्निभ्यां स्वाहा विश्वकर्म्मणे स्वाहा भरद्वाजधन्वन्तरये स्वाहादितये स्वाहाऽनुमतये स्वाहाग्नये स्विष्टकृते स्वाहेति हुत्वैतासां देवतानामव वास्तुमध्ये बलिं हरेद्देवताभ्यश्चैव देवताभ्यो नमो ब्रह्मणे ब्राह्मणेभ्यश्च वास्तोष्पते प्रतिजानीह्यस्मानिति वास्तुमध्ये वास्तोष्पतये चाथ दिशां प्रदक्षिणं यथारूपं बलिं हरति नम इन्द्रायेन्द्रेभ्यश्च नमो यमाय याम्येभ्यश्च नमो वरुणाय वारुणेभ्यश्च नमः सोमाय सौम्येभ्यश्च नमो बृहस्पतये बार्हस्पत्येभ्यश्चाथाऽऽदित्यमण्डले नमोऽदितय आदित्येभ्यश्च नमो नक्षत्रेभ्य ऋतुभ्यो मासेभ्योऽर्द्धमासेभ्योऽहोरात्रेभ्यः संवत्सरेभ्यः पूष्णे पथिकृते पाप्ने मरुद्भ्यश्चेति देहलीषु विष्णवे हपदि वनस्पतय इत्युलूखले ओषधीभ्य इत्योषधीनां स्थाने पर्जन्यायाज्य इति मणिके नमः श्रियै शर्म्यायां शिरसि पादतो भद्रकाल्या अनुगुप्ते देशे नमः सर्वात्मभूतेयेऽथान्तरिक्षे नक्तञ्चरेभ्य इति सायमहश्चरेभ्य इति प्रातर्वे देवास इति चाविज्ञाताभ्यो देवताभ्य उत्तरतो धनपतये च प्राचीनावीती दक्षिणतः शषन्निनर्यति ये अग्निदग्धा इति देवपितृनोभ्यो दत्त्वा श्रोत्रियं भोजयेद् ब्रह्मचारिणे भिक्षां दद्यादनन्तरं सौवासिनीं गर्भिणीं कुमारान् स्थविराँश्च भोजयेच्छ्वभ्यः श्वपचेभ्यश्च वयोभ्यश्चावपेद् भूमाविति नानवनमश्नीयान्नैको न पूर्वं मोघमन्नं विन्दते अप्रेक्षा इति ॥ १४ ॥

Digitized by Google

श्रोत्रियं वेदयज्ञाङ्गाकन्यतम आगच्छेद्गोपशुमजकर्म वा पत्र सामान्यतमं मन्येत तत्कुर्यान्नामांसोऽर्घः स्यादधियज्ञमधिविवाहं कुरुवेत्येव शूद्रैवाहाच्च प्राजापत्यो राज्ञ ऐन्द्रः प्रियाय वैत्रः स्नातकाय वैन्द्राग्नो यथाप्रकृतं संवत्सरस्य सोमेन यजेत कृतार्घा एवैवं वाजयेयुर्नाकृतार्घास्तदपि भवति ॥ १५ ॥

मधुपर्के च सोमे च पितृदैवतकर्म्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥
आचार्य्यश्च पिता चोभौ स्नातकश्चानतिथिर्गृहे ।
वे यद्विद्ध्युस्तत्र कुर्यादिति धर्मो विधीयते ॥
नैकस्यापीणमतिथिं विप्रोष्यागतमेव च ।
उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा ॥
अग्निहोत्रं बलीवर्दाः काले चातिथिरागताः ।
बालाश्च कुलवृद्धाश्च निर्दहन्त्यपमानिताः ॥
अनड्वान्नग्निहोत्रं च ब्रह्मचारी च ते त्रयः ।
अक्षन्त इव सिद्ध्यन्ति नैषां सिद्धिरनश्नताम् ॥
देवताः पुरुषं गृह्य अहरहर्गृहमेधिनम् ।
भागार्थमुपसर्पन्ति ताभ्यो निर्वप्तुमर्हति ॥ ॥ १६ ॥

तृणान्यप्युच्छते नित्यमग्निहोत्रं च जुह्वतः ।
सर्वं सुकृतमादत्ते ब्राह्मणोऽर्चितो वसन् ॥
उदपात्रात्तु दातव्यमाकाष्ठाज्जुह्वतादपि ।
आसूक्तादानुवाकाद्वा ब्रह्मयज्ञोऽभिधीयते ॥
नोपवासः प्रवासे स्यात् पत्नी धारयते व्रतम् ।
पुत्रो भ्राताऽथवा पत्नी शिष्यो वास्य बलिं हरेत् ॥
वैश्वदेवमिमं ये तु सायं प्रातः प्रकुर्वते ।
ते अग्नेरायुषा कीर्त्या प्रजाभिश्च समृध्नुयुरिति ॥ ॥१७॥

Digitized by Google

ब्रह्मचारी प्रवस्त्वाचार्य्यमामन्त्रयते प्राणापानयोरित्युपांशोमं वत्स्यामि भो ३ इत्युच्चैः प्राणापाना उरुण्यचास्त्वया प्रवये देवाय त्वा गोप्त्रे परिददामि देवसवितरेष ते ब्रह्मचारी परिदद्यामि ते गोपायस्व तं मायुधस्वेत्युपांशो स्वस्तीत्युच्चैराचार्य्यः स्वस्तीत्युच्चैराचार्य्यः ॥ १८ ॥ ॥ इति गृह्यसूत्रे द्वितीयोऽध्यायः ॥२॥

स्नानं समावर्त्स्यमानस्यानड्डहमित्युक्तम् । तस्मिन्नुपवेश्य केशश्मश्रूणि वापयति लोमनखानि च व्रीहियवैस्तिलसर्षपैरपामार्गैः सदापुष्पीभिरित्युद्राप्यापोहिष्ठीयेनाभिषिच्यालंकृत्य युवं वस्त्राणीति वाससी परिधायाथाऽस्मै निष्कं बध्नात्यायुष्यं वर्चस्यं ममाग्ने वर्च इति वेष्टनं गृहं गृहमहनेति च्छत्रमारोहतेत्युपानहौ दीर्घस्ते अस्त्वकुश इति वैष्णवं दण्डमादत्ते । प्रतिजीनस्तदहरासीत वनस्पते वीड्वङ्गः शास इत्येति रथमारोहयेद्यत्रैनं गवा वा पशुना वा अर्हयेयुस्तत्पूर्वमुपतिष्ठेत गोभ्यो वा समावर्तेत फलवतो वा वृक्षादिन्द्रश्रेष्ठानि द्रविणानि धेहि स्योना पृथिवी भवेत्युवेशेहलीस्पितमग्नं तदहर्भुञ्जीताचार्यार्य वस्त्रयुगं दद्यादुष्णीषमणिकुण्डलं दण्डोपानहं छत्रं च ॥ १ ॥

अगारं कारयिष्यन्निहान्नाद्याय विशः परिगृह्णामीत्युदुम्बरशाखया त्रिः परिलिख्य मध्ये स्थण्डिले जुहोति कोऽसि कस्याऽसिकायते ग्रामकामो जुहोमि स्वाहा । अस्यां देवानामसि भागधेयमितः प्रजाताः पितरः परेताः । विराड्वजुहुदूग्रामकामो न देवानां किञ्चनान्तरेण स्वाहेति स्थूणागर्तान् खादयित्वोदमन्थानासिच्य इमं विमिन्वे अमृतस्य शाखां मधोर्धारां प्रतरणीं वसूनाम् । एनां शिशुः क्रन्दत्याकुमार एनां धेनुः क्रन्दतु नित्यवत्सेत्युदुम्बरशाखां घृतेनाक्तां दक्षिणे द्वार्य्ये गर्ते निदधाति । इमामुच्छ्रयामि भुवनस्य शाखां मधोर्धारां प्रतरणीं वसूनाम् । एनां शिशुः

Digitized by Google

क्रन्दतस्कुमार एवां नेनुः क्रन्दतु पाकवत्सेत्युत्तरत एवं द्वयोर्द्वयोर्दक्षिणतः पश्चादुत्तरतश्च इमामहमस्य दक्षस्य नाभां घृतमुखरीमप्सुते निनोमि । एनां त्रिधुः क्रन्दताकुमार आस्यन्दन्तानेनसो नित्यवत्सा इति स्थूणाराजमुक्कयत्येनं कुमारस्तरुण आवत्सो जुवस्परि एनं परिस्रुतः कुम्भ्या आदध्नः कलशैर्मनु ॥ २ ॥

ए इहैव स्थूणे प्रतितिष्ठ ध्रुवाश्वावती गोमती सीलमावती सेमे तिष्ठ घृतमुसम्भणेहैव तिष्ठ निमित्तानि बिल्विकास्याजिरावती मध्ये पोषस्य तृम्पतां मा प्रापन्नवायवः । उपहूता इह गाव उपहूता अजावयः अथो अन्नस्य कीलाल उपहूतो गृहेषु नः । स्वन्तरे प्रतितिष्ठ वामदेव्ये श्रयस्व बृहतिस्तभायेति स्थूणाराजमभिमृशति संमितस्य स्थूणाः संमृशति सत्यं च श्रद्धां चेति पूर्वे यज्ञश्च दक्षिणा चेति दक्षिणे, बलं चौजश्चेत्यपरे, ब्रह्म च क्षत्रं चेत्युत्तरे श्रीस्तूपो धर्मस्थूणाराजोऽहोरात्रे द्वारफलके संवत्सरेऽपिधानमुखा समुद्रमभ्यक्तमक्ष्मानं स्तूपस्याधस्ताखिखनेत् ॥ ३ ॥

वास्तोष्पतीये कर्म्मण्यग्निं दधामि मनसा शिवेनायमग्नु संनमनो वसूनां मा नो हिंसी स्थविरं मा कुमारम् । यत्रो अव द्विपदे शं चतुष्पद इति गृहमभि वासत उपसमाधाय प्रागग्रेषु नवेषु कुशेषूदकुम्भं नवं प्रतिष्ठाप्यारिष्टा अस्माकं वीरा मा परासेचिनो धनमित्यभिमन्त्र्य रथन्तस्य स्तोत्रियेण पुनरादाय ककुप्कारं तिस्रः पूर्वाह्णे जुहोति वामदेव्यस्य मध्यन्दिने बृहतोऽपराह्णे षष्ठाव्याहृतयश्चतस्रो वास्तोष्पते इति तिस्रोऽमीवहा वास्तोष्पते वास्तोष्पते ध्रुवा स्थूणा सौविष्टकृती दशमी स्थापाकस्य रात्रौ ज्येष्ठं पुत्रमादाय जायां च सहधान्यः प्रपद्येत इन्द्रस्य गृहाः शिवा वसूमन्तो वक्षणिनस्तानहं प्रपद्ये सह जायया सह प्रजया सह पशुभिः सह रायस्पोषेण सह यन्मे किञ्चास्ति तेन ॥ ४ ॥

Digitized by Google

क्षत्रं क्षत्रं क्षिरं क्षिरं क्षेमाय वः शान्त्यै प्रपद्ये ऽभयं नो अस्तु ग्रामो मारण्याय परिदेहीति विश्वमहाय मा परिदेहीति ग्रामाणिक्षत्रमरण्यं ग्रामाय परिददातु महाविश्वाय मा परिदेहीति । ग्रामं प्रविशन्नाशीः पृहान् भद्रान् सुमनसः प्रपद्ये वीरघ्नो वीरतरः सुवीरान् इमां वहतो घृतमुक्षमाणा अग्नेष्ट्वहं सुमनाः संविशेयमिति सदा प्रवचनीयः ॥ ५ ॥

अनाहिताग्निः प्रवप्स्यं पृहान् सप्तीक्षते । इमां मे मित्रावरुणौ पृहान् मोपावतं युवौ । अविनष्टानविन्दुतान् पूषैनानभिरक्षत्वस्मार्कं पुनरागादपि कन्थामगन्महीति च जपति ॥ ६ ॥

अथ प्रोष्यावत् पृहान् सप्तीक्षते पृहा मा विभीत मा वेपध्वमूर्जं बिभ्रतरामसि ऊर्जं बिभ्रद्वः सुमनाः सुमेधा पृहानैमि मनसा मोदमानः । येषामध्येति प्रवसन्येषु सौमनसो बहुः पृहानुपहयामहे ते नो जानन्तु जानतः । उपहूता इह गाव उपहूता अजावयः अथो अन्नस्य कीलाल उपहूतो पृहेषु नः । अयं नो अग्निर्भगवानयं नो भगवत्तरः । अस्योपसद्ये मारिषा मायं श्रैष्ठ्ये दधातु न इति पृहमग्निमुपस्थाय कल्याणीं वाचं वदन्याद्विराजो दोहोऽसि विराजो दोहमशीय मयि पश्वायै विराजो दोह इति पात्रं प्रतिग्रहणः ॥७॥

अनाहिताग्निर्भवं प्राशिष्यन्नाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्वीभ्यः स्वाहाकारेण पृहेऽग्नौ जुहुयात् प्रजापतये त्वा ग्रहं पृहामि मह्यं श्रियै मह्यं यशसे मह्यमन्नाद्यायेति प्राशनार्थीयमभिमन्त्र्य भद्रान्नः श्रेयः समनैष्टदेवतास्त्वया वयोन समशीमहि त्वा सनीमयोभूः विततावितस्थ शन्नो भव द्विपदे शं चतुष्पद इत्यद्भिरभिषिञ्चति प्राशनास्यमोसि प्राण तदृतं ब्रवीम्यमोसि सर्वाऽसि प्रविष्टः स मे जरां रोगमपनुद्य शरीरादमामराधिमापृधाम इन्द्रेति हृदयदेशमभिमृशति । नाभिरसि मा विभीथाः प्राणानां ग्रन्थिरसि मा वि-

Digitized by Google

स्त्र इति नाभिं, भद्रं कर्णेभिरिति यजमानं तच्चक्षुरित्यादित्यमुपस्थाय ॥ ८ ॥

परिवः शैन्याद्वधाद्यादस्मत्तु घोषिण्यः । समानस्तस्य गोपतेर्वायवो यन्तो नवोरिषत् पूषा अन्वेतु न इति गाः प्रविशमानाश्चा अनुमन्त्रयेत परिक्रान्तासु वासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च ता नः सन्तु पयस्वतीर्बहीगोष्ठे घृताच्च इत्यागावो अग्मन्निति च प्रत्यागतासूत्तमा ममाकर्नन्पयो भूर्यात इति सूक्तेन गोष्ठे नताः ॥९॥

या कल्याण्युच्चरामावास्या सा रेवत्या संपद्यते तस्यामङ्गलक्षणानि धारयेद् भुवनमसि सहस्रपोषमिन्द्राय त्वाश्रवो ददत् अक्षतविष्टमिलाभं गोपायनं यावतीनामिदं करिष्यामि भूयसीनामुत्तमां सा मां क्रियासमिति या प्रथमा प्रजायेत तस्याः पीयूषं जुहुयात् संवत्सरीणं पय उष्णियायाश्च इत्येताभ्यामृग्भ्यां यदि ज्यायो प्रजायेत माहव्याहृतिभिर्हुत्वा यमसूं दद्यात् ॥ १० ॥

अथ वृषोत्सर्गः । कार्तिक्यां पौर्णमास्यां रेवत्यां वाक्ययुज्यस्व गवां मध्ये सुसमिद्धमग्निं कृत्वाज्याहुतीर्जुहोति इह रतिरिह रमध्वं स्वाहा इह धृतिरिहः स्वधृतिः स्वाहा उपसृजं धरुणं मात्रे धरुणो मातरं धयन् रायस्पोषमस्मासुदीधरत् स्वाहा पूषा मा अन्वेतु न इति पौष्णस्य जुहोति रुद्रान् जपित्वैकवर्णं द्विवर्णं त्रिवर्णं वा यथा यूथेन छात्रते रोहितो वै व स्यात् सर्वाङ्गैरुपेतो यूथे वर्चस्वितमः स्यात्तथलक्षणस्य यूथे मुख्याश्चतस्रो वत्सतर्यस्तास्त्राजकृत्वेनं युक्तमं पतिं वो ददामि तेन क्रीडन्तीश्च रथमिवेन मावस्यत्र जनेषु संविदाना रायस्पोषेण समिषा मदेम स्वाहेति । नव्यस्वेऽनुमन्त्रयते मयोभूरित्यनुवाकशेषेण सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान् भोजयेत ॥ ११ ॥

ऊर्ध्वमाग्रहायण्या तिस्रोऽष्टका अपरपक्षेषु तासां प्रथमायां शाकं

Digitized by Google

जुहोति इषमेव सा वा अथाऽन्नं व्युच्छदन्तरस्यां चरति प्रतिष्ठां यद्धूर्जमान नवकृज्जनित्री अथ एनां महिमानः सचन्ता स्वाहेत्यथ स्विष्टकृतो वस्वी वैश्वस्तो वसवः सर्वे देवाः समाहिताः अहुका सर्वतोमुखी सा मे कामानतीतृपत् । आहुस्ते प्राणाणो दन्तानृषः पवमानः मासाश्चार्द्धमासाश्च नमस्ते मुमनामुखि स्वाहेति ॥ १२ ॥

मध्यमायां मध्यावर्षे च महाव्याहृतयश्चतस्रो ये तातृषुरिति चतस्रोऽनुदित्य वपां जुहुयाद्धविषां जातवेदः पितृभ्यो यत्रैनान् वेत्थ सुकृतस्य लोके मेदसः कुल्या उप ताः स्रवन्तु सत्याः सन्तु यजमानस्य कामाः स्वाहेति वा महाव्याहृतयश्चतस्रो ये तातृषुरिति चतस्रोऽष्टाहुतिस्थालीपाको वदानमिश्रोऽन्तर्हिता गिरयोऽन्तर्हिता पृथिवीमह दिवा दिग्भिश्च सर्वाभिरन्यमन्तः पितुर्हवेऽमुष्यै स्वाहा। अन्तर्हिताम ऋतवोऽहोरात्राश्च सन्धिजाः मासाश्चार्द्धमासाश्चान्वमन्तः पितुर्हवेऽमुष्यै स्वाहा । यास्तिष्ठन्ति याः स्रवन्ति यादभ्राः परिसस्रुषीः आद्भिः सर्वस्य मर्तृभिरन्यमन्तः पितुर्हवेऽमुष्यै स्वाहा । यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता रेतस्तन्मे पिता वृङ्क्तां मातुरन्योवपद्यतामुष्यै स्वाहेति वा महाव्याहृतीनां वा स्थाने चतस्रोऽन्यत्र करणस्य पायसो वा चरुः स्रुवोऽन्वष्टक्यं पिण्डपितृयज्ञवृता ॥ १३ ॥

उत्तमायामपूपाञ्जुहोत्युक्थ्यश्चाऽतिरात्रश्च सद्यःक्री छन्दसा सह अपूपकृदष्टके नमस्ते मुमनामुखि स्वाहेति । गोपशुरजस्थालीपाको वाऽपि वा गोव्रासमाहरेदपि वारण्ये कक्षमपादहेदेषा मेऽष्टकेति न स्वेव न कुर्वीत न स्वेव न कुर्वीत ॥ १४ ॥ इति मुखसूत्रे तृतीयोऽध्यायः ॥ ३ ॥

मासि मासि पितृभ्यो दद्याद् ब्राह्मणान् वेदविदो युग्मॉस्त्र्यराभ्यान् पितृवदुपवेश्यायुग्मान्युदपात्राणि तिलैरवकीर्यासावेतच्च

Digitized by Google

इत्यनुदिश्य ब्राह्मणानां पाणिषु निनयेदत ऊर्द्धमलङ्कृतामन्त्यपात्रीं कृत्वाऽग्नं चामावेतत्त इत्यनुदिश्य भोजयद्भुञ्जानेषु महाव्याहृतीः सावित्रीं मधुवातीयाः पितृदेवत्याः पावमानीश्च जपेद्भुक्तवत्सु पिण्डान् दद्यात् पुरस्तादेके पिण्डान् पश्चिमेन तत्पत्नीनां किञ्चिदन्तर्धाय ब्राह्मणेभ्यः शेषं निवेदयेदौकरणादि पिण्डपितृयज्ञेन कल्पो व्याख्यातः ॥ १ ॥

अथात एकोद्दिष्टमेकपवित्रमेकार्घ्यमेकपिण्डं नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिमश्च उपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गः संवत्सरमेवं प्रेते चतुर्थविसर्गश्च ॥ २ ॥

अथ सपिण्डीकरणम् । संवत्सरे पूर्णे त्रिपक्षे वा यदहर्वा शुद्धिरापद्येत चत्वार्युदपात्राणि सतिलगन्धोदकानि कृत्वा त्रीणि पितृणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्यामेवं पिण्डमप्येतत्सपिण्डीकरणम् ॥ ३ ॥

अथात आभ्युदयिकमापूर्यमाणपक्षे पुण्याहे मातृयागं कृत्वा युग्मान् वेदविद्ब्राह्मणानुपवेश्य पूर्वाह्णे प्रदक्षिणमुपचारः पितृमन्त्रवर्जं जपक्रजवो दर्भा यवैस्तिलार्थोदधिबदराक्षतमिश्राः पिण्डा नान्दीमुखान् पितॄनावाहयिष्य इत्यावाहने नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखान् पितॄन् वाचयिष्य इति वाचने संपन्नमिति तृप्तिमश्चे समानमन्यदविरुद्धमिति ॥ ४ ॥

अथोपाकरणमोषधीनां प्रादुर्भावे हस्तेन श्रवणेन वाक्षतमक्तूनां धानानां च दधिघृतामिश्राणां प्रत्यृचं वेदेन जुहुयादिति हैक आहुः सूक्तानुवाकाद्याभिरिति वाऽध्यायार्धेयाद्याभिरिति माण्डूकेयोऽथ ह स्माह कौषीतकिरग्निमीळे पुरोहितमित्येका कुषुम्भकस्तद्ब्रवीदावदँस्त्वं शकुने भद्रमावद तूणाना जमदग्निना धामं ते

Digitized by Google

विश्वं भुवनमधिश्रितं गन्धा नो यज्ञं वनिष्यतः सुशमि यो न स्वोऽरे जः गातिवित्त्व विचक्ष्याग्ने याहि मरुत्सखा यत्ते राजं घृतं हविरिति हूत्वा मच्छंगोरातृणामिह इत्येका हुतशेषाद्धविः प्राश्नन्ति दधिक्राव्णो अकारिषमित्येतयाचम्योपविश्य महाव्याहृतीः सावित्रीं वेदादिप्रभृतीमि च स्वस्त्ययनानि च जपित्वाचार्य स्वस्तिवाच्य तदपि भवति ॥

अयातयामतां पूजां सारत्वं छन्दसां तथा ।
इच्छन्त ऋषयोऽप्यन्नुपाकर्म तपोबलात् ॥
तस्मात् षडङ्गकर्म नित्येनात्मनो मन्त्रसिद्धये ।
उपाकर्त्तव्यमित्याहुः कर्म्मणां सिद्धिमिच्छता ॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षपणं भवेत् ।
अष्टकासु त्वहोरात्रमृतवन्त्यासु च रात्रिषु ॥ ॥ ५ ॥

माघपुष्यप्रतिपत्यपराजितायां दिशि बह्वौषधिके देश उदुत्यं जातवेदसं चित्रं देवानां नमो मित्रस्य सूर्योभ्युदित्यास्त्वेति मूर्धानं च अभिमन्त्र्य शास इत्था महाँ असीति प्रदक्षिणं प्रत्यृचं प्रतिदिशं प्रत्यस्य लोमानि मृष्टीश्छन्दांसि तर्पयित्वा पतिपुरुषं च पितॄंश्छन्दांसि विश्रामयन्त्यर्द्धसप्तमान्मासानर्द्धषष्ठान् वाधीवीरँश्चेदहोरात्रमुपरम्य प्राध्ययनम ॥ ६ ॥

अथोपरममुत्सर्गेष्वाकालमन्येष्वद्भुतेषु च विद्युत्स्तनयित्नुवर्षासु श्रिस्त्येकां श्राद्धभोजने दशाहमग्न्यृतकेषु च चतुर्दश्यमावास्ययोरष्टकासु च वासरेषु नक्षत्रेषु चाचार्योपरते दशाहं श्रुत्वा त्रिरात्रं तत्पूर्वाणां च प्रतिपदे श्राद्धवत्सब्रह्मचारिणि प्रेतमनुगम्य पितृभ्यश्च निधाय पिण्डान्निशां संध्यां पर्वस्वस्तमिते शूद्रसन्निधौ स्वनशब्दे श्मशाने आगारेऽन्त्यजस्पृष्टे ग्रामे दर्शनीयादश्रमणीयादभिहतेऽन्त्यजेऽभ्रे च वर्षिणि रथ्यायां वीणाशब्दे च स्थस्थः

Digitized by Google

शूद्रसन्निधौ वाऽधीयानेऽवधीयमाने ऽप्युत्कर्दस्थाने नग्न उच्छिष्टः क्रान्ते केशश्मश्रुवापनास्नानादुत्सादने स्नाने संवशेऽञ्जने प्रेतस्पर्शेषु सूतिकोदक्यशवोश्च शूद्रवदधिहितपाणिः सेनायामुद्यान्ते ब्राह्मणे ग्रामेषु चातिक्रान्तेष्वधीयीरन्ते तेषां यदि किञ्चिदकालोत्थाने भवेत्प्राणानायम्यादित्यमीक्षित्वाऽधीयीत त्रिसुपस्तन्त्रिसुपर्वणी कल्पे पर्ववदर्द्धर्चेषु । तदप्येतत् ।

अनुपाये मूलफलं यच्चान्यच्छ्राद्धिकं भवेत् ।

मतिपूर्वमनध्यायः श्राद्धेऽन्नाद्यो द्विजः स्मृत इति ॥ ॥ ७ ॥

न्यायोपेतेभ्यश्च कर्तव्येभ्यः प्राङ्नोदङ्मुखासीन आचार्यो दक्षिणत उदङ्मुख इतरो द्वौ वा भूयाँसस्तु यथावकाशं तेषामुक्तासनोपविष्टो गुरुसमीपे नैकासनस्थो न प्रसादितपादो न बाहुभ्यां जानूपसंगृह्य नोपाश्रितशरीरो नोपस्यकृतपादो न पादकुठारिकां कृत्वाऽधीहि भो ३ इत्युक्तवाऽऽचार्य ॐकारं प्रचोदयेदधीहि भगवः प्रतिपद्यते तत्सन्तमभीप्सीताधीत्योपसंगृह्य विरताः स्म भो इत्युक्तवा यथार्थं विस्पष्टं विसमस्तावदित्येकेनाधीयतान्तरा गन्धेष्वन्यान्यं विपरिहरेदधीयानो यदि वेदोषः स्यात्त्रिरात्रमुपोष्याहोरात्रं वा सावित्रीमभ्यावर्तयेद्यावच्छवनुयाद् ब्राह्मणेभ्यः किञ्चिद् दद्याद्दद्धो रात्रमुपस्थ्य माध्ययनम् ॥ ८ ॥

स्नात उपस्पर्शनकालेऽवयाता देवतास्तर्पयंति । अग्निस्तृप्यतु वायुस्तृप्यतु सूर्यस्तृप्यतु विष्णुस्तृप्यतु प्रजापतिस्तृप्यतु सहस्राक्षस्तृप्यतु सोमः ब्रह्मा वेदाः देवाः ऋषयः सर्वाणि च छन्दांसि ॐकारः वषट्कारः महान्याहृतयः सावित्री यज्ञाः द्यावापृथिवीनक्षत्राणि अन्तरिक्षमहोरात्राणि संध्या संध्यां समुद्राः नद्यः गिरयः क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसः नागाः वयांसि सिद्धाः साध्याः द्विजाः यक्षाः रक्षांसि भूतान्येवमन्तानि तृप्यन्तु । श्रुतिं तर्पयामि स्मृतिं तर्पयामि

Digitized by Google

मि धृतिं तर्पयामि श्रद्धामेधे धारणां च गोब्राह्मणं स्थावरजङ्गमानि सर्वभूतानि त्वथत्विति यज्ञोपवीति ॥ ९ ॥

अथ प्राचीनावीती पित्र्यां दिशमीक्षमाणः ऋतर्चिनः माध्यमाः वृच्छमदः विश्वामित्रः जमदग्निः वामदेवः अत्रिः भरद्वाजः वसिष्ठः मनाथाः पावमानाः क्षुद्रसूक्तमहासूक्ताः सुमन्तुः जैमिनिवैश्म्पायनपैलसूत्रभाष्यगार्ग्यवभ्रुबाभ्रव्यमण्डुमाण्डव्याः गार्गी वाचक्नवी वडवा प्रातिथेयी सुलभा मैत्रेयी कहोलं कौषीतकीं महाकौषीतकीं सुयज्ञं शाङ्खायनम् आश्वलायनम् ऐतरेयं महैतरेयं भारद्वाजं जातूकर्ण्यं पैङ्ग्यं महापैङ्ग्यं बाष्कलं गार्ग्यं शाकल्यं माण्डूकेयं महादमत्रम् औदवाहिं महौदवाहिं सौजामिं शौनकिं शाकपूणिं गौतमीं ये चान्ये आचार्यास्ते सर्वे तृप्यन्त्विति प्रतिपुरुषं पितरः पितृवंशस्तृप्यतु मातृवंशस्तृप्यतु ॥ १० ॥

न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनान्नादित्यं संधिवेलयोरनात्मकार्यकारिणं प्रेतस्पर्शिनं सूतिकोदक्याभ्यां न संवदेदतैश्चोदधृतेजांसि न भुञ्जीत न यातयामैः कार्यं कुर्यान्न सह भुञ्जीत न शेषं पितृदेवतातिथिभृत्यानां शेषं भुञ्जीतोञ्छशिलमयाचितप्रतिग्रहः साधुभ्यो याचितो वा याजनं वृत्तिः पूर्वं पूर्वं गरीयो संसिद्ध्यमानायां वैश्यवृत्तिर्वा प्रमत्तः पितृदैवतकार्येष्वृतौ स्वदारगामी न दिवा शयीत न पूर्वापररात्रौ न भूमावनन्तर्हितायामासीत नित्योदकी यज्ञोपवीति न विरहयेदाचार्यमन्यत्र नियोगादनुज्ञातो वा अहरहराचार्यमभिवादयेद् गुरुभ्यश्चासमेत्य श्रोत्रियस्य प्रोष्य प्रत्येत्याश्रोत्रियस्यासावहं भो ३ इत्यात्मनो नामादिश्यं व्यत्यस्य पाणी असा उ इत्यस्य पाणी संगृह्याऽऽशिषमाशास्ते नावृतो यज्ञं गच्छेदधर्माच्च जुगुप्सेत न जनसमवायं गच्छेन्नोपर्युदिशेत्समेत्यानाक्रोशकोऽपिशुनोकुलंकुलीनेतिहेतिस्यान्नैकश्चरेन्न तप्तौ नापिहितपाणि-

Digitized by Google

दैवायतनानि प्रदक्षिणं न धावेन्न ष्ठीवेन्न कण्डूयेन्मूत्रपुरीषे नावेक्षेतावगुण्ठ्यासीतानन्तर्हितायां यज्ञोपवीतं कर्णे धृत्वा नादित्यमभिमुखो न जघने नाहरुदङ्मुखो नक्तं दक्षिणामुखो न चाप्सु श्लेष्म न च समीपेऽग्नेरुपसमारोहेन्न कूपमीक्षेत न ध्रुवनं गच्छेन्न स्वेव तु श्मशानं सवस्त्रोऽहरहराप्लुवेदाप्लुत्याप्युदकोऽन्यद्वस्त्रमाच्छादयेत् ॥ १२ ॥

रोहिण्यां कृषिकर्माणि कारयेत पुरस्तात् कर्मणां प्राच्यां क्षेत्रमर्यादायां द्यावापृथिवीयं बलिं हरेद् द्यावापृथिवीययर्चा नमो द्यावापृथिवीभ्यामितिचोपस्थानं प्रथमयोगे सीरस्य ब्राह्मणः सीरं स्पृशेच्छुनंनः फाला इत्येतामनुब्रुवन् क्षेत्रस्य पतिनेति प्रदक्षिणं प्रत्यृचं प्रतिदिशमुपस्थानम् ॥ १३ ॥

उदकं तरिष्यन् स्वस्त्ययनं करोत्युदकाञ्जलींस्त्रीनप्सु जुहोति समुद्राय वैष्णवे नमो वरुणाय धर्मपतये नमः सर्वाभ्यो नदीभ्यः सर्वासां पित्रे विश्वकर्म्मणे दत्तं हविर्जुषतामिति जपित्वा प्रतीपं स्रवन्तीभ्य उत्तीर्यंस्थावराभ्यस्तरँश्चेद्भयं शङ्केद्वाशिष्टं सूक्तं जपेत् समुद्रज्येष्ठा इत्येतत् प्लवन् ॥ १४ ॥

श्रवणः श्रविष्ठीयायां पौर्णमास्यामक्षतसक्तूनां स्थालीपाकस्य वा जुहोति विष्णवे स्वाहा श्रवणाय स्वाहा श्रावण्यै पौर्णमास्यै स्वाहा वर्षाभ्यः स्वाहेति गृह्यमग्निं बाह्यत उपसमाधाय लाजानक्षतसक्तूँश्च सर्पिषा संनिनीय जुहोति दिव्यानां सर्पाणामधिपतये स्वाहा दिव्येभ्यः सर्पेभ्यः स्वाहेत्युत्तरेणाऽग्निं प्राग्ग्रेषु नवेषु कुशेषूदकुम्भं प्रतिष्ठाप्यदिव्यानां सर्पाणामधिपतिरवनेनिक्तां दिव्याः सर्पा अवनेनिजन्तामित्यपो निनयति दिव्यानां सर्पाणामधिपतिः प्रलिखतां दिव्याः सर्पा प्रलिखन्तामिति फणेन चेष्टयति दिव्यानां सर्पाणामधिपतेः प्रलिपंतां दिव्याः सर्पाः प्रलिपन्तामिति

वर्णकस्य मात्रा निनयति दिव्यानां सर्पाणामधिपतिराक्रान्नीतां दिव्याः सर्पा आबध्नन्तामिति सुमनस उपहरति दिव्यानां सर्पाणामधिपतिराच्छादयतां दिव्याः सर्पा आच्छादयन्तामिति सूत्रतन्तुमुपहरति दिव्यानां सर्पाणामधिपतिराक्रां दिव्याः सर्पा आक्रमामिति कुशतरुणे पद्मान्तमञ्जनस्य करोति दिव्यानां सर्पाणामधिपतिरीक्षतां दिव्याः सर्पा ईक्षन्तामित्यादर्शेनेक्षते दिव्यानां सर्पाणामधिपत एष वो बलिरिति बलिमुपहरत्येवमन्तरिक्षाणां दिव्यानां पार्थिवानामिति त्रिस्त्रिरुत्तैस्तरामुत्तैस्तरां पूर्वं नीचैस्तरान्नीचैस्तरामुत्तरमेवमहरहरक्षतसक्तूनां दर्वेणोपघ्रावमाघ्रत्यवरोहणाद्यो रात्रौ वाग्यतः सोदकं बलिं हरेद्वाग्यतावैनमुपनादधेय उपक्रमः स उत्सर्गः सूत्रामाणमिति शय्यामासीत ॥ १५ ॥

आश्वयुज्यां पौर्णमास्यामैन्द्रः पायसोऽग्निभ्यां स्वाहाऽग्नयुग्भ्यां स्वाहाऽग्नयुज्यै पौर्णमास्यै स्वाहा शरदे स्वाहा पशुपतये स्वाहा पिङ्गलाय स्वाहेत्याज्यस्य हुत्वाग्न पृषातकस्य मातो अग्नमित्येतेन सूक्तेन प्रत्यृचं जुहुयान्मातृभिर्वत्सां संसृजन्ति तां रात्रीमप्यब्राह्मणभोजनम् ॥ १६ ॥

आग्रहायण्यां प्रत्यवरोहेद्रोहिण्यां प्रोष्ठपदासु वा प्रातः शमीपलाशमधूकेषीकापामार्गाणां शिरीषोदुम्बरबदरीणां च मूर्ध्नमुष्टिमादाय सीतालोष्ठं चोदपात्रे निधाय महाव्याहृतीः सावित्रीं चोदुत्यायनः शोशुचदघमित्येतेन सूक्तेन तस्मिन्निमज्य निमज्य प्रदक्षिणं शरणेभ्यः प्राप्यानमपहरत्युत्तरतो निवपेन्मधुपर्के दक्षिणा ॥ १७ ॥

ग्रीष्मो हेमन्त उत वा वसन्तः शरद्वर्षाः सुकृतस्तो अस्तु तेऽमृतानां शरच्छारदानां निपात एषामुभये स्वाम स्वाहा अग्नइतपदाजहि पूर्वेण चाऽपरेण च सप्त च वारुणीरिमाः सर्वाश्च राज-

Digitized by Google

स्वाहा श्वेताय वैवाह्याय स्वाहा तक्षकाय वैशालाय स्वाहा विशालाय स्वाहेत्याज्यस्य हुत्वा सहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतां सुवर्षाः सन्तु नो वर्षाः शरदः सम्भुवन्तु न इति शङ्खो निधिरिति पलाशशाखया विमृज्य समुद्रादूर्मिरित्यभ्युक्ष्य स्योना पृथिवी नो भवेति स्तरणमास्तीर्य ज्येष्ठदक्षिणपार्श्वैः संविशति प्रतिबुद्धान् प्रतितिष्ठामि क्षत्र इति दक्षिणैः अस्यक्षेषु प्रतितिष्ठामि मोषिष्यति सव्यैः प्रतिपथेषु प्रतितिष्ठामि पुष्टाविति दक्षिणैः प्रतिपथायां प्रतितिष्ठाम्यन्न इति सव्यैरुदीर्घजी इत्युपस्थमंस्तरेतां रात्रीं शेरते यथासुखमन्यत्र ॥ १८ ॥

वैष्णवी पौर्णमास्यां कर्कन्धुपर्णानि मिथुनानां च यथोपपादम् । विष्णुस्य कृत्वेन्द्राग्नस्तु श्रिलो रौद्रा गोलकलेखनो नक्षत्राण्यन्वाकृतयश्च लेखनो नक्षत्राण्यन्वाकृतयश्च ॥ १९ ॥ ॥ इति गृह्यसूत्रे चतुर्थोऽध्यायः ॥

अथ प्रकरस्कन्नात्मरण्योः समिधमाग्निं सकेरोहमसमेधि ते प्राणानोहयतित्तकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीमयं ते योनिरिति वारणी प्रतितपति समिधं वानस्पत्यमिते च मन्त्रमनुपलिप्त उद्धृतावोक्षितेऽग्निमाहृत्योपावरोहेत्युपावरोहणं मनुगतेऽग्नौ सर्वमन्त्रः श्रिष्टाहुतीर्हुत्वा पाहि नो अग्न एकया स्वाहा पाहि नो विश्ववेदसे स्वाहा सर्वं पाहि शतक्रतो स्वाहा । व्रतपाना उपोद्याज्यस्य हुत्वा त्वमग्ने व्रतपा इति ॥ १ ॥

अथ पुष्करिणीकूपतडागानां शुद्धपक्षे पुण्ये वा तिथौ नक्षत्रे वयसां स्वरं श्रुत्वित्वा स्वं नो अग्न इति हुत्वाभ्यवहरेत् इला इमं मे वरुणोरुचक्षं वहतेमां धियं शिक्षमाणस्य गृहोपयुग्योमयोर्भूरास्तरोनिःसरो निःकामः सपत्नहृषण इति वारुण्यादिदिक्प्रभृति प्रदक्षिणं जुहुयान्मध्ये पयसा जुहोति विश्वतश्चक्षुरिदं विष्णुरिति

Digitized by Google

वन् किञ्चेदमिति मज्जयित्वा धेनुर्दक्षिणा वस्त्रयुग्मं चातो ब्राह्मण-भोजनम् ॥ २ ॥

अथाराधेऽग्निमुपसमाधाय स्थालीपाकं श्रपयित्वा विष्णवे स्वाहेन्द्राग्निभ्यां स्वाहा विश्वकर्म्मणे स्वाहेति यान्वो नर इति प्रत्यृचं जुहुयाद्वनस्पते शतवल्श इत्यभिमन्त्र्य हिरण्यं दक्षिणा च ॥ ३ ॥

यदि पार्वणस्थालीकृतोऽन्यतरस्तत्प्रथमरात्रे वैश्वानराय स्वाहाऽग्नये तन्तुमते स्वाहेति होमातिक्रमे सायंदोषावस्तर्नमः स्वाहेति प्रातर्वस्तनमः स्वाहेति यावतो होमास्तावन्तो हुत्वा पूर्ववद्धोमः ॥ ४ ॥

कपोतोलूकाभ्यामुपवेशने देवाः कपोत इति प्रत्यृचं जुहुयाद् दुःस्वप्नदर्शने चारिष्टदर्शने च निशायां काकशब्दक्रान्ते चान्येन चाद्भुतेषु च पयसा चरुं स्नपयित्वा सरूपवत्सायाः गोः पयसि न स्नेव तु कृष्णायाः रात्रीसूक्तेन प्रत्यृचं जुहुयाद्भुतशेषं महाव्याहृतिभिः प्राश्य भद्रं कर्णेभिरिति कर्णौ शतमिन्नु शरदो अतिदेवा इत्यात्मानमभिमन्त्र्य ब्राह्मणेभ्यः किञ्चिद्दद्यात् ॥ ५ ॥

व्याधौ समुत्थिते इमा रुद्राय तवसे कपर्दिन इति प्रत्यृचं गावेधुकं चरुं जुहुयात् ॥ ६ ॥

अकृतसीमन्तोन्नयने चेत् प्रजायेताकृतजातकर्मासीत्ततोऽतीते दशाह उत्सङ्गे मातुः कुमारकं स्थापयित्वा महाव्याहृतिभिर्हुत्वा पूर्ववद्धोमः ॥ ७ ॥

स्थूणाविरोहणे स्थालं पाकं श्रपयित्वा याविष्टा जनयन् कर्वराणि पिशङ्गरूपः सुभरो वयोधा इति द्वाभ्यां चरुं जुहुयाद्यदि प्रणीता चरुराज्यस्थाल्यन्यदपि मृन्मयं भिन्नं स्रुवेत् सर्वप्रायश्चित्ताहुतीर्हुत्वा यन्नूते चिदिति तृचेन भिन्नमनुमन्त्रयते यच्च तस्मिन्ने होमे पवित्रे नश्यंते सर्वप्रायश्चित्तं हुत्वाऽप्स्वग्न इति पुनरुत्पादयेत् ॥ ८ ॥

Digitized by Google

अथ सपिण्डीकरणम् । चत्वार्युदपात्राणि पूरयित्वा पितुः प्रभृति तद्वत्पिण्डान् कल्पयित्वा, ये समानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्। ये समानाः समनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पतामस्मिँल्लोके शतं समाः समानो मन्त्र इति द्वाभ्यामाद्यं पिण्डं त्रिषु विभजेत्तथैवार्घ्यपात्राण्येवं मातुर्भ्रातुर्भार्यायाः पूर्वमारिण्या एभिः पिण्डैः सक्षिप्य ॥ ९ ॥

यदि गृहे मधूका मधु कुर्वन्त्युपोष्यौदुम्बरीः समिधोऽष्टशतं दधिमधुघृताक्ता, मा नस्तोक इति द्वाभ्यां जुहुयाच्छन्न इन्द्राग्नी इति च सूक्तं जपेत् सर्वेषु च कर्मसु प्रतिश्रुतादिषु प्रादेशमात्रीः पालाशीः समिधः सप्तदश हुत्वा पश्चात् स्रुवग्रहणं दर्शपूर्णमासयोः पञ्चदशमध्यावर्षेष्टके तिस्रो वा भवन्ति पितृयज्ञवद्धोमः ॥१०॥

यदि गृहे वल्मीकसम्भूतिर्गृहोत्सर्गोऽथ त्रिरात्रमुपोष्य महाशान्तिं कुर्वान्महाशान्तिं कुर्यात् ॥ ११ ॥ इति गृह्यसूत्रे पञ्चमोऽध्यायः ॥ ५ ॥

अथातो ब्रह्माणं ब्रह्मऋषिं ब्रह्मयोनिमिन्द्रं प्रजापतिं वशिष्ठं वामदेव्यं कहोलं कौषीतकिं महाकौषीतकिं सुयज्ञं शाङ्खायनम् आश्वलायनमैतरेयं महैतरेयं कात्यायनं शाट्यायनं बभ्रुं बाभ्रव्यं मण्डुं माण्डव्यं सर्वानेव पूर्वाचार्यान्नस्य स्वाध्यायारण्यकस्य नियमानुदाहरिष्यामोऽहोरात्रं ब्रह्मचर्यमुपेत्याचार्योऽमांसाशीमपिहितं चण्डालं सूतिकां रजस्वलान्तेदनियमहस्तकदर्शनान्यतध्यापकानिशवरूपाणां च पान्यास्येन प्रविशेयुर्वान्तकृतश्मश्रुकर्ममांसाशनश्राद्धसूतकभोजनेषु ग्रामाऽध्ययनानन्तर्हिताभ्यहानि त्रिरात्रो नवक्लृप्तः पराभिष्ट उपपर्वणामह उत्तरार्द्धानि चाग्निविद्युत्स्तनयित्नुर्वर्षामहाभ्र-

Digitized by Google

प्रादुर्भावाच्च वाते च शर्कराकर्षणि यावत्कालम् ॥ १ ॥

ऊर्द्धमाषाढ्याश्चतुरो मासान्नाधीयीतात्यन्तं शक्य इति नियमाः प्राग्ज्योतिषमपराजितायां दिशि पुण्यमुपगम्य देशमनुदित उदग्ग्रहणं मण्डलप्रवेशश्चाञ्जनगन्धिमित्येतयर्चा मण्डलं तु प्राग्द्वारमुदग्द्वारं वा जनाग्रीयमसम्प्रमाणमसंबाधमावामदेव्यमुत्तरशान्तिः । पुनः प्राध्येषणं च मण्डलस्थाभिराचम्य प्राधीयीरन् कृतशान्तयः शान्तिपात्रोपघाते प्रोक्षणं प्रायश्चित्तिः प्रोक्षणं तु हिरण्यवता पाणिना दर्भपिञ्जूलवता वेति भाषिकम् ॥ २ ॥

अथ प्रविश्य मण्डलं प्राङ्मुख आचार्य उपविशत्युदङ्मुखा दक्षिणत इतरे यथाप्रधानमसम्भवेत्सर्वतोमुखा प्रतीक्षेरन्नुदयमादित्यस्य विज्ञाय चैनं दीधितिमन्तमधीहि भो३ इति दक्षिणैर्दक्षिणं सव्यैः सव्यं दक्षिणोत्तरैः पाणिभिरुपसंगृह्य पादावाचार्यस्य निर्णिक्तावथाधाय शान्तिपात्रे दूर्वाकाण्डवतीष्वप्स्वपिन्वमानैः पाणिभिः प्राधीयीरन्नेष विधिर्यदि तु ग्लायेरन्नेक एषामशून्यं शान्तिभाजनं कुर्यादध्यायाद्यन्तयोश्च सर्वे तत्सन्ततमव्यवच्छिन्नं भवत्यशान्तिरोकारो महाव्याहृतयः सावित्री रथन्तरं बृहद्वामदेव्यं पुनरादायं ककुप्कारमिति बृहद्रथन्तरे दशैताः सम्पादिता भवन्ति दशदक्षिनीविराळित्येतद्ब्राह्मणम् ॥ ३ ॥

अदब्धं मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीरिति सवितारमीक्षन्ते युवं सुरामिमेका स्वस्ति नः पथ्यास्स्वस्ति च तिस्र इति च तस्य शक्करीणां तु पूर्वं प्रत्यस्मै पिपीषते योरपिबोरयितमस्त्यमुत्रो अपहणमिति त्रयस्तृचा, अस्मा अस्मा इदन्धस इति एवाद्यसि वीरयुरित्यभितशक्करीणामथोपनिषदां यैवं महाव्रतस्य संहितानां तु पूर्वम् । ऋतं वदिष्यामि सत्यं वदिष्यामीति

Digitized by Google

विशेषोऽथ मन्थस्य तत्सवितुर्वृणीमहे तत्सवितुर्वरेण्यमिति पूर्वे चाऽदब्धं मन इत्याधिकारिका शान्तयस्तत इत्याह्निकमथोत्थानकालेऽपकृष्य पापं नित्यां शान्तिं कृत्वादितः शुक्रियं दधत इत्यादित्यमीक्षन्ते ॥ ४ ॥

तमहमात्मनीत्यात्मानमभिनिहितं त्रिर्हितमुपमा श्रीर्जुषतामुपयशोऽनुमा श्रीर्जुषतामनुयशः सेन्द्रः सगणः सबलः सयशाः सवीर्य उत्तिष्ठानित्यनिष्ठतु श्रीर्मा उत्तिष्ठतु यशो मा उत्तिष्ठतु त्वित्युत्थायेदमहं द्विषतं भ्रातृव्यपाप्मानमलक्ष्मीं चापधुनोमीति वस्त्रान्तमवधूयापाच इति सूक्तमिन्द्रश्च मृळयाति न इति द्वे, यत इन्द्र भयामह इत्येका, शास इत्था महा असीति प्राचीं स्वस्तिदा इति दक्षिणां दक्षिणावृतो विरक्ष इति प्रतीचीं विन इन्द्रेत्युदीचीं सध्यावृतोपेन्द्रेति दक्षिणावृतो दिवमुदीक्षन्ते ॥ ५ ॥

सविता पश्चात्तात्त्वक्षुरित्यादित्यमुपस्थाय व्यावर्त्तमानाश्च प्रत्यायन्त्युपविशन्ति यथापः शान्ता इति शान्तिपात्रादप आदाय पृथिव्यामवनिनीय यथापृथिवीत्यस्माभिकर्षत्येवं मयि शाम्यत्विति दक्षिणेऽशे निलिम्पत्येवं द्वितीयमेवं तृतीयं काण्डात्सम्भवसि काण्डात्काण्डात् प्ररोहसि शिवा नः शाले भवेति दूर्वाकाण्डमादाय मूर्द्धनि कृत्वाऽग्निस्तृप्यतु वायुस्तृप्यतु सूर्यस्तृप्यतु विष्णुस्तृप्यतु प्रजापतिस्तृप्यतु विरूपाक्षस्तृप्यतु सहस्राक्षस्तृप्यतु सर्वभूतानि तृप्यन्त्विति सुमन्तुजैमिनिवैशम्पायनपैलाद्या आचार्या पितृन्प्रत्यात्मिका समुद्र इत्यपो निनीय वामदेव्यं जपित्वा यथाकामं विप्रतिष्ठन्ते यथागमप्रज्ञाश्रुतिस्मृतिविभवादक्रान्तमानादविवादप्रतिष्ठादभयं शंभवेन्नो अस्तु नमोऽस्तु देवऋषिपितृमनुष्येभ्यः शिवमायुर्वपुरनामयं शान्तिमरिष्टिमाक्षितिमोजस्तेजो यशो

Digitized by Google

प्रादुर्भावाच्च वाते च शर्कराकर्षणि यावत्कालम् ॥ १ ॥

ऊर्द्धमापाक्याश्चतुरो मासान्नाधीयीतात्यन्तं शक्य इति नियमाः प्राग्ज्योतिषमपराजितायां दिशि पुण्यमुपगम्य देशमनुदित उदग्ग्रहणं मण्डलप्रवेशश्चाञ्जनगन्धिमित्येतयर्चा मण्डलं तु प्राग्द्वारमुदग्द्वारं वा जनाग्रीयमसम्प्रमाणमसंबाधमावामदेव्यमुत्तरशान्तिः । पुनः प्राध्येषणं च मण्डलस्थाभिराचम्य प्राधीयीरन् कृतशान्तयः शान्तिपात्रोपघाते प्रोक्षणं प्रायश्चित्तिः प्रोक्षणं तु हिरण्यवता पाणिना दर्भपिञ्जूलवता वेति भाषिकम् ॥ २ ॥

अथ प्रविश्य मण्डलं प्राङ्मुख आचार्य उपविशत्युदङ्मुखा दक्षिणत इतरे यथाप्रधानमसम्भवेत्सर्वतोमुखा प्रतीक्षेरन्नुदयमादित्यस्य विज्ञाय चैनं दीधितिमन्तमधीहि भो३ इति दक्षिणैर्दक्षिणं सव्यैः सव्यं दक्षिणोत्तरैः पाणिभिरुपसंगृह्य पादावाचार्य्यस्य निर्णिक्तावथाधाय शान्तिपात्रे दूर्वाकाण्डवतीष्वप्स्वपिन्वमानैः पाणिभिः प्राधीयीरन्नेष विधिर्यदि तु ग्लायेरन्नेक एषामशून्यं शान्तिभाजनं कुर्यादध्यायाद्यन्तयोश्च सर्वे तत्सन्ततमव्यवच्छिन्नं भवत्यशान्तिरोंकारो महाव्याहृतयः सावित्री रथन्तरं बृहद्रामदेव्यं पुनरादायं ककुप्कारमिति बृहद्रथन्तरे दशैताः सम्पादिता भवन्ति दशदक्षिनीविराळित्येतद्ब्राह्मणम् ॥ ३ ॥

अदब्धं मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीरिति सवितारमीक्षन्ते युवं सुरामममिसेका स्वस्ति नः पथ्यास्वस्ति च तिस्र इति च तस्य शक्करीणां तु पूर्वं प्रसस्मै पिपीषते योरपिवोरयितमस्त्यमुवो अप्रहणमिति त्रयस्तृचा, अस्मा अस्मा इदन्धस इति एवाग्नये वीरयुरित्यभितशक्करीणामथोपनिषदां यैवं महाव्रतस्य संहितानां तु पूर्वम् । ऋतं वदिष्यामि सत्यं वदिष्यामीति

Digitized by Google

विशेषोऽथ मन्थस्य तत्सवितुर्वृणीमहे तत्सवितुर्वरेण्यमिति पूर्वे चाऽदब्धं मन इत्याधिकारिका शान्तयस्तत इत्याह्निकमथोत्थानकालेऽपकृष्य पापं नित्यां शान्तिं कृत्वादितः शुक्रियं दधत इत्यादित्यमीक्षन्ते ॥ ४ ॥

तमहमात्मनीत्यात्मानमभिनिहितं त्रिर्हितमुपमा श्रीर्जुषतामुपयशोऽनुमा श्रीर्जुषतामनुयशः सेन्द्रः सगणः सबलः सयशाः सवीर्य उत्तिष्ठानित्यनिष्ठतु श्रीर्मा उत्तिष्ठतु यशो मा उत्तिष्ठतु त्वित्युत्थायेदमहं द्विषतं भ्रातृव्यपाप्मानमलक्ष्मीं चापधुनोमीति वस्त्रान्तमवधूयायप्राच इति सूक्तमिन्द्रश्च मृळयाति न इति द्वे, यत इन्द्र भयामह इत्येका, शास इत्था महा असीति प्राचीं स्वस्तिदा इति दक्षिणां दक्षिणावृतो विरक्ष इति प्रतीचीं विन इन्द्रेत्युदीचीं सध्यावृतोपेन्द्रेति दक्षिणावृतो दिवमुदीक्षन्ते ॥ ५ ॥

सविता पश्चात्तात्तच्चक्षुरित्यादित्यमुपस्थाय व्यावर्त्तमानाश्च प्रत्यायन्त्युपविशन्ति यथापः शान्ता इति शान्तिपात्रादप आदाय पृथिव्यामवनिनीय यथापृथिवीत्यस्माभिकर्षत्येवं मयि शाम्यत्विति दक्षिणेऽशे निलिम्पत्येवं द्वितीयमेवं तृतीयं काण्डात्सम्भवसि काण्डात्काण्डात् प्ररोहसि शिवा नः शाले भवेति दूर्वाकाण्डमादाय मूर्द्धनि कृत्वाऽग्निस्तृप्यतु वायुस्तृप्यतु सूर्यस्तृप्यतु विष्णुस्तृप्यतु प्रजापतिस्तृप्यतु विरूपाक्षस्तृप्यतु सहस्राक्षस्तृप्यतु सर्वभूतानि तृप्यन्त्विति सुमन्तुजैमिनिवैशम्पायनपैलाद्या आचार्या पितृन्प्रत्यात्मिका समुद्रं इत्यपो निनीय वामदेव्यं जपित्वा यथाकामं विप्रतिष्ठन्ते यथागमप्रज्ञाश्रुतिस्मृतिविभवादक्रान्तमानादविवादप्रतिष्ठादभयं शंभवेन्नो अस्तु नमोऽस्तु देवऋषिपितृमनुष्येभ्यः शिवमायुर्वपुरनामयं शान्तिमरिष्टिमक्षितिमोजस्तेजो यशो

Digitized by Google

बलं ब्रह्मवर्चसं कीर्तिमायुः प्रजां पशूनमो नमस्कृता वर्द्धयन्तु दुष्टु-तादुरूपयुक्तान्यूनाधिकाच्च सर्वस्मा स्वस्ति देवऋषिभ्यश्च ब्रह्म सत्यं च पातु मामिति ब्रह्म सत्यं च पातु मामिति ॥ ६ ॥

इति शाङ्खायनशाखायाः कौषीतकिगृह्यसूत्रे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

समाप्तोऽयं ग्रन्थः ॥ इदमेव कौशिकसूत्रम् ॥



Digitized by Google

124-128 not acc'd

THE NEW YORK PUBLIC LIBRARY

ASTOR, LENOX AND TILDEN FOUNDATIONS

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 134.

पण्डितवरश्रीवामनविरचितसवृत्ति-

काव्यालंकारसूत्राणि ।

श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितकाव्यालंकार-कामधेनुसमाख्यव्याख्यासहितानि ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा रत्नगोपालभट्टेन संशोधितानि ।

KÂVYÂLAṄKÂRA SÛTRAS with GLOSS

By PANDIT VÂMANA

And a Commentary

Called KÂVYÂLAṄKÂRA KÂMADHENU

By ŚRÎ GOPENDRA TRIPURAHARA BHÛPÂLA,

EDITED BY RATNA GOPÂL BHATTA.

Fasciculus I.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya Vilas Press,

BENARES.

1907.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

OKA

Digitized by Google

सूचीपत्रम् ।

	रु०	आ०	पा०
गजपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
ज्ञातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -)	०	२	०
धातुरूपावली	०	२	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (डाइप)	७	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	१	०
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	२	८	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	८	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

Digitized by Google

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संप्राह्या तैस्तदेकैकस्य खण्डस्य कृते ॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्ग्राहकमहाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	अ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं खं०	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३ । द्वितीयभागः तृतीयकाण्डम् हेलाराजटीकासहित खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

Digitized by Google

तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८ ८ ०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ ३ ०
दुपटीका खण्डानि ४ ४ ०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०
व्याकरण मिताक्षरा। श्रीमदजंभट्टप्रणीता खण्डानि १० १० ०
रसमञ्जरी। व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम ०
पराक्रमसहितः खण्डे २ २ ०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० १० ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्विरचिता खण्डे २ २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ ३ ०
श्रीमद्भाष्यम्। श्रीश्रीवल्लभाचार्यविरचितम्।
श्रीस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-
व्याख्या समेतम् खण्डानि १५ १५ ०
तत्त्वशेखरः। श्रीभगवल्लोकाचार्यप्रणीतः। तथा—तत्त्वत्रयक्षुल्लक-
संग्रहः। कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः। १ ०
श्रीभाष्यवार्तिकम्। श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-
तिपादनपरम्। यतीन्द्रमतदीपिका च। श्रीगोविन्दाचार्यसूनु-
श्रीनिवासाचार्यकृता। सकलाचार्यमतसंग्रहश्च। खण्डे २ २ ०
गूढार्थदीपिका। श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-
व्याख्या। १ ०
आश्वलायनसूत्रप्रयोगदर्पणिका। श्रीविट्ठलरमंचनाचार्यभट्ट-
विरचिता। १ ०
काव्यालंकारसूत्राणि। पण्डितवरवामनविरचितवृत्तिसमेतानि।
कामधेनुसमाख्यव्याख्यासहितानि। १ ०

ब्रजभूषण दास और कम्पनी
चांदनीचौक के उत्तर नई सड़क बनारस सिटी

Digitized by Google

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, Ph. D.
No 140.

पण्डितवरश्रीवामनविरचितसवृत्ति-
काव्यालंकारसूत्राणि ।

श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितकाव्यालंकार-कामधेनुसमाख्यव्याख्यासहितानि ।

श्रीमदाचार्य श्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितानि ।

KÂVYÂLAṄKÂRA SÛTRAS with GLOSS
By Pandit Vâmana
And a Commentary
Called KÂVYÂLAṄKÂR KÂMADHENU
By Śrî Gopendra Tripurahara Bhûpâla,
Edited by Ratna Gopâl Bhatta.

Fasciculus II.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,
Benares.
1908.

Digitized by Google

सूचीपत्रम् ।

	रु०	आ०	पा
गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -)	०	२	०
धातुरूपावली	०	१	६
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	७	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	०	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्गवचचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	२	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	८	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	१	०	०

Digitized by Google

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख०६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

Digitized by Google

प्रादुर्भावाच्च वाते च शर्कराकर्षणि यावत्कालम् ॥ १ ॥

ऊर्द्धमापाढ्याश्चतुरो मासान्नाधीयीतात्यन्तं शक्य इति नियमाः प्राग्ज्योतिषमपराजितायां दिशि पुण्यमुपगम्य देशमनुदित उदग्ग्रहणं मण्डलप्रवेशश्चाञ्जनगन्धिमित्येतयर्चा मण्डलं तु प्राग्द्वारमुदग्द्वारं वा जनाग्रीयमसम्प्रमाणमसंबाधमावामदेव्यमुत्तरशान्तिः । पुनः प्राध्येषणं च मण्डलस्थाभिराचम्य प्राधीयीरन् कृतशान्तयः शान्तिपात्रोपघाते प्रोक्षणं प्रायश्चित्तिः प्रोक्षणं तु हिरण्यवता पाणिना दर्भपिञ्जूलवता वेति भाषिकम् ॥ २ ॥

अथ प्रविश्य मण्डलं प्राङ्मुख आचार्य उपविशत्युदङ्मुखा दक्षिणत इतरे यथाप्रधानमसम्भेत्तसर्वतोमुखा प्रतीक्षेरन्नुदयमादित्यस्य विज्ञाय चैनं दीधितिमन्तमधीहि भो३ इति दक्षिणैर्दक्षिणं सव्यैः सव्यं दक्षिणोत्तरैः पाणिभिरुपसंगृह्य पादावाचार्यस्य निर्णिक्तावथाधाय शान्तिपात्रे दूर्वाकाण्डवतीष्वप्स्वपिन्वमानैः पाणिभिः प्राधीयीरन्नेष विधिर्यदि तु ग्लायेरन्नेक एषामशून्यं शान्तिभाजनं कुर्यादध्यायाद्यन्तयोश्च सर्वे तत्सन्ततमव्यवच्छिन्नं भवत्यशान्तिरोंकारो महाव्याहृतयः सावित्री रथन्तरं बृहद्रामदेव्यं पुनरादायं ककुप्कारमिति बृहद्रथन्तरे दशैताः सम्पादिता भवन्ति दशदशिनीविराळित्येतद्ब्राह्मणम् ॥ ३ ॥

अदब्धं मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीरिति सवितारमीक्षन्ते युवं सुराममिसेका स्वस्ति नः पथ्यास्वस्ति च तिस्र इति च तस्य शकरीणां तु पूर्वं प्रत्यस्मै पिपीषते योरपिबोरयितमस्त्यमुवो अप्रहणमिति त्रयस्तृचा, अस्मा अस्मा इदन्धस इति एकाग्निसि वीरयुरित्यभितशकरीणामथोपनिषदां यैवं महाव्रतस्य संहितानां तु पूर्वम् । ऋतं वदिष्यामि सत्यं वदिष्यामीति

Digitized by Google

विशेषोऽथ मन्थस्य तत्सवितुर्वृणीमहे तत्सवितुर्वरेण्यमिति पूर्वे चाऽदब्धं मन इत्याधिकारिका शान्तयस्तत इत्याह्निकमथोत्थानकालेऽपकृष्य पापं नित्यां शान्ति कृत्वादितः शुक्रियं दधत इत्यादित्यमीक्षन्ते ॥ ४ ॥

तमहमात्मनीत्यात्मानमभिनिहितं त्रिर्हितमुपमा श्रीर्जुषतामुपयशोऽनुमा श्रीर्जुषतामनुयशः सेन्द्रः सगणः सबलः सयशाः सवीर्य उत्तिष्ठानित्यनिष्ठतु श्रीर्मा उत्तिष्ठतु यशो मा उत्तिष्ठतु त्वित्युत्थायेदमहं द्विषतं भ्रातृव्यपाप्मानमलक्ष्मीं चापधुनोमीति वस्त्रान्तमवधूयायप्राच इति सूक्तमिन्द्रश्च मृळयाति न इति द्वे, यत इन्द्र भयामह इत्येका, शास इत्था महा असीति प्राचीं स्वस्तिदा इति दक्षिणां दक्षिणावृतो विरक्ष इति प्रतीचीं विन इन्द्रेत्युदीचीं सध्यावृतोपेन्द्रेति दक्षिणावृतो दिवमुदीक्षन्ते ॥ ५ ॥

सविता पश्चात्तात्त्वक्षुरित्यादित्यमुपस्थाय व्यावर्त्तमानाश्च प्रत्यायन्त्युपविशन्ति यथापः शान्ता इति शान्तिपात्रादप आदाय पृथिव्यामवनिनीय यथापृथिवीत्यस्माभिकर्षत्येवं मयि शाम्यत्विति दक्षिणेऽशे निलिम्पत्येवं द्वितीयमेवं तृतीयं काण्डात्सम्भवसि काण्डात्काण्डात् प्ररोहसि शिवा नः शाले भवेति दूर्वाकाण्डमादाय मूर्द्धनि कृत्वाऽग्निस्तृप्यतु वायुस्तृप्यतु सूर्यस्तृप्यतु विष्णुस्तृप्यतु प्रजापतिस्तृप्यतु विरूपाक्षस्तृप्यतु सहस्राक्षस्तृप्यतु सर्वभूतानि तृप्यन्त्विति सुमन्तुजैमिनिवैशम्पायनपैलाद्या आचार्या पितृन्प्रत्यात्मिका समुद्र इत्यपो निनीय वामदेव्यं जपित्वा यथाकामं विप्रतिष्ठन्ते यथागमप्रज्ञाश्रुतिस्मृतिविभवादक्रान्तमानादविवादप्रतिष्ठादभयं शंभवेन्नो अस्तु नमोऽस्तु देवऋषिपितृमनुष्येभ्यः शिवमायुर्वपुरनामयं शान्तिमरिष्टिमाक्षितिमोजस्तेजो यशो

Digitized by Google

बलं ब्रह्मवर्चसं कीर्तिमायुः प्रजां पशूनमो नमस्कृता वर्द्धयन्तु दुष्टु-तादुरूपयुक्तान्यूनाधिकाच्च सर्वस्मा स्वस्ति देवऋषिभ्यश्च ब्रह्म सत्यं च पातु मामिति ब्रह्म सत्यं च पातु मामिति ॥ ६ ॥

इति शाङ्खायनशाखायाः कौषीतकिगृह्यसूत्रे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

समाप्तोऽयं ग्रन्थः ॥ इदमेव कौशिकसूत्रम् ॥



Digitized by Google

124-198 not acc'd
THE NEW YORK PUBLIC LIBRARY
ASTOR, LENOX AND TILDEN FOUNDATIONS

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, Ph. D.

No. 134.

पण्डितवरश्रीवामनविरचितसवृत्ति-

काव्यालंकारसूत्राणि ।

श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितकाव्यालंकार-
कामधेनुसमाख्यव्याख्यासहितानि ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितानि ।

KÂVYÂLAṄKÂRA SÛTRAS with GLOSS

BY PANDIT VÂMANA

And a Commentary

Called KÂVYÂLAṄKÂRA KÂMADHENU

By Śrî GOPENDRA TRIPURAHARA BHÛPÂLA,

EDITED BY RATNA GOPÂL BHATTA.

Fasciculus I.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya Vilas Press,

BENARES.

1907.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

CHR

OKA

Digitized by Google

सूचीपत्रम् ।

	रु०	आ०	पा०
गजपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
घातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -)	०	२	०
धातुरूपावली	०	२	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	७	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	१	०
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	२	८	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	८	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

Digitized by Google

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	अं०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं खं०	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

Digitized by Google

तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८ ८ ०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ ३ ०
टुप्टीका खण्डानि ४ ४ ०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०
व्याकरण मिताक्षरा । श्रीमदजंभट्टप्रणीता खण्डानि १० १० ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम ०
पराक्रमसहितः खण्डे २ २ ०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० १० ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्विरचिता खण्डे २ २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ ३ ०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् ।
श्रीस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-
व्याख्या समेतम् खण्डानि १५ १५ ०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा—तत्त्वत्रयचुलुक-
संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । १ ०
श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-
तिपादनपरम् । यतीन्द्रमतदीपिका च । श्रीगोविन्दाचार्यसूनु-
श्रीनिवासाचार्यकृता । सकलाचार्यमतसंग्रहश्च । खण्डे २ २ ०
गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-
व्याख्या । १ ०
आश्वलायनश्रौतप्रयोगदर्शिका । श्रीविट्ठलरमंचनाचार्यभंट्ट-
विरचिता । १ ०
काव्यालंकारसूत्राणि । पण्डितवरवामनविरचितवृत्तिसमेतानि ।
कामधेनुसमाख्यव्याख्यासहितानि । १ ०

ब्रजभूषण दास और कम्पनी
चांदनीचौक के उत्तर नई सड़क बनारस सिटी

Digitized by Google

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, Ph. D.
No 140.

पण्डितवरश्रीवामनविरचितसवृत्ति-
काव्यालंकारसूत्राणि ।

श्रीगोपेन्द्रत्रिपुरहरभूपालविरचितकाव्यालंकार-कामधेनुसमाख्यव्याख्यासहितानि ।

श्रीमदाचार्य श्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा रत्नगोपालभट्टेन संशोधितानि ।

KÂVYÂLAṄKÂRA SÛTRAS with GLOSS
By Pandit Vâmana
And a Commentary
Called Kâvyâlankâr Kâmadhenu
By Śrî Gopendra Tripurahara Bhûpâla,
Edited by Ratna Gopâl Bhatta.

Fasciculus II.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,
Benares.
1908.

Digitized by Google

सूचीपत्रम् ।

	रु०	आ०	पा
गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -)	०	२	०
धातुरूपावली	०	१	६
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	७	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	०	९
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ग यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	२	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	८	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	१	०	०

Digitized by Google

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख०६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्डानि ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

Digitized by Google

तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८ ८ ०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ ३ ०
टुप्टीका खण्डानि ४ ४ ०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०
व्याकरण मिताक्षरा । श्रीमदभंभट्टप्रणीता खण्डानि १० १० ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम
पराक्रमसहितः खण्डे २ २ ०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० १० ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्विरचिता खण्डे २ २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ ३ ०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् ।
गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-
व्याख्या समेतम् खण्डानि १५ १५ ०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा–तत्त्वत्रयचुलुक-
संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । १ ०
श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-
तिपादनपरम् । यतीन्द्रमतदीपिका च । श्रीगोविन्दाचार्यसूनु-
श्रीनिवासाचार्यकृता । सकलाचार्यमतसंग्रहश्च । खण्डे २ २ ०
गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-
व्याख्या । १ ०
आश्वलायनसूत्रप्रयोगद्योपिका । श्रीविट्ठलरमंचनाचार्यभट्ट-
विरचिता खण्डे २ । २ ०
काव्यालंकारसूत्राणि । पण्डितवरवामनविरचितवृत्तिसमेतानि
कामधेनुसमाख्यव्याख्यासहितानि खण्डे २ । २ ०
श्रुत्यन्तसुरद्रुमेः । श्रीपुरुषोत्तमप्रसादविरचितः खण्डे २ । २ ०
चतुर्विंशतिमतसंग्रहः । श्रीभट्टोजिदीक्षितसंकलितः खण्डे २ । २ ०

ब्रजभूषण दास और कम्पनी
चांदनीचौक के उत्तर ओर सड़क बनारस सिटी।

Digitized by Google

(Mss. 145-147 - not accd 2.1)

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

G. THIBAUT, Ph. D.

No. 145.

THE NEW YORK PUBLIC LIBRARY
ASTOR, LENOX AND TILDEN FOUNDATIONS.

साङ्ख्यायनगृह्यसङ्ग्रहः ।

कौसुंवरवास्तव्यपाण्डितवरवासुदेवविरचितः ।

काव्यतीर्थ-न्यायोपाध्यायपदवीमता

श्रीसोमनाथोपाध्यायेन संशोधितः ।

कौषीतकिगृह्यसूत्राणि च ।

रत्नगोपालभट्टेन संशोधितानि ।

SÂNKHYÂYANAGRIHYA SANGRAHA,

By Pandita Vasudeva;

EDITED BY

Somanâthopâdhyâya-Nyâyopâdhyâya and Kâvyatîrtha;

And KAUSHÎTAKI GRIHYASÛTRAS,

Edited by Ratna Gopâla Bhatta.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press

By Harikrishna Dasa.

Benares.

1908.

Registered under Act XXV. of 1867. (All rights reserved.)

Digitized by Google

तत्त्वदीपनम । पञ्चपादिकाविवरणस्य व्याख्यानम्) खं० ८ ८ ०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३ ३ ०
टुप्टीका खण्डानि ४ ४ ०
पातञ्जलदर्शनम्श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०
व्याकरण मिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि १० १० ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम
पराक्रमसहितः खण्डे २ २ ०
बोधसारोनरहरिकृतः तच्छिष्यदिवाकरकृतटीकयास०ख० १० ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्विरचिता खण्डे २ २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डानि ३ ३ ०
श्रीमदणुभाष्यम । श्रीश्रीवल्लभाचार्यविरचितम् ।
गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य
व्याख्या समेतम् खण्डानि १५ १५ ०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा-तत्त्वत्रयचुलुक
संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । १ ०
श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-
तिपादनपरम् । यतीन्द्रमतदीपिका च । श्रीगोविन्दाचार्यसूनु-
श्रीनिवासाचार्यकृता । सकलाचार्यमतसंग्रहश्च । खण्डे २ २ ०
गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-
व्याख्या खण्डे २ २ ०
आश्वलायनसूत्रप्रयोगदीपिका । श्रीविद्वद्वरमंचनाचार्यभट्ट-
विरचिता खण्डे २ । २ ०
काव्यालंकारसूत्राणि । पण्डितवरवामनविरचितवृत्तिसमेतानि
कामधेनुसमाख्यव्याख्यासहितानि खण्डे २ । २ ०
श्रुत्यन्तसुरद्रुमेः । श्रीपुरुषोत्तमप्रसादविरचितः खण्डानि ३ ३ ०
चतुर्विंशतिमतसंग्रहः । श्रीभट्टोजिदीक्षितसंकलितः खण्डे २ २ ०
श्रीविद्वन्मण्डनम् श्रीविट्ठलनाथदीक्षित विरचितम् । गोस्वामि श्री-
पुरुषोतमजीमहाराजविरचित सुवर्णसूत्राख्यव्याख्यासहितम् २ ०
साख्यायनगृह्यसङ्ग्रहः । कौसुवरवास्तव्यपण्डितवरवासुदेव
विरचितः । १ १ ०

ब्रजभूषण दास और कम्पनी
बनारससंस्कृत सीरीज़कार्यालय
बनारस सिटी ।

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google